वेदनिधि ग्रन्थमाला. ..401DV

# अथर्ववेदीय

# शौनक संहिता

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

## अवधूत दत्तपीठम्

श्रीगणपति सच्चिदानन्द आश्रमः, दत्त नगरम्

मैसूरु 570025

वेदनिधि ग्रन्थमाला – 401DV

अथर्ववेदीय शौनक संहिता

May 2017

Editor

Dr.Vamshi Krishna Ghanapaathi

Printed by

Ma Prints, Bengaluru

Published by

SVAMI (SGS VedaNidhi Academy & Masters' Institute)

Avadhoota Datta Peetham

Sri Ganapathy Sachchidananda Ashrama

Datta Nagara, Ooty Road, Mysore 570025 India

Email - veda@dattapeetham.com

Website - www.vedanidhi.in/books

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore • SGS



अवधूत दत्तपीठाधीश्वराणां जगद्गुरूणां

परमपूज्यानां

**श्री श्री श्री गणपति सच्चिदानन्द स्वामिश्रीचरणानां**

# आविष्कार वचांसि

।। नमो ब्रह्मणे धारणं मे अस्त्वनिराकरणम् ।।

महतां सज्जनानां सम्पत्तिः - ऋचः, यजूंषि, सामानि, तद्विनियोजकानि प्रख्यापकानि ब्राह्मणवाक्यानि - इति श्रुतिः ब्रवीति। तथाविध सम्पत्तिमन्तः नैके महान्तः श्रोत्रियाः ब्रह्मनिष्ठागरिष्ठाः शब्दब्रह्मोपासनधुरीणाः वर्षेऽस्मिन् भारते राराजन्ते स्म। ऋषिकल्पानां तादृशां महतां परम्परा अद्यापि प्रकर्षेण वर्तते, यस्याः परिपोषणाय छात्राणामधीतिः निदानमास्ते। तदधीत्यै उपकुर्वन्ति महान्ति उपकरणानि बहूनि वर्तन्ते, यदन्यतमं पुस्तकजातम् - इति सम्प्रति वैदिकलोकः गाढं विश्वसिति।।

आचार्योपदिष्टानि वेदवाक्यानि समामनन्तः छात्राः, स्वेषामध्ययनाय मुद्रितग्रन्थानेव सर्वधा आद्रियन्ते। अतः गुरुणा उपदिष्टान्, उपदेष्टव्यान्, विकार- लोप- आगम- आदेशात्मकान् विषयान् सङ्कलय्य मुद्रापितो वेदग्रन्थः, नितरां छात्रोपकाराय कल्पते। तथा च मन्त्रसम्बन्धि ऋषि-च्छन्दो-दैवत-विनियोग-प्रकरणादिकं तत्तद्देशेषु निविष्टं सत्, पाठकेषु सुकृतं सम्पादयेत्।

एवंविधग्रन्थसहायेन अध्ययनसम्पत्त्या समासादितयशसः संसाधितपरमेश्वरानुग्रहाः भूयासुरिति सङ्कल्पः दत्तगुरोरनुग्रहेण पूर्वं समजनि। तदीयमहितकृपावशेन, सद्यः अस्माकं दत्तपीठस्य वेदनिधिबृन्दः पूर्वोदित-बह्वंश-कलितं वेदग्रन्थसमुदायं प्रकाशयतीति महान्तमानन्दमनुबोभूयामहे।

तदस्य ग्रन्थजातस्य पठनेन, अधीयाना अपि भूयिष्ठानन्दभाजस्सन्तः, शब्दब्रह्मोपासनधुरं ससुखं वहन्तः श्रेयसे पारयेयुरिति श्रीदत्त सद्गुरुं प्रार्थयामहे।

प्रायेण संवत्सराष्टकात् सञ्चलतः वेदग्रन्थप्रकाशनस्य आविष्कृतिरूपा समुद्गतिः महत्यस्मिन् वज्रोत्सवे विधीयत इति विषयं, दत्तगुरोः समधिकवरिवस्याफलत्वेन सम्भावयामः। महतोऽस्मात् वज्रोत्सवादारभ्य वैदिकलोकः निरायासं निश्शुल्कं ग्रन्थजातमिदं (अन्तर्जालात्) वेदनिधि निवेशनात् (वॆब्सैट् द्वारा) प्राप्नुवन्तु - इति श्रीदत्तस्मरणपूर्वकं समाशास्महे।

शेवधिर्यः पुमर्थानां षडध्वातीत विग्रहः।

राद्धान्तो निगमार्थानां प्रसद्यात् दत्तसद्गुरुः।।

# विज्ञापनम्

**विद्वान् वंशीकृष्ण घनपाठी**

निर्देशकः - वेदनिधि प्रकाशनम्

**तद्विश्वमुप जीवति।**

यददो ब्रह्म- विश्वस्य अधिष्ठानत्वेन परस्सहस्त्रैः श्रौत स्मार्त पौराणिक वाक्य प्रमाणैः सङ्कीर्तितं- तदिदं विश्वं सञ्जीवयति, तदाधारेण विश्वमिदं उपजीवतीति भारतीयेषु सम्प्रदायसिद्धं सत्यम्। विश्वसिसृक्षोः अभितप्ताद्ब्रह्मणः- त्रयो लोकाः, त्रयो वेदाः, गायत्र्यास्त्रयः पादाः, तिस्रो व्याहृतयो जज्ञिर इति मन्त्रेभ्यः, तदुपबृंहक ब्राह्मणवाक्येभ्यश्च अवगम्यते।

तदासु वेदवाक्यराजीषु भगवता पिप्पलादेन दृष्टाः मन्त्राः, महता भृग्वङ्गिरोगणेन परिदृष्टामन्त्राः ब्रह्मवेदरूपेण प्रसिद्धिं गताः। अधुना उपलभ्यमान वेदशाखयोः शौनकशाखा प्रचुरतरा स्वरसहिता द्विजैरधीयते। परन्तु पैप्पलाद संहितायास्तावत् स्वरो लुप्तो दृश्यते। ऋङ्मन्त्रैः यजुर्निभैश्च मन्त्रैः पठ्यमानोऽयं वेदः संहिता ब्राह्मणरूपेण विराजते।

प्रकृतः शौनक संहिता ग्रन्थः 20 काण्डेषु, 36 प्रपाठकेषु वा सुभक्तस्सन्नधुना अध्याप्यते। बहुशः यज्ञकर्मप्रतिष्ठापनाय, दोपागमनाय च ब्रह्मणा ऋत्विजा प्रयुज्यमानाः मन्त्राः सङ्कलिता दृश्यन्ते ग्रन्थेऽस्मिन्। इत्थम्भूतः परकृतपीडानिवारकः आत्मरक्षाहेतुकः संहिताग्रन्थः, बहुभिः धार्मिकैः बहुवारं मुद्रितोऽपि तत्तत्कालिकच्छात्र पठितृवर्ग प्रयोजनाय, पौनःपुन्येन बहुधा प्राकाश्यं नीयत इति मोदस्य महत आस्पदं भवति।

सम्प्रति पाठकोपकाराय श्रीमदवधूत दत्तपीठाधीश्वराणां श्री **श्री गणपति सच्चिदानन्द स्वामि** श्रीचरणानां दिव्याशीर्मञ्जूषया, दत्तपीठस्य विद्वांसः नैकान् वर्षानधीत्य ग्रन्थमेनं प्रकाशयन्तीति, तेषु गुरुकृपा वृष्टिर्नूनं भूयोभूयो भवेदिति समाशासाना निवेदयामः। तथा च वेदनिधि.ग्रन्थमालायां बहवो वैदिका ग्रन्थाः देशभाषासु मुद्राप्यन्त इति, तत्तत्सम्पादका विपश्चितो वेदविद्व.दुपकारैकपथिकाः वेदपुरुषस्वरूपं सद्गुरुवर्यं सेवमाना इति, तेषु सर्वेषु- आदिगुरो.र्दत्तात्रेयस्य वात्सल्य.दृक्पातो निरन्तरं संपद्यतामिति च प्रार्थयन्तो विरमामः।

।।समानी व आकूति स्समाना हृदयानि वः।।

******

# अस्मिन् प्रकाशने प्रयुक्तानि चिह्नानि

आदौ अष्टक - अध्याय संख्या (यथा - प्रथमाष्टके प्रथमाध्यायः)

वेदः - स्तरः1, शाखा - स्तरः 2, ग्रन्थः - स्तरः 3

 υ अष्टक/ काण्ड प्रारम्भः (स्तरः 4)

﷽ अध्याय/ प्रपाठक प्रारम्भः (स्तरः 5)

सूक्त/ अनुवाक प्रारम्भः (स्तरः 6)

❀ वर्गः/ पञ्चाशत्/ दशतिः (स्तरः 7)

卐 मन्त्र/ ब्राह्मण वाक्य समूहः (स्तरः 8)

✡ परिशिष्टम् | ꣶ गणान्तः (ऋग्वेदे)

। वाक्यावसानः | ।। (ऋक्/ यजुः/ साम मन्त्र) वाक्यसमूहावसानः

‡ मन्द्रस्थायिना वक्तव्यम् अथवा इतः प्राक् पाठं नावसादयेत्।

ऽऽ आकार प्रश्लेषः, ऽअकार प्रश्लेषः

ᳲ उपध्मानीय/जिह्वामूलीये

अनुदात्तः (यथा – अ॒ग्निमी॑ळे), स्वरितः (यथा - पव॑स्व सोम),

अध्यर्ध स्वरितः (य॒ज्ञेषु॒ वर्धते), दीर्घ स्वरितः (सोमो॒ धेनुम्)

ᳵ अनुस्वार आगमः (देवाᳵ एह)

^ विसर्जनीय स्थलानि (यथा शि॒वा^ नᳲ प्र॒दिशः)

अयावाद्यादेश स्थलम्, उच्चारणे धारणे वा विशिष्टं स्थलम्,

ँ सानुनासिक यकार/वकार/ लकार विशिष्टः (अर्धानुस्वारः) (यँ वयम्, त्र्यम्बकँ यजामहे)

ं अनुस्वारः

द्विमात्रादि कालोच्चारण संकेतः '2', '3', '4'

क्लिष्टा दशतिः☞, मन्त्रविशेषाः ✍,

विकार सूचनम् - ¤ (त्रि¤षप्ताः, वि¤ष्यतम्, ¤दूळभम्)

# अथर्ववेदीय शौनक संहितागन्थस्य विषयसूचिका


आविष्कार वचांसि....................2

विज्ञापनम्....................3

अस्मिन् प्रकाशने प्रयुक्तानि चिह्नानि....................3

अथर्ववेदीय शौनक संहितागन्थस्य विषयसूचिका ........ 4

ʋ प्रथमकाण्डम् ........ 13

ड़ प्रथम काण्डे प्रथमोऽनुवाकः ........ 13

ड़ प्रथम काण्डे द्वितीयोऽनुवाकः ........ 18

ड़ प्रथम काण्डे तृतीयोऽनुवाकः ........ 23

ड़ प्रथम काण्डे चतुर्थोऽनुवाकः ........ 27

ड़ प्रथम काण्डे पञ्चमोऽनुवाकः ........ 30

ड़ प्रथम काण्डे षष्ठोऽनुवाकः ........ 36

ʋ द्वितीयं काण्डम् ........ 43

ड़ द्वितीय काण्डे प्रथमोऽनुवाकः ........ 43

ड़ द्वितीय काण्डे द्वितीयोऽनुवाकः ........ 48

ड़ द्वितीय काण्डे तृतीयोऽनुवाकः ........ 55

ड़ द्वितीय काण्डे चतुर्थोऽनुवाकः ........ 62

ड़ द्वितीय काण्डे पञ्चमोऽनुवाकः ........ 70

ड़ द्वितीय काण्डे षष्ठोऽनुवाकः ........ 75

ʋ तृतीयं काण्डम् ........ 81

ड़ तृतीये काण्डे प्रथमोऽनुवाकः ........ 81

ड़ तृतीये काण्डे द्वितीयोऽनुवाकः ........ 86

ड़ तृतीये काण्डे तृतीयोऽनुवाकः ........ 92

ड़ तृतीये काण्डे चतुर्थोऽनुवाकः ........ 98

ड़ तृतीये काण्डे पञ्चमोऽनुवाकः ........ 104

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore • SGS

तृतीये काण्डे षष्ठोऽनुवाकः ........ 109

चतुर्थङ्काण्डम् ........ 118

चतुर्थ काण्डे प्रथमोऽनुवाकः ........ 118

चतुर्थ काण्डे द्वितीयोऽनुवाकः ........ 123

चतुर्थ काण्डे तृतीयोऽनुवाकः ........ 129

चतुर्थ काण्डे चतुर्थोऽनुवाकः ........ 137

चतुर्थकाण्डे पञ्चमोऽनुवाकः ........ 143

चतुर्थ काण्डे षष्ठोऽनुवाकः ........ 148

चतुर्थ काण्डे सप्तमोऽनुवाकः ........ 153

चतुर्थ काण्डे अष्टमोऽनुवाकः ........ 159

पञ्चमङ्काण्डम् ........ 167

पञ्चम काण्डे प्रथमोऽनुवाकः ........ 167

पञ्चम काण्डे द्वितीयोऽनुवाकः ........ 175

पञ्चम काण्डे तृतीयोऽनुवाकः ........ 183

पञ्चम काण्डे चतुर्थोऽनुवाकः ........ 191

पञ्चम काण्डे पञ्चमोऽनुवाकः ........ 203

पञ्चम काण्डे षष्ठोऽनुवाकः ........ 214

षष्ठङ्काण्डम् ........ 225

षष्ठ काण्डे प्रथमोऽनुवाकः ........ 225

षष्ठ काण्डे द्वितीयोऽनुवाकः ........ 230

षष्ठ काण्डे तृतीयोऽनुवाकः ........ 235

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

षष्ठ काण्डे चतुर्थोऽनुवाकः ........ 242

षष्ठ काण्डे पञ्चमोऽनुवाकः ........ 248

षष्ठ काण्डे षष्ठोऽनुवाकः ........ 253

षष्ठ काण्डे सप्तमोऽनुवाकः ........ 257

षष्ठ काण्डे अष्टमोऽनुवाकः ........ 262

षष्ठ काण्डे नवमोऽनुवाकः ........ 268

षष्ठ काण्डे दशमोऽनुवाकः ........ 272

षष्ठ काण्डे एकादशोऽनुवाकः ........ 277

षष्ठ काण्डे द्वादशोऽनुवाकः ........ 283

षष्ठ काण्डे त्रयोदशोऽनुवाकः ........ 288

सप्तमङ्काण्डम् ........ 298

सप्तम काण्डे प्रथमोऽनुवाकः ........ 298

सप्तम काण्डे द्वितीयोऽनुवाकः ........ 302

सप्तम काण्डे तृतीयोऽनुवाकः ........ 306

सप्तम काण्डे चतुर्थोऽनुवाकः ........ 311

सप्तमकाण्डे पञ्चमोऽनुवाकः ........ 316

सप्तम काण्डे षष्ठोऽनुवाकः ........ 320

सप्तम काण्डे सप्तमोऽनुवाकः ........ 326

सप्तम काण्डे अष्टमोऽनुवाकः ........ 331

सप्तम काण्डे नवमोऽनुवाकः ........ 334

सप्तम काण्डे दशमोऽनुवाकः ........ 338


Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

ʊअष्टमं काण्डम् (1-5)....................................343
ऽ୦ऽ अष्टम काण्डे प्रथमोऽनुवाकः....................................343
ऽ୦ऽ अष्टम काण्डे द्वितीयोऽनुवाकः....................................350
ऽ୦ऽ अष्टम काण्डे तृतीयोऽनुवाकः....................................357
ऽ୦ऽ अष्टम काण्डे चतुर्थोऽनुवाकः....................................363
ऽ୦ऽ अष्टम काण्डे पञ्चमोऽनुवाकः....................................371
ʊनवमं काण्डम्....................................381
ऽ୦ऽ नवम काण्डे प्रथमोऽनुवाकः....................................381
ऽ୦ऽ नवम काण्डे द्वितीयोऽनुवाकः....................................388
ऽ୦ऽ नवम काण्डे तृतीयोऽनुवाकः....................................395
ऽ୦ऽ नवम काण्डे चतुर्थोऽनुवाकः....................................408
ऽ୦ऽ नवम काण्डे पञ्चमोऽनुवाकः....................................413
ʊदशमं काण्डम्....................................420
ऽ୦ऽ दशम काण्डे प्रथमोऽनुवाकः....................................420
ऽ୦ऽ दशम काण्डे द्वितीयोऽनुवाकः....................................429
ऽ୦ऽ दशम काण्डे तृतीयोऽनुवाकः....................................436
ऽ୦ऽ दशम काण्डे चतुर्थोऽनुवाकः....................................450
ऽ୦ऽ दशम काण्डे पञ्चमोऽनुवाकः....................................462
ʊएकादशं काण्डम्....................................471
ऽ୦ऽ एकादश काण्डे प्रथमोऽनुवाकः....................................471
ऽ୦ऽ एकादश काण्डे द्वितीयोऽनुवाकः....................................480

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

एकादश काण्डे तृतीयोऽनुवाकः ........................................ 492

एकादश काण्डे चतुर्थोऽनुवाकः ........................................ 499

एकादश काण्डे पञ्चमोऽनुवाकः ........................................ 507

द्वादशं काण्डम् ........................................ 514

द्वादश काण्डे प्रथमोऽनुवाकः ........................................ 514

द्वादश काण्डे द्वितीयोऽनुवाकः ........................................ 524

द्वादश काण्डे तृतीयोऽनुवाकः ........................................ 531

द्वादश काण्डे चतुर्थोऽनुवाकः ........................................ 540

द्वादश काण्डे पञ्चमोऽनुवाकः ........................................ 546

त्रयोदशं काण्डम् ........................................ 552

त्रयोदश काण्डे प्रथमोऽनुवाकः ........................................ 552

त्रयोदश काण्डे द्वितीयोऽनुवाकः ........................................ 560

त्रयोदश काण्डे तृतीयोऽनुवाकः ........................................ 566

त्रयोदश काण्डे चतुर्थोऽनुवाकः ........................................ 572

चतुर्दशं काण्डम् ........................................ 578

चतुर्दश काण्डे प्रथमोऽनुवाकः ........................................ 578

चतुर्दश काण्डे द्वितीयोऽनुवाकः ........................................ 586

पञ्चदशं काण्डम् ........................................ 596

पञ्चदश काण्डे प्रथमोऽनुवाकः ........................................ 596

पञ्चदश काण्डे द्वितीयोऽनुवाकः ........................................ 607


Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

ʊषोडशं काण्डम्.......................................................617

ﬤ षोडश काण्डे प्रथमोऽनुवाकः .......................................................617

ﬤ षोडश काण्डे द्वितीयोऽनुवाकः .......................................................620

ʊसप्तदशं काण्डम्.......................................................632

ﬤ सप्तदश काण्डे प्रथमोऽनुवाकः.......................................................632

ʊअष्टादशं काण्डम् .......................................................638

ﬤ अष्टादश काण्डे प्रथमोऽनुवाकः .......................................................638

ﬤ अष्टादश काण्डे द्वितीयोऽनुवाकः.......................................................647

ﬤ अष्टादश काण्डे तृतीयोऽनुवाकः.......................................................654

ﬤ अष्टादश काण्डे चतुर्थोऽनुवाकः.......................................................664

ʊ नवदशं काण्डम्.......................................................675

ﬤ नवदश काण्डे प्रथमोऽनुवाकः .......................................................675

ﬤ नवदश काण्डे द्वितीयोऽनुवाकः .......................................................683

ﬤ नवदश काण्डे तृतीयोऽनुवाकः .......................................................694

ﬤ नवदश काण्डे चतुर्थोऽनुवाकः.......................................................700

ﬤ नवदश काण्डे पञ्चमोऽनुवाकः.......................................................709

ﬤ नवदश काण्डे षष्ठोऽनुवाकः.......................................................720

ﬤ नवदश काण्डे सप्तमोऽनुवाकः.......................................................729

ʊविंशं काण्डम्.......................................................737

ﬤ विंश काण्डे प्रथमोऽनुवाकः .......................................................737

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

ऽ०ऽ विंश काण्डे द्वितीयोऽनुवाकः ....................................................................745
ऽ०ऽ विंश काण्डे तृतीयोऽनुवाकः ....................................................................750
ऽ०ऽ विंश काण्डे चतुर्थोऽनुवाकः ....................................................................762
ऽ०ऽ विंश काण्डे पञ्चमोऽनुवाकः ....................................................................769
ऽ०ऽ विंश काण्डे षष्ठोऽनुवाकः ....................................................................790
ऽ०ऽ विंश काण्डे सप्तमोऽनुवाकः ....................................................................798
ऽ०ऽ विंश काण्डे अष्टमोऽनुवाकः ....................................................................811
ऽ०ऽ विंश काण्डे नवमानुवाकः....................................................................821
(विंश काण्डे नवमानुवाके पूर्वार्धम्) ....................................................................821
कुन्ताप सूक्तानि )खिलभागः( ....................................................................839
(ऐतश प्रलापाः)....................................................................843
प्रवह्लिकाः ....................................................................848
प्रतिराध्याः ....................................................................849
आजिज्ञासेन्याः....................................................................849
आहनस्याः ....................................................................851
(विंश काण्डे नवमानुवाके द्वितीयार्धम्)....................................................................853

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •



आथर्वणाभिधो वेदो धवलो मर्कटाननः ।

अक्षसूत्रञ्च खद्वाङ्गं बिभ्राणोऽयं जयप्रियः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham
SGS
Mysore

# अथर्ववेदीय शौनक संहिता

# ౮ प्रथमकाण्डम्

## ऽ౮ऽ प्रथम काण्डे प्रथमोऽनुवाकः

- 01-01-01 (1-4) ये त्रिषप्ता इति चतुर्ऋचस्य सूक्तस्य अथर्वा ऋषिः। वाचस्पतिर्देवता। 1-3 प्रथमादि तृचस्याऽनुष्टुप्, 4 चतुर्थ ऋचस्य चतुष्पदा विराडुरोबृहती छन्दांसि।।) ❃मेधाजननम्।
- ✡ कां01।सू01। तत्र प्रथमम्। 1 ये त्रिषप्ता इति त्रीणि सूक्तान्यानुष्टुभान्येवाथर्वाऽपश्यत्। पूर्वं वाचस्पत्यं, द्वितीयं चान्द्रमसं पार्जन्यं, तृतीयं पर्जन्यमित्रादिबहुदेवत्यम्। पूर्वेण चतुर्ऋचेन वाचस्पतिमेवास्तौत्, वाचोऽभिवृद्ध्यै। द्वितीयेन चतुर्ऋचेनाऽमृतमयम्।

卐 ओम्।

卐ये त्रिषप्ताः परियन्ति विश्वा- रूपाणि बिभ्रतः। वाच.स्पति.र्बला तेषा.-न्तन्वो अद्य दधातु मे।। 1।।

卐 पुन.रेहि वाच.स्पते- देवेन मनसा सह। वसो.ष्पते नि रमय-मय्येवाऽस्तु मयि श्रुतम्।। 2।।

卐 इहैवाऽभि वि तनूभे~- आर्त्नी~ इव ज्यया। वाच.स्पति.र्नि यच्छतु-मय्येवाऽस्तु मयि श्रुतम्।। 3।।

卐 उपहूतो वाच.स्पति.-रुपाऽस्मा.न्वाच.स्पति.र्ह्वयताम्। सं श्रुतेन गमेमहि- मा श्रुतेन वि राधिषि।। 4।।-

➢ 01-01-02 (1-4) विद्मा शरस्येति चतुर्ऋचस्य सूक्तस्य अथर्वा ऋषिः। चन्द्रमाः पर्जन्यश्च देवता। 1, 2, 4 प्रथमा-द्वितीया-चतुर्थीना.मृचा.मनुष्टुप्, 3 तृतीयायाश्च त्रिपदा विराण्नाम गायत्री छन्दांसि।।।) ❀ रोगोपशमनम्।

✡ 1।2। 3 वृक्षँ यदिति त्रिपदा विराण्नाम गायत्री।

卐 वि॒द्मा॑ श॒रस्य॑ पि॒तरं॑- प॒र्जन्यं॑ भूरि॑धायसम्। वि॒द्मो~ ष्व॑स्य मा॒तरं॑- पृ॒थिवीं भूरि॑वर्पसम्।। 1।।

卐 ज्याके॒ परि॑ णो न॒मा-ऽश्मा॑न.न्त॒न्व॑.ङ्कृधि। वी॒डु.र्वरी॒योऽराती॒.-रप॒ द्वे॒षां.स्या कृ॑धि।। 2।।

卐 वृ॒क्षँ य.द्गाव॑ः परिषस्वजा॒ना^- अ॑नुस्फुरं श॒र.मर्च॑.न्त्यृ॒भुम्। शरु. म॒स्म॑.द्याव॑य- दि॒द्यु.मि॑न्द्र।। 3।।

卐 यथा॒ द्या.श्च॑ पृथि॒वी.श्चा-ऽ-न्त.स्तिष्ठ॑ति॒ तेज॑नम्। ए॒वा॑ रोग॑.श्चाऽऽस्रा॒व.श्चा॒-ऽन्त.स्तिष्ठ॒तु मुञ्ज॒^ इत्।। 4।।

01-01-03 (1-9 विद्मा शरस्येति नवर्चस्य सूक्तस्य अथर्वा ऋषिः। मन्त्रोक्ता.स्सर्वा देवताः (1 पर्जन्यः, 2 मित्रः, 3 वरुणः, 4 चन्द्रः)। 1-5 प्रथमादि पञ्चर्चा पथ्यापङ्क्तिः, 6 - 9 षष्ठ्यादि चतसृणाञ्चाऽनुष्टुप्- छन्दांसि।।) ❃ मूत्रमोचनम्।

✡1-3 विद्मा शरस्येति तृतीयस्य नवर्चस्याऽऽद्याः पथ्यापङ्क्तयः। तत्रैकोना निचृद् द्व्यूना विराडेकाधिका भुरिक्। द्व्यधिका स्वराडिति। सन्दिग्धे देवताऽऽदितः। (छन्दस्सूत्रम्।) इति सर्वत्र परिभाष्यते। पराश्वतस्त्रः प्रथमः प्रतीकत्वेनाऽनुष्टुभः - इत्येवं सर्वत्र वक्ष्यमाणेषु मन्त्रेषु प्रथम प्रतीकिका प्रकृतिरिति।।

卐 विद्मा शरस्य पितरं- पर्जन्यं शतवृष्ण्यम्। तेना ते तन्वे3(ए) शङ्करं- पृथिव्या.न्ते निषेचनं- बहि.ष्टे अस्तु बा.लिति।। 1।।

卐 विद्मा शरस्य पितरं- मित्रं शतवृष्ण्यम्। तेना ते तन्वे3(ए) शङ्करं- पृथिव्या.न्ते निषेचनं- बहि.ष्टे अस्तु बा.लिति।। 2।।

卐 विद्मा शरस्य पितरँ- वरुणं शतवृष्ण्यम्। तेना ते तन्वे3(ए) शङ्करं- पृथिव्या.न्ते निषेचनं- बहि.ष्टे अस्तु बा.लिति।। 3।।

卐 विद्मा शरस्य पितर.-ञ्चन्द्रं शतवृष्ण्यम्। तेना ते तन्वे3(ए) शङ्करं- पृथिव्या.न्ते निषेचनं- बहि.ष्टे अस्तु बा.लिति।। 4।।

卐 विद्मा शरस्य पितरं- सूर्यं शतवृष्ण्यम्। तेना ते तन्वे3(ए) शङ्करं- पृथिव्या.न्ते निषेचनं- बहि.ष्टे अस्तु बा.लिति।। 5।।

卐 य.दान्त्रेषु गवीन्यो.-र्यद्वस्ता.वधि संश्रितम्। एवा ते मूत्रं मुच्यतां-बहि.र्बा.लिति सर्वकम्।। 6।।

卐 प्र ते भिनद्मि मेहनं- वर्त्रं वेशन्त्या^ इव। एवा ते मूत्रं मुच्यतां-बहि.र्बा.लिति सर्वकम्।। 7।।

卐 विषित.न्ते वस्तिबिलं- समुद्रस्योदधे.रिव। एवा ते मूत्रं मुच्यतां-बहि.र्बा.लिति सर्वकम्।। 8।।

卐 यथेषुका पराऽपत.-दवसृष्टाऽधि धन्वनः। एवा ते मूत्रं मुच्यतां-बहि.र्बा.लिति सर्वकम्।। 9।।-

01-01-04 (1-4 अम्बयो यन्तीति चतुर्ऋचस्य सूक्तस्य सिन्धुद्वीपः ऋषिः। अपां नपात् सोम आपश्च देवता। 1-3 प्रथमादि तृचस्य गायत्री, 4 चतुर्थ्या ऋचश्च पुरस्ताद्बृहती छन्दः।।) ❀ अपां भेषजम्।

✡ 1।4।-1 अम्बयोयन्तीति त्रीणि सूक्ता.न्यपोनप्त्रीयाणि गायत्राणि सोमदैवतानि सिन्धुद्वीपोऽपश्यत्, अन्त्यमथर्वा। कृतिः स्वस्थानत्वेनैतैः सूक्तै.रप एवाऽस्तौत्। 4 तत्राप्स्वन्त.रिति पुरस्ताद्बृहती।।

卐 अम्बयो यन्त्यध्वभि.-र्जामयो अध्वरीयताम्। पृञ्चती.र्मधुना पयः।। 1।।

卐 अमू.र्या^ उप सूर्ये- याभि.र्वा सूर्य.स्सह। ता^ नो हिन्व.न्त्वध्वरम्।। 2।।

卐 अपो देवी.रुप ह्वये- यत्र गावः पिबन्ति नः। सिन्धुभ्यः कर्त्वं हविः।।

3।।

卐 अ.प्स्व1(अ)न्त.-रमृत.मप्सु भेषजम्। अपा.मुत प्रशस्तिभि.-रश्वा^ भवथ वाजिनो- गावो भवथ वाजिनीः।। 4।।-

01-01-05 (1-4 आपो हिष्ठेति चतुर्ऋचस्य सूक्तस्य सिन्धुद्वीपः ऋषिः। अपां नपात् सोम आपश्च देवता। गायत्री छन्दः।।) ❁ अपां भेषजम्।

卐 आपो हि ष्ठा मयोभुव.-स्ता^ न^ ऊर्जे दधातन। महे रणाय चक्षसे।।

1।।

卐 यो व.श्शिवतमो रस.-स्तस्य भाजयतेह नः। उशती.रिव मातरः।।

2।।

卐 तस्मा अर.ङ्गमाम वो- यस्य क्षयाय जिन्वथ। आपो जनयथा च नः।।

3।।

卐 ईशाना^ वार्याणा.-ङ्क्षयन्ती.श्चर्षणीनाम्। अपो याचामि भेषजम्।।

4।।-

- 01-01-06 (1-4 शन्नो देवीरिति चतुर्ऋचस्य सूक्तस्य सिन्धुद्वीपोऽथर्वा ऋषिः। अपां नपात् सोम आपोऽग्निश्च देवता। 1 – 3 प्रथमादि तृचस्य गायत्री, 4 चतुर्था ऋचश्च पथ्यापङ्क्तिश्छन्दसी।।) ❁ अपां भेषजम्।

✡ 1।6।4 शं न आप इति पथ्या पङ्क्तिः।।

卐 शन्नो देवी.रभिष्टय- आपो भवन्तु पीतये। शँ यो.रभि स्रवन्तु नः।। 1।।

卐 अप्सु मे सोमो अब्रवी.-दन्त.र्विश्वानि भेषजा। अग्नि.ञ्च विश्वशम्भुवम्।। 2।।

卐 आपः पृणीत भेषजँ- वरूथ.न्तन्वे3(ए) मम। ज्यो.क्च सूर्य.न्दृशे।। 3।।

卐 शन्न^ आपो धन्वन्या3(आ).-श्श.मु स.न्त्वनूप्याः। श.न्नः खनित्रिमा^ आप.-श्श.मु याः कुम्भ आभृता.- श्शिवा^ न.स्सन्तु वार्षिकीः।। 4।।-

## ꧁ प्रथम काण्डे द्वितीयोऽनुवाकः

- 01-02-01 (1-7 स्तुवान मग्न इति सप्तर्चस्य सूक्तस्य चातन ऋषिः। प्रथमा द्वितीययोर्ऋचोस्तृतीया पूर्वार्द्धस्य चतुर्थ्यादि चतसृणाञ्चाऽग्निः, तृतीयाया उत्तरार्धस्य चाऽग्नीन्द्रौ देवता। 1-4, 5-7 प्रथमादिचतुर्ऋचां षष्ठी सप्तम्योश्चाऽनुष्टुप, 5 पञ्चम्याश्च त्रिष्टुप् छन्दांसि।।) ❁ यातुधाननाशनम्।

✡ 1।7।1। स्तुवानम्

卐 स्तुवान.मग्न आ वह- यातुधान.न्किमीदिनम्। त्वं हि देव वन्दितो- हन्ता दस्यो.र्बभूविथ।। 1।।

卐 आज्यस्य परमेष्ठि.-ञ्जातवेद.स्तनूवशिन्न्। अग्ने तौलस्य प्राऽशान- यातुधाना.न्वि लापय।। 2।।

卐 वि लपन्तु यातुधाना॑- अत्त्रिणो ये किमीदिनः। अथेद.मग्ने नो हवि.-
रिन्द्र.श्च प्रति हर्यतम्।। 3।।

卐 अग्निः पूर्व॑ आ रभतां- प्रेन्द्रो नुदतु बाहुमान्। ब्रवीतु सर्वो यातुमा.-
नय.मस्मी.त्येत्य।। 4।।

卐 पश्याम ते वीर्य.ञ्जातवेदः- प्र णो ब्रूहि यातुधाना.न्नृचक्षः। त्वया सर्वे
परितप्ताः पुरस्ता.-त्त आ यन्तु प्रब्रुवाणा॑ उपेदम्।। 5।।

卐 आ रभस्व जातवेदो-ऽस्माकार्थाय जज्ञिषे। दूतो नो अग्ने भूत्वा-
यातुधाना.न्वि लापय।। 6।।

卐 त्व.मग्ने यातुधाना.-नुपबद्धाँ इहाऽवह। अथैषा.मिन्द्रो वज्रेणा-ऽपि
शीर्षाणि वृश्चतु।। 7।।-

- 1-02-02 (1-4 इदं हविरिति चतुर्ऋचस्य सूक्तस्य चातन ऋषिः। 1- 2 प्रथमाद्वितीययोर्ऋचो बृहस्पतिरग्नीषोमौ च, 3 - 4 तृतीया चतुर्थ्योश्चाऽग्निर्देवता। 1- 3 प्रथमादि तृचस्याऽनुष्टुप्, 4 चतुर्थ्याश्च बार्हतगर्भा त्रिष्टुप्- छन्दसी।।) ❀ यातुधाननाशनम्।

✡ 1।8।1 इदं हविरिति चैतत्सूक्तद्वयमानुष्टुभं चातनोऽपश्यत्। प्रथमेन सप्तर्चेन स्तुवानं यातुधानमग्निमाह्वयत्। ततोऽग्निः सर्वाभिर्ऋग्भिरस्तौत्। इदं हविरिति द्वाभ्यामृग्भ्यां बृहस्पतमग्नीषोमौ चा प्रार्थयत्। पराभ्यामग्निम्। 7।5 पश्यामि त इति त्रिष्टुप्। 7।3 अथेदमग्न इत्यग्निम्। इन्द्रप्रार्थना वा। 1।8। यत्रैषामग्न इति बार्हतगर्भा त्रिष्टुबिति।।5।।

卐 इदं हवि.र्यातुधाना.-न्नदी फेन.मिवाऽवहत्। य^ इदं स्त्री पुमा.नक.-रिह

स^ स्तुवता.ञ्जनः।। 1।।

卐 अयं स्तुवान आऽगम.-दिमं स्म प्रति हर्यत। बृहस्पते वशे लब्ध्वा-

ऽग्नीषोमा वि विध्यतम्।। 2।।

卐 यातुधानस्य सोमप- जहि प्रजा.न्नयस्व च। नि स्तुवानस्य पातय- पर.

मक्ष्युताऽवरम्।। 3।।

卐 यत्रैषा.मग्ने जनिमानि वेत्थ- गुहा सता.मत्त्रिणा.ञ्जातवेदः। तां.स्त्वं

ब्रह्मणा वावृधानो- जह्येषां शततर्.ह.मग्ने।। 4।।-

- 1-02-03 (1-4 अस्मि.न्वसु वसव इति चतुर्ऋचस्य सूक्तस्य अथर्वा ऋषिः। 1 वसवः, इन्द्रः, पूषा, वरुणः, मित्रः, अग्निः, आदित्याः, विश्वे देवाः, 2 देवाः, सूर्यः, अग्निः, हिरण्यं, 3-4 अग्निः (जातवेदाः) देवता। त्रिष्टुप् छन्दः।।) ❁ विजयाय प्रार्थना।
- 1।6। 1 अस्मिन् वस्विति सूक्तं त्रैष्टुभं, वस्वादि नानामन्त्रोक्तदेवत्यमथर्वाऽपश्यत्। तत्र प्रथमाद्वितीये बहुदेवत्ये। परे द्वे आग्नेय्यौ, तत आभिर्मन्त्रोक्तान् देवा.नग्निपुरोगमान् सर्वान् प्रार्थयत्। चतसृभिर्वस्वादि सर्वमिष्टं च।।

卐 अस्मि.न्वसु वसवो धारय.-न्त्विन्द्रः पूषा वरुणो मित्रो अग्निः।

इम.मादित्या^ उत विश्वे च देवा^- उत्तरस्मि.न्ज्योतिषि धारयन्तु।। 1।।

卐 अस्य देवाः प्रदिशि ज्योति.रस्तु- सूर्यो अग्नि.रुत वा हिरण्यम्। सपत्ना^

अस्म.दधरे भव.-न्तूत्तम.न्नाक.मधि रोहयेमम्।। 2।।

卐 येनेन्द्राय समभरः पयां.-स्युत्तमेन ब्रह्मणा जातवेदः। तेन त्व.मग्न इह वर्धयेमं- सजातानां श्रैष्ठ्य आ धेह्येनम्।। 3।।

卐 ऐषाँ यज्ञ.मुत वर्चो ददेऽहं- राय.स्पोष.मुत चित्ता.न्यग्ने। सपत्ना^ अस्म.दधरे भव.-न्तूत्तम.न्नाक.मधि रोहयेमम्।। 4।।-

- 01-02-04 (1- 4 अयन्देवानामिति चतुर्ऋचस्य सूक्तस्य अथर्वा ऋषिः। 1 प्रथमर्चोऽसुरः। 2 - 4 द्वितीयादि तृचस्य वरुणो देवता।। 1 – 2 प्रथमा द्वितीययोः त्रिष्टुप्, 3 तृतीयायाः ककुम्मत्यनुष्टुप्, 4 चतुर्थ्याश्चाऽनुष्टुप् - छन्दांसि।।) ❀ पाश –विमोचनम्।

  ☆1।10। 1 ततः अयन्देवानामिति सूक्तमासुरं वारुणं त्रैष्टुभम्। पूर्वयाऽसुर.मस्तौत्, पराभिर्वरुणम्। अनुष्टुभावन्त्ये द्वे। 3 यदुवक्थेति ककुम्मती।।

卐 अय.न्देवाना.मसुरो वि राजति- वशा हि सत्या वरुणस्य राज्ञः। तत.स्परि ब्रह्मणा शाशदान^- उग्रस्य मन्यो.रु.दिम.न्नयामि।। 1।।

卐 नम.स्ते राज.न्वरुणाऽस्तु मन्यवे- विश्वं ह्युग्र निचिकेषि द्रुग्धम्। सहस्र.मन्या.न्प्र सुवामि साकं - शत.ञ्जीवाति शरद.स्तवाऽयम्।। 2।।

卐 य.दुवक्थाऽनृत.-ञ्जिह्वया वृजिनं बहु। राज्ञ.स्त्वा सत्यधर्मणो- मुञ्चामि वरुणा.दहम्।। 3।।

卐 मुञ्चामि त्वा वैश्वानरा.-दर्णवा.न्महत.स्परि। सजाता.नुग्रेहा ऽऽवद- ब्रह्म चाऽप चिकीहि नः।। 4।।-

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

➢ 01-02-05 (1 - 6 वषट्ते पूषन्निति षडृचस्य सूक्तस्याऽथर्वा ऋषिः। पूषादयो अर्यमा, वेधाः, दिशः) देवता। 1 प्रथमर्चः पङ्क्तिः, 2 द्वितीयाया अनुष्टुप्, 3 तृतीयायाश्चतुष्पदोष्णिग्गर्भा ककुम्मत्यनुष्टुप्, 4 - 6 चतुर्थ्यादितृचस्य च पथ्या पङ्क्तिश्छन्दांसि।।) ❀ नारी – सुखप्रसूतिः।

➢ 1।11 ।1 वषट् ते पूषन्निति सूक्तं पौष्णं षडर्चं पाङ्क्तम्। अनेन मन्त्रोक्तानर्यमादि देवान् नारीसुखप्रसवायाभिष्टूयेष्टञ्च सर्वाभिः प्रार्थयत्। 2 चतस्रो दिव इत्यनुष्टुप्परा चतुष्पदोष्णिग्गर्भा ककुम्मत्यनुष्टुप्।4 नैव मांस इति तिस्रः पथ्या पङ्क्त्य इत्यनयोः प्रागुक्त ऋषिरिति।

卐 वषट्ते पूष.न्नस्मि‘2’न्त्सूता.-वर्यमा होता कृणोतु वेधाः। सिस्रता.न्नार्यृतप्रजाता - वि पर्वाणि जिहतां सूतवा उ।। 1।।

卐 चतस्रो दिवः प्रदिश.-श्चतस्रो भूम्या उत। देवा गर्भं स.मैरय.-न्तँ व्यूर्णुवन्तु सूतवे।। 2।।

卐 सूषा व्यूर्णोतु- वि योनिं हापयामसि। श्रथया सूषणे त्व.-मव त्वं बिष्कले सृज।। 3।।

卐 नेव मांसे न पीबसि- नेव मज्ज.स्वाहतम्। अवैतु पृश्नि शेवलं- शुने जराय्वत्तवे-ऽव जरायु पद्यताम्।। 4।।

卐 वि ते भिनद्मि मेहनँ- वि योनिँ वि गवीनिके। वि मातर.ञ्च पुत्र.ञ्च- वि कुमार.ञ्जरायुणा-ऽव जरायु पद्यताम्।। 5।।

卐 यथा वातो यथा मनो- यथा पतन्ति पक्षिणः। एवा त्व.न्दशमास्य-साक.ञ्जरायुणा पता-ऽव जरायु पद्यताम्।। 6।।-

## ॐ प्रथम काण्डे तृतीयोऽनुवाकः

01-03-01 (1-4 जरायुजेति चतुर्ऋचस्य सूक्तस्य भृग्वङ्गिरा ऋषिः। यक्ष्मनाशनरूपोऽर्थो देवता। 1 प्रथमर्चो जगती, 2 – 3 द्वितीया तृतीययो स्त्रिष्टुप्, 4 चतुर्थ्याश्चानुष्टुप् छन्दांसि।।) ❀ यक्ष्मनाशनम्

- 1।12।1। जरायुज इति सूक्तं यक्ष्मनाशन देवताकं जागतं भृग्वंगिरा।द्वितीयान्त्यनुष्टुप् ।।

卐 जरायुजः प्रथम^ उस्त्रियो वृषा- वाताभ्रजा^ स्तनय.न्नेति वृष्ट्या। स^ नो मृडाति तन्व ऋजुगो रुजन्- य^ एक. मोज. स्त्रेधा वि चक्रमे।। 1।।

卐 अङ्गेअङ्गे शोचिषा शिश्रियाण- न्नमस्यन्त.स्त्वा हविषा विधेम। अङ्का. न्थ्समङ्कान् हविषा विधेम- यो अग्रभी. त्पर्वाऽस्या ग्रभीता।। 2।।

卐 मुञ्च शीर्षक्त्या^ उत कास^ एनं- परुष्परु राविवेशा यो अस्य। यो अभ्रजा^ वातजा^ यश्च शुष्मो- वनस्पती. न्त्सचतां पर्वतांश्च।। 3।।

卐 शं मे परस्मै गात्राय- शमस्त्ववराय मे। शं मे चतुर्भ्यो अङ्गेभ्य- श्शमस्तु तन्वे3(ए) मम।। 4।।-

🏺 01-03-02 (1- 4 नमस्ते अस्त्विति चतुर्ऋचस्य सूक्तस्य भृग्वङ्गिरा ऋषिः। विद्युद्देवता। 1 – 2 प्रथमाद्वितीययोर्ऋचोरनुष्टुप्, 3 तृतीयायाश्चतुष्पाद्विराड् जगती, 4 चतुर्थ्याश्च त्रिष्टुप्परा बृहतीगर्भा पङ्क्तिश्छन्दांसि।।) ❁ विद्युत्

1।13।1 नमस्ते अस्तु।।

卐 नमस्ते अस्तु विद्युते- नमस्ते स्तनयित्नवे। नमस्ते अस्त्वश्मने- येना दूडाशे अस्यसि।। 1।।

卐 नमस्ते प्रवतो नपा - द्यत. स्तप. स्समूहसि। मृडया न.स्तनूभ्यो- मय. स्तोकेभ्य.स्कृधि।। 2।।

卐 प्रवतो नपा. न्नम^ एवास्तु तुभ्य- न्नमस्ते हेतये तपुषे च कृण्मः। विद्म ते धाम परम. ङ्गुहा- यत्समुद्रे अन्त. र्निहिताऽसि नाभिः।। 3।।

卐 यान्त्वा देवा^ असृजन्त विश्व- इषु. ङ्कृण्वाना^ असनाय धृष्णुम्। सा नो मृड विदथे गृणाना- तस्यै ते नमो अस्तु देवि।। 4।।-

🏺 01-03-03 (1-4 भगमस्येति चतुर्ऋचस्य सूक्तस्य भृग्वङ्गिरा ऋषिः। वरुणो, यमो वा देवता। 1 प्रथमर्चः ककुम्मत्यनुष्टुप, 2 – 4 द्वितीया चतुर्थोरनुष्टुप्, 3 तृतीयायाश्च चतुष्पद्विराडनुष्टुप् छन्दांसि।।) कुलपा कन्या

- 1।14। 1 भगमस्या इति सूक्ते वैद्युते द्वे त्र्यानुष्टुभे। प्रथमं वैद्युतं परं वारुरां वोत याम्यं वा। प्रथमेन विद्युतमस्तौत् द्वितीयेन तदर्थं यममिति। 13।1 भगमस्या इति ककुम्मती। 13 ।3 प्रवतो नपादिति चतुष्पाद्विराड्जगती। 13। 4 यां त्वा देवा इति त्रिष्टुप्पराबृहतीगर्भा पंक्तिः ।14। एषा ते कुलपा इति चातुष्पाद्विराड्।।

卐 भग.मस्या^ वर्च^ आदि-ष्यधि वृक्षा.दिव स्रजम्। महाबुध्न^ इव पर्वतो-

ज्योक्पितृष्वास्ताम्।। 1।।

卐 एषा ते राज. न्कन्या- वधू. र्नि धूयताँ यम। सा मातु. र्बध्यता. ङ्गृहे-

ऽथो~ भ्रातु. रथो~ पितुः।। 2।।

卐 एषा ते कुलपा राज- न्तामु ते परि दद्मसि। ज्योक्पितृष्वासाता- आ

शीर्ष्ण. श्शमोप्यात्।। 3।।(स्समोप्यात्)

卐 असितस्य ते ब्रह्मणा- कश्यपस्य गयस्य च।- अन्तःकोशमिव

जामयो-ऽपि नह्यामि ते भगम्।। 4।।-

01-03-04 (1-4 संसं स्रवन्त्विति चतुर्ऋचस्य सूक्तस्य अथर्वा ऋषिः। मन्त्रोक्ता देवताः (सिन्धवः, वाताः, पतत्रिणः)। 1 प्रथमर्चो भुरिग्बृहती, 2 द्वितीयायाः पथ्यापङ्क्तिः, 3 – 4 तृतीया चतुर्थ्यौश्चानुष्टुप् छन्दांसि।।) ❁ पुष्टिकर्म

1। 15।।1 सं सं स्रवन्त्विति सूक्तमानुष्टुभसैंधवमथर्वापश्यत्ततोऽनेन मंत्रोक्तान्देवानप्रार्थयदाद्या द्वितीया भुरिक् पथ्यापंक्तिरिति।।7।।

卐 संसं स्रवन्तु सिन्धव- स्सँवाता. स्सं पतत्रिणः।- इमँ यज्ञं प्रदिवो मे

जुषन्तां- संस्राव्येण हविषा जुहोमि।। 1।।

卐 इहैव हव. मायात म इह संस्रावणा^- उतेमँ वर्धयता गिरः।- इहैतु सर्वो

यः पशु- रस्मि. न्तिष्ठतु या रयिः।।

卐 ये नदीनां संस्रव.-न्त्युत्सास. स्सद.मक्षिताः।- तेभिर्मे सर्वैः. स्संस्रावै-र्धनं संस्रावयामसि।। 3।।

卐 ये सर्पिष. स्संस्रवन्ति- क्षीरस्य चोदकस्य च। तेभिर्मे सर्वैः. स्संस्रावै-र्धनं सं स्रावयामसि।। 4।।-

01-03-05 (1- 4 येऽमावास्यामिति चतुर्ऋचस्य सूक्तस्य चातन ऋषिः। मन्त्रोक्ता अग्नीन्द्रवरुणा देवताः। 1- 3 प्रथमादितृचस्यानुष्टुप् , 4 चतुर्थ्याश्च ककुम्मत्यनुष्टुप् छन्दसी।।) ❀ शत्रुबाधनम् --,1।16।।1 येऽमावास्यामिति सूक्तमग्नीन्द्रं वारुरां दधत्यमानुष्टुभं चातनोऽद्राक्षीदनेन मंत्रोक्तान्देवान् सीसप्रभिष्टूयाप्रार्थयत्। 4 यदि नोगमिति ककुम्मती शेषं प्राकृतम्।।

卐 येऽमावास्या3(आं) रात्रि- मुदस्थु. भ्राज. मत्त्रिणः।- अग्नि. स्तुरीयो यातुहा- सो अस्मभ्य.मधि ब्रवत्।। 1।। (व्राज)

卐 सीसायाऽध्याह वरुण- स्सीसायाऽग्नि रुपावति।- सीसं म इन्द्रः प्राऽयच्छ- त्तदङ्ग यातुचातनम्।। 2।।

卐 इदँ विष्कन्धं सहत- इदं बाधते अत्त्रिणः।- अनेन विश्वा ससहे- या जातानि पिशाच्याः।। 3।।

卐 यदि नो गां हंसि- यद्यश्वं यदि पूरुषम्।- तन्त्वा सीसेन विध्यामो- यथा नोऽसो अवीरहा।। 4।।-

Sri Ganapathi Sacchidananda Avadhoota Datta Peetham • Mysore •

## ꣸ प्रथम काण्डे चतुर्थोऽनुवाकः

🏺 01-04-01 (1-4 अमूर्याइति चतुर्ऋचस्य सूक्तस्य ब्रह्मा ऋषिः। मन्त्रोक्ता लोहितवाससो योषितो देवताः। 1 प्रथमर्चो भुरिगनुष्टुप्, 2 – 3 द्वितीया तृतीययोरनुष्टुप्, 4 चतुर्थाश्च त्रिपदार्षी गायत्री छन्दांसि।।) ❁ रुधिरस्रावनिवृत्तये धमनीबन्धनम्

1।17।।1 अमूर्या इति सूक्तं योषिद्देवत्यमानुष्टुभं। ब्रह्मालोहितवाससो मंत्रोक्तदेवता अस्तौत्। आद्या भुरिक्। 4 परि वः सिकतावतीति त्रिपदार्षीगायत्री।।

卐 अमू.र्या^ यन्ति योषितो- हिरा^ लोहितवाससः।- अभ्रातर^इव जामय-स्तिष्ठन्तु हतवर्चसः।। 1।।

卐 तिष्ठाऽवरे तिष्ठ पर- उत त्व.न्तिष्ठ मध्यमे।- कनिष्ठिका च तिष्ठति-तिष्ठा.दि.द्धमनि. र्मही।। 2।।

卐 शतस्य धमनीनां- सहस्रस्य हिराणाम्।- अस्थु. रिन्मध्यमा^ इमा-स्साक. मन्ता^ अरंसत।। 3।।

卐 परि व.स्सिकतावती- धनू. र्बृह.त्यक्रमीत्।- तिष्ठतेलयता सु कम्।। 4।।- (इलयता)

🏺 01-04-02 (1 - 4 निर्लक्ष्म्येति चतुर्ऋचस्य सूक्तस्य द्रविणोदा ऋषिः। विनायको देवता। 1 प्रथमर्च उपरिष्टाद्विराड्बृहती, 2 द्वितीयाया निचृज्जगती, 3 तृतीयाया विराडास्तारपङ् क्तिस्त्रिष्टुप्, 4 चतुर्थ्याश्चानुष्टुप् छन्दांसि।)अलक्ष्मीनाशनम्

- 1।18।। 1 निर्लक्ष्म्यमिति सूक्तं वैनायकमानुष्टुभं। ब्रह्मालोहितवाससोमत्रोक्तदेवता अस्तौत् ब्रह्मा भुरिक परिवःसिकतावतीति त्रिपदार्षी गायत्री ।।,

卐 निर्लक्ष्म्यँ ललाम्यं1(अ)- न्निररातिं सुवामसि।- अथ या भद्रा तानि नः- प्रजाया अराति. न्नयामसि।। 1।।

卐 निररणिं सविता साविष.क्पदो - र्निर्हस्तयो.र्वरुणो मित्रो अर्यमा।- निरस्मभ्य. मनुमती रराणा- प्रेमा. न्देवा^ असाविषु. स्सौभगाय।। 2।।

卐 यत्त आत्मनि तन्वा. ङ्घोर.मस्ति- यद्वा केशेषु प्रतिचक्षणेव।- सर्व. न्तद्वाचाऽपहन्मो- वय. न्देवस्त्वा सविता सूदयतु।।

卐 रिश्यपदीँ वृषदती- ङ्गोषेधाँ विधमा. मुत। विलीढ्यँ ललाम्यं1(अ)- न्ता^ अस्म. न्नाशयामसि।। 4।।-

01-04-03 (1 - 4 मा नो विदन्निति चतुर्ऋचस्य सूक्तस्य ब्रह्मा ऋषिः। 1 प्रथमर्च इन्द्रः, 2 द्वितीयाया दैवीः मनुष्येषवः, 3 तृतीयाया रुद्रः, 4 चतुर्थ्याश्च विश्वे देवा देवताः। 1, 4 प्रथमा चतुर्थ्योरनुष्टुप्, 2 द्वितीयायाः पुरस्ताद्बृहती, 3 तृतीयायाश्च पथ्यापङ्क्तिश्छन्दांसि।।)शत्रुनिवारणम्

- 1।19।।1मानोविदन्निति सूक्तमैश्वर्यमानुष्टुभं।ब्रह्माप्रथैमन्द्री द्वितीया मानुष्येष्ववीर्दैवीस्तृतीयारौद्रीया। यद्देवत्या तया तामेवास्तौदिति वैश्वदेवत्या। 2 विष्वञ्चो अस्मछरव इति पुरस्ताद्बृहती। 3 यो नः स्व इति पथ्यापंक्तिः।।

卐 मा नो विद. न्विव्याधिनो- मो~ अभिव्याधिनो विदन्न्।- आरा. च्छरव्या अस्म-द्विषूची. रिन्द्र पातय।। 1।।

卐 विष्वञ्चो अस्म.च्छरवः पतन्तु- ये अस्ता^ ये चाऽस्याः।- दैवी. र्मनुष्येषवो- ममाऽमित्रान्वि विध्यत।। 2।।

卐 यो न.स्स्वो यो अरण. स्सजात^- उत निष्ठ्यो यो अस्मा९ अभिदासति।-
रुद्र. श्शरव्ययैता- न्ममाऽमित्रान्वि विध्यतु।। 3।।
卐 यस्सपत्नो योऽसपत्नो- यश्च द्विष. न्छपाति नः।- देवा.स्तं सर्वे धूर्वन्तु-
ब्रह्म वर्म ममाऽन्तरम्।। 4।।-

01-04-04 (1-4 अदारसृदिति चतुर्ऋचस्य सूक्तस्य अथर्वा ऋषिः। 1 प्रथमर्चः सोमो मरुतश्च, 2 द्वितीयाया मित्रावरुणौ, 3 तृतीयाया वरणः, 4 चतुर्थ्याश्चेन्द्रो देवताः। 1 प्रथमायास्त्रिष्टुप् , 2 – 4 द्वितीयादि तृचस्य चानुष्टुप् छन्दसी।।) शत्रुनिवारणम्

- 1। 20।। 1 अदारसृदिति सूक्तं सौम्यमानुष्टुभमथर्वा प्रथमात्रिष्टुप् सौम्या। द्वितीया मारुतः तृतीया मैत्रावारुणी। परा वारुणी। परैन्द्री।।

卐 अदारसृ.द्भवतु देव सोमा-ऽस्मिन्यज्ञे मरुतो मृडता नः।- मा नो विद.
दभिभा मो~ अशस्ति-र्मा नो विद. द्वृजिना द्वेष्या या।। 1।।
卐 यो अद्य सेन्यो वधो-ऽघायूना मुदीरते।- युव.न्तं मित्रावरुणा- वस्म.
द्यावयतं परि।। 2।।
卐 इतश्च यदमुतश्च- यद्वधँ वरुण यावय।- वि मह.च्छर्म यच्छ- वरीयो
यावया वधम्।। 3।।
卐 शास^ इत्था महा९ -अस्यमित्रसाहो अस्तृतः। न यस्य हन्यते सखा- न
जीयते कदा चन।। 4।।-

☸ 01-04-05 (1 - 4 स्वस्तिदा इति चतुर्ऋचस्य सूक्तस्य अथर्वा ऋषिः। इन्द्रो देवता। अनुष्टुप् छन्दः।।) शत्रु निवारणम्

- 1 121।।1 स्वस्तिदा विशामिति सूक्तमैन्द्रमानुष्टभम् अनेनेन्द्रप्रार्थनां प्रागुक्तर्षिरकरोत्।।

卐 स्वस्तिदा^ विशां पति- र्वृत्रहा विमृधो वशी।- वृषेन्द्रः पुर^ एतु न- स्सोमपा^ अभयङ्करः।। 1।।

卐 वि न इन्द्र मृधो जहि- नीचा यच्छ पृतन्यतः।- अधमं. ङ्गमया तमो- यो अस्माँ अभिदासति।। 2।।

卐 वि रक्षो वि मृधो जहि- वि वृत्रस्य हनू~ रुज।- वि मन्यु. मिन्द्र वृत्रह- न्नमित्रस्याऽभिदासतः।। 3।।

卐 अपेन्द्र द्विषतो मनो-ऽप जिज्यासतो वधम्। वि मह.च्छर्म यच्छ- वरीयो यावया वधम्।। 4।।-

## प्रथम काण्डे पञ्चमोऽनुवाकः

☸ 01-05-01 (1- 4 अनु सूर्यमिति चतुर्ऋचस्य सूक्तस्य ब्रह्मा ऋषिः। सूर्यो हरिमा हृद्रोगश्च देवताः। अनुष्टुप् छन्दः।।) ❃ हृद्रोग – कामिला – नाशनम्

1 122। 1 अनुसूर्यमिति सूक्तं सौर्यमुत मंत्रोक्तं। हरिमादेवत्यमानुष्टुभं। ब्रह्मा ततोऽनेन सूर्य्यं हरिमाणं हृद्रोगं चास्तौदनाशयम्।।

卐 अनु सूर्य. मुदयतां- हृद्योतो हरिमा च ते।- गो^ रोहितस्य वर्णेन- तेन त्वा परि दध्मसि।। 1।।

卐 परि त्वा रोहितै. र्वर्णै- र्दीर्घायुत्वाय दध्मसि।- यथाऽय. मरपा^ अस-
दथो~ अहरितो भुवत्।। 2।।

卐 या^ रोहिणी. र्दैवत्या3(आ)^- गावो या^ उत रोहिणीः।- रूपंरूपँ
वयोवय- स्ताभिष्ट्वा परि दध्मसि।। 3।।

卐 शुकेषु ते हरिमाणं- रोपणाकासु दध्मसि।- अथो~ हारिद्रवेषु ते-
हरिमाण. न्निदध्मसि।। 4।।-

01-05-02 (1 - 4 नक्तञ्जाता इति चतुर्ऋचस्य सूक्तस्य अथर्वा ऋषिः। असिक्नी वनस्पतिर्देवता। अनुष्टुप् छन्दः।।) ❀ श्वेतकुष्टनाशनम्

1।23।।1 नक्तंजातेतिसूक्तं वानस्पत्यमानुष्टुभमथर्वा श्वेतलक्ष्मविनाशनायेनेनासिक्नीमोषधिमस्तौदिति।।6।।

卐 नक्तञ्जाताऽस्योषधे- रामे कृष्णे असिक्नि च।- इदं रजनि रजय- किलासं
पलितञ्च यत्।। 1।।

卐 किलासञ्च पलितञ्च- निरितो नाशया पृषत्।- आ त्वा स्वो विशताँ
वर्णः- परा शुक्लानि पातय।। 2।।

卐 असित.न्ते प्रलयन- मास्थान. मसित. न्तव।- असिक्न्यस्योषधे- निरितो
नाशया पृषत्।। 3।।

卐 अस्थिजस्य किलासस्य- तनूजस्य च यत्त्वचि।- दूष्या कृतस्य ब्रह्मणा- लक्ष्म श्वेत.मनीनशम्।। 4।।-

☫ 01-05-03 (1 - 4 सुपर्णो जात इति चतुर्ऋचस्य सूक्तस्य ब्रह्मा ऋषिः। आसुरी वनस्पतिर्देवता। 1, 3, 4 प्रथमातृतीया चतुर्थीनामृचानुष्टुप्, 2 द्वितीयाश्च निचृत्पथ्या पङ्क्तिश्छन्दसी।।) श्वेतकुष्ठनाशनम्

- 1।24 ।। 1सुपर्णो जात इति सूक्तमासुरी वनस्पतिदेवत्यमानुष्टुभं। ब्रह्मासुरीमनेनास्तौदिति। 2 आसुरी चक्र इति निचृत्पथ्यापंक्तिः।।

卐 सुपर्णो जातः प्रथम-स्तस्य त्वं पित्त मासिथ।- तदासुरी युधा जिता- रूप.ञ्चक्रे वनस्पतीन्।। 1।।

卐 आसुरी चक्रे प्रथमेद ङ्किलासभेषज- मिद. ङ्किलासनाशनम्।- अनीनश. त्किलासं- सरूपा. मकर. त्त्वचम्।। 2।।

卐 सरूपा नाम ते माता- सरूपो नाम ते पिता।- सरूपकृ. त्त्वमोषधे- सा सरूप. मिद. ङ्कृधि।। 3।।

卐 श्यामा सरूप.ङ्करणी- पृथिव्या अध्युद्भृता। इद.मू षु प्र साधय- पुना रूपाणि कल्पय।। 4।।-

☫ 01-05-04 (1 - 4 यदग्निरिति चतुर्ऋचस्य सूक्तस्य भृग्वङ्गिरा ऋषिः। यक्ष्मनाशनोऽग्निर्देवता। प्रथमर्चस्त्रिष्टुप्, 2, 3 द्वितीय तृतीययो र्विराड्गर्भा त्रिष्टुप्, 4 चतुर्थ्याश्च पुरोऽनुष्टुप् त्रिष्टुप् छन्दांसि।।) ज्वर – नाशनम्

➢ 1।25।। 1 यदग्निरिति सूक्तं यक्ष्मनाशनाग्निदैवतं त्रैष्टुभं भृग्वंगिरामंत्रोक्तदेवानस्तौत्। द्वितीया तृतीये विराड्गर्भे। 4 नमः शीतायेति पुरोनुष्टुविति।।

卐 यद॒ग्नि. रापो॑ अद॑ह. त्प्र॒वि॒श्य- यत्राऽकृ॑ण्व. न्धर्म॑धृ॒तो॑ नमां॑सि।- तत्र॑ त आहुः॒ प॒रम. ञ्ज॒नित्रं॒- स॒ न. स्सँवि॒द्वा. न्परि॑ वृङ्धि तक्मन्न्।। 1।।

卐 यद्य॒र्चि. र्यदि॑ वाऽसि॑ शो॒चि- श्शकल्ये॑षि यदि॑ वा ते ज॒नित्रम्।- ह्रूडु॒. र्नामा॑सि हरितस्य दे॒व- स॒ न.स्सँवि॒द्वा.न्परि॑वृङ्धि तक्मन्न्।। 2।।

卐 यदि॑ शो॒को यदि॑ वाऽभिशो॒को- यदि॑ वा॒ राज्ञो॒ वरु॑णस्याऽसि॑ पु॒त्रः।- ह्रूडु॒. र्नामा॑सि हरितस्य दे॒व- स॒ न.स्सँवि॒द्वा. न्परि॑वृङ्धि तक्मन्न्।। 3।।

卐 नम॑. श्शी॒ताय॑ त॒क्मने॑- नमो॑ रू॒राय॑ शो॒चिषे॑ कृणोमि। यो अ॒न्ये॒द्यु. रु॑भयद्यु॒. र॒भ्येति॒- तृतीयका॒य॒ नमो॑ अस्तु॒ तक्मने॑।। 4।।-

☃ 01-05-05 (1-4 आरेऽसावस्मदस्त्विति चतुर्ऋचस्य सूक्तस्य ब्रह्मा ऋषिः। इन्द्रादयो मन्त्रोक्ता देवताः (देवाः, 2 भगः, सविता, 3 - 4 मरुतः)। 1, 3 प्रथम तृतीययोऋचोर्गायत्री, 2 द्वितीयाया एकावसाना त्रिपदा त्रिष्टुप्, 4 चतुर्थ्याश्चैकावसाना पादनिचृद्गायत्री।) शर्मप्राप्तिः

➢ 1।26। 1 आरे सावितिं सूक्तमिन्द्रादि बहुदेत्यं गायत्रं। ब्राह्मा मंत्रोक्तान्देवानभिष्टूयाप्रार्थयत्। 2 सखासाविति त्रिपदा साम्नीत्रिष्टुप्। 4सुषूदतेति पादनिचृदुभे एकावसाने।।

卐 आ॒रे॒3(ए)ऽसा. व॒स्म.द॒स्तु- हे॒ति. दे॑वासो असत्।- आ॒रे अश्मा॒ यमस्य॑थ।। 1।।

卐 सखाऽसा. वस्मभ्य. मस्तु राति- स्सखेन्द्रो भग. स्सविता चित्रराधाः।।
2।।
卐 यूय.न्नः प्रवतो नपा- न्मरुत. स्सूर्यत्वचसः।- शर्म यच्छाथ सप्रथाः।।
3।।
卐 सुषूदत मृडत- मृडया न.स्तनूभ्यो- मय स्तोकेभ्य स्कृधि।। 4।।-

- 01-05-06 (1 - 4 अमूः पारे इति चतुर्ऋचस्य सूक्तस्य अथर्वा ऋषिः (स्वस्त्ययनकामः)। चन्द्रमा इन्द्राणी वा देवता। 1 प्रथमर्चः पथ्या पङ्क्तिः, 2 – 4 द्वितीयादि तृचस्यचानुष्टुप् छन्दसी।।) स्वस्त्ययनम्
- 1।27।। 1 अमूः पार इति सूक्तं चान्द्रमसमुतेन्द्राणी दैवतमानुष्टुभं। स्वस्त्ययनकामोऽथर्वा। प्रथमा पथ्यापंक्तिः।।

卐 अमूः पारे पृदाक्व- स्त्रिषप्ता^ निर्जरायवः।- तासा. ञ्जरायुभि. र्वय-
मक्ष्या3(आ) वपिव्ययाम-स्यघायोः परिपन्थिनः।। 1।।
卐 विषूच्येतु कृन्तती- पिनाक.मिव बिभ्रती।- विष्वक्पुनर्भुवा^ मनो-
ऽसमृद्धा^ अघायवः।। 2।।
卐 न बहव.स्समशक- न्नाऽर्भका^ अभि दाधृषुः।- वेणो रद्गा^इवाऽभितो-
ऽसमृद्धा^ अघायवः।। 3।।

卐 प्रेतं पादौ प्र स्फुरतँ- वहतं पृणतो गृहान्।- इन्द्राण्येतु प्रथमा- ऽजीता ऽमुषिता पुरः।। 4।।-

01-05-07 (1 - 4 उपप्रागादिति चतुर्ऋचस्य सूक्तस्य चातन ऋषिः। 1 - 2 प्रथमर्चो द्वीतीयायाः पूर्वार्धस्य चाग्निः, 2, 3, 4 द्वितीयाया उत्तरार्धस्य तृतीया चतुर्थ्याश्च यातुधान्यो देवताः। 1,2 प्रथमा द्वितीययोरनुष्टुप्, 3 तृतीयाया विराड्पथ्याबृहती, 4 चतुर्थ्याश्च पथ्यापङक्तिश्छन्दः।।) ❋ रक्षोघ्नम्

1 28=1 उपप्रागाद्देव इति सूक्तमाग्नेयमानुष्टुभं। चातनः सार्द्धाद्ययाग्निमस्तौत्। सार्धाभ्यांपरामृग्भ्यां यातुधानीश्चेति। 3 याशशापेति विराड्पथ्याबृहती। 4 पुत्रमत्त्विति पथ्या पंक्तिरिति।।10।।

卐 उप प्रागा. द्देवो अग्नी-रक्षोहाऽमीवचातनः।- दह. न्नप द्वयाविनो- यातुधाना. न्किमीदिनः।। 1।।

卐 प्रति दह यातुधाना- न्प्रति देव किमीदिनः।- प्रतीचीः कृष्णवर्तने- सन्दह यातुधान्यः।। 2।।

卐 या शशाप शपनेन- याऽघं मूर.मादधे।- या रसस्य हरणाय- जात. मारेभे तोक. मत्तु सा।। 3।।

卐 पुत्र. मत्तु यातुधानी- स्स्वसार. मुत नप्त्यम्। अधा मिथो विकेश्यो3(ओ)- वि घ्नतां यातुधान्यो3(ओ)- वि तृह्यन्ता मराय्यः।। 4।।-

## प्रथम काण्डे षष्ठोऽनुवाकः

- 01-06-01 (1- 6 अभिवर्तेनेति षडृचस्य सूक्तस्य वसिष्ट ऋषिः। ब्रह्मणस्पतिर्देवता (अभीवर्तमणिः)। अनुष्टुप् छन्दः।।) राष्ट्राभिवर्धनम्, सपत्नक्षयणं च
- 1।29।।1 अभीवर्तेनेत्य भीवर्तमणिं सूक्तं पडर्चं ब्राह्मणस्पत्यमानुष्टुभं।वसिष्ठोऽनेन सूक्तेनेमं मणिं सपत्नक्षयणाय चन्द्रमसो ब्राह्मणस्पत्यम् अभिष्टूयाप्रार्थयत्।।

卐 अभीवर्तेन मणिना- येनेन्द्रो अभिवावृधे। तेनास्मा. न्ब्रह्मणस्पते-ऽभि राष्ट्राय वर्धय।। 1।।

卐 अभिवृत्य सपत्ना- नभि या^ नो अरातयः। अभि पृतन्यन्त न्तिष्ठा-ऽभि यो नो दुरस्यति।। 2।।

卐 अभि त्वा देव. स्सविता-ऽभि सोमो अवीवृधत्। अभि त्वा विश्वा भूता.- न्यभीवर्तो यथाऽससि।। 3।।

卐 अभीवर्तो अभिभव- स्सपत्नक्षयणो मणिः। राष्ट्राय मह्यं बध्यतां- सपत्नेभ्यः पराभुवे।। 4।।

卐 उदसौ सूर्यो अगा- दुदिदं मामकँ वचः। यथाऽहं शत्रुहोऽसा- न्यसपत्न. स्सपत्नहा।। 5।।

卐 सपत्नक्षयणो वृषा-ऽभिराष्ट्रो विषासहिः। यथाऽह. मेषाँ वीराणाँ- विराजानि जनस्य च।। 6।।-

01-06-02 (1- 4 विश्वे देवा इति चतुऋचस्य सूक्तस्य अथर्वा ऋषिः (आयुष्कामः)। विश्वे देवा देवताः। 1, 2, 4 प्रथमाद्वितीयाचतुर्थीनामृचानां त्रिष्टुप्, 3 तृतीयाश्च शाक्करगर्भा विराड् जगती छन्दसी।) ❁ दीर्घायुःप्राप्तिः

1।30।1 विश्वेदेवाः इति सूक्तं वैश्वदेवं त्रैष्टुभमायुष्कामोऽथर्वा सर्वान् वस्वादिदेवान् सर्वाभिर्ऋग्भिरस्तौत्। 3 ये देवाः इति शाक्करगर्भाविराड्जगती।।

卐 विश्वे देवा^ वसवो रक्षतेम- मुताऽऽदित्या^ जागृत यूय. मस्मिन्न्। मेमं सनाभि. रुत वाऽन्यनाभि- र्मेमं प्राऽऽप.त्पौरुषेयो वधो यः।। 1।।

卐 ये वो देवाः पितरो ये च पुत्रा- स्सचेतसो मे श्रृणुतेद. मुक्तम्। सर्वेभ्यो वः परि ददा.म्येतं- स्वस्त्येन. ञ्जरसे वहाथ।। 2।।

卐 ये देवा^ दिवि ष्ठ ये पृथिव्याँ- ये अन्तरिक्ष ओषधीषु पशुष्वप्स्व1(अ)न्तः। ते कृणुत जरस.मायु. रस्मै- शत. मन्या. न्परि वृणक्तु मृत्यून्।। 3।।

卐 येषां प्रयाजा^ उत वाऽनुयाजा^- हुतभागा^ अहुतादश्च देवाः। येषाँ वः पञ्च प्रदिशो विभक्ता- स्तान्वो अस्मै सत्रसदः कृणोमि।। 4।।-

- 01-06-03 (1 - 4 आशानामिति चतुर्ऋचस्य सूक्तस्य ब्रह्मा ऋषिः। आशापालाः वास्तोष्पतयश्च देवताः। 1,2 प्रथमा द्वितीययोऋचोरनुष्टुप्, 3 तृतीयाया विराड्त्रिष्टुप्, 4 चतेर्थ्याश्च परानुष्टुप् त्रिष्टुप् छन्दांसि।।) पाशमोचनम्

➢ 1।31। 1 आशानामाशापालेभ्यः इति सूक्तमाशापालेभ्यः इति सूक्तमाशा पालीयं वास्तोष्पत्यमानुष्टुभं। ब्रह्मानेनाशापालान्वास्तोष्पतीन् सूक्तेनास्तौत् 3 अस्रामस्त्वा इति विराड्विष्टुप्। 4स्वस्तिमात्रे इति परानुष्टुप् त्रिष्टुप् इति।।11।।

卐 आशाना. माशापालेभ्यं- श्चतुर्भ्यो अमृतेभ्यः। इदं भूतस्याऽध्यक्षेभ्यो- विधेम हविषा वयम्।। 1।।

卐 य आशाना. माशापाला- श्चत्वार. स्स्थन देवाः। ते नो निर्ऋत्याः पाशेभ्यो- मुञ्चतांहसो~अंहसः।। 2।।

卐 अस्राम.स्त्वा हविषा यजा- म्यश्लोणस्त्वा घृतेन जुहोमि। य^ आशाना. माशापाल. स्तुरीयो देव- स्स^ न.स्सुभूत.मेह वक्षत्।। 3।।

卐 स्वस्ति मात्र उत पित्रे नो अस्तु- स्वस्ति गोभ्यो जगते पुरुषेभ्यः। विश्वं सुभूतं सुविदत्र.न्नो अस्तु- ज्योगेव दृशेम सूर्यम्।। 4।।-

01-06-04 (1 - 4 इद ञ्जनास इति चतुरृचस्य सूक्तस्य ब्रह्मा ऋषिः। द्यावापृथिव्यौ देवते। 1, 3, 4 प्रथमातृतीयाचतुर्थीनामृचामनुष्टुप्, 2 द्वितीयायाश्च ककुम्मत्यनुष्टुप् छन्दसी।।) ❀ महद्ब्रह्म

1।32।1 इदंजनासः इति ब्रह्मसूक्तं द्यावापृथिवीयमानुष्टुभमनेन तदेवास्तौदिति। सर्वत्रानुक्रोर्षेसूक्तेषु प्रागुक्तर्षिरिति विजानयादनुक्त कियेष्वपश्यात्तन इति च सर्वत्र परिभाष्यते। या यद्देवत्या तया तामेवास्तौदिति पारिभाषिकं सूक्तमिति च सर्वत्रावगच्छेदिति शास्त्रप्रकृतिराग्रंथ परिसमाप्तेः 2 अन्तरिक्ष आसाम् इति ककुम्मतीति।।

卐 इद. ञ्जनासो विदथ- महद्ब्रह्म वदिष्यति। न तत्पृथिव्या.न्नो≈ दिवि- येन प्राणन्ति वीरुधः।। 1।।

卐 अन्तरिक्ष आसां- स्थाम श्रान्तसदा.मिव। आस्थान.मस्य भूतस्य- विदु.ष्ट.द्वेधसो न वा।। 2।।

卐 यद्रोदसी≈ रेजमाने≈- भूमिश्च निरतक्षतम्। आर्द्र. न्तदद्य सर्वदा- समुद्रस्येव स्रोत्याः।। 3।।

卐 विश्व.मन्या. मभीवार- तदन्यस्या. मधि श्रितम्। दिवे च विश्ववेदसे- पृथिव्यै चाऽकर. न्नमः।। 4।।-

☃ 01-06-05 (1 - 4 हिरण्यवर्णा इति चतुरृचस्य सूक्तस्य शन्ताति ऋषिः। चन्द्रमाः आपो वा देवताः। त्रिष्टुप् छन्दः।।) ❀ आपः

1।33। 1 हिरण्य वर्णा इति सूक्तं चान्द्रमसमाप्यमुत त्रैष्टुभं। शंतातिः सर्वेण सूक्तेन सर्वकाररां आप एवेति विज्ञाय ता अस्तौदिति।।

卐 हिरण्यवर्णा. श्शुचय॰ पावका^- यासु जात. स्सविता यास्वग्निः। या^ अग्नि. गर्भ. न्दधिरे सुवर्णा-स्ता^ न^ आप. श्शं स्योना^ भवन्तु।। 1।।

卐 यासां राजा वरुणो याति मध्ये- सत्यानृते≈ अवपश्य. न्जनानाम्। या^ अग्नि. ङ्गर्भ. न्दधिरे सुवर्णा-स्ता^ न^ आप. श्शं स्योना^ भवन्तु।। 2।।

卐 यासा. न्देवा^ दिवि कृण्वन्ति भक्षँ- या^ अन्तरिक्षे बहुधा भवन्ति। या^ अग्नि. ङ्गर्भ. न्दधिरे सुवर्णा-स्ता^ न^ आप. श्शं स्योना^ भवन्तु।। 3।।

卐 शिवेन मा चक्षुषा पश्यताऽऽप- श्शिवया तन्वोपस्पृशत त्वचं मे। घृतश्चुत. श्शुचयो या॰ पावका-स्ता^ न^ आप. श्शं स्योना^ भवन्तु।। 4।।-

01-06-06 (1 – 5 इयँ वीरुदिति पञ्चर्चस्य सूक्तस्य अथर्वा ऋषिः। मधुवनस्पतिर्देवता। अनुष्टुप् छन्दः।।) ❁ मधुविद्या

1। 34। 1 इयं वीरुत्। इति मधुकमणिंसूक्तं पञ्चर्चं वानस्पत्यमानुष्टुभमथर्वा मधुवनस्पतिमस्तौत्।।

卐 इयँ वीरु. न्मधुजाता- मधुना त्वा खनामसि। मधो. रधि प्रजाताऽसि- सा नो मधुमत. स्कृधि।। 1।।

卐 जिह्वाया^ अग्रे मधु मे- जिह्वामूले मधूलकम्। ममेदह क्रता.वसो- मम चित्त मुपाऽऽयसि।। 2।।

卐 मधुम.न्मे निक्रमणं- मधुम.न्मे परायणम्। वाचा वदामि मधुम- द्भूयासं मधुसन्दृशः।। 3।।

卐 मधो.रस्मि मधुतरो- मदुघा. न्मधुमत्तरः। मामित्किल त्वँ वना- श्शाखां मधुमती.मिव।। 4।।

卐 परि त्वा परितत्नु-नेक्षुणाऽगा. मविद्विषे। यथा मां कामिन्यसो- यथा म.न्नाऽपगा^ असः।। 5।।-

- 01-06-07 (1 - 4 यदाबध्नन्नेति चतुरृचस्य सूक्तस्य अथर्वा ऋषिः (आयुष्कामः)। हिरण्यमिन्द्राग्नी विश्वे देवा वा देवताः। 1 - 3 प्रथमादि तृचस्य जगती, 4 चतुर्थ्याश्चानुष्टुब्गर्भा चतुष्पदा त्रिष्टुप् छन्दसी।। दीर्घायुःप्राप्तिः

➢ 1।35।1 यदाबध्नन् इति हैरण्यमैन्द्राग्नमुत वैश्वदेवं जादतं ततोऽनेन सूक्तेन हिरएयमेवास्तौत्। यच्छतानीकाय राज्ञे दक्षर्षेः पुत्रा अबध्नस्तँत्र आत्मनि बध्नाम्यायुष्कामः 4 विश्वेदेवाः इति 4 समानां मासाम् इत्यनुष्टुब्गर्भा चतुष्पदात्रिष्टुप् तत्ते बध्ना म्यायुषे 1 वर्चसेबलाय इति शाक्करस्तथा 3 अस्मिन्तद्दक्षमारा इति।।12।।

卐 यदाबध्न. न्दाक्षायणा^ हिरण्यं- शतानीकाय सुमनस्यमानाः। तत्ते बध्ना. म्यायुषे वर्चसे बलाय- दीर्घायुत्वाय शतशारदाय।। 1।।

卐 नैनं रक्षांसि न पिशाचा. स्सहन्ते- देवाना. मोजः प्रथमजं ह्ये3(ए)तत्। यो बिभर्ति दाक्षायणं हिरण्यं- स^ जीवेषु कृणुते दीर्घ.मायुः।। 2।।

卐 अपा. न्तेजो ज्योति. रोजो बलञ्च- वनस्पतीना. मुत वीर्याणि। इन्द्र इवेन्द्रियाण्यधि धारयामो- अस्मि. न्तद्दक्षमाणो बिभर. द्धिरण्यम्।। 3।।

卐 समानां मासा. मृतुभिष्ट्वा वयं- सँवत्सरस्य पयसा पिपर्मि। इन्द्राग्नी≈ विश्वे देवा- स्तेऽनु मन्यन्ता.महृणीयमानाः।। 4।।-

-।।प्रथमं काण्डं समाप्तम्।।-

# ॶ द्वितीयं काण्डम्

## द्वितीय काण्डे प्रथमोऽनुवाकः

02-01-01 (1-5 वेन स्तदिति पञ्चर्चस्य सूक्तस्य वेन ऋषिः। ब्रह्मात्मा देवता। 1, 2, 4, 5 प्रथमा द्वितीया चतुर्थी पञ्चमीनामृचां त्रिष्टुप्, 3 तृतीयायाश्च जगती छन्दसी।।) ❀ परमं धाम

- 2।1।1 वेनस्तत् इति प्रभृतिराकाण्डपरिसमाप्तेः पूर्वकाण्डस्य चतुर्ऋचप्रकृतिरित्येवमुत्तरकाण्डेषु षष्ठं यावदेकैका तावत्सूक्तेष्वृगिति विजानीयात्। 1 वेनस्तत् इति त्रैष्टुभं ब्रह्मात्मदैवतं वेनोऽपश्यत्। ततोऽनेन सूक्ते न तदेवास्तौदिति। 3 स नः पिता इति जगती।।

卐 वेन. स्तत्पश्य. त्परम. ङ्गुहा य- द्यत्र विश्वं भव. त्येकरूपम्। इदं पृश्नि. रदुह. ज्जायमाना- स्स्वर्विदो अभ्यनूषत व्राः।। 1।।

卐 प्र तद्वोचे. दमृतस्य विद्वा- न्गान्धर्वो धाम परम. ङ्गुहा यत्। त्रीणि पदानि निहिता गुहाऽस्य- य.स्तानि वेद स^ पितुष्पिताऽसत् ।।2।।

卐 स^ नः पिता जनिता स^ उत बन्धु- र्धामानि वेद भुवनानि विश्वा। यो देवाना. न्नामध^ एक^ एव- तं संप्रश्नं भुवना यन्ति सर्वा ।। 3।।

卐 परि द्यावापृथिवी≈ सद्य आय- मुपाऽऽतिष्ठे प्रथमजा. मृतस्य। वाचमिव वक्तरि भुवनेष्ठा- धास्यु. रेष^ नन्वे3(ए)षो अग्निः।। 4।।

卐 परि विश्वा भुवना.न्याय- मृतस्य तन्तुँ वितत. न्दृशे कम्। यत्र देवा^ अमृत. मानशाना - स्समाने योना. वध्यैरयन्त ।।5।।-

Sri Sacchidananda Avadhoota Datta Peetham Mysore

☸ 02-01-02 (1 - 5 दिव्यो गन्धर्व इति पञ्चर्चस्य सूक्तस्य मातृनामा ऋषिः। गन्धर्वाप्सरसो देवताः। 1 प्रथमर्चो विराड्जगती, 2, 3 द्वितीयातृतीययो स्त्रिष्टुप् , 4 चतुर्थ्या विराड्गायत्री, 5 पञ्चमाश्च भुरिगनुष्टुप् छन्दांसि।।)❀भुवनपतिसूक्तम्

- 2।2। 1 दिव्यो गन्धर्वः इति त्रैष्टुभं। मातृनामा गन्धर्वाप्सरो देवत्यं मातृनामानेन सूक्तेन मंत्रोक्तान् गन्धर्वाप्सरसो देवता अस्तौत्। 4 अभ्रिये दिद्युत् इति त्रिपाद्विराण्णानाम गायत्री 1 दिव्यो गन्धर्वः इति विराड्जगती 5 याः क्लन्दाः इति भुरिगनुष्टुविति।।13।।

卐 दि॒व्यो ग॑न्ध॒र्वो भुव॑नस्य॒ य॒स्पति॒- रेक॑^ ए॒व न॑म॒स्यो॒ वि॒क्ष्वीड्यः॑। तन्त्वा॑ यौमि॒ ब्रह्म॑णा दिव्य दे॒व- नम॑स्ते अस्तु दि॒वि ते॑ स॒धस्थम्।। 1।।

卐 दि॒वि. स्पृ॒ष्टो य॑ज॒त. स्सूर्य॑त्व- गवयाता ह॒रसो॒ दैव्य॑स्य। मृ॒डा. द्ग॑न्ध॒र्वो भुव॑नस्य॒ य॒स्पति॒- रेक॑^ ए॒व न॑म॒स्य. स्सु॒शेवाः॑।। 2।।

卐 अ॒न॒व॒द्याभि॒. स्सम॑ु जग्म आभि- रप्स॒रास्वपि॑ गन्ध॒र्व^ आ॑सीत्। स॒मु॒द्र^ आ॑सां॒ सद॑नं म आहु॒- र्यत. स्स॒द्य आ च॒ परा॑ च॒ यन्ति॑।। 3।।

卐 अभ्रि॑ये॒ दिद्यु॒. न्नक्ष॑त्रिये॒ या- वि॒श्वाव॑सु. ङ्गन्ध॒र्वं सच॑ध्वे। ताभ्यो॑ वो देवी॒. र्नम॒^ इत्कृ॑णोमि।। 4।।

卐 याः क्लन्दा॒. स्तमि॑षीचयो॒- ऽक्षका॑मा^ मनो॒मुहः॑। ताभ्यो॑ गन्ध॒र्वप॑त्नीभ्यो- ऽप्स॒राभ्यो॑ऽकर॒. न्नमः॑।। 5।।-

☫ 02-01-03 (1 – 6 अदोयदिति षडृचस्य सूक्तस्य अङ्गिरा ऋषिः। भैषज्यायुर्धन्वन्तरयो देवताः। 1 – 5 प्रथमादि पञ्चर्चामनुष्टुप् , 6 षष्ठ्याश्च त्रिपदा स्वराडुपरिष्टान्महाबृहती छन्दसी।।) ❀ आस्त्रावस्य भेषजम्

- 2।3।1 अदोयत् इति भैषज्यायुर्धन्वंतरि दैवतं षडर्चमानुष्टुभमंगिरा अश्यदनेन मंत्रोक्तान् देवानस्तौत्। 6 शं नो भवन्तु इति त्रिपात्स्वराडुपरिष्टान्महाबृहतीति।।

卐 अदो यदवधाव- त्यवत्क. मधि पर्वतात्। तत्ते कृणोमि भेषजं- सुभेषजँ यथाऽससि।। 1।।

卐 आदङ्गा कुविदङ्गा- शतँ या भेषजानि ते। तेषा. मसि त्वमुत्तम- मनास्त्राव. मरोगणम्।। 2।।

卐 नीचैः खनं. न्त्यसुरा^- अरुस्त्राण मिदं महत्। तदास्त्रावस्य भेषज- न्तदु रोग. मनीनशत्।। 3।।

卐 उपजीका^ उद्भरन्ति- समुद्रा. दधि भेषजम्। तदास्त्रावस्य भेषज- न्तदु रोग. मशीशमत्।। 4।।

卐 अरुस्त्राणं. मिदं मह- त्पृथिव्या^ अध्युद्धृतम्। तदास्त्रावस्य भेषज- न्तदु रोग. मनीनशत्।। 5।।

卐 शन्नो भव. न्त्वप^- ओषधय श्शिवाः। इन्द्रस्य वज्रो~ अप हन्तु रक्षस- आरा. द्विसृष्टा^ इषवः पतन्तु रक्षसाम्।। 6।।-

02-01-04 (1 - 6 दीर्घायुत्वायेति षड़्चस्य सूक्तस्य अथर्वा ऋषिः। चन्द्रमा जङ्गिडो वा देवता। 1 प्रथमर्चा विराट् प्रस्तारपङ्क्तिः, 2 - 6 द्वितीयादि षड़्चामाञ्चानुष्टुप् छन्दसी।।) ❁ दीर्घायुःप्राप्तिः

- 2।4। 1 दीर्घायुत्वाय इति चान्द्रमसमुतजंगिडदेवताकमानुष्टुभं षडर्चमथर्वानेन सूक्तेन जंगिडमणिमस्तौतिति। प्रथमा विराट् प्रस्तारपंक्तिरिति।।

卐 दीर्घायुत्वाय बृहते रणा-ऽयारिष्यन्तो दक्षमाणा. स्सदैव। मणिँ विष्कन्धदूषण- ञ्जङ्गिडं बिभृमो वयम्।। 1।।

卐 जङ्गिडो जम्भा. द्विशरा- द्विष्कन्धा. दभिशोचनात्। मणि. स्सहस्रवीर्यः- परि णः पातु विश्वतः।। 2।।

卐 अयँ विष्कन्धं सहते- ऽयँ बाधते अत्त्रिणः। अय. न्नो विश्वभेषजो- जङ्गिडः पात्वंहसः।। 3।।

卐 देवै. र्दत्तेन मणिना- जङ्गिडेन मयोभुवा। विष्कन्धं सर्वा रक्षांसि- व्यायामे सहामहे।। 4।।

卐 शणश्च मा जङ्गिडश्च- विष्कन्धा. दभि रक्षताम्। अरण्या. दन्य^ आभृतः- कृष्या^ अन्यो रसेभ्यः।। 5।।

卐 कृत्यादूषि. रयं मणि- रथो~ अरातिदूषिः। अथो~ सहस्वा. ञ्जङ्गिडः- प्र ण^ आयूंषि तारिषत् ।।6।।-

02-01-05 (1- 7 इन्द्र जुषस्वेति सप्तर्चस्य सूक्तस्य आथर्वणो भृगु ऋषिः। इन्द्रो देवता। 1 प्रथमर्चो निचृदुपरिष्टाद्बृहती, 2 द्वितीयाया विराडुपरिष्टाद्बृहती, 3 तृतीयाया विराट् पथ्या बृहती, 4 चतुर्थ्या पुरोविराड्जगती, 5 – 7 पञ्चमादि तृचस्य च त्रिष्टुप् छन्दांसि।।) इन्द्रस्य वीर्याणि

- 2 ।5।1 इन्द्र जुषस्व इति सप्तर्च त्रैष्टुभमैन्द्रं भृगुरथर्वाण इन्द्रमनेन सूक्तेनाह्वयदाद्यया पराभिश्च सर्वाभिस्तमस्तौदिति। य उपरिष्टाद्बृहत्यौ तत्र प्रथमा निचृदुत्तरा विराडिति। 3 इन्द्रस्तुराषाट् इति विराट्पथ्याबृहती। 4 आत्वा विशन्तु सुतासः इति जगती पुरोविराडिति।।14।।

卐 इन्द्र जुषस्व प्र वहा- ऽऽयाहि शूर हरिभ्याम्। पिबा सुतस्य मते. रिह- मधो. श्चकान. श्चारु. र्मदाय।। 1।।

卐 इन्द्र जठर. न्नव्यो न- पृणस्व मधो. र्दिवो न। अस्य सुतस्य स्व1(अ).- र्णोप त्वा मदा. स्सुवाचो अगुः।। 2।।

卐 इन्द्र. स्तुराषा.ण्मित्रो- वृत्रँ यो जघान यती.र्न। बिभेद वलं भृगु.र्न ससहे- शत्रू. न्मदे सोमस्य।। 3।।

卐 आ त्वा विशन्तु सुतास^ इन्द्र- पृणस्व कुक्षी विड्ढि शक्र धियेह्या नः। श्रुधी हव. ङ्गिरो मे जुष-स्वेन्द्र स्वयुग्भि. र्मत्स्वेह महे रणाय।। 4।।

卐 इन्द्रस्य नु प्राऽवोचँ वीर्याणि- यानि चकार प्रथमानि वज्री। अह. न्नहि. मन्वप. स्ततर्द- प्र वक्षणा^ अभिन. त्पर्वतानाम्।। 5।।

卐 अह. न्नहिं पर्वते शिश्रियाण- न्त्वष्टाऽस्मै वज्रं स्वर्यं. न्ततक्ष। वाश्रा^इव धेनव. स्स्यन्दमाना^- अञ्ज. स्समुद्र. मव जग्मु. रापः।। 6।।

卐 वृषायमाणो अवृणीत सोम- न्त्रिकद्रुकेष्वपिब. त्सुतस्य। आ सायकं मघवाऽदत्त वज्र- मह.न्नेनं प्रथमजा.महीनाम् ।।7।।-

## द्वितीय काण्डे द्वितीयोऽनुवाकः

02-02-01 (1 - 5 समास्त्वाग्ने इति पञ्चर्चस्य सूक्तस्य शौनक ऋषिः (सम्पत्कामः)। अग्निर्देवता। 1 – 3 प्रथमादि तृचस्य त्रिष्टुप्, 4 चतुर्थ्याश्चतुष्पदार्षि पङ्क्तिः, 5 पञ्चमाश्च विराट् प्रस्तारपङ्क्तिश्छन्दांसि।।) ❁ सपत्नहाऽग्निः

- 2। 6। 1 समास्त्वाग्ने इत्याग्ने इत्याग्नेयं त्रैष्टुभंसम्पत्कामः शौनकोऽनेन सूक्तेनाग्निमस्तौदिति।4 क्षत्रेणाग्ने स्वेन इति चतुष्पदार्षीपंक्तिः परा विराट् प्रस्तारपंक्तिरिति।।

Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 समास्त्वाऽग्न ऋतवो वर्धयन्तु- सँवथ्सरा^ ऋषयो यानि सत्या। सन्दिव्येन दीदिहि रोचनेन- विश्वा^ आ भाहि प्रदिश. श्चतस्रः।। 1।।

卐 सञ्चेध्यस्वाऽग्ने प्र च वर्धयेम- मुच्च तिष्ठ महते सौभगाय। मा ते रिष. न्नुपसत्तारो अग्ने- ब्रह्माण.स्ते यशस. स्सन्तु माऽन्ये।। 2।।

卐 त्वा.मग्ने वृणते ब्राह्मणा^ इमे- शिवो अग्ने सँवरणे भवा नः। सपत्नहाऽग्ने अभिमातिजि.द्भव- स्वे गये जागृ.ह्यप्रयुच्छन्न्।। 3।।

卐 क्षत्रेणाऽग्ने स्वेन सं रभस्व- मित्रेणाऽग्ने मित्रधा यतस्व। सजातानां मध्यमेष्ठा^- राज्ञा. मग्ने विहव्यो दीदिहीह।। 4।।

卐 अति निहो अति सृधो-ऽत्यचित्ती. रति द्विषः। विश्वा ह्यग्ने दुरिता तर त्व-मथाऽस्मभ्यं सहवीरं रयि.न्दाः।। 4।।-

02-02-02 (1 - 5 अघद्विष्टा इति पञ्चर्चस्य सूक्तस्य अथर्वा ऋषिः। भैषज्यायुर्वनस्पतयो देवताः। 1 प्रथमर्चो भुरिगनुष्टप् , 2, 3, 5 द्वितीयातृतीया पञ्चमीनामनुष्टुप्, 4 चतुर्थ्याश्च विराडुपरिष्टाद् बृहती छन्दांसि।।) ❃ शापमोचनम्

- 2।7। 1 अघ द्विष्टा इति भैषज्यायुर्वनस्पतिदेवत्यमानुष्टुभमथर्वा प्रथममनेन सूक्तेन दूर्वामस्तौदिति ।प्रथमा भुरिक्। 4 परि मे इति विराडुपरिष्टाद्बृहती।।

卐 अघद्विष्टा देवजाता- वीरु. च्छपथयोपनी। आपो मलमिव प्राणैक्षी-त्सर्वा. न्मच्छपथाः अधि।। 1।।

卐 यश्च सापत्न. श्शपथो- जाम्या. श्शपथश्च यः। ब्रह्मा यन्मन्युत. श्शपा-त्सर्व. न्तन्नो अधस्पदम्।। 2।।

卐 दिवो मूल. मवततं- पृथिव्या^ अध्युत्ततम्। तेन सहस्रकाण्डेन- परि णः पाहि विश्वतः।। 3।।

卐 परि मां परि मे प्रजां- परि णः पाहि यद्धनम्। अरातिर्नो मा तारी- न्मा न.स्तारिषु. रभिमातयः।। 4।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 शप्तार. मेतु शपथो- य. स्सुहार्त् तेन न.स्सह। चक्षु.र्मन्त्रस्य दुर्हार्दः- पृष्टी.रपि श्रृणीमसि।। 5।।

➢02-02-03(1 - 5 उदगातामिति पञ्चर्चस्य सूक्तस्य भृग्वङ्गिरा ऋषिः। वनस्पति यक्ष्मनाशनश्च देवते। 1, 2 प्रथमाद्वितीययोरनुष्टुप्, 3 तृतीयायाः पथ्या पङ्क्तिः, 4 चतुर्थ्या विराडनुष्टुप्, 5 पञ्चमाश्च निचृत्पथ्या पङ्क्तिश्छन्दांसि।।) क्षेत्रियरोगनाशनम्

➢ 2।8। 1 उदगातां।।

卐 उदगातां भगवती~- विचृतौ नाम तारके~। विक्षेत्रियस्य मुञ्चता- मधमं पाश. मुत्तमम्।। 1।।

卐 अपेयं रात्र्युच्छ-त्वपोच्छ.न्त्वभिकृत्वरीः। वीरु.त्क्षेत्रिय नाश-न्यप क्षेत्रिय. मुच्छतु।। 2।।

卐 बभ्रो. रर्जुनकाण्डस्य- यवस्य ते पलाल्या- तिलस्य तिलपिञ्ज्या। वीरु.त्क्षेत्रियनाश- न्यप क्षेत्रिय. मुच्छतु।। 3।।

卐 नमस्ते लाङ्गलेभ्यो- नम^ ईषायुगेभ्यः। वीरु.त्क्षेत्रियनाश- न्यप क्षेत्रिय. मुच्छतु।। 4।।

卐 नम. स्सनिस्रसाक्षेभ्यो- नम. स्सन्देश्येभ्यः। नमः~ क्षेत्रस्य पतये- वीरु.त्क्षेत्रिय नाश- न्यप क्षेत्रिय. मुच्छतु।। 5।।-

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

02-02-04 (1 - 5 दशवृक्ष इति पञ्चर्चस्य सूक्तस्य भृग्वङ्गिरा ऋषिः। यक्ष्मनाशनो वनस्पतिर्देवता। 1 प्रथमर्चो विराट् प्रस्तारपङ्, 2 – 5 द्वितीयादि चतसृणाञ्चानुष्टुप् छन्दसी।।) ❀ दीर्घायुःप्राप्तिः

- 2।6। 1 दशवृक्ष इति च द्वे इमे सूक्ते वानस्पत्ये यक्ष्मनाशन दैवते चानुष्टुभे भृग्वंगिरा आभ्यां मंत्रोक्तदेवते अस्तौत्। 2।8। 3 बभ्रोरर्जुन काण्डस्य इति पथ्यापंक्तिः परा विराट् परा निचृत्पथ्यापंक्तिः। 1 दशवृक्ष मुञ्च इति विराट् प्रस्तारपंक्तिरिति।।15।।

卐 दशवृक्ष मुञ्चेमं रक्षसो ग्राह्या^- अधि यैन.ञ्जग्राह पर्वसु। अथो~ एनँ वनस्पते- जीवानाँ लोक. मुन्नय।। 1।।

卐 आऽगा. दुदगा. दय- ञ्जीवानाँ व्रात. मप्यगात्। अभूदु पुत्राणां पिता- नृणाञ्च भगवत्तमः।। 2।।

卐 अधीती. रध्यगा. दय- मधि जीवपुरा^ अगन्न्। शतँ ह्यस्य भिषज- स्सहस्र. मुत वीरुधः।। 3।।

卐 देवास्ते चीति. मविद- न्ब्रह्माण^ उत वीरुधः। चीतिन्ते विश्वे देवा^- अविद. न्भूम्या. मधि।। 4।।

卐 यश्चकार स^ निष्कर-त्स^ एव सुभिषक्तमः। स^ एव तुभ्यं भेषजानि- कृणव. द्भिषजा शुचिः।। 5।।-

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

02-02-05 (1 - 8 क्षेत्रियात्वा इति अष्टर्चस्य सूक्तस्य भृग्वङ्गिरा ऋषिः। 1 प्रथमर्चो ब्रह्मणा सह निरृतिः, 2 – 7 द्वितीयादि सप्तानाञ्च द्यावापृथिव्यौ तत्रापि 2 द्वितीयायाः पूर्वपादस्याद्भिः सहाग्निः उत्तरस्य च औषधीभिः सह सोमः, 3 तृतीयायाः पूर्वपादस्य वात उत्तरस्यच चतस्रो दिशः, 4, 5 चतुर्थ्यादि पञ्चानाञ्च वातपत्नयः सूर्यः यक्ष्मा निरृति प्रसृतयश्च देवताः। 1 प्रथमायास्त्रिष्टुप्, 2 द्वितीयायाः सप्तपदाष्टिः, 3 - 5, 7, 8 तृतीयादितृचस्य सप्तम्यष्टम्योश्च सप्तपदा धृतिः, 6 षष्ठ्याश्च सप्तपदात्यष्टिश्छन्दांसि।।) ❁ पाशमोचनम्

2। 10। 1 क्षेत्रियात् त्वा इति सूक्तं प्रागुक्तर्षिगरां निर्ऋति द्यावापृथिव्यादिनाना देवत्यमष्टर्चं। प्रथमा त्रिष्टुप् तया निर्ऋतिमस्तौद्ब्रह्मणा सह सर्वाभिर्द्यावापृथिवी। द्वितीययाग्निमद्भिः सह पूर्वपादेनोत्तरेण सहौषधीभिः सोमं ।तृतीयया पूर्वपादेन वातमुत्तरेए चतस्रोदिशः। पराभिर्वातपत्नीः सूर्ययक्ष्मं निर्ऋति प्रभृतीनिचेति।2 शं ते अग्निः इति सप्तपादष्टिः।3 शं ते वातः 4 इमा या देवीः 5 तासु त्वा 8 सूर्यमृतं 7 अहा अरातिम् इति प्रत्यृचं सप्तपादो धृतयः।6 अमुक्था यक्ष्मात् इति सप्तपादत्यष्टिः। 8 एवाहं त्वाम् द्वावौष्णिहौ पादाविति।।16।।

**卐 क्षेत्रिया.त्त्वा निर्ऋत्या^ जामिशंसा- द्रुहो मुञ्चामि वरुणस्य पाशात्। अनागसं ब्रह्मणा त्वा कृणोमि- शिवे~ ते~ द्यावापृथिवी~ उभे~ स्ताम्।। 1।।**

**卐 शन्ते अग्नि. स्सहाऽद्भि. रस्तु- शं सोम. स्सहौषधीभिः। एवाऽह. न्त्वा.क्षेत्रिया. न्निर्ऋत्या^ जामिशंसा- द्रुहो मुञ्चामि वरुणस्य पाशात्।**

अनागसं ब्रह्मणा त्वा कृणोमि- शिवे~ ते द्यावापृथिवी~ उभे~ स्ताम्।।
2।।

卐 शन्ते वातो अन्तरिक्षे वयो धा- च्छन्ते भवन्तु प्रदिश. श्चतस्रः। एवाऽह. न्त्वा.क्षेत्रिया. न्निर्ऋत्या^ जामिशंसा- द्रुहो मुञ्चामि वरुणस्य पाशात्। अनागसं ब्रह्मणा त्वा कृणोमि- शिवे~ ते द्यावापृथिवी~ उभे~ स्ताम्।।
3।।

卐 इमा^ या देवीः प्रदिश. श्चतस्रो- वातपत्नी. रभि सूर्यो विचष्टे। एवाऽह. न्त्वा.क्षेत्रिया. न्निर्ऋत्या^ जामिशंसा- द्रुहो मुञ्चामि वरुणस्य पाशात्। अनागसं ब्रह्मणा त्वा कृणोमि- शिवे~ ते द्यावापृथिवी~ उभे~ स्ताम्।।
4।।।

卐 तासु त्वाऽन्त. र्जरस्या दधामि -प्र यक्ष्म^ एतु निर्ऋतिः पराचैः। एवाऽह. न्त्वा.क्षेत्रिया. न्निर्ऋत्या^ जामिशंसा- द्रुहो मुञ्चामि वरुणस्य पाशात्। अनागसं ब्रह्मणा त्वा कृणोमि- शिवे~ ते द्यावापृथिवी~ उभे~ स्ताम्।। 5।।

卐 अमुक्था^ यक्ष्मा. दुरिता. दवद्या- द्रुहः पाशा. द्ग्राह्या. श्चोदमुक्थाः। एवाऽह. न्त्वा.क्षेत्रिया. न्निर्ऋत्या^ जामिशंसा- द्रुहो मुञ्चामि वरुणस्य

पाशात्। अनागसं ब्रह्मणा त्वा कृणोमि- शिवे~ ते द्यावापृथिवी~ उभे~ स्ताम्।। 6।।

卐 अह्ना^ अराति. मविद. स्स्योन- मप्यभू. र्भद्रे सुकृतस्य लोके। एवाऽह. न्त्वा.क्षेत्रिया. न्निर्ऋत्या^ जामिशंसा- द्द्रुहो मुञ्चामि वरुणस्य पाशात्। अनागसं ब्रह्मणा त्वा कृणोमि- शिवे~ ते द्यावापृथिवी~ उभे~ स्ताम्।। 7।।

卐 सूर्य.मृत. न्तमसो ग्राह्या^ अधि- देवा मुञ्चन्तो असृज. न्निरेणसः। एवाऽह. न्त्वा.क्षेत्रिया. न्निर्ऋत्या^ जामिशंसा- द्द्रुहो मुञ्चामि वरुणस्य पाशात्। अनागसं ब्रह्मणा त्वा कृणोमि- शिवे~ ते द्यावापृथिवी~ उभे~ स्ताम्।। 8।।-

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

# ऽ◊ऽ द्वितीय काण्डे तृतीयोऽनुवाकः

02-03-01 (1 - 5 दूष्या दूषिरसीति पञ्चर्चस्य सूक्तस्य शुक्र ऋषिः। कृत्यादूषणं देवता। 1 प्रथमायाश्चतुष्पदा विराड्गायत्री, 2 -5 द्वितीयादि चतसृणाञ्च त्रिपदा परोष्णिक्, तत्रापि 4 चतुर्थ्यां पिपीलिकमध्या निचृच्छन्दांसि।।) ❀ श्रेयः प्राप्तिः

2।11। 1 दूष्या दूषिरसि इति कृत्यापरिहरण सूक्तं कृत्यादूषण देवत्यं । शुकोऽनेन स्त्राक्त्यमणिमेव सर्वरूपमित्यस्तौत्। प्रथमा चतुष्पदा विराड् गायत्री। 2 स्त्रक्त्योऽसि इति चतस्त्रस्त्रिपदाः परोष्णिहः ।4 सूरिरसि इति पिपीलिकमध्या निचृदिति।।17।।

卐 दूष्या^ दूषि.रसि- हेत्या^ हेति.रसि- मेन्या^ मेनिरसि। आप्नुहि श्रेयांस- मति सम.क्राम।। 1।।

卐 स्त्रक्त्योऽसि- प्रतिसरोऽसि- प्रत्यभिचरणोऽसि। आप्नुहि श्रेयांस- मति सम.क्राम।। 2।।

卐 प्रति त.मभि चर- यो3(ओ)ऽस्मा.न्द्वेष्टि- यँ वय.न्द्विष्मः। आप्नुहि श्रेयांस- मति सम.क्राम।। 3।।

卐 सूरि.रसि वर्चोधा^ असि- तनूपानोऽसि। आप्नुहि श्रेयांस- मति सम.क्राम।। 4।।

卐 शुक्रोऽसि भ्राजोऽसि- स्व.रसि ज्योति.रसि। आप्नुहि श्रेयांस- मति सम.क्राम।। 5।।-

02-03-02 (1 - 8 द्यावापृथिवी इति अष्टर्चस्य सूक्तस्य भरद्वाज ऋषिः। द्यावापृथिव्यादि बह्वयो देवताः (1अन्तरिक्षम्, 2 देवाः, 3 इन्द्रः, 4 आदित्या वसवोऽङ्गिरसः पितरः, 5 सोम्यासः पितरः, 6 मरुतः, 7 यमसादनम् , 8 अग्निः)। 1, 3 - 6 प्रथमर्चसृतीयादाचतसृणाञ्च त्रिष्टुप्, 2 द्वितीयाया जगती, 7 - 8 सप्तम्यष्टम्योश्चानुष्टुप् छन्दांसि।।) ❁ शत्रुनाशनम्

2।12। 1 द्यावापृथिवी उरू इति सूक्तमष्टर्चं नाना देवत्यं। त्रैष्टुभं भरद्वाजः प्रथमया द्यावापृथिवी अन्तरिक्षमुरूगायमस्तौत्। द्वितीयया देवान् परयेन्द्रं परयादित्यवस्वंगिरः पितृन् सौम्यान् परया ब्रह्मविरादुतपोऽध्यो मरुतः परया यमसदनात् परया ब्रह्मा परयाग्निमिति। तत्र 2 इदं देवाः इति जगती।7 सप्त प्राणान् इति द्वे अनुष्टुभौ। शेषः प्रतीक इति।।18।।

卐 द्यावापृथिवी~ उर्व1(अ)न्तरिक्ष- ङ्क्षेत्रस्य पत्न्युरुगायोऽद्भुतः। उताऽन्तरिक्ष. मुरु वातगोप. न्त इह तप्यन्तां मयि तप्यमाने।। 1।।

卐 इद. न्देवा. श्शृणुत ये यज्ञिया. स्थ- भरद्वाजो मह्य. मुक्थानि शंसति। पाशे स^ बद्धो दुरिते नि युज्यताँ- यो अस्माकं मन^ इदँ हिनस्ति।। 2।।

卐 इद. मिन्द्र श्शृणुहि सोमप- यत्त्वा हृदा शोचता जोहवीमि। वृश्चामि त.ङ्कुलिशेनेव वृक्षँ- यो अस्माकं मन^ इदँ हिनस्ति।। 3।।

卐 अशीतिभि. स्तिसृभि. स्सामगेभि- रादित्येभि. र्वसुभि. रङ्गिरोभिः। इष्टापूर्त. मवतु नः पितृणा- माऽमु. न्ददे हरसा दैव्येन।। 4।।

卐 द्यावापृथिवी~ अनु मा दीधीथाँ- विश्वे देवासो अनु मा रभध्वम्। अङ्गिरसः पितर. स्सोम्यासः- पाप.मार्च्छ. त्वपकामस्य कर्ता।। 5।।

卐 अतीव यो मरुतो मन्यते नो- ब्रह्म वा यो निन्दिष. त्क्रियमाणम्। तपूंषि तस्मै वृजिनानि सन्तु- ब्रह्मद्विष. न्द्यौ.रभि सन्तपाति।। 6।।

卐 सप्त प्राणा. नष्टौ मन्य- स्तां. स्ते वृश्चामि ब्रह्मणा। अया^ यमस्य सादन-मग्निदूतो अरङ्कृतः।। 7।।

卐 आ दधामि ते पदं- समिद्धे जातवेदसि। अग्नि. श्शरीरँ वेवे-ष्ट्वसुँ वागपि गच्छतु।। 8।।-

02-03-03 (1- 5 आयुर्दा अग्ने इति पञ्चर्चस्य सूक्तस्य अथर्वा ऋषिः। अग्निर्विश्वेदेवा वा देवताः। 1 - 3 प्रथमादि तृचस्य त्रिष्टुप् , 4 चतुर्थ्यानुष्टुप्, 5 पञ्चम्याश्च विराड्गती छन्दांसि।।) ❁ दीर्घायुःप्राप्तिः

- 2।13।1 आयुर्दा इति बहुदेवत्यमुताग्नेयं। त्रैष्टुभमथर्वाद्ययाग्निमस्तौत्। पराभ्यांबृहस्पतिं चन्द्रमसे वासः प्रार्थयत्। पराभ्यामायुर्विश्वान्देवान्।4 एह्यश्मानम् इत्यनुष्टुप्। 5 यस्य ते वासः इति विराड्गती।।

卐 आयुर्दा^ अग्ने जरसँ वृणानो- घृतप्रतीको घृतपृष्ठो अग्ने। घृतं पीत्वा मधु चारु गव्यं- पितेव पुत्रा. नभि रक्षता. दिमम्।। 1।।

卐 परि धत्त धत्त नो वर्चसेम- ञ्जरामृत्यु. ङ्कृणुत दीर्घ.मायुः। बृहस्पतिः प्रायच्छ. द्वास^ एत- त्सोमाय राज्ञे परिधातवा उ।। 2।।

卐 परीदँ वासो अधिथा. स्स्वस्तये-ऽभू. गृष्टीना. मभिशस्तिपा^ उ। शतञ्च ञ्जीव शरदः पुरूची^- रायश्च पोष. मुप सँ व्ययस्व।। 3।।

卐 एह्यश्मान. मा तिष्ठा-ऽश्मा भवतु ते तनूः। कृण्वन्तु विश्वे देवा^- आयुष्टे शरद. श्शतम्।। 4।।

卐 यस्य ते वासः प्रथमवास्य1(अं) हराम- स्तन्त्वा विश्वेऽवन्तु देवाः। तन्त्वा भ्रातर. स्सुवृधा वर्धमान- मनु जायन्तां बहव. स्सुजातम्।। 5।।-

02-03-04 (1 - 6 निस्सालामिति षड्चस्य सूक्तस्य चातन ऋषिः। शालाग्निर्मन्त्रोक्ता देवताः। 1, 3, 5, 6 प्रथमातृतीया पञ्चमीषष्ठीनामृचामनुष्टुप्, 2 द्वितीयाया भुरिगनुष्टुप्, 4 चतुर्थ्याश्चोपरिष्टाद्विरड्बृहती छन्दांसि।।) ❀ दस्युनाशनम्

- 2।14।1 निस्सालाम् इति षडर्चमानुष्टुभं। शालाग्निदेवत्यमुत मंत्रोक्त देवताकं चातनः सर्वाभिर्ऋग्भिर्मन्त्रोक्तान् देवान् अग्निभूतपतीन्द्रानस्तौत्। 2 निर्वः इति भुरिक्। 4 भूतपतिः- इत्युपरिष्टाद्विराड्बृहतीति।।16।।

卐 निस्साला. न्धृष्णु. न्धिषण- मेकवाद्या.ञ्जिघत्स्वम्। सर्वा. श्चण्डस्य नप्त्यो- नाशयाम. स्सदान्वाः।। 1।।

卐 निर्वो गोष्ठा. दजामसि- निरक्षा. न्निरुपानसात्। निर्वो मगुन्द्या^ दुहितरो- गृहेभ्य. श्चातयामहे।। 2।।

卐 असौ यो अधरा द्गृह- स्तत्र सन्त्वराय्यः। तत्र सेदि. न्र्युच्यतु- सर्वाश्च यातुधान्यः।। 3।।

卐 भूतपतिः निरज- त्विन्द्र. श्वेत. स्सदान्वाः। गृहस्य बुध्न आसीना- स्ता^ इन्द्रो वज्रेणाऽधि तिष्ठतु।। 4।।

卐 यदि स्थ क्षेत्रियाणाँ- यदि वा पुरुषेषिताः। यदि स्थ दस्युभ्यो जाता^- नश्यतेत. स्सदान्वाः।। 5।।

卐 परि धामा. न्यासा- माशु. गाष्ठा. मिवाऽसरन्न्। अजैषं सर्वा. नाजीन् वो- नश्यतेत. स्सदान्वाः।। 6।।-

02-03-05 (1 - 6 यथा द्यौरिति षड्चस्य सूक्तस्य ब्रह्मा ऋषिः। प्राणापान आयूंषि देवताः। त्रिपाद्गायत्री छन्दः।।) ❁ उभयप्राप्तिः

2।15। 1यथाद्यौः।।

卐 यथा द्यौश्च पृथिवी च- न बिभीतो न रिष्यतः। एवा मे प्राण मा बिभेः।। 1।।

卐 यथाऽहश्च रात्री च- न बिभीतो न रिष्यतः। एवा मे प्राण मा बिभेः।। 2।।

卐 यथा सूर्यश्च चन्द्रश्च- न बिभीतो न रिष्यतः। एवा मे प्राण मा बिभेः।। 3।।

卐 यथा ब्रह्म च क्षत्रञ्च- न बिभीतो न रिष्यतः। एवा मे प्राण मा बिभेः।। 4।।

卐 यथा॒ स॒त्य. ञ्चा॒ऽनृ॑तञ्च॒- न बि॑भी॒तो न रिष्य॑तः। ए॒वा मे॒ प्रा॒ण॒ मा बि॑भेः।। 5।।

卐 यथा॒ भू॒तञ्च॒ भव्य॒ञ्च॒- न बि॑भी॒तो न रिष्य॑तः। ए॒वा मे॒ प्रा॒ण॒ मा बि॑भेः।। 6।।-

02-03-06 (1 - 5 प्राणापानौ इति पञ्चर्चस्य सूक्तस्य ब्रह्मा ऋषिः। प्राणापान आयूंषि देवताः । 1, 3 प्रथमातृतीययो ऋचोरेकपादासुरी त्रिष्टुप्, 2 द्वितीयाया एकपादासुरी उष्णीक्, 4, 5 चतुर्थीपञ्चम्योश्च द्विपदासुरी गायत्री छन्दांसि।।) ❁ सुरक्षा

2 ।16।1 प्राणापानौ।। प्राणापानौ इत्येकपदासुरी त्रिष्टुप् द्वितीयैकपदासुर्युष्णिक्। पराचैकपदासुरी त्रिष्टुप्। 4 अग्ने वैश्वानर इति [ द्वे ] द्विपदे द्विपदे आसुरी गायत्र्यावाद्याद्य ऋतुवर्णः पराद्यो वसुवर्ण इति।।

卐 प्राणा॑पानौ मृ॒त्यो.र्मा॑ पा॒तं स्वाहा॑।। 1।।

卐 द्यावा॑पृथिवी॒~ उप॑श्रुत्या मा पा॒तं स्वाहा॑।। 2।।

卐 सूर्य॒ चक्षु॑षा मा पा॒हि स्वाहा॑।। 3।।

卐 अग्ने॑ वैश्वान॒र विश्वै॑.र्मा दे॒वैः पा॑हि॒ स्वाहा॑।। 4।।

卐 विश्व॑म्भ॒र विश्वे॑न मा॒ भर॑सा पा॒हि स्वाहा॑।। 5।।-

☫ 02-03-07 (1 - 7 ओजोसीति सप्तर्चस्य सूक्तस्य ब्रह्मा ऋषिः। प्राणापानायूंषि देवताः। 1 - 6 प्रथमादि षड्चामेकपदासुरी त्रिष्टुप्, 7 सप्तम्याश्चा सुरी उष्णिक् छन्दसी।।) ❁ बलप्राप्तिः

- 2। 17।1 ओजोसि इति त्रीणि प्रारापानायुर्देवत्यानि नानाछन्दांसि। ब्राह्मा प्रथमं षडर्चं त्रिपाद्गायत्रं तेन प्राणमप्रार्थयत्। परे द्वे एकावसाने। तत्र द्वितीयं सप्तर्चं तस्याद्याः षडेकपदा आसुरी त्रिष्टुभोऽन्त्यासुर्युष्णिक् प्रथक् प्रथमेन प्रत्यृचं मंत्रोक्ता

卐 ओजोऽस्योजो मे दा.स्स्वाहा।। 1।।

卐 सहोऽसि सहो मे दा.स्स्वाहा।। 2।।

卐 बल.मसि बलं मे दा.स्स्वाहा।। 3।।

卐 आयु.रस्यायुर्मे दा.स्स्वाहा।। 4।।

卐 श्रोत्र.मसि श्रोत्रं मे दा.स्स्वाहा।। 5।।

卐 चक्षु.रसि चक्षुर्मे दा.स्स्वाहा।। 6।।

卐 परिपाण.मसि परिपाणं मे दा.स्स्वाहा।। 7।।-

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

## ꠸ द्वितीय काण्डे चतुर्थोऽनुवाकः

02-04-01 (1 - 5 भ्रातृव्यक्षयणमिति पञ्चर्चस्य सूक्तस्य चातन ऋषिः। अग्निर्देवता। द्विपदा साम्नी बृहती छन्दः।।) ❁ शत्रुनाशनम्

2।16।1अग्नेयत् इति पंचसूक्तानि त्रिपाद्गायत्राणि। प्रतिसूक्तं पंच पंचर्चान्येकावसानानि पांचपत्यान्यथर्वा। प्रथममाग्नेयं द्वितीयंवायव्यं तृतीयंसौर्यं च तुरीयंचान्द्रं चतुर्थेन चतुर्थेन चान्द्रमसं पञ्चमेनापइति। तत्राद्यानां चतुर्णामाद्याश्चतस्रो निचृद्विषमा अंत्या स्वराड्विषमा। सर्वा एव संगताः पंच विंशतिस्त्रिपाद इति।।

卐 भ्रातृव्यक्षयण.मसि भ्रातृव्यचातनं मे दा.स्स्वाहा।। 1।।

卐 सपत्नक्षयण.मसि सपत्नचातनं मे दा.स्स्वाहा।। 2।।

卐 अरायक्षयण.मस्यरायचातनं मे दा.स्स्वाहा।। 3।।

卐 पिशाचक्षयण.मसि पिशाचचातनं मे दा.स्स्वाहा।। 4।।

卐 सदान्वाक्षयण.मसि सदान्वाचातनं मे दा.स्स्वाहा।। 5।।-

02-04-02 (1 - 5 अग्ने यत्ते इति पञ्चर्चस्य सूक्तस्य अथर्वा ऋषिः। अग्निर्देवता। 1 - 4 प्रथमादि चतसृणामेकावसाना निचृद्विषमा त्रिपदा गायत्री, 5 पञ्चम्याश्चैकावसाना भुरिग्विषमा त्रिपदा गायत्री छन्दसी।।) ❁ शत्रुनाशनम्

- 2।16।1अग्नेयत् इति पंचसूक्तानि त्रिपाद्गायत्राणि। प्रतिसूक्तं पंच पंचर्चान्येकावसानानि पांचपत्यान्यथर्वा। प्रथममाग्नेयं द्वितीयंवायव्यं तृतीयंसौर्यं च तुरीयंचान्द्रं चतुर्थेन चतुर्थेन चान्द्रमसं पञ्चमेनापइति। तत्राद्यानां चतुर्णामाद्याश्चतस्रो निचृद्विषमा अंत्या स्वराड्विषमा। सर्वा एव संगताः पंच विंशतिस्त्रिपाद इति।।

Sri Ganapathy Sachchidananda Avadhoota Datta Peetham • Mysore

卐 अग्ने यत्ते तप. स्तेन- तं प्रति तप- योऽ3(ओ)ऽस्मा. न्द्वेष्टि यँ वय. न्द्विष्मः।। 1।।

卐 अग्ने यत्ते हर. स्तेन- तं प्रति हर- योऽ3(ओ)ऽस्मा. न्द्वेष्टि यँ वय. न्द्विष्मः।। 2।।

卐 अग्ने यत्तेऽर्चि. स्तेन- तं प्रत्यर्च- योऽ3(ओ)ऽस्मा. न्द्वेष्टि यँ वय. न्द्विष्मः।। 3।।

卐 अग्ने यत्ते शोचि. स्तेन- तं प्रति शोच योऽ3(ओ)ऽस्मा. न्द्वेष्टि यँ वय. न्द्विष्मः।। 4।।

卐 अग्ने यत्ते तेज. स्तेन- तमतेजस. ङ्कृणु- योऽ3(ओ)ऽस्मा. न्द्वेष्टि यँ वय. न्द्विष्मः।।-

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

02-04-03 (1 - 5 वायोयत्ते इति पञ्चर्चस्य सूक्तस्य अथर्वा ऋषिः। वायुर्देवता। 1 - 4 प्रथमादि चतसृणामृचामेकावसाना निचृद्विषमा गायत्री, 5 पञ्चम्याश्चैकावसाना भुरिग्विषमा त्रिपदा गायत्री छन्दसी।।) ❀ शत्रुनाशनम्

卐 वायो~ यत्ते तप. स्तेन- तं प्रति तप- योऽ3(ओ)ऽस्मा. न्द्वेष्टि यँ वय. न्द्विष्मः।। 1।।

卐 वायो~ यत्ते हर. स्तेन- तं प्रति हर- योऽ3(ओ)ऽस्मा. न्द्वेष्टि यँ वय. न्द्विष्मः।। 2।।

卐 वायो~ यत्तेऽर्चिं. स्तेन- तं प्रत्यर्च- यो3(ओ)ऽस्मा. न्द्वेष्टि यँ वय. न्द्विष्मः।। 3।।

卐 वायो~ यत्ते शोचि. स्तेन- तं प्रति शोच- यो3(ओ)ऽस्मा. न्द्वेष्टि यँ वय. न्द्विष्मः।। 4।।

卐 वायो~ यत्ते तेज. स्तेन- तमतेजस. ङ्कृणु- यो3(ओ)ऽस्मा. न्द्वेष्टि यँ वय. न्द्विष्मः।।-

02-04-04 (1 - 5 सूर्ययत्ते इति पञ्चर्चस्य सूक्तस्य अथर्वा ऋषिः। सूर्योदेवता। 1 - 4 प्रथमादि चतसृणामृचामेकावसाना निचृद्विषमा त्रिपदा गायत्री, 5 पञ्चम्याश्चैकावसाना भुरिग्विषमा त्रिपदा गायत्री छन्दसी।।) ❁ शत्रुनाशनम्

卐 सूर्य यत्ते तप. स्तेन- तं प्रति तप- यो3(ओ)ऽस्मा. न्द्वेष्टि यँ वय. न्द्विष्मः।। 1।।

卐 सूर्य यत्ते हर. स्तेन- तं प्रति हर- यो3(ओ)ऽस्मा. न्द्वेष्टि यँ वय. न्द्विष्मः।। 2।।

卐 सूर्य यत्तेऽर्चिं. स्तेन- तं प्रत्यर्च- यो3(ओ)ऽस्मा. न्द्वेष्टि यँ वय. न्द्विष्मः।। 3।।

卐 सूर्य यत्ते शोचि. स्तेन- तं प्रति शोच- यो3(ओ)ऽस्मा. न्द्वेष्टि यँ वय. न्द्विष्मः।। 4।।

卐 सूर्य यत्ते तेज. स्तेन- तमतेजस. ङ्कृणु- यो3(ओ)ऽस्मा. न्द्वेष्टि यँ वय.
न्द्विष्मः।।-

🏺 02-04-05 (1 - 5 चन्द्र यत्ते इति पञ्चर्चस्य सूक्तस्य अथर्वा ऋषिः। चन्द्रमा देवता। 1 - 4 प्रथमादिचतसृणामृचामेकावसाना निचृद्विषमा त्रिपदा गायत्री, 5 पञ्चम्याश्चैकावसाना भुरिग्विषमा त्रिपदा गायत्री छन्दसी।।) ❁ शत्रुनाशनम्

卐 चन्द्र यत्ते तप. स्तेन- तं प्रति तप- यो3(ओ)ऽस्मा. न्द्वेष्टि यँ वय.
न्द्विष्मः।। 1।।

卐 चन्द्र यत्ते हर. स्तेन तं प्रति हर- यो3(ओ)ऽस्मा. न्द्वेष्टि यँ वय.
न्द्विष्मः।। 2।।

卐 चन्द्र यत्तेऽर्चि. स्तेन- तं प्रत्यर्च- यो3(ओ)ऽस्मा. न्द्वेष्टि यँ वय.
न्द्विष्मः।। 3।।

卐 चन्द्र यत्ते शोचि. स्तेन- तं प्रति शोच- यो3(ओ)ऽस्मा. न्द्वेष्टि यँ वय.
न्द्विष्मः।। 4।।

卐 चन्द्र यत्ते तेज. स्तेन- तमतेजस. ङ्कृणु- यो3(ओ)ऽस्मा. न्द्वेष्टि यँ वय.
न्द्विष्मः।।-

☃ 02-04-06 (1 - 5 आपोयदिति पञ्चर्चस्य सूक्तस्य अथर्वा ऋषिः। आपो देवताः। 1 - 4 प्रथमादिचतसृणामृचामेकावसाना समविषमा त्रिपदा गायत्री, 5 पञ्चम्याश्च स्वराड्विषमा त्रिपदा गायत्री छन्दसी।।) ❀ शत्रुनाशनम्

卐 आपो यद्व. स्तप. स्तेन- तं प्रति तपत- यो3(ओ)ऽस्मा. न्द्वेष्टि यँ वय. न्द्विष्मः।। 1।।

卐 आपो यद्वो हर- स्तेन तं प्रति हरत- यो3(ओ)ऽस्मा. न्द्वेष्टि यँ वय. न्द्विष्मः।। 2।।

卐 आपो यद्वोऽर्चि- स्तेन तं प्रत्यर्चत- यो3(ओ)ऽस्मा. न्द्वेष्टि यँ वय. न्द्विष्मः।। 3।।

卐 आपो यद्व. श्शोचि- स्तेन तं प्रति शोचत- यो3(ओ)ऽस्मा. न्द्वेष्टि यँ वय. न्द्विष्मः।। 4।।

卐 आपो यद्व. स्तेज- स्तेन तमतेजस. ङ्कृणुत- यो3(ओ)ऽस्मा. न्द्वेष्टि यँ वय. न्द्विष्मः।। 5।।-

- ☃ 02-04-07 (1 - 8 शेरभक इति अष्टर्चस्य सूक्तस्य ब्रह्मा ऋषिः। आयुर्देवता। 1 - 4 प्रथमादिचतसृणामृचां वैराजपरा पञ्चपदा पथ्यापङ्क्तिः तत्रापि 1, 2 प्रथम द्वितीययोः भुरिक् पुरउष्णिक्, 3, 4 तृतीया चतुर्थ्योः निचृत् पुरोदेवत्या पङ्क्तिः, 5 पञ्चम्याश्चतुष्पदा बृहती, 6 - 8 षष्ठ्यादि तृचस्य च चतुष्पदा भुरिग्बृहती छन्दांसि।।) शत्रुनाशनम्

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

➢ 2। 24। 1 शेरभक अष्टर्चमायुष्यं पांक्तं । ब्रह्मा सर्वाभिः प्रत्यृचं मंत्रोक्त देवतामृग्भिरस्तौदिति। प्रथमे द्वे पुरउष्णिहे परे द्वे पुरो देवत्ये पांक्तेसर्वा एताश्चतस्रो वैराजः। पराः पञ्चपदाःपथ्यापंक्तयोऽत्राद्ये भुरिजावुत्तरे निचृदाविति।5 जूर्णि चतुष्पदा बृहत्यः प्रथमा वर्जं तिस्रो भुरिज इति।।21।।

卐 शेरभक शेरभ- पुनर्वो यन्तु यातवः- पुनर् हेतिः किमीदिनः। यस्य स्थ तमत्त- यो वः प्राहै. त्तमत्त- स्वा मांसान्यत्त।। 1।।

卐 शेवृधक शेवृध- पुनर्वो यन्तु यातवः- पुनर् हेतिः किमीदिनः। यस्य स्थ तमत्त- यो वः प्राहै. त्तमत्त- स्वा मांसान्यत्त।। 2।।

卐 म्रोकाऽनुम्रोक- पुनर्वो यन्तु यातवः- पुनर् हेतिः किमीदिनः। यस्य स्थ तमत्त- यो वः प्राहै. त्तमत्त- स्वा मांसान्यत्त।। 3।।

卐 सर्पाऽनुसर्प- पुनर्वो यन्तु यातवः- पुनर् हेतिः किमीदिनः। यस्य स्थ तमत्त- यो वः प्राहै.त्तमत्त- स्वा मांसान्यत्त।। 4।।

卐 जूर्णि पुनर्वो यन्तु यातवः- पुनर् हेतिः किमीदिनीः। यस्य स्थ तमत्त- यो वः प्राहै. त्तमत्त- स्वा मांसान्यत्त।। 5।।

卐 उपब्दे पुनर्वो यन्तु यातवः- पुनर् हेतिः किमीदिनीः। यस्य स्थ तमत्त- यो वः प्राहै.त्तमत्त - स्वा मांसान्यत्त।। 6।।

卐 अर्जुनि पुनर्वो यन्तु यातवः- पुनर् हेतिः किमीदिनीः। यस्य स्थ तमत्त-

यो वः प्राहै.त्तमत्त- स्वा मांसान्यत्त।। 7।।

卐 भरूजि पुनर्वो यन्तु यातवः- पुनर् हेतिः किमीदिनीः। यस्य स्थ तमत्त-

यो वः प्राहै. त्तमत्त- स्वा मांसान्यत्त।। 8।।-

02-04-08 (1 - 5 शन्नो देवी इति पञ्चर्चस्य सूक्तस्य चातन ऋषिः। पृश्निपर्ण्यौधिर्देवता।1 – 3, 5 प्रथमादितृचस्य पञ्चम्या ऋचश्चानुनुष्टुप्, 4 चतुर्थ्याश्च भुरिगनुष्टुप् छन्दसी।।) पृश्निपर्णी

- 2।25 ।1 शं नः इति वानस्पत्यमानुष्टुभं चातनोऽनेन पृश्निपर्णीमोषधीमस्तौत्। 4 गिरिमेनाँ इति भुरिक्।।

卐 शन्नो देवी पृश्निप-र्ण्यश. न्निर्ऋत्या^ अकः। उग्रा हि कण्वजम्भनी-

ता.मभक्षि सहस्वतीम्।। 1।।

卐 सहमानेयं प्रथमा- पृश्निपर्ण्यजायत। तयाऽह. न्दुर्णाम्नां शिरो- वृश्चामि

शकुने.रिव।। 2।।

卐 अराय. मसृक्पावानँ- यश्च स्फाति.ञ्जिहीर्षति। गर्भाद. ङ्कण्व. न्नाशय-

पृश्निपर्णि सहस्व च।। 3।।

卐 गिरि.मेनाँ आ वेशय- कण्वा. न्जीवितयोपनान्। तांस्त्व न्देवि

पृश्निप.-र्ण्यग्नि. रिवाऽनुदह. न्निहि।। 4।।

卐 पराच^ एना. न्प्रणुद- कण्वा. न्जीवितयोपनान्। तमांसि यत्र गच्छन्ति-तत्क्रव्यादो अजीगमम्।। 5।।-

☬ 02-04-09 (1 – 5 एह यन्तु पशवो इति पञ्चर्चस्य सूक्तस्य सविता ऋषिः। पशवो देवताः। 1,2 प्रथमा द्वितीययो स्त्रिष्टुप्, 3 तृतीयाया उपरिष्टाद्विराड्बृहती, 4 चतुर्थ्या भुरिगनुष्टुप्, 5 पञ्चम्याश्चानुष्टुप् छन्दांसि।।) ❁ पशुसंवर्धनम्

- 2।26। 1 एह यन्तु इति पशव्यं त्रैष्टुभं सवितानेन पशूनभ्यस्तौदिति।3 सं सं स्त्रवन्तु इति उपरिष्टाद्विराड्बृहती। 4 सं सिञ्चामि इति द्वे अनुष्टुभौ। पूर्वा तत्र भुरिक्।।

卐 एह यन्तु पशवो ये परेयु- र्वायु. र्येषां सहचार. ञ्जुजोष। त्वष्टा येषां रूपधेयानि वेदा-ऽस्मि. न्तान्गोष्ठे सविता नि यच्छतु।। 1।।

卐 इम. ङ्गोष्ठं पशव. स्सं स्त्रवन्तु- बृहस्पति. रानयतु प्रजानन्न्। सिनीवाली नय त्वाऽग्र. मेषा- माजग्मुषो अनुमते नि यच्छ।। 2।।

卐 संसं स्त्रवन्तु पशव- स्समश्वा. स्स.मु पूरुषाः। सन्धान्यस्य या स्फाति-स्संस्त्राव्येण हविषा जुहोमि।++। 3।।

卐 सं सिञ्चामि गवा. क्षीरं- समाज्येन बलं रसम्। संसिक्ता^ अस्माकँ वीरा^ - ध्रुवा^ गावो मयि गोपतौ।। 4।।-

卐 आ हरामि गवा. क्षीर- माऽहार्ष न्धान्य1(अं) रसम्। आहृता^ अस्माकँ वीरा^- आ पत्नी. रिद. मस्तकम्।। 5।।-

## द्वितीय काण्डे पञ्चमोऽनुवाकः

02-05-01 (1 - 7 नेच्छत्रुरिति सप्तर्चस्य सूक्तस्य कपिञ्जल ऋषिः। 1 – 5 प्रथमादि पञ्चर्चामोषधिः, 6 षष्ठ्या रुद्रः, 7 सप्तम्याश्चेन्द्रो देवताः। अनुष्टुप्छन्दः।।) शत्रुपराजयः 2।27।1 नेच्छत्रुः इति सप्तर्चं वानस्पत्यमानुष्टुभं कपिञ्जलः।।प्रथमयारि निरोजस्त्वमप्रार्थयन्मंत्रोक्तमौषाधिं पराभिश्चतसृभिश्चौषधिमस्तौत्। परया रौद्रयां रुद्रं परयैन्द्रमिति।।

卐 नेच्छत्रुः प्राश. ञ्जयाति- सहमानाऽभिभू. रसि। प्राशं प्रतिप्राशो ज-ह्यरसा. न्कृण्वोषधे।। 1।

卐 सुपर्ण.स्त्वाऽन्वविन्द- त्सूकर.स्त्वाऽखन. न्नसा। प्राशं प्रतिप्राशो ज-ह्यरसा. न्कृण्वोषधे।। 2।।

卐 इन्द्रो ह चक्रे त्वा बाहा-वसुरेभ्य. स्तरीतवे। प्राशं प्रतिप्राशो ज-ह्यरसा. न्कृण्वोषधे।। 3।।

卐 पाटा. मिन्द्रो व्याश्ना- दसुरेभ्य. स्तरीतवे। प्राशं प्रतिप्राशो ज-ह्यरसा. न्कृण्वोषधे।। 4।।

卐 तयाऽहं शत्रू. न्त्साक्ष- इन्द्र. स्सालावृकाँ इव। प्राशं प्रतिप्राशो ज-ह्यरसा. न्कृण्वोषधे।। 5।।

卐 रुद्र जलाषभेषज- नीलशिखण्ड कर्मकृत्। प्राशं प्रतिप्राशो ज-ह्यरसा. न्कृण्वोषधे।। 6।।

卐 तस्य प्राश. न्त्व. ञ्जहि- यो न^ इन्द्राभिदासति। अधि नो ब्रूहि शक्तिभिः- प्राशि. मामुत्तर. ङ्कृधि।। 7।।-

02-05-02 (1 – 5 तुभ्यमेव जरिमन्निति पञ्चर्चस्य सूक्तस्य शम्भु ऋषिः। 1 प्रथमर्चो जरिमा आयुश्च , 2 द्वितीयाया मित्रावरोणौ, 3 तृतीयाया जरिमा, 4 - 5 चतुर्थी मञ्चम्योः द्यावापृथिव्यादयो देवताः। प्रथमाया जगती, 2 – 4 द्वितीयादि तृचस्य त्रिष्टुप्, 5 पञ्चम्याश्च भुरिक्त्रिष्टुप् छन्दांसि।।) ❀ दीर्घायुःप्राप्ति

- 2। 28।1 तुभ्यमेव इति त्रैष्टुभं। जरिमायुर्दैवतं। शंभू प्रथमया जरिमाण मभिष्टूयाप्रार्थयदायुश्च। द्वितीयया मित्रावरुणौ परया पुनर्जरिमाणं। पराभिर्द्यावापृथिव्यादिदेवानायुश्च । प्रथमा जगत्यंत्याभुरिगिति।।22।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

卐 तुभ्य.मेव जरिम. न्वर्धता मयं- मेम. मन्ये मृत्यवो हिंसिषु. श्शतँ ये। मातेव पुत्रं प्रमना^ उपस्थे- मित्र^ एनं मित्रिया. त्पात्वंहसः।। 1।।

卐 मित्र^ एनँ वरुणो वा रिशादा- जरामृत्यु. ङ्कृणुतां सँविदानौ। तदग्नि. र्होता वयुनानि विद्वा.-न्विश्वा देवाना. ञ्जनिमा विवक्ति।। 2।।

卐 त्व.मीशिषे पशूनां पार्थिवानाँ- ये जाता^ उत वा ये जनित्राः। मेमं प्राणो हासी. न्मो~ अपानो- मेमं मित्रा^ वधिषु.र्मो~ अमित्राः।। 3।।

卐 द्यौष्ट्वा पिता पृथिवी माता- जरा मृत्यु. ङ्कृणुतां सँविदाने~। यथा जीवा^ अदिते. रुपस्थे- प्राणापानाभ्या. ङ्गुपित. श्शतं हिमाः।। 4।।

卐 इम.मग्न आयुषे वर्चसे नय- प्रियं रेतो वरुण मित्र राजन्न्। मातेवाऽस्मा अदिते शर्म यच्छ- विश्वे देवा^ जरदष्टि. र्यथाऽसत् ।।5।।-

02-05-03 (1 – 7 पार्थिवस्य इति सप्तर्चस्य इति सूक्तस्य अथर्वा ऋषिः। बह्व्यो देवताः (1 अग्निः सूर्यः बृहस्पतिः, 2 जातवेदाः सविता, 3 इन्द्रः , 4 – 5 द्यावापृथिवी, विश्वेदेवाः, मरुतः, आपः, 6 आश्विनौ, 7 इन्द्रः)। 1 प्रथमाया अनुष्टुप्, 2,3, 5 - 7 द्वितीयातृतीययोः पञ्चम्यादि तृचस्य च त्रिष्टुप्, 4 चतुर्थ्याश्च पराबृहती निचृत्प्रस्तारपङ्क्तिश्छन्दांसि।।) ❀ दीर्घायुष्यम्

- 2।26।1 पार्थिवस्य इति सप्तर्चं त्रैष्टुभं बहुदेवत्यमथर्वाप्रथमा वैश्वदेवी तया देवानायुष्यमात्मनेऽप्रार्थयत् द्वितीयायाः प्रथमेनायुर्जातवेदसं परेण पादेन प्रजां त्वष्टारं तृतीयेन सवितारं धनं शतायुश्च परयेन्द्रं सौप्रजास्त्वादि पराभ्यां द्यावापृथिव्यौ

卐 पार्थिवस्य रसे देवा^- भगस्य तन्वो3(ओ) बले। आयुष्य. मस्मा अग्नि. स्सूर्यो- वर्च^ आ धा. द्बृहस्पतिः।। 1।।

卐 आयु.रस्मै धेहि जातवेदঃ- प्रजा. न्त्वष्ट. रधि नि धेह्यस्मै। राय.स्पोषं सवित. रा सुवाऽस्मै- शत. ञ्जीवाति शरद.स्तवाऽयम्।। 2।।

卐 आशी.र्ण^ ऊर्ज. मुत सौप्रजास्त्व- न्दक्ष. न्धत्त. न्द्रविणं सचेतसौ। जय. न्क्षेत्राणि सहसाऽय. मिन्द्र कृण्वानो- अन्या. नधरा. न्त्सपत्नान्।। 3।।

卐 इन्द्रेण दत्तो वरुणेन शिष्टो- मरुद्भि. रुग्रঃ प्रहितो न^ आगन्न्। एष^ वा. न्द्यावापृथिवी~ उपस्थे- मा क्षुध. न्मा तृषत्।। 4।।

卐 ऊर्जं.मस्मा ऊर्जस्वती≈ धत्तं- पयो अस्मै पयस्वती≈ धत्तम्। ऊर्जं.
मस्मै द्यावापृथिवी≈ अधाताँ- विश्वे देवा^ मरुत^ ऊर्जं. मापः।। 5।।

卐 शिवाभि.ष्टे हृदय. न्तर्पया- म्यनमीवो मोदिषीष्ठा. स्सुवर्चाः। सवासिनौ
पिबतां मन्थ. मेत- मश्विनो^ रूपं परिधाय मायाम्।। 6।।

卐 इन्द्र^ एता.न्थ्ससृजे विद्धो अग्र- ऊर्जां स्वधा. मजरां सा त एषा। तया
त्व.ञ्जीव शरद. स्सुवर्चा^- मा त आ सुस्रो. द्भिषजस्ते अक्रन्न्।। 7।।-

02-05-04 (1 - 5 यथेदं भूम्यामिति पञ्चर्चस्य सूक्तस्य प्रजापति ऋषिः। अश्विनौ देवते। 1 प्रथमायाः पथ्या पङ्क्तिः, 2, 4,5 द्वितीयाचतुर्थी पञ्चमीनामनुष्टुप्, 3 तृतीयायाश्च भुरिगनुष्टुप् छन्दांसि।।)

❀ कामिनीमनोऽभिमुखीकरणम्

➢ 1।30।1 यथेदम् इति प्रजापतिराश्विनमानुष्टुभं कामिनी मनोऽभिमुखीकरणकामः प्रथमया भूतृणं दृष्टान्तेन मनोमंथनमादध्यात्। परयाश्विनौ पराभिस्तदर्थमोषधिमस्तौदंत्यया दम्पती परस्परंमनोग्रहणमाकुरुताम्।।

卐 यथेदं भूम्या^ अधि- तृणँ वातो मथायति। एवा मथ्नामि ते मनो- यथा
मा.ङ्कामिन्यसो- यथा म.न्नाऽप गा^ असः।। 1।।

卐 सञ्चे.न्नयाथो अश्विना- कामिना सञ्च वक्षथः। सँ वां भगासो अग्मत -
सञ्चित्तानि समु व्रता।। 2।।

卐 यत्सुपर्णा^ विवक्षवो- अनमीवा^ विवक्षवः। तत्र मे गच्छता. द्धवं-
शल्य^इव कुल्मलँ यथा।। 3।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 यदन्तर. न्तद्वाह्यँ- यद्वाह्य. न्तदन्तरम्। कन्यानाँ विश्वरूपाणां- मनो गृभायौषधे।। 4।।

卐 एय. मग. न्पतिकामा- जनिकामोऽह. माऽगमम्। अश्वः कनिक्रद. द्यथा- भगेनाऽहं सहाऽऽगमम्।। 5।।-

02-05-05 (1 – 5 इन्द्रस्य या महीरिति पञ्चर्चस्य सूक्तस्य काण्व ऋषिः। मही, चन्द्रमा वा देवता। 1 प्रथमाया अनुष्टुप्। 2, 4 द्वितीया चतुर्थ्योरुपरिष्टाद्विराट् बृहती, 3, 5 तृतीयापञ्चम्योश्चार्षि त्रिष्टुप् छन्दांसि।।) ❀ क्रिमिजम्भनम्

- 2। 31। 1 इन्द्रस्य या इति महीदेवत्यमुत चान्द्रमसमानुष्टुभं काण्वः। प्रथमया महीमस्तुवत् पराभिः सर्वाभिश्च कृमिजम्भनमादध्यादिति।2 दृष्टमदृष्टम् इत्युपरिष्टाद्विराड्बृहती। परार्षी त्रिष्टुप्।4 अन्वान्त्यम् इति प्रागुक्ता बृहती। 5 ये क्रिमयः इति प्रागुक्ता त्रिष्टुप्।

卐 इन्द्रस्य या मही दृष-त्क्रिमे. र्विश्वस्य तर्हणी। तया पिनष्मि स.ङ्क्रिमी- न्दृषदा खल्वाँ इव।। 1।।

卐 दृष्ट. मदृष्ट.मतृह- मथो~ कुरूरु. मतृहम्। अल्गण्डू. न्त्सर्वा. न्छलुना न्क्रिमी- न्वचसा जम्भयामसि।। 2।।

卐 अल्गण्डू. न्हन्मि महता वधेन- दूना^ अदूना^ अरसा^ अभूवन्न्। शिष्टा. नशिष्टा. न्नि तिरामि वाचा- यथा क्रिमीणा. न्नकि. रुच्छिषातै।। 3।।

卐 अन्वान्त्र्यं शीर्षण्य1(अ)-मथो~ पार्ष्टेय. क्रिमीन्। अवस्कवँ व्यध्वर. ङ्क्रिमीन् -वचसा जम्भयामसि।। 4।।

卐 ये क्रिमयः पर्वतेषु वने-ष्वोषधीषु पशुष्वप्स्व1(अ)न्तः। ये अस्माकं. न्तन्वं. माविविशु- स्सर्वं. न्तद्धन्मि जनिम क्रिमीणाम्।। 5।।-

## ≈◊≈ द्वितीय काण्डे षष्ठोऽनुवाकः

02-06-01 (1 – 6 उद्यन्नादित्यः इतिषड्चस्य सूक्तस्य काण्व ऋषिः। आदित्यो देवता। 1 प्रथमर्चस्त्रिपाद्भुरिग्गायत्री, 2 – 4 द्वितीयादि चतसृणामनुष्टुप्, 6 षष्ठ्या पथ्याश्च चतुष्पान्निचृदुष्णिक् छन्दांसि।।)

❃ क्रिमिनाशनम्

- 2।32।1उद्यन्नादित्यःइत्यादित्यदेवत्यं षड्चमानुष्टुभम् अनेनोक्त ऋषिरुक्त क्रियामकरोदिति। प्रथमा त्रिपाद्भुरिग्गायत्री। 6 प्र ते श्रृणामि श्रृंगे इति चतुष्पान्निचृत् उष्णिगिति।।24।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 उद्य. न्नादित्यः क्रिमीं न्हन्तु- निम्रोच. न्हन्तु रश्मिभिः। ये अन्तः क्रिमयो गवि।। 1।।

卐 विश्वरूप. ञ्चतुरक्ष- ङ्क्रिमिं सारङ्ग. मर्जुनम्। श्रृणाम्यस्य पृष्टी- रपि वृश्चामि यच्छिरः।। 2।।

卐 अत्रिवद्वः क्रिमयो हन्मि- कण्वव. ज्जमदग्निवत्। अगस्त्यस्य ब्रह्मणा- सं पिनष्म्यह. ङ्क्रिमीन्।।3।।

卐 हतो राजा क्रिमीणा- मुतैषां स्थपतिर् हतः। हतो हतमाता क्रिमिर्- हतभ्राता हतस्वसा।। 4।।

卐 हतासो अस्य वेशसो- हतासः परिवेशसः। अथो~ ये क्षुल्लका^ इव-
सर्वे ते क्रिमयो हताः।। 5।।

卐 प्र ते शृणामि शृङ्गे≈ - याभ्याँ वितुदायसि। भिनद्मि ते कुषुम्भँ- यस्ते
विषधानः।। 6।।-

02-06-02 (1-7 अक्षीभ्यामिति सप्तर्चस्य सूक्तस्य ब्रह्मा ऋषिः। यक्ष्मविबर्हणं देवता। 1, 2 प्रथमाद्वितीययोर्ऋचोरनुष्टुप्, 3 तृतीयाया ककुम्मत्यनुष्टुप्, 4 चतुर्थ्याश्चतुष्पदा भुरिगुष्णिक्, 5 पञ्चम्या उपरिष्टाद्विराड्बृहती, 6 षष्ठ्या उष्णिग्गर्भानिचृदनुष्टुप्, 7 सप्तम्याश्च पथ्यापङ्क्तिश्छन्दांसि।।) ❁ यक्ष्मविबर्हणम्

- 2।33।1 अक्षीभ्यां ते इति यक्ष्मविबर्हणं सप्तर्चं चान्द्रमसमायुष्यमानुष्टुभं। ब्रह्मानेन सर्वेण सूक्तेन सर्वांगतो। यक्ष्मनिर्गमनमादध्यात्। 5 उरूभ्यां ते इत्युपरिष्टाद्विराड्बृहती। 3हृदयात्ते इति ककुम्मती। 4 आन्त्रेभ्यः इति चतुष्पादभुरिगुष्णिक्।6 अस्थिभ्यः इत्युष्णिग्गार्भा निचृदनुष्टुप्। 7 अङ्गे अङ्गे इति पथ्यापंक्तिः।।

卐 अक्षीभ्या.न्ते नासिकाभ्या- ङ्कर्णाभ्या. ञ्छुबुका.दधि। यक्ष्मं शीर्षण्यं
मस्तिष्का- ज्जिह्वाया^ वि वृहामि ते।। 1।।

卐 ग्रीवाभ्यस्त उष्णिहाभ्यः- कीकसाभ्यो अनूक्यात्। यक्ष्म. न्दोषण्य1(अ)
मंसाभ्यां- बाहुभ्याँ वि वृहामि ते।। 2।।

卐 हृदया.त्ते परि क्लोम्नो- हलीक्ष्णा. त्पार्श्वाभ्याम्। यक्ष्मं मतस्नाभ्यां प्लीह्नो-
यक्न.स्ते वि वृहामसि।। 3।।

卐 आन्त्रेभ्य.स्ते गुदाभ्यो- वनिष्ठो रुदरा.दधि। यक्ष्म. ङ्कुक्षिभ्यां प्लाशे- र्नाभ्या^ वि वृहामि ते।। 4।।

卐 ऊरुभ्या.न्ते~ अष्ठीवद्ध्यां- पार्ष्णिभ्यां प्रपदाभ्याम्। यक्ष्मं भसद्य1(अं) श्रोणिभ्यां- भासदं भंससो वि वृहामि ते।। 5।।

卐 अस्थिभ्य.स्ते मज्जभ्य- स्स्नावभ्यो धमनिभ्यः। यक्ष्मं पाणिभ्या. मङ्गुलिभ्यो- नखेभ्यो वि वृहामि ते।। 6।।

卐 अङ्गेअङ्गे लोम्निलोम्नि- यस्ते पर्वणिपर्वणि। यक्ष्म. न्त्वचस्य. न्ते वय- ङ्कश्यपस्य वीबर्हेण- विष्वञ्चँ वि वृहामसि।। 7।।-

02-06-03 (1 – 5 य ईशे पशुपतिरिति पञ्चर्चस्य सूक्तस्य अथर्वा ऋषिः। 1 प्रथमर्चः पशुपतिः, 2 द्वितीयाया देवाः, 3 तृतीयाया अग्निर्विश्वकर्मा च, 4 चतुर्थ्या वायुः प्रजापतिश्च, 5 पञ्चम्याश्चाशीर्देवताः। त्रिष्टुप् छन्दः।।) ❃ पशवः

- 2।34।1 य ईशे इति पाशुपत्यं पशुभागकरणं त्रैष्टुभमथर्वा। प्रथमया पशुपतिमभिष्टूय परा पश्चाप्रार्थयदंततो द्वितीयया देवान् परयाग्निं विश्वकर्म्माणं परया वायुं प्रजापतिमंत्यया यज्ञियं पशुमाशिषा प्रारुदत्।।

卐 य^ ईशे पशुपतिः पशूना- ञ्चतुष्पदा. मुत यो द्विपदाम्। निष्क्रीत. स्स^ यज्ञियं भाग. मेतु- राय.स्पोषा^ यजमानं सचन्ताम्।। 1।।

卐 प्रमुञ्चन्तो भुवनस्य रेतो- गातु. न्धत्त यजमानाय देवाः। उपाऽकृतं शशमानँ यदस्था- त्प्रिय. न्देवाना. मप्येतु पाथः।। 2।।

卐 ये बध्यमानं मनु दीध्याना^- अन्वैक्षन्त मनसा चक्षुषा च। अग्निष्टा.नग्रे प्र मुमोक्तु देवो- विश्वकर्मा प्रजया संरराणः।। 3।।

卐 ये ग्राम्याः पशवो विश्वरूपा^- विरूपा. स्सन्तो बहुधैकरूपाः। वायु.ष्टानग्रे प्र मुमोक्तु देवः- प्रजापतिः प्रजया संरराणः।। 4।।

卐 प्रजानन्तः प्रति गृह्णन्तु पूर्वे- प्राण. मङ्गेभ्यः पर्याचरन्तम्। दिव. ङ्गच्छ प्रति तिष्ठा शरीरै- स्स्वर्गं याहि पथिभि. र्देवयानैः।। 5।।-

02-06-04 (1 -5 ये भक्षयन्त इति पञ्चर्चस्य सूक्तस्य अङ्गिरा ऋषिः। विश्वकर्मा देवता। प्रथमर्चो बृहतीगर्भा त्रिष्टुप्, 2,3 द्वितीयातृतीययोस्त्रिष्टुप्, 4, 5 चतुर्थ्या पञ्चम्योश्च भुरिक्त्रिष्टुप् छन्दांसि।।) ❀ विश्वकर्मा

- 2।35।1 ये भक्षयन्तः इति वैश्वकर्माणं त्रैष्टुभमंगिरा सर्वेणानेन सूक्तेन तं विश्वकर्मएमेवास्तौत्।प्रथमा बृहतीगर्भा। 4 घोरा ऋषयः 5यज्ञस्य चक्षुः इति भुरिजौ।।

卐 ये भक्षयन्तो न वसू.न्यानृधु- र्यानग्नयो अन्वतप्यन्त धिष्ण्याः। या तेषा. मवया^ दुरिष्टि- स्स्विष्टि.न्न.स्ता. ङ्कृणव. द्विश्वकर्मा।। 1।।

卐 यज्ञपति. मृषय^ एनसाऽऽहु- र्निर्भक्तं प्रजा^ अनुतप्यमानम्। मथव्या. न्स्तोका. नप यान् रराध- स.न्नष्टेभि. स्सृजतु विश्वकर्मा।। 2।।

卐 अदान्या. न्त्सोमपा.न्मन्यमानो- यज्ञस्य विद्वा. न्त्समये न धीरः। यदेन. श्चकृवा. न्बद्ध^ एष^- तँ विश्वकर्म.न्प्र मुञ्चा स्वस्तये।। 3।।

卐 घोरा^ ऋषयो नमो अस्त्वेभ्य- श्चक्षु. र्यदेषां मनसश्च सत्यम्। बृहस्पतये महिष द्युम. न्नमो- विश्वकर्म. न्नमस्ते पाह्य1(अ)स्मान्।। 4।।

卐 यज्ञस्य चक्षुः प्रभृति. र्मुखञ्च- वाचा श्रोत्रेण मनसा जुहोमि। इमँ यज्ञँ. विततँ विश्वकर्मणा-ऽऽ देवा^ यन्तु सुमनस्यमानाः।। 5।।-

- 02-06-05 (1 - 8 आ नो अग्ने इति अष्टर्चस्य सूक्तस्य पतिवेदन ऋषिः। 1 प्रथमर्चोऽग्निः, 2 द्वितीयाया सोमादयः, 3 तृतीयाया अग्निषोमौ, 4 चतुर्थ्या इन्द्रः, 5 पञ्चम्याः सूर्यः, 6 षष्ठ्या धनपतिः, 7 सप्तम्या हिरण्यं भगश्च, 8 अष्यम्याश्चोषधिर्देवताः। 1 प्रथमाया भुरिगनुष्टुप्, 2, 5- 7 द्वितीयायाः पञ्चम्यादि तृचस्य चानुष्टुप्, 3,4 तृतीया चतुर्थ्योस्त्रिष्टुप्, 8 अष्टम्याश्च निचृत्पुरउष्णिक् छन्दांसि।।) ❁ पतिवेदनम्
- 2।36।1 आनो अग्ने इत्यष्टर्चमग्नीषोमीयं त्रैष्टुभं पतिवेदनः प्रथमयाग्निमस्तौत् द्वितीयया सोमादीन् देवान् परयाग्नीषोमौ परया त्विन्द्रं परया सूर्यं परया धनपतिं परया हिरण्यादिभगं चांत्ययौपधिमप्रार्थयदिति। प्रथमा भुरिक्। 2 सोमजुष्टं 5 भगस्य नावम् इति तिस्रोऽनुष्टुभोऽन्त्या निचृत्पुरउष्णिगिति।।25

इति ब्रह्मवेदोक्त मंत्राणां बृहत्सर्वानुक्रमणिकायां प्रथमः पटलः समाप्तः।।

卐 आ नो अग्ने सुमतिं सम्भलो गमे- दिमा. ङ्कुमारीं सह नो भगेन। जुष्टा वरेषु समनेषु वल्गु- रोषं पत्या सौभग. मस्त्वस्यै।। 1 ।।

卐 सोमजुष्टं ब्रह्मजुष्ट- मर्यम्णा सम्भृतं भगम्। धातु. र्देवस्य सत्येन- कृणोमि पतिवेदनम्।। 2।।

卐 इय.मग्ने नारी पतिँ विदेष्ट- सोमो हि राजा सुभगा. ङ्कृणोति। सुवाना पुत्रा. न्महिषी भवाति- गत्वा पतिं सुभगा वि राजतु।। 3।।

卐 यथाऽऽखरो मघवं.श्चारु.रेष- प्रियो मृगाणां सुषदा बभूव। एवा भगस्य जुष्टेय. मस्तु नारी- संप्रिया पत्याऽविराधयन्ती।। 4।।

卐 भगस्य नाव.मा रोह- पूर्णा मनुपदस्वतीम्। तयोप प्रतारय- यो वरः प्रतिकाम्यः।। 5।।

卐 आ क्रन्दय धनपते- वर. मामनस. ङ्कृणु। सर्वं प्रदक्षिण. ङ्कृणु- यो वरः प्रतिकाम्यः।। 6।।

卐 इदं हिरण्य. ङ्गुल्गु-ल्वय. मौक्षो अथो भगः। एते पतिभ्य स्त्वा.मदुः- प्रतिकामाय वेत्तवे।। 7।।

卐 आ ते नयतु सविता नयतु- पति. र्यः प्रतिकाम्यः। त्वमस्यै धेह्योषधे।। 8।।-

# ७ तृतीयं काण्डम्

## ७ तृतीये काण्डे प्रथमोऽनुवाकः

03-01-01 (1 - 6 षड्टचस्य सूक्तस्याथर्वा ऋषिः। 1 प्रथमर्चोऽग्निः, 2 द्वितीयाया मरुतः, 3-6 तृतीयादि चतसृणाश्चेन्द्रो देवताः। 1, 4 प्रथमा चतुर्थ्योस्त्रिष्टुप्, 2 द्वितीयाया विराङ्गर्भा भुरिक्त्रिष्टुप्, 3, 6 तृतीयाषष्ठयोरनुष्टुप्, 5 पञ्चम्याश्च विराट् पुरउष्णिक् छन्दांसि।।) शत्रुसेना संमोहनम्

卐 अग्नि.र्न श्शत्रू. न्प्रत्येतु विद्वा- न्प्रतिदह. न्नभिशस्ति.मरातिम्। स^ सेनां मोहयतु परेषा- न्निर्हस्तांश्च कृणव. ज्जातवेदाः।। 1।।

卐 यूय. मुग्रा^ मरुत^ ईदृशे स्था-ऽभि प्रेत मृणत सहध्वम्। अमीमृण. न्वसवो नाथिता^ इमे- अग्नि.र्ह्येषा. न्दूतः प्रत्येतु विद्वान्।। 2।।

卐 अमित्रसेनां मघव- न्नस्मा. न्छत्रूयती. मभि। युव. न्तानिन्द्र वृत्रह- न्नग्निश्च दहतं प्रति।। 3।।

卐 प्रसूत^ इन्द्र प्रवता हरिभ्यां- प्र ते वज्रः प्रमृण. न्नेतु शत्रून्। जहि प्रतीचो अनूचः पराचो- विष्व.क्सत्य. ङ्कृणुहि चित्त. मेषाम्।। 4।।

卐 इन्द्र सेनां- मोहयाऽमित्राणाम्। अग्ने. र्वातस्य ध्राज्या- ता.न्विषूचो वि नाशय।। 5।।

卐 इन्द्र. स्सेनां मोहयतु- मरुतो घ्नन्त्वोजसा। चक्षूंष्यग्नि. राद॑त्तां- पुन.रेतु पराजिता।। 6।।-

03-01-02 (1 - 6 षड्रृचस्य सूक्तस्याथर्वा ऋषिः । 1, 2 प्रथमाद्वितीययोर्ऋचोरग्निः, 3 - 4 तृतीयाचतुर्थ्योरिन्द्रः, 5 पञ्चम्या द्यौः, 6 षष्ठ्याश्च मरुतो देवताः। 1, 5 - 6 प्रथमा पञ्चमी षष्ठीनां त्रिष्टुप्, 2 - 4 द्वितीयादि तृचस्य चानुष्टुप् छन्दांसि।।) ❁ शत्रुसेना संमोहनम्

卐 अग्नि.र्नो दूतः प्रत्येतु विद्वा- न्प्रतिदह. न्नभिशस्ति. मरातिम्। स चित्तानि मोहयतु परेषा- न्निर्हस्तांश्च कृणव. ज्जातवेदाः।। 1।।

卐 अय. मग्नि. रमूमुह- द्यानि चित्तानि वो हृदि। वि वो धम. त्वोकसः- प्र वो धमतु सर्वतः।। 2।।

卐 इन्द्र चित्तानि मोहय-न्नर्वा.ङाकूत्या चर। अग्ने.र्वातस्य ध्राज्या- ता.न्विषूचो वि नाशय।। 3।।

卐 व्याकूतय एषा मिता-ऽथो चित्तानि मुह्यत। अथो यदद्यैषां हृदि- तदेषां परि निर्जहि।। 4।।

卐 अमीषा. श्चित्तानि प्रतिमोहयन्ती- गृहाणाऽङ्गान्यप्वे परेहि। अभि प्रेहि निर्दह हृत्सु शोकै- र्ग्राह्याऽमित्रां. स्तमसा विध्य शत्रून्।। 5।।

卐 असौ या सेना मरुतः परेषा- मस्मा. नैत्यभ्योजसा स्पर्धमाना। ताँ विध्यत तमसाऽपव्रतेन- यथैषा. मन्यो अन्य.न्न जानात्।। 6।।-

☸ 03-01-03 (1 - 6 षडृचस्य सूक्तस्याथर्वा ऋषिः। अग्निर्मन्त्रोक्ता वा देवताः। 1 - 2, 4 प्रथमा द्वितीया चतुर्थोनामृचां त्रिष्टुप्, 3 तृतीयायाश्चतुष्पदा भुरिक्पङ्क्तिः, 5 - 6 पञ्चमी षष्ठ्योश्चानुष्टुप् छन्दांसि।।) ❈ स्वराज्ये राज्ञः पुनः स्थापनम्

卐 अचिक्रद. त्स्वपा^ इह भुव- दग्ने व्यचस्व रोदसी~ उरूची~। युञ्जन्तु त्वा मरुतो विश्ववेदस^- आऽमु. न्नय नमसा रातहव्यम्।। 1।।

卐 दूरे चि.त्सन्त मरुषास^ इन्द्र- मा च्यावयन्तु सख्याय विप्रम्। यद्गायत्रीं बृहती. मर्क. मस्मै- सौत्रामण्या दधृषन्त देवाः।। 2।।

卐 अद्भ्यस्त्वा राजा वरुणो ह्वयतु- सोम.स्त्वा ह्वयतु पर्वतेभ्यः। इन्द्र.स्त्वा ह्वयतु विड्भ्य^ आभ्य- श्श्येनो भूत्वा विश^ आ पतेमाः।। 3।।

卐 श्येनो हव्य.न्नयत्वा परस्मा- दन्यक्षेत्रे अपरुद्ध. ञ्चरन्तम्। अश्विना पन्था.ङ्कृणुतां सुगन्त -इमं सजाता^ अभिसँविशध्वम्।। 4।।

卐 ह्वयन्तु त्वा प्रतिजनाः- प्रति मित्रा^ अवृषत। इन्द्राग्नी~ विश्वे देवा- स्ते विशि क्षेम.मदीधरन्न्।।5।।

卐 यस्ते हवं विवद-त्सजातो यश्च निष्ट्यः। अपाञ्च. मिन्द्र त.ङ्कृत्वा-ऽथेम. मिहाऽव गमय।। 6।।-

03-01-04 (1 - 7 सप्तर्चस्य सूक्तस्याथर्वा ऋषिः। इन्द्रो देवता। 1 प्रथमर्चो जगती, 2 - 3, 6 - 7 द्वितीया तृतीया षष्ठी सप्तमीनां त्रिष्टुप्, 4 - 6 चतुर्थीपञ्चम्योश्च भुरिक्त्रिष्टुप् छन्दांसि।।) ❀ प्रजाभी राज्ञः संवरणम्

卐 आ त्वा ग.न्राष्ट्रं सह वर्चसोदिहि- प्राङ् विशां पति. रेकराट्वं विराज। सर्वा.स्ता^ राज. न्प्रदिशो ह्वय-न्तूपसद्यो नमस्यो भवेह।। 1।।

卐 त्वां विशो वृणतां राज्याय- त्वा.मिमाः प्रदिशः पञ्च देवीः। वर्ष्म. न्राष्ट्रस्य ककुदि श्रयस्व- ततो न^ उग्रो वि भजा वसूनि।। 2।।

卐 अच्छ त्वा यन्तु हविन. स्सजाता- अग्नि. र्दूतो अजिर. स्सञ्चरातै। जायाः पुत्रा. स्सुमनसो भवन्तु- बहुं बलिं प्रति पश्यासा उग्रः।। 3।।

卐 अश्विना त्वाऽग्रे मित्रावरुणोभा- विश्वे देवा^ मरुतस्त्वा ह्वयन्तु। अधा मनो वसुदेयाय कृणुष्व- ततो न^ उग्रो वि भजा वसूनि।। 4।।

卐 आ प्र द्रव परमस्याः परावत- श्शिवे~ ते द्यावापृथिवी~ उभे~ स्ताम्। तदयं राजा वरुण. स्तथा ह- स^ त्वाऽय. मह्व. त्स^ उपेद.मेहि।। 5।।

卐 इन्द्रेन्द्र मनुष्या3(आः) परेहि- सं ह्यज्ञास्था^ वरुणै. स्सँविदानः। स^ त्वाऽय. मह्व.त्स्वे सधस्थे- स^ देवान् यक्ष. त्स^ उ कल्पया. द्विशः।। 6।।

卐 पथ्या^ रेवती. र्बहुधा विरूपा- स्सर्वा. स्सङ्गत्य वरीयस्ते अक्रन्न्। तास्त्वा सर्वा. स्सँविदाना^ ह्वयन्तु- दशमी. मुग्र. स्सुमना^ वशेह।। 7।।-

03-01-05 (1 - 8 अष्टर्चस्य सूक्तस्याथर्वा ऋषिः। सोमः पर्णमणिर्वा देवता। 1 प्रथमर्चः पुरोऽनुष्टुप्त्रिष्टुप् , 2 - 3, 5 - 7 द्वितीया तृतीययोः पञ्चम्यादितृचस्य चानुष्टुप्, 4 चतुर्थ्यास्त्रिष्टुप् , 8 अष्टम्याश्च विराडुरोबृहती छन्दांसि।।) ❋ राष्ट्रस्य राजा राजकृतश्च

卐 आऽय. मग. न्पर्णमणि- र्बली बलेन प्रमृण. न्त्सपत्नान्। ओजो देवानां पय^ ओषधीनां- वर्चसा मा जिन्व.त्वप्रयावन्न्।। 1।।

卐 मयि क्षत्रं पर्णमणे- मयि धारयता. द्रयिम्। अहं राष्ट्रस्याऽभीवर्गे- निजो भूयास. मुत्तमः।। 2।।

卐 यन्निदधु. र्वनस्पतौ- गुह्य. न्देवाः प्रियं मणिम्। त.मस्मभ्यं सहाऽऽयुषा- देवा^ ददतु भर्तवे।। 3।।

卐 सोमस्य पर्ण. स्सह^ उग्र. माऽग- न्निन्द्रेण दत्तो वरुणेन शिष्टः। तं प्रियासं बहु रोचमानो- दीर्घायुत्वाय शतशारदाय।। 4।।

卐 आ माऽरुक्ष. त्पर्णमणि- र्मह्या अरिष्टतातये। यथाऽह. मुत्तरोऽसा- न्यर्यम्ण^ उत सँविदः।। 5।।

卐 ये धीवानो रथकाराः- कर्मारा^ ये मनीषिणः। उपस्ती. न्पर्ण मह्य. न्त्वं- सर्वा. न्कृण्वभितो जनान्।। 6।।

卐 ये राजानो राजकृत- स्सूता^ ग्रामण्यश्च ये। उपस्ती. न्पर्ण मह्य. न्त्वं- सर्वा. न्कृण्वभितो जनान्।।7।।

卐 पर्णोऽसि तनूपान- स्सयोनि. र्वीरो वीरेण मया। सँवत्सरस्य तेजसा-

तेन बध्नामि त्वा मणे।। 8।।-

## तृतीये काण्डे द्वितीयोऽनुवाकः

03-02-01 (1-8 अष्टर्चस्य सूक्तस्य जगद्बीजं पुरुष ऋषिः।अश्वत्थ वनस्पतिर्देवता। अनुष्टुप् छन्दः।।) ❁ शत्रुनाशनम्

卐 पुमा. न्पुंसः परिजातो-ऽश्वत्थः खदिरा. दधि। स^ हन्तु शत्रू. न्मामकान्- यानह. न्द्वेष्मि ये च माम्।। 1।।

卐 ता.नश्वत्थ नि.श्शृणीहि- शत्रू. न्वैबाधदोधतः। इन्द्रेण वृत्रघ्ना मेदी- मित्रेण वरुणेन च।। 2।।

卐 यथाऽश्वत्थ निरभनो-ऽन्त र्मह.त्यर्णवे। एवा ता.न्त्सर्वा. न्निर्भङ्ग्धि- या.नह. न्द्वेष्मि ये च माम्।। 3।।

卐 य.स्सहमान श्चरसि- सासहान^ इव ऋषभः। तेनाऽश्वत्थ त्वया वयं- सपत्ना. न्त्सहिषीमहि।। 4।।

卐 सिना.त्वेना. न्निरृति- र्मृत्योः पाशै. रमोक्यैः। अश्वत्थ शत्रू. न्मामकान्- यानह. न्द्वेष्मि ये च माम्।। 5।।

卐 यथाऽश्वत्थ वानस्पत्या- नारोह. न्कृणुषेऽधरान्। एवा मे शत्रो. र्मूर्धानँ- विष्वग्भिन्द्धि सहस्व च।। 6।।

卐 तेऽधराञ्चः प्र प्लवन्ता- ञ्छिन्ना नौ.रिव बन्धनात्। न वैबाधप्रणुत्तानां-
पुन.रस्ति निवर्तनम्।। 7।।

卐 प्रैणा.न्नुदे मनसा- प्र चित्तेनोत ब्रह्मणा। प्रैणा. न्वृक्षस्य शाखया-
ऽश्वत्थस्य नुदामहे।। 8।।-

03-02-02 (1 - 7 सप्तर्चस्य सूक्तस्य भृग्वङ्गिरा ऋषिः। 1 - 3 प्रथमादितृचस्य हरिणाः, 4 चतुर्थ्या ऋचस्तारके, 5 पञ्चम्या आपः, 6 - 7 षष्ठीसप्तम्योश्च यक्ष्मनाशनं देवताः। 1- 5, 7 प्रथमादि पञ्चमां सप्तम्याश्चानुष्टुप्, 6 षष्ठ्याश्च भुरिगनुष्टुप् छन्दसी।।) ❋ यक्ष्मनाशनम्

卐 हरिणस्य रघुष्यदो-ऽधि शीर्षणि भेषजम्। स^ क्षेत्रियँ विषाणया-
विषूचीन. मनीनशत्।।1।।

卐 अनु त्वा हरिणो वृषा- पद्भि. श्चतुर्भि. रक्रमीत्। विषाणे वि ष्य गुष्पितँ-
यदस्य क्षेत्रियं हृदि।। 2।।

卐 अदो यदवरोचते- चतुष्पक्षमिव च्छदिः। तेना ते सर्व. क्षेत्रिय- मङ्गेभ्यो
नाशयामसि।। 3।।

卐 अमू~ ये~ दिवि सुभगे~- विचृतौ नाम तारके~। वि क्षेत्रियस्य मुञ्चता-
मधमं पाश. मुत्तमम्।। 4।।

卐 आप^ इद्वा उ भेषजी- रापो अमीवचातनीः। आपो विश्वस्य भेषजी-
स्ता.स्त्वा मुञ्चन्तु क्षेत्रियात्।। 5।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 यदासुते॰ क्रियमाणाया॰~ क्षेत्रिय. न्त्वा व्यानशे। वेदा॒ऽह. न्तस्य भेषज-क्षेत्रिय. न्नाशयामि त्वत्।।6।।

卐 अपवासे नक्षत्राणा- मपवास उषसा. मुत। अपाऽस्म. त्सर्व. न्दुर्भूत-मप क्षेत्रिय. मुच्छतु।। 7।।-

03-02-03 (1 - 6 षड़ृचस्य सूक्तस्याथर्वा ऋषिः। 1 - 4 प्रथमादिचतुर्ऋचां मित्रादयो विश्वे देवाः, 5 - 6 पञ्चमीषष्ठ्योश्च मनो वताः। 1, 3 प्रथमातृतीययोस्त्रिष्टुप् , 2, 6 द्वितीया षष्ठयोर्जगती, 4 चतुर्थ्याश्चतुष्पदा विराड् बृहतीगर्भा त्रिष्टुप्, 5 पञ्चम्याश्चानुष्टुप् छन्दांसि।।)

❀ राष्ट्राधारणम्

卐 आ यातु मित्र^ ऋतुभि॰ कल्पमान- स्सँवेशय. न्पृथिवी. मुस्त्रियाभिः। अथाऽस्मभ्यँ वरुणो वायु. रग्नि- र्बृह. द्राष्ट्रं सँवेश्य. न्दधातु।। 1।।

卐 धाता राति. स्सवितेद. ञ्जुषन्ता- मिन्द्र. स्त्वष्टा प्रति हर्यन्तु मे वचः। हुवे देवी. मदितिं शूरपुत्रां- सजातानां मध्यमेष्ठा^ यथाऽसानि।। 2।।

卐 हुवे सोमं सवितार. न्नमोभि- र्विश्वा. नादित्या॰ अह. मुत्तरत्वे। अय. मग्नि. र्दीदाय.द्दीर्घ. मेव- सजातै. रिद्धोऽप्रतिब्रुवद्भिः।। 3।।

卐 इहे.दसाथ न परो गमा-थेर्यो गोपा॰ पुष्टपति.र्व^ आऽजत्। अस्मै कामायोप कामिनी- र्विश्वे वो देवा^ उपसँयन्तु।। 4।।

Sachidananda Avadhoota Datta Peetham Mysore

卐 सँ वो मनांसि सँ व्रता- समाकूती. र्नमामसि। अमी~ ये विव्रता^
स्स्थन- ता.न्व. स्स.न्नमयामसि।। 5।।

卐 अह.ङ्गृभ्णामि मनसा मनांसि- मम चित्त.मनु चित्तेभि. रेत। मम वशेषु
हृदयानि वः कृणोमि- मम यात. मनुवर्त्मान^ एत।।6।।-

03-02-04 (1 - 6 षडृचस्य सूक्तस्य वामदेव ऋषिः। द्यावापृथिव्यौ विश्वे देवा वा देवताः। 1- 3, 5 प्रथमादितृचस्य पञ्चम्या ऋचश्चानुष्टुप्, 4 चतुर्थ्याश्चतुष्पदा निचृद्बृहती, 6 षष्ठ्याश्च भुरिगनुष्टुप् छन्दांसि।।) ❈ दुःख नाशनम्

卐 करूशफस्य विशफस्य- द्यौः पिता पृथिवी माता। यथाऽभिचक्र देवा-
स्तथाऽप कृणुता पुनः।। 1।।

卐 अश्रेष्माणो अधारय- न्तथा तन्मनुना कृतम्। कृणोमि वध्रि विष्कन्धं-
मुष्काबर्हो गवामिव।। 2।।

卐 पिशङ्गे सूत्रे खृगल- न्तदाबध्नन्ति वेधसः। श्रवस्युं शुष्म. ङ्काबवँ- वध्रि.
ङ्कृण्वन्तु बन्धुरः।। 3।।

卐 येना श्रवस्यव. श्चरथ- देवा^ इवासुरमायया। शुना. ङ्कपिरिव दूषणो-
बन्धुरा काबवस्य च।। 4।।

卐 दुष्ट्यै हि त्वा भत्स्यामि- दूषयिष्यामि काबवम्। उदाशवो रथा^इव-
शपथेभि. स्सरिष्यथ।। 5।।

卐 एकशतँ विष्कन्धानि- विष्ठिता पृथिवी. मनु। तेषा. न्त्वा.मग्र उज्जहरु-
र्मणिँ विष्कन्धदूषणम्।। 6।।-

☸ 03-02-05 (1 - 13 त्रयोदशर्चस्य सूक्तस्याथर्वा ऋषिः। अष्टका देवता। 1 - 3, 8 - 11, 13 प्रथमादि तृचस्याष्टम्यादि चतसृणामृचां त्रयोदश्याश्चानुष्टुप् , 4 – 6, 12 चतुर्थ्यादि तृचस्य द्वादश्याश्च त्रिष्टुप्, 7 सप्तम्याश्च त्र्यवसाना षट्पदा विराड्गर्भातिजगती छन्दांसि।।) ❃ रायस्पोषप्राप्तिः

卐 प्रथमा ह व्युवास- सा धेनु. रभव. द्यमे। सा नः पयस्वती दुहा-
मुत्तरामुत्तरां समाम्।। 1।।

卐 या.न्देवाः प्रतिनन्दन्ति- रात्रि. न्धेनु. मुपाऽऽयतीम्। सँवत्सरस्य या
पत्नी- सा नो अस्तु सुमङ्गली।। 2।।

卐 सँवत्सरस्य प्रतिमाँ- या.न्त्वा रात्र्युपाऽऽस्महे। सा न^ आयुष्मतीं प्रजां-
राय.स्पोषेण सं सृज।। 3।।

卐 इय.मेव सा या प्रथमा व्यौछ- दास्वितरासु चरति प्रविष्टा। महान्तो
अस्यां महिमानो अन्त- र्वधू. र्जिगाय नवग. ज्जनित्री।। 4।।

卐 वानस्पत्या ग्रावाणो घोष. मक्रत- हविष्कृण्वन्तः परिवत्सरीणम्।
एकाष्टके सुप्रजस. स्सुवीरा^- वयं स्याम पतयो रयीणाम्।। 5।।

卐 इडाया.स्पद. ङ्घृतव. त्सरीसृप- ञ्जातवेदः प्रति हव्या गृभाय। ये ग्राम्याः
पशवो विश्वरूपा- स्तेषां सप्तानां मयि रन्ति रस्तु।। 6।।

卐 आ मा पुष्टे च पोषे च- रात्रि देवानां सुमतौ स्याम। पूर्णा दर्वे परा पत-
सुपूर्णा पुन.रा पत। सर्वान् यज्ञा. न्सम्भुञ्ज-तीष. मूर्जन्न^ आ भर।। 7।।

卐 आऽय. मग.न्त्सँवत्सरः- पति.रेकाष्टके तव। सा न^ आयुष्मतीं प्रजां-
राय.स्पोषेण सं सृज।। 8।।

卐 ऋतू. न्यज ऋतुपती- नार्तवा. नुत हायनान्। समा. स्सँवत्सरा. न्मासा-
न्भूतस्य पतये यजे।। 9।।

卐 ऋतुभ्यष्ट्वाऽऽर्तवेभ्यो- माद्भ्य. स्सँवत्सरेभ्यः। धात्रे विधात्रे समृधे- भूतस्य
पतये यजे।। 10।।

卐 इडया जुह्वतो वय- न्देवा. न्घृतवता यजे। गृहा. नलुभ्यतो वयं- सँ
विशेमोप गोमतः।। 11।।

卐 एकाष्टका तपसा तप्यमाना- जजान गर्भं महिमान. मिन्द्रम्। तेन देवा^
व्यसहन्त शत्रून्- हन्ता दस्यूना. मभव. च्छचीपतिः।। 12।।

卐 इन्द्रपुत्रे सोमपुत्रे- दुहिताऽसि प्रजापतेः। कामा. नस्माकं पूरय- प्रति
गृह्णाहि नो हविः।। 13।।-

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

## ॐ तृतीये काण्डे तृतीयोऽनुवाकः

03-03-01 (1-8 अष्टर्चस्य सूक्तस्य ब्रह्मा ऋषिः। इन्द्राग्नी आयुर्यक्ष्मनाशनं देवताः। 1 - 3 प्रथमादितृचस्य त्रिष्टुप्, 4 चतुर्थ्या शक्करीगर्भा जगती, 5, 6 पञ्चमीषष्ठ्योश्चानुष्टुप्, 7 सप्तम्या उष्णिग्बृहती गर्भा पथ्यापङ्क्तिः, 8 अष्टम्याश्च षट्पदा बृहतीगर्भा जगती छन्दांसि।।)

❀ दीर्घायिः प्राप्तिः

卐 मुञ्चामि त्वा हविषा जीवनाय क-मज्ञातयक्ष्मा. दुत राजयक्ष्मात्। ग्राहि. र्जग्राह यद्येत.देन- न्तस्या^ इन्द्राग्नी~ प्र मुमुक्त. मेनम्।। 1।।

卐 यदि क्षितायु. र्यदि वा परेतो- यदि मृत्यो. रन्तिक. न्नीत^ एव। त.मा हरामि निर्ऋते. रुपस्था- दस्पार्ष. मेनं शतशारदाय।। 2।।

卐 सहस्राक्षेण शतवीर्येण- शताऽऽयुषा हविषाऽहार्ष.मेनम्। इन्द्रो यथैनं शरदो नया-त्यति विश्वस्य दुरितस्य पारम्।। 3।।

卐 शत.ञ्जीव शरदो वर्धमान- श्शतं हेमन्ता. न्छत.मु वसन्तान्। शत. न्त इन्द्रो अग्नि. स्सविता बृहस्पति- श्शताऽऽयुषा हविषाऽहार्ष. मेनम्।। 4।।

卐 प्र विशतं प्राणापाना- वनड्वाहाविव व्रजम्। व्य1(अ)न्ये यन्तु मृत्यवो- या.नाहु. रितरा. न्छतम्।। 5।।

卐 इहैव स्तं प्राणापानौ- माऽप गात. मितो युवम्। शरीर. मस्याङ्गानि-जरसे वहतं पुनः।। 6।।

卐 जरायै त्वा परि ददामि- जरायै नि धुवामि त्वा। जरा त्वा भद्रा नेष्ट-व्य1(अ)न्ये यन्तु मृत्यवो- या.नाहु. रितरा. न्छतम्।। 7।।

卐 अभि त्वा जरिमाऽहित- गा.मुक्षण.मिव रज्ज्वा। यस्त्वा मृत्यु. रभ्यधत्त-जायमानं सुपाशया। तन्ते सत्यस्य हस्ताभ्या- मुदमुञ्च. द्बृहस्पतिः।। 8।।-

03-03-02 (1 - 9 नवर्चस्य सूक्तस्य ब्रह्मा ऋषिः। शालावास्तोष्पतिर्देवते। 1, 4, 5 प्रथमाचतुर्थीपञ्चमीनामृचां त्रिष्टुप्, 2 द्वितीयाया विराड्, 3 तृतीयाया बृहती, 6 षष्ठ्याः शक्करीगर्भा जगती, 7 सप्तम्या आर्ष्यनुष्टुप्, 8 अष्टम्या भुरिक्, 9 नवम्याष्चानुष्टुप्छन्दांसि।।) ❋ शाला निर्माणम्

卐 इहैव ध्रुवा.न्नि मिनोमि शाला- क्षेमे तिष्ठाति घृत. मुक्षमाणा। ता.न्त्वा शाले सर्ववीरा. स्सुवीरा^- अरिष्टवीरा^ उप सञ्चरेम।। 1।।

卐 इहैव ध्रुवा प्रति तिष्ठ शाले-ऽश्वावती गोमती सूनृतावती। ऊर्जस्वती घृतवती पयस्व-त्युच्छ्रयस्व महते सौभगाय।। 2।।

卐 धरुण्यसि शाले- बृहच्छन्दाः पूतिधान्या। आ त्वा वत्सो गमे.दा कुमार^- आ धेनव. स्साय. मास्पन्दमानाः।। 3।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham · Mysore

卐 इमां शालां सविता वायु. रिन्द्रो- बृहस्पति. र्नि मिनोतु प्रजानन्न्।
उक्षन्तूद्ना मरुतो घृतेन- भगो नो राजा नि कृषि. न्तनोतु।। 4।।

卐 मानस्य पत्नि शरणा स्योना- देवी देवेभि. र्निमिता ऽस्यग्रे। तृणँ वसाना
सुमना^ अस.स्त्व-मथा ऽस्मभ्यं सहवीरं रयि.न्दाः।। 5।।

卐 ऋतेन स्थूणा. मधि रोह वंशोग्रो- विराज न्नप वृङ्क्ष्व शत्रून्। मा ते रिष.
न्नुपसत्तारो गृहाणां शाले- शत. ञ्जीवेम शरद. स्सर्ववीराः।। 6।।

卐 एमा. ङ्कुमार. स्तरुण^- आ वत्सो जगता सह। एमां परिस्रुतः कुम्भ^-
आ दध्नः कलशै रगुः।। 7।।

卐 पूर्ण. न्नारि प्र भर कुम्भ. मेत- ङ्घृतस्य धारा. ममृतेन सम्भृताम्। इमां
पातृ. नमृतेना सम-ञ्जीष्टापूर्त. मभि रक्षा.त्येनाम्।। 8।

卐 इमा^ आपः प्र भरा- म्ययक्ष्मा^ यक्ष्मनाशनीः। गृहा नुप प्र सीदा-
म्यमृतेन सहा ऽग्निना।। 9।।-

03-03-03 (1 - 7 सप्तर्चस्य सूक्तस्य भृगुर्ऋषिः। वरुणाः सिन्ध्वापो वा देवताः। प्रथमर्चो निचृदनुष्टुप् । 2 - 4, 7 द्वितीयादितृचस्य सप्तम्याश्चानुष्टुप्, 5 पञ्चम्या विराड्जगती, 6 षष्ठ्याश्च निचृत्त्रिष्टुप् छन्दांसि।।) ❀ आपः

卐 यदद. स्सम्प्रयती- रहा. वनदता हते। तस्मा.दा नद्यो3(ओ)नाम स्थ-
ता वो नामानि सिन्धवः।। 1।।

卐 यत्प्रेषिता वरुणेना-ऽच्छीभं समवल्गात। तदाप्नो. दिन्द्रो वो यती-स्तस्मा.दापो अनु ष्ठन।। 2।।

卐 अपकामं स्यन्दमाना^- अवीवरत वो हिकम्। इन्द्रो व.श्शक्तिभि. र्दैवी-स्तस्मा.द्वा. र्नाम वो हितम्।। 3।।

卐 एको वो देवोऽप्यतिष्ठ- त्स्यन्दमाना^ यथावशम्। उदानिषु. र्महीरिति-तस्मा.दुदक. मुच्यते।। 4।।

卐 आपो भद्रा^ घृत. मिदाप^ आस- न्नग्नीषोमौ बिभ्र.त्याप^ इत्ताः। तीव्रो रसो मधुपृचा. मरङ्गम^- आ मा प्राणेन सह वर्चसा गमेत्।। 5।।

卐 आदि. त्पश्या.म्युत वा श्रृणो-म्या मा घोषो गच्छति वाङ्मा ऽसाम्। मन्ये भेजानो अमृतस्य तर्हि- हिरण्यवर्णा^ अतृपँ यदा वः।। 6।।

卐 इदँ व^ आपो हृदय- मयँ वत्स^ ऋतावरीः। इहेत्थमेत शक्करी- र्यत्रेदँ वेशयामि वः।। 7।।-

03-03-04 (1 - 6 षडृचस्य सूक्तस्य ब्रह्मा ऋषिः। गोष्ठो मन्त्रोक्ता वा देवताः। 1 - 5 प्रथमादिपञ्चर्चामनुष्टुप्, 6 षष्ठ्याश्चार्षो त्रिष्टुप् छन्दसी।।) ❀ गोष्ठः

卐 सँ वो गोष्ठेन सुषदा- सं रय्या सं सुभूत्या। अहर्जातस्य यन्नाम- तेना व.स्सं सृजामसि।। 1।।

卐 सँ व.स्सृज.त्वर्यमा- सं पूषा सं बृहस्पतिः। समिन्द्रो यो धनञ्जयो- मयि पुष्यत यद्वसु।। 2।।

卐 सञ्जग्माना^ अबिभ्युषी- रस्मि. न्गोष्ठे करीषिणीः। बिभ्रती. स्सोम्यं म.-ध्वनमीवा^ उपेतन।। 3।।

卐 इहैव गाव^ एत-नेहो शकेव पुष्यत। इहैवोत प्र जायध्वं- मयि सञ्ज्ञान.मस्तु वः।। 4।।

卐 शिवो वो गोष्ठो भवतु- शारिशाकेव पुष्यत। इहैवोत प्र जायध्वं- मया व.स्सं सृजामसि।। 5।।

卐 मया गावो गोपतिना सचध्व- मयँ वो गोष्ठ^ इह पोषयिष्णुः। राय.स्पोषेण बहुला भवन्ती- र्जीवा^ जीवन्ती. रुप व.स्सदेम।। 6।।-

03-03-05 (1 - 8 अष्टर्चस्य सूक्तस्याथर्वा ऋषिः। विश्वे देवा इन्द्राग्नी वा देवते। 1 प्रथमर्चो भुरिक्त्रिष्टुप्, 2 - 3, 6 द्वितीयातृतीययोः षष्ठ्याश्च त्रिष्टुप्, 4 चतुर्थ्यास्त्र्यवसाना षट्पदा बृहतीगर्भा विराडत्यष्टिः, 5 पञ्चम्या विराड्जगती, 7 सप्तम्या अनुष्टुप्, 8 अष्टम्याश्च निचृत्त्रिष्टुप् छन्दांसि।।) ❃ वाणिज्यम्

卐 इन्द्र.महँ वणिज. ञ्चोदयामि- स^ न ऐतु पुर^एता नो अस्तु। नुद. न्नरातिं परिपन्थिनं मृगं- स^ ईशानो धनदा^ अस्तु मह्यम्।। 1।।

卐 ये पन्थानो बहवो देवयाना^- अन्तरा द्यावापृथिवी~ सञ्चरन्ति। ते मा जुषन्तां पयसा घृतेन- यथा क्रीत्वा धन. माहराणि।। 2।।

卐 इध्मेनाऽग्न इच्छमानो घृतेन- जुहोमि हव्य. न्तरसे बलाय। याव. दीशे ब्रह्मणा वन्दमान^- इमा. न्धियं शतसेयाय देवीम्।। 3।।

卐 इमा. मग्ने शरणिं मीमृषो नो- य.मध्वान. मगाम दूरम्। शुन. न्नो अस्तु प्रपणो विक्रयश्च प्रतिपणः- फलिनं मा कृणोतु। इदं हव्यं सँविदानौ जुषेथां- शुन.न्नो अस्तु चरित. मुत्थितञ्च।। 4।।

卐 येन धनेन प्रपण. ञ्चरामि- धनेन देवा^ धन. मिच्छमानः। तन्मे भूयो भवतु मा कनीयो-ऽग्ने सातघ्नो देवान् हविषा नि षेध।। 5।।

卐 येन धनेन प्रपण. ञ्चरामि- धनेन देवा^ धन. मिच्छमानः। तस्मिन्म इन्द्रो रुचि. मा दधातु- प्रजापति. स्सविता सोमो अग्निः।। 6।।

卐 उप त्वा नमसा वयं- होत. र्वैश्वानर स्तुमः। स^ नः प्रजा.स्वात्मसु- गोषु प्राणेषु जागृहि।। 7।।

卐 विश्वाऽहा ते सद.मि द्भरेमा-ऽश्वायेव तिष्ठते जातवेदः। राय.स्पोषेण समिषा मदन्तो- मा ते अग्ने प्रतिवेशा^ रिषाम।। 8।।-

## SGS तृतीये काण्डे चतुर्थोऽनुवाकः

03-04-01 (1 - 7 सप्तर्चस्य सूक्तस्याथर्वा ऋषिः। अग्नीन्द्रादयो मन्त्रोक्ता देवताः।1 प्रथमर्च आर्षो जगती, 2-3, 5-7 द्वितीयातृतीययोः पञ्चम्यादितृचस्य च त्रिष्टुप्, 4 चतुर्थ्याश्च भुरिक्पङ्क्तिश्छन्दांसि।।) स्वस्तये प्रार्थना

卐 प्रात.रग्निं प्रात.रिन्द्रं हवामहे- प्रात.र्मित्रावरुणा प्रात.रश्विना। प्रात.र्भगं पूषणं ब्रह्मणस्पतिं- प्रात. स्सोम. मुत रुद्रं हवामहे।। 1।।

卐 प्रात.र्जितं भग. मुग्रं हवामहे- वयं पुत्र. मदिते. र्यो विधर्ता। आध्र.श्चिद्यं मन्यमान- स्तुर. श्चिद्राजा चिद्यं भगं भक्षीत्याह।। 2।।

卐 भग प्रणेत. र्भग सत्यराधो- भगेमा. न्धिय. मुदवा ददन्नः। भग प्र णो जनय गोभि. रश्वै- र्भग प्र नृभि. र्नृवन्त. स्स्याम।। 3।।

卐 उतेदानीं भगवन्त. स्स्या-मोत प्रपित्व उत मध्ये अह्ना। उतोदितौ मघव. न्सूर्यस्य- वय. न्देवानां सुमतौ स्याम।। 4।।

卐 भग^ एव भगवा॰ अस्तु देव- स्तेना वयं भगवन्त. स्स्याम। त.न्त्वा भग सर्व^ इज्जोहवीमि- स^ नो भग पुर^एता भवेह।। 5।।

卐 समध्वरायोषसो नमन्त- दधिक्रावेव शुचये पदाय। अर्वाचीनँ वसुविदं भगं मे- रथ.मिवाऽश्वा वाजिन^ आ वहन्तु।। 6।।

Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 अश्वावती. गोमती.र्न उषासो- वीरवती. स्सद. मुच्छन्तु भद्राः। घृत. न्दुहाना विश्वतः प्रपीता- यूयं पात स्वस्तिभि. स्सदा नः।। 7।।-

03-04-02 (1 - 9 नवर्चस्य सूक्तस्य विश्वामित्र ऋषिः। सीता देवता। 1 प्रथमर्च आर्षो गायत्री, 2, 5, 9 द्वितीयापञ्चमीनवमीनां त्रिष्टुप्, 3 तृतीयायाः पथ्यापङ्क्तिः, 4, 6 चतुर्थोषष्ठ्योरनुष्टुप्, 7 सप्तम्या विराड्डुर उष्णिक्, 8 अष्टम्याश्च निचृदनुष्टुप् छन्दांसि।।) ❃ कृषिः

卐 सीरा युञ्जन्ति कवयो- युगा वि तन्वते पृथक्। धीरा देवेषु सुम्नयौ।। 1।।

卐 युनक्त सीरा वि युगा तनोत- कृते योनौ वपतेह बीजम्। विराज. श्श्नुष्टि. स्सभरा असन्नो- नेदीय इत्सृण्यः पक्व.मा यवन्न्।।2।।

卐 लाङ्गलं पवीरव- त्सुशीमं सोमस.त्सरु। उदि.द्वपतु गा.मविं- प्रस्थाव. द्रथवाहनं- पीवरीञ्च प्रफर्व्यम्।। 3।।

卐 इन्द्र. स्सीता. न्नि गृह्णातु- तां पूषाऽभि रक्षतु। सा नः पयस्वती दुहा- मुत्तरामुत्तरां समाम्।। 4।।

卐 शुनं सुफाला वि तुदन्तु भूमिं- शुन. ङ्कीनाशा अनु यन्तु वाहान्। शुनासीरा हविषा तोशमाना- सुपिप्पला ओषधीः कर्त.मस्मै।। 5।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 शुनँ वाहा. श्शुन. न्नर- श्शुन. ङ्कृषतु लाङ्गलम्। शुनँ वरत्रा^ बध्यन्तां- शुन.मष्ट्रा. मुदिङ्गय।। 6।।

卐 शुनासीरेह स्म मे जुषेथाम्। यद्दिवि चक्रथुः पय- स्तेनेमा. मुप सिञ्चतम्।। 7।।

卐 सीते वन्दामहे त्वा-ऽर्वाची सुभगे भव। यथा न.स्सुमना असो- यथा न. स्सुफला भुवः।। 8।।

卐 घृतेन सीता मधुना समक्ता- विश्वै. र्देवै. रनुमता मरुद्भिः। सा न.स्सीते पयसाऽभ्याववृ-त्स्वोर्जस्वती घृतव. त्पिन्वमाना।। 9।।-

03-04-03 (1 - 6 षड़ृचस्य सूक्तस्याथर्वा ऋषिः। वनस्पतिः वाणापरार्योषधिः देवता। 1 - 3, 5 प्रथमादितृचस्य पञ्चम्या ऋचश्चानुष्टुप्, 4 चतुर्थ्या अनुष्टुब्गर्भा चतुष्पादुष्णिक्, 6 षष्ठ्याश्चोष्णिग्गर्भा पथ्यापङ्क्तिश्छन्दांसि।।) ❃ वनस्पतिः

卐 इमा.ङ्खना. म्योषधिँ- वीरुधां बलवत्तमाम्। यया सपत्नीं बाधते- यया सँविन्दते पतिम्।। 1।।

卐 उत्तानपर्णे सुभगे- देवजूते सहस्वति। सपत्नीं मे परा णुद- पतिं मे केवल.ङ्कृधि।। 2।।

卐 नहि ते नाम जग्राह- नो अस्मि. न्रमसे पतौ। परा.मेव परावतं- सपत्नी.ङ्गमयामसि।। 3।।

卐 उत्तराऽह. मुत्तर- उत्तरे. दुत्तराभ्यः। अध. स्सपत्नी या ममा-ऽधरा साऽधराभ्यः।। 4।।( मुत्तर)

卐 अह. मस्मि सहमाना-ऽथो~ त्वमसि सासहिः। उभे~ सहस्वती भूत्वा-सपत्नीं मे सहावहै।। 5।।

卐 अभि तेऽधां सहमाना- मुप तेऽधां सहीयसीम्। मा.मनु प्र ते मनो-वत्स. ङ्गौरिव धावतु- पथा वारिव धावतु।। 6।।

03-04-04 (1 - 8 अष्टर्चस्य सूक्तस्य वसिष्ठ ऋषिः। विश्वे देवाः चन्द्रमा इन्द्रो वा देवता। 1 प्रथमर्चः पथ्याबृहती, 2, 4 द्वितीयाचतुर्थ्योरनुष्टुप्, 3 तृतीयाया भुरिग्बृहती, 5 पञ्चम्यास्त्रिष्टुप्, 6 षष्ठ्यास्त्र्यवसाना षट्पदा त्रिष्टुप्ककुम्मतीगर्भातिजगती, 7 सप्तम्या विराडास्तारपङ्क्तिः, 8 अष्टम्याश्च पथ्यापङ्क्तिश्छन्दांसि।।) ❁ अजरं क्षत्रम्

卐 संशितं म इदं ब्रह्म- संशितँ वीर्य1(अं) बलम्। संशित. ङ्क्षत्र. मजर. मस्तु- जिष्णु. र्येषा. मस्मि पुरोहितः।। 1।।

卐 समह.मेषां राष्ट्रं स्यामि- समोजो वीर्य1(अं) बलम्। वृश्चामि शत्रूणां बाहू- ननेन हविषाऽहम्।। 2।।

卐 नीचैः पद्यन्ता. मधरे भवन्तु- ये न.स्सूरिं मघवानं पृतन्यान्। क्षिणामि ब्रह्मणाऽमित्रा- नुन्नयामि स्वा. नहम्।। 3।।

卐 तीक्ष्णीयांसः परशो- रग्ने. स्तीक्ष्णतरा^ उत। इन्द्रस्य वज्रा. त्तीक्ष्णीयांसो- येषा. मस्मि पुरोहितः।। 4।।

卐 एषा. मह. मायुधा संस्या- म्येषां राष्ट्रं सुवीरँ वर्धयामि। एषा. ङ्क्षत्र. मजर. मस्तु जिष्ण्वे3-(ए)षा. ञ्चित्तँ विश्वेऽवन्तु देवाः।। 5।। (सुवीरँ)

卐 उद्धर्‌षन्तां मघव. न्वाजिना- न्युद्वीराणा. ञ्जयता.मेतु घोषः। पृथग्घोषा^ उलुलयः केतुमन्त^ उदीरताम्। देवा^ इन्द्रज्येष्ठा^ मरुतो यन्तु सेनया।। 6।।

卐 प्रेता जयता नर^- उग्रा व.स्सन्तु बाहवः। तीक्ष्णेषवो बलधन्वनो हतोग्रायुधा^- अबला. नुग्रबाहवः।। 7।।

卐 अवसृष्टा परा पत- शरव्ये ब्रह्मसंशिते। जयाऽमित्रा. न्प्र पद्यस्व- जह्येषाँ वरँवरं- माऽमीषां मोचि कश्चन।। 8।।-

☙ 03-04-05 (1-10 दशर्चस्य सूक्तस्य वसिष्ठ ऋषिः। 1, 2, 5 प्रथमा द्वितीययोर्ऋचोः पञ्चम्याश्चाग्निः, 3 - 4, 6-10 तृतीयाचतुर्थोः षष्ठ्यादिपञ्चानाञ्च भगादयो देवताः।1 - 5, 7, 9, 10 प्रथमादिपञ्चानां सप्तमीनवमीदशमीनाञ्चानुष्टुप्, 6 षष्ठ्याः पथ्यापङ्क्तिः, 8 अष्टम्याश्च विराड्जगती छन्दांसि।।) ❀ रयिसंवर्धनम्

卐 अय.न्ते योनिर् ऋत्वियो- यतो जातो अरोचथाः। तञ्जान. न्नग्न आ रोहा-ऽधा नो वर्धया रयिम्।। 1।।

卐 अग्ने अच्छा वदेह नः- प्रत्यङ्ङ्. स्सुमना भव। प्र णो यच्छ विशां पते-
धनदा^ असि न.स्त्वम्।। 2।।

卐 प्र णो यच्छ. त्वर्यमा- प्र भगः प्र बृहस्पतिः। प्र देवीः प्रोत सूनृता- रयि.
न्देवी दधातु मे।। 3।।

卐 सोमं राजान. मवसे-ऽग्नि. ङ्गीर्भिर् हवामहे। आदित्यँ विष्णुं सूर्यं-
ब्रह्माणञ्च बृहस्पतिम्।। 4।।

卐 त्वन्नो अग्ने अग्निभि- र्ब्रह्म यज्ञञ्च वर्धय। त्व.न्नो देव दातवे- रयि.
न्दानाय चोदय।। 5।।

卐 इन्द्रवायू~ उभा.विह- सुहवेह हवामहे। यथा न.स्सर्व. इज्जन- स्सङ्गत्यां
सुमना^ अस- द्दानकामश्च नो भुवत्।। 6।।

卐 अर्यमणं बृहस्पति- मिन्द्र. न्दानाय चोदय। वातँ विष्णुं सरस्वतीं-
सवितार.ञ्च वाजिनम्।। 7।।

卐 वाजस्य नु प्रसवे सं बभूवि-मेमा च विश्वा भुवना.न्यन्तः।
उताऽदित्सन्त. न्दापयतु प्रजान- न्रयिञ्च न.स्सर्ववीर. न्नि यच्छ।। 8।।

卐 दुह्रां मे पञ्च प्रदिशो- दुह्रा. मुर्वी. र्यथाबलम्। प्रापेयं सर्वा^ आकूती-
र्मनसा हृदयेन च।। 9।।

卐 गोसनिँ वाचं. मुदेयँ- वर्चसा माऽभ्युदिहि। आ रुन्धां सर्वतो वायु-स्त्वष्टा पोषं. न्दधातु मे।। 10।।- (मुदेयँ)

## ॐ तृतीये काण्डे पञ्चमोऽनुवाकः

03-05-01 (1 - 10 दशर्चस्य सूक्तस्य वसिष्ठ ऋषिः। 1 - 7 प्रथमादिसप्तर्चामग्नयः, 8 - 10 अष्टम्यादितृचस्य च मन्त्रोक्ता देवताः। 1 प्रथमायाः पुरोऽनुष्टुप्त्रिष्टुप्, 2 - 3, 8 द्वितीयातृतीयाष्टमीनां भुरिक् त्रिष्टुप्, 4 चतुर्थ्यास्त्रिष्टुप्, 5 पञ्चम्या जगती, 6 षष्ठ्या उपरिष्टाद्विराड्बृहती, 7 सप्तम्या विराङ्गर्भा त्रिष्टुप्, 9 नवम्या निचृदनुष्टुप्, 10 दशम्याश्चानुष्टुप् छन्दांसि।।) ❃ शान्तिः

卐 ये अग्नयो अप्स्व1(अ)न्त. र्ये वृत्रे- ये पुरुषे ये अश्मसु। य^ आविवेशोषधी.र्यो वनस्पतीं- स्तेभ्यो अग्निभ्यो हुत. मस्त्वेतत्।। 1।।

卐 य.स्सोमे अन्त.र्यो गोष्वन्त- र्य^ आविष्टो वयस्सु यो मृगेषु। य^ आविवेश द्विपदो य.श्चतुष्पद्- स्तेभ्यो अग्निभ्यो हुत. मस्त्वेतत्।। 2।।

卐 य^ इन्द्रेण सरथँ याति देवो- वैश्वानर^ उत विश्वदाव्यः। य.ञ्जोहवीमि पृतनासु सासहि- न्तेभ्यो अग्निभ्यो हुत. मस्त्वेतत्।। 3।।

卐 यो देवो विश्वा. द्यमु कामं. माहु- र्य.न्दातारं प्रतिगृह्णन्त. माहुः। यो धीर. श्शक्रः परिभू. रदाभ्य- स्तेभ्यो अग्निभ्यो हुत.मस्त्वेतत्।। 4।।

卐 यन्त्वा होतारं मनसाऽभि सँविदु- स्त्रयोदश भौवनाः पञ्च मानवाः। वर्चोधसे यशसे सूनृतावते- तेभ्यो अग्निभ्यो हुत.मस्त्वेतत्।। 5।।

卐 उक्षान्नाय वशाऽन्नाय- सोमपृष्ठाय वेधसे। वैश्वानरज्येष्ठेभ्य. स्तेभ्यो- अग्निभ्यो हुत.मस्त्वेतत्।।6।।

卐 दिवं पृथिवी. मन्वन्तरिक्षँ- ये विद्युत. मनुसञ्चरन्ति। ये दिक्ष्व1(अ)न्त. र्यै वाते अन्त- स्तेभ्यो अग्निभ्यो हुत.मस्त्वेतत्।। 7।।

卐 हिरण्यपाणिं सवितार मिन्द्रं- बृहस्पतिँ वरुणं मित्र मग्निम्। विश्वा. न्देवा. नङ्गिरसो हवामह- इम. ङ्क्रव्यादं शमय. न्त्वग्निम्।। 8।।

卐 शान्तो अग्निः क्रव्या- च्छान्तः पुरुष.रेषणः। अथो~ यो विश्वदाव्य1(अ)-स्त.ङ्क्रव्याद. मशीशमम्।। 9।।

卐 ये पर्वता. स्सोमपृष्ठा- आप^ उत्तानशीवरीः। वातः पर्जन्य^ आदग्नि- स्ते क्रव्याद. मशीशमन्न्।। 10।।-

03-05-02 (1-6 षड्चस्य सूक्तस्य वसिष्ठ ऋषिः। बृहस्पतिर्विश्वे देवा वा देवता। 1 प्रथमर्चो विराट् त्रिष्टुप्, 2, 5 - 6 द्वितीयापञ्चमीषष्ठीनामनुष्टुप्, 3 तृतीयायाः पञ्चपदा परानुष्टुब्विराडतिजगती, 4 चतुर्थ्याश्च त्र्यवसाना षट्पदा जगती छन्दांसि।।) ❁ वर्चः प्राप्तिः

卐 हस्तिवर्चसं प्रथतां बृह. द्यशो- अदित्या^ यत्तन्व. स्सम्बभूव। तत्सर्वे समदु. र्मह्य. मेत- द्विश्वे देवा^ अदिति. स्सजोषाः।। 1।।

卐 मित्रश्च वरुण- श्चेन्द्रो रुद्रश्च चेततु। देवासो विश्वधायस-स्ते माऽञ्जन्तु वर्चसा।। 2।।

卐 येन हस्ती वर्चसा सम्बभूव- येन राजा मनुष्येष्वप्स्व1(अ)न्तः। येन देवा^ देवता. मग्र आय- न्तेन मा.मद्य वर्चसाऽग्ने वर्चस्विन. ङ्कृणु।। 3।।

卐 यत्ते वर्चो जातवेदो- बृह.द्भवत्याहुतेः। यावत्सूर्यस्य वर्च^- आसुरस्य च हस्तिनः। ताव.न्मे अश्विना वर्च^- आ धत्तां पुष्करस्रजा।। 4।।

(बृह.द्भवत्याहुतेः)

卐 याव. च्चतस्रः प्रदिश- श्चक्षु. र्यावत्समश्नुते। ताव.त्समैत्विन्द्रियं- मयि तद्धस्तिवर्चसम्।। 5।।

卐 हस्ती मृगाणां सुषदा- मतिष्ठावा. न्बभूव हि। तस्य भगेन वर्चसा- ऽभिषिञ्चामि मा.महम्।। 6।।-

03-05-03 (1 - 6 षड़्चस्य सूक्तस्य ब्रह्मा ऋषिः। चन्द्रमा योनिर्वा देवता। 1 - 4 प्रथमादिचतसृणामृचामनुष्टुप्, 5 पञ्चम्या उपरिष्टाद्भुरिग्बृहती, 6 षष्ठ्याश्च स्कन्धोग्रीवी बृहती छन्दांसि।।) ❃ वीर प्रसूतिः

卐 येन वेह. द्बभूविथ- नाशयामसि तत्त्वत्। इद. न्तदन्यत्र त्व-दप दूरे नि दध्मसि।। 1।।

卐 आ ते योनि. ङ्गर्भ^ एतु- पुमा. न्बाण^ इवेषुधिम्। आ वीरोऽत्र जायतां-

पुत्रस्ते दशमास्यः।। 2।।

卐 पुमांसं पुत्र.ञ्जनय- तं पुमा. ननु जायताम्। भवासि पुत्राणां माता-

जाताना.ञ्जनयाश्च यान्।।3।।

卐 यानि भद्राणि बीजा-न्यृषभा जनयन्ति च। तैस्त्वं पुत्रँ विन्दस्व- सा प्रसू.

र्धेनुका भव।। 4।।

卐 कृणोमि ते प्राजापत्य-मा योनि. ङ्गर्भ^ एतु ते। विन्दस्व त्वं पुत्र न्नारि-

य.स्तुभ्यं श.मस- च्छमु तस्मै त्वं भव।। 5।।

卐 यासा. न्द्यौ॰ पिता पृथिवी माता- समुद्रो मूलँ वीरुधां बभूव। ता.स्त्वा

पुत्रविद्याय- दैवी॰ प्रावन्त्वोषधयः।। 6।।-

03-05-04 (1 - 7 सप्तर्चस्य सूक्तस्य भृगुर्ऋषिः। वनस्पतिः प्रजापतिर्वा देवता। 1, 3 - 7 प्रथमर्चस्तृतीयादि पञ्चानाञ्चानुष्टुप्, 2 द्वितीयायाश्च निचृत्पथ्यापङ्क्तिश्छन्दसी।।) ❁ समृद्धि-प्राप्तिः

卐 पयस्वती. रोषधय॰- पयस्व. न्मामकँ वचः। अथो~ पयस्वतीना-मा

भरेऽहं सहस्रशः।। 1।।

卐 वेदाऽहं पयस्वन्त- ञ्चकार धान्यं बहु। सम्भृत्वा नाम यो देव- स्तँ वयं

हवामहे- योयो अयज्वनो गृहे।। 2।।

卐 इमा याः पञ्च प्रदिशो- मानवीः पञ्च कृष्टयः। वृष्टे शाप. न्नदीरि-वेह स्फातिं समावहान्।। 3।।

卐 उदुत्सं शतधारं- सहस्रधार. मक्षितम्। एवास्माकेद. न्धान्यं- सहस्रधार. मक्षितम्।। 4।।

卐 शतहस्त समाहर- सहस्रहस्त स.ङ्किर। कृतस्य कार्यस्य- चेह स्फातिं समावह।। 5।।

卐 तिस्रो मात्रा^ गन्धर्वाणा-श्चतस्रो गृहपत्न्याः। तासाँ या स्फातिमत्तमा- तया त्वाऽभि मृशामसि।। 6।।

卐 उपोहश्च समूहश्च- क्षत्तारौ ते प्रजापते। ता.विहा वहतां स्फातिं- बहुं भूमान मक्षितम्।। 7।।-

03-05-05 (1-6 षड्चस्य सूक्तस्य भृगुर्ऋषिः। मित्रावरुणौ कामेषवश्च देवताः। अनुष्टुप् छन्दः।।) ❃ कामस्य इषुः

卐 उत्तुद.स्त्वोत्तुदतु- मा धृथा. श्शयने स्वे। इषुः कामस्य या भीमा- तया विध्यामि त्वा हृदि।। 1।।

卐 आधीपर्णा.ङ्कामशल्या- मिषुं सङ्कल्पकुल्मलाम्। तां सुसन्नता. ङ्कृत्वा- कामो विध्यतु त्वा हृदि।। 2।।

卐 या प्लीहानं शोषयति- कामस्येषु. स्सुसन्नता। प्राचीनपक्षा व्योषा- तया विध्यामि त्वा हृदि।। 3।।

卐 शुचा विद्धा व्योषया- शुष्काऽऽस्याऽभि सर्प मा। मृदु. र्निमन्युः केवली- प्रियवादि.न्यनुव्रता।। 4।।

卐 आऽजामि त्वाऽजन्या- परि मातु रथो~ पितुः। यथा मम क्रता.वसो- मम चित्त. मुपायसि।। 5।।

卐 व्यस्यै मित्रावरुणौ- हृद. श्चित्ता.न्यस्यतम्। अथैना. मक्रतु.ङ्कृत्वा- ममैव कृणुतँ वशे।। 6।।-

## तृतीये काण्डे षष्ठोऽनुवाकः

03-06-01 (1-6 षडृचस्य सूक्तस्याथर्वा ऋषिः। 1 प्रथमर्चः साग्नये हेतयः, 2 द्वितीयायाः सकामा अविष्यवः, 3 तृतीयाया अव्युक्ता वैराजाः, 4 चतुर्थ्याः सवाताः प्रविध्यन्तः, 5 पञ्चम्याः सौषधिका निलिम्पाः, 6 षष्ठ्याश्च बृहस्पतियुक्ता अवस्वन्तो देवताः। 1 प्रथमायास्त्रिष्टुप् 2, 5 - 6 द्वितीयापञ्चमीषष्ठीनां जगती, 3 - 4 तृतीयाश्चतुर्थ्यौश्च भुरिक्त्रिष्टुप् छन्दांसि।।) ❁ दिक्षु आत्मरक्षा

卐 ये3(ए)ऽस्यां स्थ प्राच्या. न्दिशि- हेतयो नाम देवा- स्तेषाँ वो अग्नि. रिषवः। ते नो मृडत- ते नोऽधि ब्रूत- तेभ्यो वो नम- स्तेभ्यो व.स्स्वाहा।। 1।।

卐 ये3(ए)ऽस्यां स्थ दक्षिणाया. न्दिश्यविष्यवो नाम देवा- स्तेषाँ वः काम^ इषवः। ते नो मृडत- ते नोऽधि ब्रूत- तेभ्यो वो नम- स्तेभ्यो व.स्स्वाहा।। 2।।

卐 ये3(ए)ऽस्यां स्थ प्रतीच्या. न्दिशि- वैराजा^ नाम देवा- स्तेषाँ व^ आप^ इषवः। ते नो मृडत- ते नोऽधि ब्रूत- तेभ्यो वो नम- स्तेभ्यो व.स्स्वाहा।। 3।।

卐 ये3(ए)ऽस्यां स्थोदीच्या. न्दिशि- प्रविध्यन्तो नाम देवा- स्तेषाँ वो वात^ इषवः। ते नो मृडत- ते नोऽधि ब्रूत- तेभ्यो वो नम- स्तेभ्यो व.स्स्वाहा।। 4।।

卐 ये3(ए)ऽस्यां स्थ ध्रुवाया. न्दिशि- निलिम्पा^ नाम देवा- स्तेषाँ व^ ओषधी. रिषवः। ते नो मृडत- ते नोऽधि ब्रूत- तेभ्यो वो नम- स्तेभ्यो व.स्स्वाहा।। 5।।

卐 ये3(ए)ऽस्यां स्थोर्ध्वाया न्दि-श्यवस्वन्तो नाम देवा- स्तेषाँ वो बृहस्पति. रिषवः। ते नो मृडत- ते नोऽधि ब्रूत- तेभ्यो वो नम- स्तेभ्यो व.स्स्वाहा।। 6।।-

☃ 03-06-02 (1 - 6 षड्टचस्य सूक्तस्याथर्वा ऋषिः। 1 प्रथमर्चः प्राची दिगग्निरसित आदित्याः, 2 द्वितीयाया दक्षिणा दिगिन्द्रस्तिरश्चिराजिः पितरः, 3 तृतीयायाः प्रतीची दिग्वरुणाः पृदाकुरन्नम्, 4 चतुर्थ्या उदीची दिक्सोमःस्वजोऽशनिः, 5 पञ्चम्या ध्रुवा दिग्विष्णुः कल्माषग्रीवो वीरुधः, 6 षष्ठ्याश्चोर्ध्वादिग्बृहस्पतिः श्वित्रं वर्षञ्च देवताः। 1, 3 - 4, 6 प्रथमातृतीयाचतुर्थोषष्ठीनां पञ्चपदा ककुम्मतीगर्भाष्टिः, 2 द्वितीयाया पञ्चपदा ककुम्मतीगर्भात्यष्टिः, 5 पञ्चम्याश्च पञ्चपदा ककुम्मतीगर्भा भुरिगष्टिश्छन्दांसि।।) ❃ शत्रुनिवारणम्

卐 प्राची दिगग्नि. रधिपति-रसितो रक्षिताऽऽदित्या^ इषवः। तेभ्यो नमोऽधिपतिभ्यो- नमो रक्षितृभ्यो नम^ इषुभ्यो- नम^ एभ्यो अस्तु। यो3(ओ)ऽस्मा. न्द्वेष्टि यँ वय. न्द्विष्म. स्तँ वो जम्भे दध्मः।।

卐 दक्षिणा दिगिन्द्रोऽधिपति- स्तिरश्चिराजी रक्षिता पितर^ इषवः। तेभ्यो नमोऽधिपतिभ्यो- नमो रक्षितृभ्यो नम^ इषुभ्यो- नम^ एभ्यो अस्तु। यो3(ओ)ऽस्मा. न्द्वेष्टि यँ वय. न्द्विष्म. स्तँ वो जम्भे दध्मः।। 2।।

卐 प्रतीची दिग्वरुणोऽधिपतिः- पृदाकू रक्षिताऽन्न. मिषवः। तेभ्यो नमोऽधिपतिभ्यो- नमो रक्षितृभ्यो नम^ इषुभ्यो- नम^ एभ्यो अस्तु। यो3(ओ)ऽस्मा. न्द्वेष्टि यँ वय. न्द्विष्म. स्तँ वो जम्भे दध्मः।। 3।।

卐 उदीची दिक्सोमोऽधिपति- स्स्वजो रक्षिताऽशनि.रिषवः। तेभ्यो नमोऽधिपतिभ्यो- नमो रक्षितृभ्यो नम^ इषुभ्यो- नम^ एभ्यो अस्तु। यो3(ओ)ऽस्मा. न्द्वेष्टि यँ वय. न्द्विष्म. स्तँ वो जम्भे दध्मः।। 4।।

卐 ध्रुवा दि.ग्विष्णु रधिपतिः- कल्माषग्रीवो रक्षिता वीरुध^ इषवः। तेभ्यो नमोऽधिपतिभ्यो- नमो रक्षितृभ्यो नम^ इषुभ्यो- नम^ एभ्यो अस्तु। यो3(ओ)ऽस्मा. न्द्वेष्टि यँ वय. न्द्विष्म. स्तँ वो जम्भे दध्मः ।। 5।।

卐 ऊर्ध्वा दि.ग्बृहस्पति. रधिपति- श्श्वित्रो रक्षिता वर्ष. मिषवः। तेभ्यो नमोऽधिपतिभ्यो- नमो रक्षितृभ्यो नम^ इषुभ्यो- नम^ एभ्यो अस्तु। यो3(ओ)ऽस्मा. न्द्वेष्टि यँ वय. न्द्विष्म. स्तँ वो जम्भे दध्मः ।। 6।।-

03-06-03 (1 - 6 षड्टचस्य सूक्तस्य ब्रह्मा ऋषिः। यमिनी देवता। 1 प्रथमर्चोऽतिशक्करी गर्भा चतुष्पदातिजगती, 2 - 3 द्वितीयातृतीययोरनुष्टुप्, 4 चतुर्थ्या यवमध्या विराड्ककुप्, 5 पञ्चम्यास्त्रिष्टुप्, 6 षष्ठ्याश्च विराड्गर्भा प्रस्तारपङ्क्तिश्छन्दांसि।।) ❀

पशु पोषणम्

卐 एकैकयैषा सृष्ट्या सं बभूव- यत्र गा^ असृजन्त भूतकृतो विश्वरूपाः। यत्र विजायते यमि.न्यपर्तु- स्सा पशू. न्क्षिणाति रिफती रुशती।। 1।।

卐 एषा पशू.न्त्स.ङ्क्षिणाति- क्रव्या द्भूत्वा व्यद्वरी। उतैनां ब्रह्मणे दद्या-त्तथा स्योना शिवा स्यात्।। 2।।

卐 शिवा भव पुरुषेभ्यो- गोभ्यो अश्वेभ्य. श्शिवा। शिवाऽस्मै सर्वस्मै-
क्षेत्राय शिवा न^ इहैधि।। 3।।

卐 इह पुष्टि. रिह रस^- इह सहस्रसातमा भव। पशून् यमिनि पोषय।।
4।।

卐 यत्रा सुहार्द. स्सुकृतो मदन्ति- विहाय रोग. न्तन्व1(अ) स्स्वायाः। तँ
लोकँ यमिन्यभिसंबभूव- सा नो मा हिंसी. त्पुरुषा.न्पशूंश्च।। 5।।

卐 यत्रा सुहार्दां सुकृता- मग्निहोत्रहुताँ यत्र लोकः। तँ लोकँ
यमिन्यभिसम्बभूव- सा नो मा हिंसी. त्पुरुषा.न्पशूंश्च।। 6।।-

03-06-04 (1 - 8 अष्टर्चस्य सूक्तस्योद्दालक ऋषिः। 1-6 प्रथमादिषड्चां शितिपादविः, 7 सप्तम्याः कामः, 8 अष्टम्याश्च भूमिर्देवताः। 1, 3 प्रथमातृतीययोर्ऋचोः पथ्यापङ्क्तिः, 2, 4 - 6 द्वितीयाया श्चतुर्थ्यादि तृचस्य चानुष्टुप्, 7 सप्तम्यास्त्र्यवसाना षद्पदा उपरिष्टाद्दैवी बृहती ककुम्मतीगर्भा विराड्गती, 8 अष्टम्याश्चोपरिष्टाद्बृहती छन्दांसि।।) ❀ आविः

卐 यद्राजानो विभजन्त इष्टापूर्तस्य- षोडशँ यमस्याऽमी~ सभासदः।
अवि. स्तस्मा.त्प्र मुञ्चति- दत्त. श्शितिपा.त्स्वधा।। 1।।

卐 सर्वा. न्कामा. न्पूरय-त्याभव. न्प्रभव. न्भवन्न्। आकूतिप्रोऽविर्दत्त-
श्शितिपा. न्नोप दस्यति।। 2।।

卐 यो ददाति शितिपाद- मविँ लोकेन सम्मितम्। स^ नाक मभ्यारोहति-

यत्र शुल्को न क्रियते- अबलेन बलीयसे।। 3।।

卐 पञ्चापूपं शितिपाद- मविँ लोकेन सम्मितम्। प्रदातोप जीवति- पितृणाँ

लोकेऽक्षितम्।। 4।।

卐 पञ्चापूपं शितिपाद- मविँ लोकेन सम्मितम्। प्रदातोप जीवति-

सूर्यामासयो. रक्षितम्।। 5।।

卐 इरेव नोप दस्यति- समुद्र^इव पयो महत्। देवौ संवासिना.विव-

शितिपा.न्नोप दस्यति।। 6।।

卐 क^ इद.ङ्कस्मा अदा- त्कामꣳ कामायाऽदात्। कामो दाता- कामꣳ

प्रतिग्रहीता- कामं स्समुद्र.मा विवेश। कामेन त्वा प्रति गृह्णामि-

कामैतत्ते।। 7।।

卐 भूमि.ष्ट्वा प्रति गृह्णा-त्वन्तरिक्ष. मिदं महत्। माऽहं प्राणेन माऽऽत्मना-

मा प्रजया प्रतिगृह्य वि राधिषि।। 8।।-

☬ 03-06-05 (1 - 7 सप्तर्चस्य सूक्तस्याथर्वा ऋषिः। चन्द्रमा सांमनस्यञ्च देवते। 1 - 4 प्रथमादिचतुर्ऋचामनुष्टुप् पञ्चम्या विराङ्गगती, 6 षष्ठ्याः प्रस्तारपङ्क्तिः, 7 सप्तम्याश्च त्रिष्टुप् छन्दांसि।।) ❀ सांमनस्यम्

卐 सहृदयं सांमनस्य- मविद्वेष.ङ्कृणोमि वः। अन्यो अन्य. मभि हर्यत- वत्स. ञ्जात मिवाघ्न्या।। 1।।

卐 अनुव्रतः पितुः पुत्रो- मात्रा भवतु सम्मनाः। जाया पत्ये मधुमतीँ- वाचँ वदतु शन्तिवाम्।। 2।।

卐 मा भ्राता भ्रातर. न्द्विक्ष- न्मा स्वसार.मुत स्वसा। सम्यञ्च. स्सव्रता भूत्वा- वाचँ वदत भद्रया।। 3।।

卐 येन देवा^ न वियन्ति- नो च विद्विषते मिथः। तत्कृण्मो ब्रह्म वो गृहे- सञ्ज्ञानं पुरुषेभ्यः।। 4।।

卐 ज्यायस्वन्त. श्चित्तिनो मा वि यौष्ट- संराधयन्त. स्सधुरा. श्चरन्तः। अन्यो अन्यस्मै वल्गु वदन्त^ एत- सध्रीचीना.न्व^ स्सम्मनस. स्कृणोमि।। 5।।

卐 समानी प्रपा सह वोऽन्नभाग- स्समाने योक्त्रे सह वो युनज्मि। सम्यञ्चोऽग्निं सपर्यतारा- नाभिमिवाऽभितः।। 6।।

卐 सध्रीचीना.न्व. स्सम्मनस. स्कृणो-म्येकश्नुष्टी.न्त्सँवननेन सर्वान्। देवा^ इवामृतं रक्षमाणा- स्सायंप्रात. स्सौमनसो वो अस्तु।। 7।।-

03-06-06 (1-11 एकादशर्चस्य सूक्तस्य ब्रह्मा ऋषिः। पाप्महा मन्त्रोक्ताश्च देवताः। 1 - 3, 6 -11 प्रथमादितृचस्य षष्ठ्यादिषणणाञ्चानुष्टुप्, 4 चतुर्थ्या भुरिगनुष्टुप्, 5 पञ्चम्याश्च विराट् प्रस्तारपङ्क्तिश्छन्दांसि।।) ❀ यक्ष्मनाशनम्

卐 वि देवा^ जरसावृत-न्वि त्व.मग्ने अरात्या। व्यं1(अ)हं सर्वेण पाप्मना- वि यक्ष्मेण समायुषा।। 1।।

卐 व्यात्र्या पवमानो- वि शक्रः पापकृत्यया। व्यं1(अ)हं सर्वेण पाप्मना- वि यक्ष्मेण समायुषा।। 2।।

卐 वि ग्राम्याः पशव^ आरण्यै- र्व्याप.स्तृष्णयाऽसरन्न्। व्यं1(अ)हं सर्वेण पाप्मना- वि यक्ष्मेण समायुषा।। 3।।

卐 वी3(ई)मे~ द्यावापृथिवी~ इतो- वि पन्थानो दिशन्दिशम्। व्यं1(अ)हं सर्वेण पाप्मना- वि यक्ष्मेण समायुषा।। 4।।

卐 त्वष्टा दुहित्रे वहतुं युनक्ती-तीदँ विश्वं भुवनँ वि याति। व्यं1(अ)हं सर्वेण पाप्मना- वि यक्ष्मेण समायुषा।। 5।।

卐 अग्निः प्राणा.न्त्सन्दधाति- चन्द्रः प्राणेन संहितः। व्यं1(अ)हं सर्वेण पाप्मना- वि यक्ष्मेण समायुषा।। 6।।

卐 प्राणेन विश्वतोवीर्य- न्देवा. स्सूर्यं समैरयन्न्। व्यं1(अ)हं सर्वेण पाप्मना- वि यक्ष्मेण समायुषा।। 7।।

卐 आयुष्मता. मायुष्कृतां- प्राणेन जीव मा मृथाः। व्यं1(अ)हं सर्वेण पाप्मना- वि यक्ष्मेण समायुषा।। 8।।

卐 प्राणेन प्राणतां प्रा-णेहैव भव मा मृथाः। व्यं1(अ)हं सर्वेण पाप्मना- वि यक्ष्मेण समायुषा।। 9।।

卐 उदायुषा समायु-षोदोषधीनां रसेन। व्यं1(अ)हं सर्वेण पाप्मना- वि यक्ष्मेण समायुषा।। 10।।

卐 आ पर्जन्यस्य वृ-ष्ट्योदस्थामाऽमृता^ वयम्। व्यं1(अ)हं सर्वेण पाप्मना- वि यक्ष्मेण समायुषा।। 11।।

- तृतीय काण्डं समाप्तम्।।-

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

## ʊ चतुर्थङ्काण्डम्

## ॐ चतुर्थ काण्डे प्रथमोऽनुवाकः

04-01-01 (1 - 7 सप्तर्चस्य सूक्तस्य वेन ऋषिः। बृहस्पतिरादित्यो वा देवता। 1, 3 - 4, 6 - 7 प्रथमातृतीयाचतुर्थोषष्ठीसप्तमीनामृचां त्रिष्टुप्, 2, 5 द्वितीयापञ्चम्यो भुरिक्त्रिष्टुप् छन्दसी।।) ❁ ब्रह्मविद्या

卐 ब्रह्म जज्ञानं प्रथमं पुरस्ता-द्वि सीमत. स्सुरुचो वेन^ आवः। स^ बुध्न्या उपमा^ अस्य विष्ठा- स्सतश्च योनि. मसतश्च वि वः।। 1।।

卐 इयं पित्र्या राष्ट्र्येत्वग्रे- प्रथमाय जनुषे भुवनेष्ठाः। तस्मा एतं सुरुचं ह्वार.मह्य- ङ्घर्मं श्रीणन्तु प्रथमाय धास्यवे।। 2।।

卐 प्र यो जज्ञे विद्वा. नस्य बन्धु- र्विश्वा देवाना. ञ्जनिमा विवक्ति। ब्रह्म ब्रह्मण^ उज्जभार- मध्या. न्नीचै. रुच्चै. स्स्वधा ≈अभि प्र तस्थौ।। 3।।

卐 स^ हि दिव. स्स पृथिव्या^ ऋतस्था^- मही क्षेमं रोदसी~ अस्कभायत्। महा.न्मही~ अस्कभाय- द्वि जातो द्यां सद्म पार्थिवञ्च रजः।। 4।।

卐 स^ बुध्न्या.दाष्ट्र जनुषोऽभ्यग्रं- बृहस्पति.र्देवता तस्य सम्राट्। अह. र्यच्छुक्र. ञ्ज्योतिषो जनिष्टा-ऽथ द्युमन्तो वि वसन्तु विप्राः।। 5।।

卐 नून. न्तदस्य काव्यो हिनोति- महो देवस्य पूर्व्यस्य धाम। एष^ जज्ञे बहुभि. स्साक. मित्था- पूर्वे अर्धे विषिते ससन्नु।। 6।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 योऽथर्वाणं पितर. न्देवबन्धुं- बृहस्पति. न्नमसाऽव च गच्छात्। त्वँ विश्वेषा. ञ्जनिता यथाऽसः- कवि. र्देवो न दभाय.त्स्वधावान्।। 7।।-

04-01-02 (1 - 8 अषअटर्चस्य सूक्तस्य वेन ऋषिः। आत्मा देवता। 1 - 5, 7 प्रथमादि पञ्चर्चां सप्तम्याश्च त्रिष्टुप्, 6 षष्ठ्याः पुरोऽनुष्टुप्त्रिष्टुप्, 8 अष्टम्याश्चोपरिष्टाज्ज्योतिरश्छन्दांसि।।) आत्मविद्या

卐 य^ आत्मदा^ बलदा^ यस्य विश्व -उपाऽऽसते प्रशिषँ यस्य देवाः। यो3(ओ)ऽस्येशे द्विपदो य.श्चतुष्पदः- कस्मै देवाय हविषा विधेम।। 1।।

卐 यः प्राणतो निमिषतो महि-त्वैको राजा जगतो बभूव। यस्य च्छायाऽमृतँ यस्य मृत्युः- कस्मै देवाय हविषा विधेम।। 2।।

卐 यङ्क्रन्दसी~ अवत. श्चस्कभाने~- भियसाने~ रोदसी~ अह्वयेथाम्। यस्याऽसौ पन्था^ रजसो विमानः- कस्मै देवाय हविषा विधेम।। 3।।

卐 यस्य द्यौ.रुर्वी पृथिवी च मही- यस्याद^ उर्व1(अ)न्तरिक्षम्। यस्याऽसौ सूरो विततो महित्वा- कस्मै देवाय हविषा विधेम।। 4।।

卐 यस्य विश्वे हिमवन्तो महित्वा- समुद्रे यस्य रसा. मिदाहुः। इमाश्च प्रदिशो यस्य बाहू~- कस्मै देवाय हविषा विधेम।। 5।।

卐 आपो अग्रे विश्व. माव- न्गर्भ. न्दधाना^ अमृता^ ऋतज्ञाः। यासु देवी.ष्वधि देव^ आसी- त्कस्मै देवाय हविषा विधेम।। 6।।

卐 हिरण्यगर्भ. स्समवर्तताऽग्रे- भूतस्य जातः पति. रेक^ आसीत्। स^ दाधार पृथिवी. मुत द्या-ङ्कस्मै देवाय हविषा विधेम।। 7।।

卐 आपो वत्स. ञ्जनयन्ती- गर्भ. मग्रे समैरयन्न्। तस्योत जायमान-स्योल्ब^ आसी द्धिरण्ययः- कस्मै देवाय हविषा विधेम।। 8।।-

04-01-03 (1 - 7 सप्तर्चस्य सूक्तस्य सूक्तस्याथर्वा ऋषिः। रुद्रो व्याघ्रो वा देवता। 1 प्रथमर्चः पथ्यापङ्क्तिः, 2, 4 - 6 द्वितीयायाश्चतुर्थ्यादितृचस्य चानुष्टुप्, 3 तृतीयाया गायत्री सप्तम्याश्च ककुम्मतीगर्भोपरिष्टाद्बृहती छन्दांसि।।) शत्रुनाशनम्

卐 उदित.स्त्रयो अक्रम- न्व्याघ्रः पुरुषो वृकः। हिरुग्घि यन्ति सिन्धवो- हिरुग्देवो वनस्पतिर्-हिरु.ङ्नमन्तु शत्रवः।। 1।।

卐 परेणैतु पथा वृकः- परमेणोत तस्करः। परेण दत्वती रज्जुः- परेणाऽघायु. ररषतु।। 2।।

卐 अक्ष्यौ च ते मुखञ्च ते- व्याघ्र जम्भयामसि। आत्सर्वा. न्विंशति. न्नखान्।।3।।

卐 व्याघ्र. न्दत्वताँ वयं- प्रथम.ञ्जम्भयामसि। आदु ष्टेन. मथो~ अहिं- यातुधान. मथो~ वृकम्।। 4।।

卐 यो अद्य स्तेन^ आऽयति- स^ संपिष्टो अपायति। पथा मपध्वंसेनै- त्विन्द्रो वज्रेण हन्तु तम्।। 5।।

卐 मूर्णा मृगस्य दन्ता^- अपिशीर्णा उ पृष्टयः। निम्रुक्ते गोधा भवतु- नीचा यच्छशयु. र्मृगः।। 6।।

卐 यत्सँयमो न वि यमो- वि यमो यन्न सँयमः। इन्द्रजा. स्सोमजा^ आथर्वण-मसि व्याघ्रजम्भनम्।। 7।।-

04-01-04 (1 - 8 अष्टर्चस्य सूक्तस्याथर्वा ऋषिः। वनस्पतिर्देवता। 1 - 3, 5, 8 प्रथमादितृचस्य पञ्चम्यष्टम्योर्ऋचोरनुष्टुप्, 4 चतुर्थ्याः भुरिक्पुर उष्णिक्, 6-7 षष्ठीसप्तम्योश्च भुरिगनुष्टुप् छन्दांसि।।) ❃ वाजीकरणम्

卐 यान्त्वा गन्धर्वो अखनन्- द्वरुणाय मृतभ्रजे। ता.न्त्वा वय. ङ्खनाम-स्योषधिं शेपहर्षणीम्।। 1।। (वाजीकरणम्)

卐 उदुषा^ उदु सूर्य^- उदिदं मामकँ वचः। उदेजतु प्रजापति- र्वृषा शुष्मेण वाजिना।। 2।।

卐 यथा स्म ते विरोहतो-ऽभितप्त. मिवानति। ततस्ते शुष्मवत्तर- मिय. ङ्कृणो. त्वोषधिः।। 3।।

卐 उच्छुष्मौषधीनां- सार^ ऋषभाणाम्। सं पुंसा.मिन्द्र वृष्ण्य- मस्मि. न्धेहि तनूवशिन्न्।। 4।।

卐 अपां रसः प्रथमजो-ऽथो~ वनस्पतीनाम्। उत सोमस्य भ्राता-ऽस्युताऽऽर्श. मसि वृष्ण्यम्।। 5।।

卐 अद्याऽग्ने अद्य सवित- रद्य देवि सरस्वति। अद्यास्य ब्रह्मणस्पते- धनुरिवाऽऽतानया पसः।। 6।।

卐 आऽहं. न्तनोमि ते पसो- अधि ज्यामिव धन्वनि। क्रमस्वर्श^ इव रोहित- मनवग्लायता सदा।। 7।।

卐 अश्वस्याऽश्वतरस्या-ऽजस्य पेत्वस्य च। अथ ऋषभस्य ये वाजा^- स्ता.नस्मि. न्धेहि तनूवशिन्न्।। 8।।-

04-01-05 (1 - 7 सप्तर्चस्य सूक्तस्य ब्रह्मा ऋषिः। वृषभः स्वपनञ्च देवते। 1, 3 - 6 प्रथमर्चस्तृतीयादि चतसृणाञ्चानुष्टुप्, 2 द्वितीयाया भुरिगनुष्टुप्, 7 सप्तम्याश्च पुरस्ताञ्ज्योतिस्त्रिष्टुप् छन्दांसि।।) ❃ स्वापनम्

卐 सहस्रशृङ्गो वृषभो- य.स्समुद्रा. दुदाचरत्। तेना सहस्येना वय- न्नि जना. न्त्स्वापयामसि।। 1।। (स्वप्नार्थम्)

卐 न भूमिँ वातो अति वाति- नाति पश्यति कश्चन। स्त्रियश्च सर्वा. स्स्वापय- शुन. श्चेन्द्रसखा चरन्न्।। 2।।

卐 प्रोष्ठेशया. स्तल्पेशया^- नारी.र्या वह्यशीवरीः। स्त्रियो याः पुण्यगन्धय- स्ता. स्सर्वा. स्स्वापयामसि।। 3।।

卐 एज.देज. दजग्रभ- ञ्चक्षुः प्राण. मजग्रभम्। अङ्गा.न्यजग्रभं सर्वा- रात्रीणा. मतिशर्वरे।। 4।।

卐 य॑ आस्ते य॒श्चर॑ति॒ यश्च॒ तिष्ठ॒न्विपश्य॑ति। तेषां॒ सं द॑ध्मो॒ अक्षी॑णि॒ यथे॒दं ह॒र्म्य॑ न्तथा॑।। 5।।

卐 स्वप्तु॑ मा॒ता स्वप्तु॑ पि॒ता स्वप्तु॒ श्वा स्वप्तु॑ वि॒श्पतिः॑। स्वपं॑त्वस्यै ज्ञा॒त॒य॒ स्स्वप्त्व॒य॒ म॒भितो॒ जनः॑।। 6।।

卐 स्वप्न॑ स्वप्नाऽभि॒करं॑णेन॒ सर्वं॒ न्निष्वा॑पया॒ जन॑म्। ओ॒त्सू॒र्य॒ म॒न्या न्त्स्वा॒पया॑ऽव्यु॒षं ज्जा॑गृता॒ दह॒ मिन्द्र॑ इ॒वारि॑ष्टो॒ अक्षि॑तः।। 7।।

## चतुर्थ काण्डे द्वितीयोऽनुवाकः

04-02-01 (1 - 8 अष्टर्चस्य सूक्तस्य गरुत्मानृषिः। तक्षको मन्त्रोक्ताश्च देवताः (1 ब्राह्मणः, 2 द्यावापृथिवी, सप्तसिन्धवः, 3 सुपर्णः, 4 -8 विषम्)। अनुष्टुप् छन्दः।।) ❀ विषघ्नम्

卐 ब्रा॒ह्म॒णो ज॑ज्ञे प्रथ॒मो दश॑शीर्॒षो॒ दशा॑ऽस्यः। स॑ सोमं॑ प्रथ॒मः॑ पंपौ॒ स॑ चकाराऽर॒सं वि॒षम्।। 1।। (सर्प मन्त्राः)

卐 याव॑ती॒ द्यावा॑पृथि॒वी व॑रि॒म्णा याव॑त्स॒प्त सिन्ध॑वो वितष्ठि॒रे। वाचं॑ वि॒षस्य॒ दूष॑णी॒ न्ता॒मितो॒ निर॑वादिषम्।। 2।।

卐 सु॒प॒र्णस्त्वा॑ ग॒रुत्मा॒न्विषं॑ प्रथ॒मं मा॑ऽवयत्। नाऽमी॑मदो॒ नाऽरू॑रुप॒ उ॒ताऽस्मा॑ अभवः पि॒तुः।। 3।।

卐 यस्त आस्य.त्पञ्चाङ्गुरि- र्वक्रा. च्चिदधि धन्वनः। अपस्कम्भस्य शल्या-न्निरवोच. महँ विषम्।। 4।।

卐 शल्या.द्विष. न्निरवोचं- प्राञ्जना. दुत पर्णधेः। अपाष्ठा. च्छृङ्गा. त्कुल्मला- न्निरवोच. महँ विषम्।। 5।।

卐 अरस.स्त इषो शल्यो-ऽथो~ ते अरसँ विषम्। उताऽरसस्य वृक्षस्य-धनुष्टे अरसारसम्।। 6।।

卐 ये अपीष.न्ये अदिह-न्य आस्य.न्ये अवासृजन्न्। सर्वे ते वध्रयꣳ कृता^-वध्रि. र्विषगिरिꣳ कृतः।। 7।।

卐 वध्रय.स्ते खनितारो- वध्रि स्त्व.मस्योषधे। वध्रि. स्स^ पर्वतो गिरि- र्यतो जात. मिदँ विषम्।। 8।।-

04-02-02 (1 - 8 अष्टर्चस्य सूक्तस्य गरुत्मानृषिः। वनस्पतिर्देवता। 1 – 3, 5 - 8 प्रथमादि तृचस्य पञ्चम्यादि अष्टर्चोऽनुष्टुप्, 4 चतुर्थी स्वराट् छन्दसी।।) ❃ विषनाशनम्

卐 वा.रिदँ वारयातै- वरणावत्या. मधि। तत्राऽमृतस्याऽऽसिक्त- न्तेना ते वारये विषम्।। 1।।

卐 अरसं प्राच्यँ विष- मरसँ यदुदीच्यम्। अथेद. मधराच्य-ङ्करम्भेण वि कल्पते।। 2।।

卐 करम्भ.ङ्कृत्वा तिर्यं- पीबस्पाक. मुदारथिम्। क्षुधा किल त्वा दुष्टनो-
जक्षिवा.न्त्स^ न रूरुपः।। 3।।

卐 वि ते मदं मदावति- शरमिव पातयामसि। प्र त्वा चरुमिव येषन्तँ-
वचसा स्थापयामसि।। 4।।

卐 परि ग्राम.मिवाऽचितँ- वचसा स्थापयामसि। तिष्ठा वृक्ष^इव स्था-
म्न्यभ्रिखाते न रूरुपः।। 5।।

卐 पवस्तै.स्त्वा पर्यक्रीण- न्दूर्शेभि. रजिनै रुत। प्रक्रीरसि त्वमोषधे-
ऽभ्रिखाते न रूरुपः।। 6।।

卐 अनाप्ता ये वः प्रथमा- यानि कर्माणि चक्रिरे। वीरा.न्नो अत्र मा दभ-
न्तद्व^ एत. त्पुरो दधे।। 7।।-

04-02-03 (1 - 7 सप्तर्चस्य सूक्तस्याथर्वा ऽङ्गिरा ऋषिः। चन्द्रमा आपश्च देवताः। 1,7 प्रथमासप्तम्योर्ऋचोर्भुरिक्त्रिष्टुप्, 2, 4, 6 द्वितीयाचतुर्थीषष्ठीनामनुष्टुप्, 3 तृतीयायास्त्रिष्टुप्, 5 पञ्चम्याश्च विराट् प्रस्तारपङ्क्तिश्छन्दांसि।।) राज्याभिषेकः

卐 भूतो भूतेषु पय^ आ दधाति- स^ भूताना. मधिपति. र्बभूव। तस्य मृत्यु.
श्चरति राजसूयं- स^ राजा राज्य. मनु मन्यता. मिदम्।। 1।।

卐 अभि प्रेहि माऽप वेन^- उग्र. श्चेत्ता सपत्नहा। आ तिष्ठ मित्रवर्धन- तुभ्य.
न्देवा^ अधि ब्रवन्न्।। 2।। (ब्रुवन्न्)

卐 आतिष्ठन्तं परि विश्वे अभूष-न्छ्रियँ वसान. श्चरति स्वरोचिः। मह.त्तद्वृष्णो असुरस्य नामा-ऽऽ विश्वरूपो अमृतानि तस्थौ।। 3।।

卐 व्याघ्रो अधि वैयाघ्रे- वि क्रमस्व दिशो महीः। विशस्त्वा सर्वा वाञ्छ-न्त्वापो दिव्याः पयस्वतीः।। 4।।

卐 या आपो दिव्याः पयसा मद-न्त्यन्तरिक्ष उत वा पृथिव्याम्। तासा.न्त्वा सर्वासा. मपा- मभि षिञ्चामि वर्चसा।। 5।।

卐 अभि त्वा वर्चसाऽसिच- न्नापो दिव्याः पयस्वतीः। यथाऽसो मित्रवर्धन-स्तथा त्वा सविता करत्।। 6।।

卐 एना व्याघ्रं परिषस्वजाना- स्सिंहं हिन्वन्ति महते सौभगाय। समुद्र.न्न सुभुव. स्तस्थिवांसं- मर्मृज्यन्ते द्वीपिन. मप्स्व1(अ)न्तः।। 7।।-

04-02-04 (1 - 10 दशर्चस्य सूक्तस्य भृगुर्ऋषिः। त्रैकाकुदाञ्जनं देवता। 1, 4 -10 प्रथमर्चश्चतुर्थ्यादि दशानाञ्चानुष्टुप्, 2 द्वितीयाया ककुम्मत्यनुष्टुप्, 3 तृतीयायाश्च पथ्यापङ्क्तिश्छन्दांसि।।) आञ्जनम्

卐 एहि जीव. न्त्रायमाणं- पर्वतस्याऽस्यक्ष्यम्। विश्वेभि. र्देवै. र्दत्तं- परिधि. र्जीवनाय कम्।। 1।।

卐 परिपाणं पुरुषाणां- परिपाण.ङ्गवामसि। अश्वाना. मर्वतां- परिपाणाय तस्थिषे।। 2।।

卐 उतासि परिपाणँ- यातुजम्भन. माऽञ्जन। उताऽमृतस्य त्वँ वेत्था-ऽथो~ असि जीवभोजन- मथो~ हरितभेषजम्।। 3।।

卐 यस्याऽऽञ्जन प्रसर्प-स्यङ्गमङ्गं परुष्परुः। ततो यक्ष्मँ वि बाधस- उग्रो मध्यमशी.रिव।। 4।।

卐 नैनं प्राऽऽप्नोति शपथो- न कृत्या नाऽभिशोचनम्। नैनँ विष्कन्ध. मश्नुते- यस्त्वा बिभर्त्याऽञ्जन।। 5।।

卐 असन्मन्त्रा. दुष्वप्न्या- दुष्कृता. च्छमला.दुत। दुर्हार्द. श्चक्षुषो घोरा- त्तस्मा.न्नः पाह्याऽञ्जन।। 6।।

卐 इदँ विद्वा. नाऽञ्जन- सत्यँ वक्ष्यामि नानृतम्। सनेय. मश्व.ङ्गा. मह- मात्मान. न्तव पूरुष।। 7।।

卐 त्रयो दासा^ आऽञ्जनस्य- तक्मा बलास^ आदहिः। वर्षिष्ठः पर्वताना- न्त्रिककु.न्नाम ते पिता।। 8।।

卐 यदाऽञ्जन. न्त्रैककुद- ञ्जातं हिमवत.स्परि। यातूंश्च सर्वा. न्जम्भय- त्सर्वांश्च यातुधान्यः।। 9।।

卐 यदि वाऽसि त्रैककुदँ- यदि यामुन. मुच्यसे। उभे~ ते भद्रे~ नाम्नी~- ताभ्या.न्नः पाह्याऽञ्जन।। 10।।-

04-02-05 (1 - 7 सप्तर्चस्य सूक्तस्याथर्वा ऋषिः। शशाङ्खमणिः कृशनो देवता। 1 - 5 प्रथमादिपञ्चर्चामनुष्टुप्, 6 षष्ठ्याः पथ्यापङ्क्तिः, 7 सप्तम्याश्च पञ्चपदा परानुष्टुप् शक्करी छन्दांसि।।) ❁ शङ्खमणिः

卐 वाता. ज्जातो अन्तरिक्षा- द्विद्युतो ज्योतिष.स्परि। स^ नो हिरण्यजा-श्शङ्खः कृशनः पात्वंहसः।। 1।।

卐 यो अग्रतो रोचनानां- समुद्रा. दधि जज्ञिषे। शङ्खेन हत्वा रक्षां-स्यत्त्रिणो वि षहामहे।। 2।।

卐 शङ्खेनाऽमीवा. मर्मतिं- शङ्खेनोत सदान्वाः। शङ्खो नो विश्वभेषजः-कृशनः पात्वंहसः।। 3।।

卐 दिवि जात. स्समुद्रज- स्सिन्धुत.स्पर्याभृतः। स^ नो हिरण्यजा. श्शङ्ख-आयुष्प्रतरणो मणिः।। 4।।

卐 समुद्रा. ज्जातो मणि- र्वृत्रा. ज्जातो दिवाकरः। सो अस्मा. न्त्सर्वतः पातु- हेत्या देवासुरेभ्यः।। 5।।

卐 हिरण्याना. मेकोऽसि- सोमा. त्त्वमधि जज्ञिषे। रथे त्व.मसि दर्.शत^-इषुधौ रोचन. स्त्वं- प्र ण^ आयूंषि तारिषत्।। 6।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 देवाना. मस्थि कृशनं बभूव- तदात्मन्व. च्चर.त्यप्स्व1(अ)न्तः। तत्ते बध्ना. म्यायुषे वर्चसे- बलाय दीर्घायुत्वाय शतशारदाय- कार्शन.स्त्वाऽभि रक्षतु।। 7।।

## ꗃ चतुर्थ काण्डे तृतीयोऽनुवाकः

04-03-01 (1 - 12 द्वादशर्चस्य सूक्तस्य भृग्वङ्गिरा ऋषिः। इन्द्ररूपोऽनडुद्देवता। 1, 4 प्रथमा चतुर्थ्योर्ऋचोर्जगती, 2 द्वितीयाया भुरिक्त्रिष्टुप्, 3, 5 - 6 तृतीयापञ्चमीषष्ठीनां त्रिष्टुप्, 7 सप्तम्यास्त्र्यवसाना षट्पदानुष्टप् गर्भोपरिष्टाज्जागता निचृच्छक्करी, 8 - 12 अष्टम्यादि पञ्चानाञ्चानुष्टुप् छन्दांसि।।) ❀ अनड्वान्

卐 अनड्वा. न्दाधार पृथिवी. मुत द्या- मनड्वा. न्दाधारोर्व1(अ)न्तरिक्षम्। अनड्वा. न्दाधार प्रदिश. ष्षडुर्वी- रनड्वा. न्विश्वं भुवन. मा विवेश।। 1।।

卐 अनड्वा. निन्द्र. स्स^ पशुभ्यो वि चष्टे- त्रया.न्छक्रो वि मिमीते अध्वनः। भूतं भविष्य. द्भुवना दुहान- स्सर्वा देवाना. ञ्चरति व्रतानि।। 2।।

卐 इन्द्रो जातो मनुष्ये.ष्वन्त- र्घर्म. स्तप्त. श्चरति शोशुचानः। सुप्रजा. स्स.न्त्स^ उदारे न सर्ष-द्यो नाऽश्नीया. दनडुहो विजानन्न्।। 3।।

卐 अनड्वा. न्दुहे सुकृतस्य लोक- ऐनं प्यायति पवमानः पुरस्तात्। पर्जन्यो धारा^ मरुत^ ऊधो अस्य- यज्ञः पयो दक्षिणा दोहो अस्य।। 4।।

卐 यस्य नेशे यज्ञपति. र्न यज्ञो- नास्य दातेशे न प्रतिग्रहीता। यो विश्वजि. द्विश्वभृ. द्विश्वकर्मा- घर्म.न्नो ब्रूत यतम. श्चतुष्पात्।। 5।।

卐 येन देवा. स्स्व.रा.रुरुहुर्-हित्वा शरीर. ममृतस्य नाभिम्। तेन गेष्म सुकृतस्य लोक- ङ्घर्मस्य व्रतेन तपसा यशस्यवः।। 6।।

卐 इन्द्रो रूपेणाऽग्नि र्वहेन- प्रजापतिः परमेष्ठी विराट्। विश्वानरे अक्रमत- वैश्वानरे अक्रमता-ऽनडु.ह्यक्रमत। सोऽदृंहयत सोऽधारयत।। 7।।

卐 मध्य. मेत. दनडुहो- यत्रैष^ वह आहितः। एताव.दस्य प्राचीनँ- यावा. न्प्रत्य.ङ्समाहितः।। 8।।

卐 यो वेदाऽनडुहो दोहा- न्त्सप्ताऽनुपदस्वतः। प्रजाञ्च लोक. ञ्चाऽऽप्नोति- तथा सप्तऋषयो विदुः।। 9।।

卐 पद्भि. स्सेदि. मवक्राम- न्निरा.ञ्जङ्घाभि. रुत्खिदन्न्। श्रमेणाऽनड्वा. न्कीलाल-ङ्कीनाश. श्चाभिगच्छतः।। 10।।

卐 द्वादश वा एता^ रात्री- र्व्रत्या^ आहुः प्रजापतेः। तत्रोप ब्रह्म यो वेद- तद्वा अनडुहो व्रतम्।। 11।।

卐 दुहे साय. न्दुहे प्रात- र्दुहे मध्यन्दिनं परि। दोहा^ ये अस्य सँयन्ति- ता.न्विद्माऽनुपदस्वतः।। 12।।-

04-03-02 (1 - 7 सप्तर्चस्य सूक्तस्य ऋभुर्ऋषिः। वनस्पतिर्देवता। 1 प्रथमर्चस्त्रिपदा गायत्री,  2 - 5 द्वितीयादि चतसृणामनुष्टुप्, 6 षष्ठ्यास्त्रिपदा यवमध्या भुरिग्गायत्री, 7 सप्तम्याश्च बृहती छन्दांसि।।) ❃ रोहिणीवनस्पतिः

卐 रोहण्यसि रोह-ण्यस्थ्न. श्छिन्नस्य रोहणी। रोहयेद. मरुन्धति।। 1।।

卐 यत्ते रिष्टँ यत्ते द्युत्त- मस्ति पेष्ट्र.न्तफ आत्मनि। धाता तद्भद्रया पुन-स्सन्दध. त्परुषा परुः।। 2।।

卐 स.न्ते मज्जा मज्ज्ञा भवतु- समु ते परुषा परुः। स.न्ते मांसस्य विस्त्रस्तं-समस्थ्यपि रोहतु।। 3।।

卐 मज्जा मज्ज्ञा सन्धीयता- ञ्चर्मणा चर्म रोहतु। असृक्ते अस्थि रोहतु- मांसं मांसेन रोहतु।। 4।।

卐 लोम लोम्ना सङ्कल्पया- त्वचा सङ्कल्पया त्वचम्। असृक्ते अस्थि रोहतु- छिन्नं स^ न्धेह्योषधे।। 5।।

卐 स^ उत्तिष्ठ प्रेहि प्र द्रव- रथ. स्सुचक्र. स्सुपवि. स्सुनाभिः। प्रतितिष्ठोर्ध्वः।। 6।।

卐 यदि कर्तं पतित्वा संशश्रे- यदि वाऽश्मा प्रहृतो जघान। ऋभू रथस्येवाऽङ्गानि- सन्दध.त्परुषा परुः।। 7।।-

☃ 04-03-03 (1 - 7 सप्तर्चस्य सूक्तस्य शन्तातिर्ऋषिः। चन्द्रमा विश्वे देवा वा देवताः। अनुष्टुप् छन्दः।।) ❀ रोगनिवारणम्

卐 उत देवा^ अवहित- न्देवा^ उन्नयथा पुनः। उताऽऽग. श्चक्रुष. न्देवा^- देवा^ जीवयथा पुनः।। 1।।

卐 द्वा.विमौ वातौ वात^- आ सिन्धो.रा परावतः। दक्ष.न्ते अन्य^ आ वातु- व्य1(अ)न्यो वातु यद्रपः।। 2।।

卐 आ वात वाहि भेषजँ- वि वात वाहि यद्रपः। त्वं हि विश्वभेषज- देवाना. न्दूत^ ईयसे।। 3।।

卐 त्रायन्ता. मिम. न्देवा- स्त्रायन्तां मरुता.ङ्गणाः। त्रायन्ताँ विश्वा भूतानि- यथाऽय. मरपा^ असत्।। 4।।

卐 आ त्वाऽगमं शन्तातिभि- रथो~ अरिष्टतातिभिः। दक्ष.न्त उग्र. माऽभारिषं- परा यक्ष्मं सुवामि ते।। 5।।

卐 अयं मे हस्तो भगवा- नयं मे भगवत्तरः। अयं मे विश्वभेषजो-ऽयं शिवाभिमर्शनः।। 6।।

卐 हस्ताभ्या. न्दशशाखाभ्या-ञ्जिह्वा वाचः पुरोगवी। अनामयित्नुभ्यां हस्ताभ्या- न्ताभ्या. न्त्वाऽभि मृशामसि।। 7।।-

04-03-04 (1 - 9 नवर्चस्य सूक्तस्य भृगुर्ऋषिः। आज्यमग्निश्च देवते। 1, 5 - 6 प्लृथमापञ्चमीषष्ठीनामृचां त्रिष्टुप्, 2, 4 द्वितीयाचतुर्थोरनुष्टुप्, 3 तृतीयायाः प्रस्तारपङ्क्तिः, 7, 9 सप्तमी नवम्योर्जगती, 8 अष्टम्याश्च पञ्चपदातिशक्करी छन्दांसि।।) ❀ स्वर्ज्योतिष्प्राप्तिः

卐 अजो ह्य1(अ)ग्ने. रजनिष्ट शोका-त्सो अपश्य. ज्जनितार. मग्रे। तेन देवा^ देवता. मग्र आय- न्तेन रोहा. न्रुरुहु. र्मेध्यासः।। 1।।

卐 क्रमध्व. मग्निना नाक-मुख्या. न्हस्तेषु बिभ्रतः। दिव. स्पृष्ठं स्वर्गत्वा- मिश्रा^ देवेभि. राध्वम्।। 2।।

卐 पृष्ठा. त्पृथिव्या^ अह. मन्तरिक्ष. माऽरुह- मन्तरिक्षा. द्दिव. माऽरुहम्। दिवो नाकस्य पृष्ठा- त्स्व1(अ)र्ज्योति. रगा. महम्।। 3।।

卐 स्व1(अ)र्यन्तो नापेक्षन्त- आ द्यां रोहन्ति रोदसी~। यज्ञँ ये विश्वतोधारं- सुविद्वांसो वितेनिरे।। 4।।

卐 अग्ने प्रेहि प्रथमो देवताना- ञ्चक्षु. र्देवाना. मुत मानुषाणाम्। इयक्षमाणा^ भृगुभि. स्सजोषा- स्स्वर्यन्तु यजमाना. स्स्वस्ति।। 5।।

卐 अज मनज्मि पयसा घृतेन- दिव्यं सुपर्णं पयसं बृहन्तम्। तेन गेष्म सुकृतस्य लोकं- स्व.रारोहन्तो अभि नाक.मुत्तमम्।। 6।।

卐 पञ्चौदनं पञ्चभि. रङ्गुलिभि- र्दर्व्योद्धर पञ्चधैत. मोदनम्। प्राच्या. न्दिशि शिरो अजस्य धेहि- दक्षिणाया. न्दिशि दक्षिण. न्धेहि पार्श्वम्।। 7।।

卐 प्रतीच्यां. न्दिशि भसदं. मस्य धे-ह्युत्तरस्या. न्दिश्युत्तर. न्धेहि पार्श्वम्।
ऊर्ध्वायां. न्दिश्य1(अ)जस्याऽनूक. न्धेहि- दिशि ध्रुवायां. न्धेहि पाजस्यं-
मन्तरिक्षे मध्यतो मध्यमस्य।। 8।।

卐 श्रृत. मजं श्रृतया प्रोर्णुहि त्वचा- सर्वै. रङ्गैः. स्सम्भृतँ विश्वरूपम्। स^
उत्तिष्ठेतो अभि नाक मुत्तमं- पद्भि. श्चतुर्भिः प्रति तिष्ठ दिक्षु।। 9।।-

04-03-05 (1 - 16 षोडशर्चस्य सूक्तस्याथर्वा ऋषिः। 1 प्रथमर्चः सर्वा दिशः, 2 - 3 द्वितीयातृतीययोर्वारुधः, 4 चतुर्थ्या मारुतपर्जन्याः, 5 - 9 पञ्चम्यादिपञ्चानां मरुतः, 10 दशम्या अग्निः, 11 एकादश्याः स्तनयित्नुना सहप्रजापतिः, 12 द्वादश्या वरुणाः, 13 -15 त्रयोदश्यादितृचस्य मण्डूकाः पितरश्च, 16 षोडश्याश्च वातो देवताः। 1 - 2, 5 प्रथमाद्वितीया पञ्चमीनां विराड्जगती, 3, 6, 11, 16 तृतीयाषष्ठ्येकादशी षोडशीनां त्रिष्टुप् चतुर्थ्या विराट् पुरस्ताद्बृहती, 7 - 8, 13 - 14 सप्तम्याष्टमी त्रयोदशी चतुर्दशीनामनुष्टुप्, 9 नवम्याः पथ्यापङ्क्तिः, 10 दशम्या भुरिक्त्रिष्टुप्, 12 द्वादश्याः पञ्चपदानुष्टुब्गर्भा भुरिक्त्रिष्टुप्, 15 पञ्चदश्याश्च शङ्कुमत्यनुष्टुप् छन्दांसि।।) ❀ वृष्टिः

卐 समुत्पतन्तु प्रदिशो नभस्वती- स्समभ्राणि वातजूतानि यन्तु।
महऋषभस्य नदतो नभस्वतो- वाश्रा^ आपः पृथिवी. न्तर्पयन्तु।। 1।।

卐 समीक्षयन्तु तविषा स्सुदानवो-ऽपां रसा^ ओषधीभि. स्सचन्ताम्।
वर्षस्य सर्गा^ महयन्तु भूमिं- पृथग्जायन्ता. मोषधयो विश्वरूपाः।। 2।।

卐 समीक्षयस्व गायतो नभां-स्यपाँ वेगास॰ पृथ.गुद्विजन्ताम्। वर्षस्य सर्गा^ महयन्तु भूमिं- पृथ.ग्जायन्ताँ वीरुधो विश्वरूपाः।। 3।।

卐 गणा.स्त्वोप गायन्तु- मारुता॰ पर्जन्य घोषिण॰ पृथक्। सर्गा^ वर्षस्य वर्षतो- वर्षन्तु पृथिवी. मनु।। 4।।

卐 उदीरयत मरुत. स्समुद्रत- स्त्वेषो अर्को नभ^ उत्पातयाथ। महऋषभस्य नदतो नभस्वतो- वाश्रा^ आप॰ पृथिवी. न्तर्पयन्तु।। 5।।

卐 अभि क्रन्द. स्तनयार्दयोदधिं - भूमिं पर्जन्य पयसा समङ्धि। त्वया सृष्टं बहुल. मैतु वर्ष- माशारैषी कृशगु. रेत्वस्तम्।। 6।।

卐 सँ वोऽवन्तु सुदानव^- उत्सा अजगरा^ उत। मरुद्भि॰ प्रच्युता^ मेघा^- वर्षन्तु पृथिवी. मनु।। 7।।

卐 आशामाशाँ वि द्योतताँ- वाता^ वान्तु दिशोदिशः। मरुद्भि॰ प्रच्युता^ मेघा- स्सँ यन्तु पृथिवी. मनु।। 8।।

卐 आपो विद्यु. दभ्रँ वर्षं- सँ वोऽवन्तु सुदानव^- उत्सा^ अजगरा^ उत। मरुद्भि॰ प्रच्युता^ मेघा॰- प्रावन्तु पृथिवी. मनु।। 9।।

卐 अपा. मग्नि. स्तनूभि. स्सँविदानो- य^ ओषधीना. मधिपा^ बभूव। स^ नो वर्षँ वनुता. ञ्जातवेदा॰- प्राणं प्रजाभ्यो अमृत. न्दिव. स्परि।। 10।।

卐 प्रजापति. स्सलिला.दा समुद्रा- दाप^ ईरय. न्नुदधि. मर्दयाति। प्र प्यायतॉं वृष्णो अश्वस्य रेतो-ऽर्वा.ङेतेन स्तनयित्नुनेहि।। 11।।

卐 अपो निषिञ्च. न्नसुरः पिता न.- श्श्वसन्तु गर्गरा^ अपॉं वरुणाऽव नीचीं. रप. स्सृज। वदन्तु पृश्निबाहवो- मण्डूका^ इरिणाऽनु।। 12।।

卐 सँवत्सरं शशयाना^- ब्राह्मणा^ व्रतचारिणः। वाचं पर्जन्यजिन्वितां- प्र मण्डूका^ अवादिषुः।। 13।।

卐 उपप्रवद मण्डूकि- वर्षमा वद तादुरि। मध्ये ह्रदस्य प्लवस्व- विगृह्य चतुरः पदः।। 14।।

卐 खण्वखा'3'इ खैमखा'3'इ- मध्ये तदुरि। वर्षँ वनुध्वं पितरो- मरुतां मन^ इच्छत।। 15।।

卐 महान्त.ङ्कोश. मुदचाऽभिषिञ्च- सविद्युतं भवतु वातु वातः। तन्वतॉं यज्ञं बहुधा विसृष्टा^- आनन्दिनी. रोषधयो भवन्तु।। 16।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

# ॐ चतुर्थ काण्डे चतुर्थोऽनुवाकः

04-04-01 (1 - 9 नवर्चस्य सूक्तस्य ब्रह्मा ऋषिः। वरुणोदेवता। 1 प्रथमर्चोऽनुष्टुप्, 2 - 4, 6 द्वितीयादितृचस्य षष्ठ्याश्च त्रिष्टुप्, 5 पञ्चम्या भुरिक्त्रिष्टुप्, 7 सप्तम्या जगती, 8 अष्टम्यास्त्रिपान्महाबृहती, 9 नवम्याश्च त्रिपदा विराड्गायत्री छन्दांसि।।) ❁ सत्यानृतसमीक्षकः

卐 बृह.न्नेषा. मधिष्ठाता- अन्तिका.दिव पश्यति। यस्ताय. न्मन्यते चर-न्त्सर्व. न्देवा^ इदं विदुः।। 1।।-

卐 यस्तिष्ठति चरति यश्च वञ्चति यो निलाय.ञ्चरति यः प्रतङ्कम्। द्वौ सन्निषद्य यन्मन्त्रयेते~- राजा तद्वेद वरुण.स्तृतीयः।। 2।।

卐 उतेयं भूमि. र्वरुणस्य राज्ञ^- उताऽसौ द्यौ. र्बृहती दूरेअन्ता। उतो~ समुद्रौ वरुणस्य कुक्षी~- उताऽस्मि. न्नल्प उदके निलीनः।। 3।।

卐 उत यो द्या.मतिसर्पा. त्परस्ता- न्न स^ मुच्यातै वरुणस्य राज्ञः। दिव. स्पशः प्र चरन्तीद. मस्य- सहस्राक्षा^ अति पश्यन्ति भूमिम्।। 4।।

卐 सर्व. न्तद्राजा वरुणो वि चष्टे- यदन्तरा रोदसी~ यत्परस्तात्। सङ्ख्याता^ अस्य निमिषो जनाना- मक्षानिव श्वघ्नी नि मिनोति तानि।। 5।।

卐 ये ते पाशा^ वरुण सप्तसप्त- त्रेधा तिष्ठन्ति विषिता^ रुशन्तः। छिनन्तु सर्वे अनृतं वदन्तं- य.स्सत्यवाद्यति तं सृजन्तु।। 6।।

卐 शतेन पाशै. रभि धेहि वरुणैनं- मा ते मोच्यनृतवा.ङ्नृचक्षः। आस्ता. ञ्जाल्म^ उदरं श्रंसयित्वा- कोश^ इवाऽबन्धः परिकृत्यमानः।। 7।।

卐 य.स्समाम्यो3(ओ) वरुणो- यो व्याम्यो3(ओ)- यस्सन्देश्यो3(ओ)- वरुणो यो विदेश्यः। यो दैवो वरुणो यश्च मानुषः।। 8।।

卐 तै.स्त्वा सर्वै. रभिष्यामि पाशै- रसा.वामुष्यायणाऽमुष्याः पुत्र। तानु ते सर्वा. ननु सन्दिशामि।। 9।।-

04-04-02 (1 - 8 अष्टर्चस्य सूक्तस्य शुक्र ऋषिः। अपामार्गवनस्पतिर्देवता।अनुष्टुप् छन्दः।।) ❀ अपामार्गः

卐 ईशाना.न्त्वा भेषजाना- मुज्जेष^ आ रभामहे। चक्रे सहस्रवीर्य- सर्वस्मा ओषधे त्वा।। 1।।

卐 सत्यजितं शपथयावनीं- सहमानां पुनस्सराम्। सर्वा. स्समह्व्योषधी- रितो नः पारया.दिति।। 2।।

卐 या शशाप शपनेन- याऽघं मूर. मादधे। या रसस्य हरणाय- जात. मारेभे तोक. मत्तु सा।। 3।।

卐 या.न्ते चक्रु. रामे पात्रे- याञ्चक्रु. नीललोहिते। आमे मांसे कृत्याँ या.ञ्चक्रु- स्तया कृत्याकृतो जहि।। 4।।

卐 दौष्व॑प्न्य॒. न्दौर्जी॑वित्य॒- रक्षो॑ अ॒भ्व. मरा॒य्यः॑। दु॒र्णाम्नी॒. स्सर्वा॑^ दु॒र्वाच॒-स्ता^ अ॒स्म. न्नाशयामसि।। 5।।

卐 क्षु॒धा॒मा॒र. न्तृष्णा॑मा॒र- म॒गोता॑. मनप॒त्यता॑म्। अपा॑माग॒र्ग त्वया॑ व॒यं-सर्व॒. न्तदप॑ मृज्महे।। 6।।

卐 तृ॒ष्णा॒मा॒र. ङ्क्षु॑धामा॒र- मथो॑~ अक्षपरा॒जयम्। अपा॑मार्ग॒ त्वया॑ व॒यं- सर्व॒. न्तदप॑ मृज्महे।। 7।।

卐 अ॒पा॒मा॒र्ग^ ओष॑धीना॒ं- सर्वा॑सा॒. मेक॒^ इद्वशी। तेन॑ ते मृज्म॒^ आस्थित॒-मथ॒. त्व.मग॑द॒. श्चर॑।। 8।।-

04-04-03 (1 - 8 अष्टर्चस्य सूक्तस्य शुक्र ऋषिः। अपामार्गवनस्पतिर्देवता। 1 - 5, 7 - 8 प्रथमादि पञ्चानामृचां सप्तम्योश्चानुष्टुप्, 6 षष्ठ्याश्च बृहतीगर्भानुष्टुप् छन्दांसि।।) ❁ अपामार्गः

卐 स॒म. ञ्ज्योति॒. स्सूर्ये॑णा॒-ऽह्ना॒ रात्री॑ स॒माव॑ती। कृ॒णोमि॑ स॒त्य. मू॒तये॑-ऽ॒रसा. स्सन्तु॒ कृत्व॑रीः।। 1।।

卐 यो दे॑वाः कृ॒त्या. ङ्कृत्वा- ह॒रा. दवि॑दुषो गृ॒हम्। व॒त्सो धा॒रु.रि॑व मा॒त॒र-न्तं प्र॒त्य.गुप॑ पद्यताम्।। 2।।

卐 अ॒मा कृ॒त्वा पा॒प्मान॒ँ- य.स्तेना॒ऽन्य ञ्जिघां॑सति। अश्मा॑न॒. स्तस्या॑. न्द॒ग्धायां॑- ब॒हु॒लाः फ॒ड्क॑रिक्रति।। 3।।

卐 सहस्रधाम. न्विशिखा- न्विग्रीवा न्छायया त्वम्। प्रति स्म चक्रुषे कृत्यां-

प्रियां प्रियावते हर।। 4।। (शायय)

卐 अनयाऽह. मोषध्या- सर्वाः कृत्या^ अदूदुषम्। या.क्षेत्रे चक्रु. र्या.ङ्गोषु-

याँ वा ते पुरुषेषु।। 5।।

卐 यश्चकार न शशाक- कर्तुं शश्रे पाद. मङ्गुरिम्। चकार भद्र. मस्मभ्य-

मात्मने तपन.न्तु सः।। 6।।

卐 अपामार्गोऽप मार्ष्टु- क्षेत्रियं शपथश्च यः। अपाह यातुधानी- रप सर्वा

अराय्यः।। 7।।

卐 अपमृज्य यातुधाना- नप सर्वा^ अराय्यः। अपामार्ग त्वया वयं- सर्व.

न्तदप मृज्महे।। 8।।-

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

☙ 04-04-04 (1 - 8 अष्टर्चस्य सूक्तस्य शुक्र ऋषिः। अपामार्गो वनस्पतिर्देवता। 1, 3 - 8 प्रथमर्चस्तृतीयादिषण्णाञ्चानुष्टुप्, 2 द्वितीयायाश्च पथ्यापङ्क्तिश्छन्दांसि।।) ❃ अपामार्गः

卐 उतो अस्यबन्धुकृ- दुतो~ असि नु जामिकृत्। उतो~ कृत्याकृतः प्रजा.-

न्नड.मिवाऽऽ च्छिन्धि वार्षिकम्।। 1।।

卐 ब्राह्मणेन पर्युक्ताऽसि- कण्वेन नार्षदेन। सेनेवैषि त्विषीमती- न तत्र

भय. मस्ति- यत्र प्राऽऽप्नोष्योषधे।। 2।।

卐 अग्र. मेष्योषधीना- ञ्ज्योतिषेवाऽभिदीपयन्न्। उत त्राताऽसि पाकस्या-
ऽथो~ हन्ताऽसि रक्षसः।। 3।।

卐 यद्दो देवा^ असुरां - स्त्वयाऽग्रे निरकुर्वत। तत. स्त्वमध्योषधे-
ऽपामार्गो अजायथाः।। 4।।

卐 विभिन्दती शतशाखा- विभिन्द. न्नाम ते पिता। प्रत्यग्वि भिन्धि त्व.न्तँ -
यो अस्माऌ अभिदासति।। 5।।

卐 अस.द्भूम्या. स्समभव- त्तद्यामेति मह.द्व्यचः। तद्वै ततो विधूपाय- त्प्रत्य.
क्कर्तार. मृच्छतु।। 6।।

卐 प्रत्यङ् हि सम्बभूविथ- प्रतीचीनफल. स्त्वम्। सर्वा. न्मच्छपथाऌ
अधि- वरीयो यावया वधम्।। 7।।

卐 शतेन मा परि पाहि- सहस्रेणाऽभि रक्ष मा। इन्द्रस्ते वीरुधां पत- उग्र^
ओज्मान. मा दधत्।।8।।-

04-04-05 (1 - 9 नवर्चस्य सूक्तस्य मातृनामा ऋषिः। मातृनामौषधिर्देवता।1 प्रथमर्चः स्वराडनुष्टुप्, 2 - 8 द्वितीयादिसप्तानामनुष्टुप्, 9 नवम्याश्च भुरिगनुष्टुप् छन्दांसि।।)

❀ पिशाचक्षयणण्

卐 आ पश्यति प्रति पश्यति- परा पश्यति पश्यति। दिव. मन्तरिक्ष.
माद्भूमिं- सर्व. न्तद्देवि पश्यति।। 1।।

卐 तिस्रो दिवं. स्तिस्रः पृथिवी- ष्षड्वेमाः प्रदिशः पृथक्। त्वयाऽहं सर्वा भूतानि- पश्यानि देव्योषधे।। 2।।

卐 दिव्यस्य सुपर्णस्य- तस्य हासि कनीनिका। सा भूमि. मारुरोहिथ- वह्यं श्रान्ता वधू.रिव।। 3।।

卐 तां मे सहस्राक्षो देवो- दक्षिणे हस्त आ दधत्। तयाऽहं सर्वं पश्यामि- यश्च शूद्र उताऽऽर्यः।। 4।।

卐 आवि.ष्कृणुष्व रूपाणि- माऽऽत्मान. मप गूहथाः। अथो सहस्रचक्षो त्वं- प्रति पश्याः किमीदिनः।। 5।।

卐 दर्.शय मा यातुधाना- न्दर्.शय यातुधान्यः। पिशाचा. न्त्सर्वा. न्दर्.श- येति त्वा ऽऽरभ ओषधे।। 6।।

卐 कश्यपस्य चक्षु.रसि- शुन्याश्च चतुरक्ष्याः। वीध्रे सूर्यमिव सर्पन्तं- मा पिशाच. न्तिरस्करः।। 7।।

卐 उदग्रभं परिपाणा- द्यातुधान. ङ्किमीदिनम्। तेनाऽहं सर्वं पश्या-म्युत शूद्र. मुताऽऽर्यम्।। 8।।

卐 यो अन्तरिक्षेण पतति- दिवँ यश्चाऽतिसर्पति। भूमिँ यो मन्यते नाथ- न्तं पिशाचं प्र दर्.शय।। 9।।

## ≈ चतुर्थकाण्डे पञ्चमोऽनुवाकः

04-05-01 (1 - 7 सप्तर्चस्यासूक्तस्य ब्रह्मा ऋषिः। गावो देवताः। 1, 5 -7 प्रथमर्चः पञ्चम्यादितृचस्य च त्रिष्टुप्, 2 - 4 द्वितीयादितृचस्य च जगती छन्दांसि।।) गावः

卐 आ गावो अग्मन्नुत भद्रमक्रन्त्सीदन्तु गोष्ठे रणयन्त्वस्मे। प्रजावतीः पुरुरूपा इह स्युरिन्द्राय पूर्वीरुषसो दुहानाः।। 1।।

卐 इन्द्रो यज्वने गृणते च शिक्षत उपेद्ददाति न स्वं मुषायति। भूयोभूयो रयिमिदस्य वर्धयन्नभिन्ने खिल्ये नि दधाति देवयुम्।। 2।।

卐 न ता नशन्ति न दभाति तस्करो नाऽसामामित्रो व्यथिरा दधर्षति। देवांश्च याभिर्यजते ददाति च ज्योगित्ताभिस्सचते गोपतिस्सह।। 3।।

卐 न ता अर्वा रेणुककाटोऽश्नुते न संस्कृतत्रमुप यन्ति ता अभि। उरुगायमभयन्तस्य ता अनु गावो मर्तस्य वि चरन्ति यज्वनः।। 4।।

卐 गावो भगो गाव इन्द्रो म इच्छाद्गावस्सोमस्य प्रथमस्य भक्षः। इमा या गावस्स जनास इन्द्र इच्छामि हृदा मनसा चिदिन्द्रम्।। 5।।

卐 यूयङ्गावो मेदयथा कृशं चिदश्रीरं चित्कृणुथा सुप्रतीकम्। भद्रङ्गृहङ्कृणुथ भद्रवाचो बृहद्वो वय उच्यते सभासु।। 6।।

卐 प्रजावती. स्सूयवसे रुशन्ती- श्शुद्धा^ अप. स्सुप्रपाणे पिबन्तीः। मा व. स्स्तेन^ ईशत माऽघशंसः- परि वो रुद्रस्य हेति. र्वृणक्तु।। 7।।-

04-05-02 (1 - 7 सप्तर्चस्य सूक्तस्य वसिष्ठ अथर्वा वा ऋषिः। इन्द्रो देवता। त्रिष्टुप् छन्दः।।) ❀ अमित्रक्षयणम्

卐 इम.मिन्द्र वर्धय क्षत्रियं म- इमँ विशा. मेकवृष.ङ्कृणु त्वम्। निरमित्रा. नक्ष्णुह्यस्य सर्वा- स्ता.त्रन्धयाऽस्मा अह.मुत्तरेषु।। 1।।

卐 एमं भज ग्रामे अश्वेषु गोषु- निष्टं भज यो अमित्रो अस्य। वर्ष्म. क्षत्राणा. मय. मस्तु रा-जेन्द्र शत्रुं रन्धय सर्व.मस्मै।। 2।।

卐 अय.मस्तु धनपति. र्धनाना- मयँ विशाँ विश्पति. रस्तु राजा। अस्मि.न्निन्द्र महि वर्चांसि धे-ह्यवर्चसं. ङ्कृणुहि शत्रु.मस्य।। 3।।

卐 अस्मै द्यावापृथिवी~ भूरि वाम- न्दुहाथा.ङ्घर्मदुघे~इव धेनू~। अयं राजा प्रिय^ इन्द्रस्य भूया- त्प्रियो गवा. मोषधीनां पशूनाम्।। 4।।

卐 युनज्मि त उत्तरावन्त. मिन्द्रँ- येन जयन्ति न पराजयन्ते। यस्त्वा कर. देकवृष. ञ्जनाना- मुत राज्ञा मुत्तमं मानवानाम्।। 5।।

卐 उत्तर. स्त्वमधरे ते सपत्ना^- ये के च राज. न्प्रति शत्रवस्ते। एकवृष^ इन्द्रसखा जिगीवा- न्छत्रूयता. माभरा भोजनानि।। 6।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

卐 सिंहप्रतीको विशो अद्धि सर्वा^- व्याघ्रप्रतीकोऽव बाधस्व शत्रून्।
एकवृष^ इन्द्रसखा जिगीवा- न्छत्रूयता. माखिदा भोजनानि।। 7।।-

☸ 04-05-03 (1 - 7 सप्तर्चस्य सूक्तस्य मृगार ऋषिः। प्रचेता अग्निर्देवता। 1 - 2, 5, 7 प्रथमा द्वितीया पञ्चमी सप्तमीनामृचां त्रिष्टुप्, 3 तृतीयायाः पुरस्ताज्ज्योतिष्मती त्रिष्टुप्, 4 चतुर्थ्या अनुष्टुप्, 6 षष्ठ्याश्च प्रस्तारपङ्क्तिश्छन्दांसि।।) ❃ पापमोचनम्

卐 अग्ने. मन्वे प्रथमस्य प्रचेतस ॢ- पाञ्चजन्यस्य बहुधा यमिन्धते।
विशोविश ॢ प्रविशिवांस- मीमहे स^ नो मुञ्च.त्वंहसः।। 1।।

卐 यथा हव्यँ वहसि जातवेदो- यथा यज्ञ.ङ्कल्पयसि प्रजानन्न्। एवा देवेभ्य.
स्सुमति. न्न^ आ वह- स^ नो मुञ्च.त्वंहसः।। 2।।

卐 याम.न्याम. न्नुपयुक्तँ वहिष्ठ- ङ्कर्मन्कर्म. न्नाभग. मग्नि.मीडे। रक्षोहणँ
यज्ञवृध. ङ्घृताऽऽहुतं- स^ नो मुञ्च.त्वंहसः।। 3।। (आभगम्। अग्नि.मीडे रक्षोहणमिति इति पाठान्तरम्)

卐 सुजात.ञ्जातवेदस- मग्निँ वैश्वानरँ विभुम्। हव्यवाहं हवामहे- स^ नो
मुञ्च.त्वंहसः।। 4।।

卐 येन ऋषयो बल. मद्योतयन् युजा – येनाऽसुराणा. मयुवन्त मायाः।
येनाऽग्निना पणी. निन्द्रो जिगाय- स^ नो मुञ्च.त्वंहसः।। 5।।

卐 येन देवा^ अमृत मन्वविन्दन् - येनौषधी. र्मधुमती. रकृण्वन्न्। येन देवा^
स्स्व1(अ)राऽभर- न्त्स^ नो मुञ्च.त्वंहसः।। 6।।

卐 यस्येदं प्रदिशि यद्विरोचते- यज्जात. ञ्जनितव्यञ्च केवलम्। स्तौ.म्यग्नि.
न्नाथितो जोहवीमि- स^ नो मुञ्च.त्वंहसः।। 7।।-

04-05-04 (1 - 7 सप्तर्चस्य सूक्तस्य मृगार ऋषिः। इन्द्रो देवता। 1 प्रथमर्चः शक्वरीगर्भा पुरःशक्वरी त्रिष्टुप्, 2 - 7 द्वितीयादिषण्णाञ्च त्रिष्टुप् छन्दसी।।) ❁ पापमोचनम्

卐 इन्द्रस्य मन्महे शश्व. दिदस्य मन्महे- वृत्रघ्न. स्स्तोमा^ उप मेम.
आऽगुः। यो दाशुष. स्सुकृतो हव.मेति- स^ नो मुञ्च.त्वंहसः।। 1।।

卐 य^ उग्रीणा. मुग्रबाहु. र्ययु - र्यो दानवानां बल. मारुरोज। येन जिता.
स्सिन्धवो येन गाव- स्स^ नो मुञ्च.त्वंहसः।। 2।।

卐 यश्चर्षणिप्रो वृषभ. स्स्वर्वि- द्यस्मै ग्रावाणः प्रवदन्ति नृम्णम्।
यस्याध्वर. स्सप्तहोता मदिष्ठ- स्स^ नो मुञ्च.त्वंहसः।। 3।।

卐 यस्य वशास^ ऋषभास^ उक्षणो- यस्मै मीयन्ते स्वरव. स्स्वर्विदे। यस्मै
शुक्रः पवते ब्रह्मशुम्भित- स्स^ नो मुञ्च.त्वंहसः।। 4।।

卐 यस्य जुष्टिं सोमिनः कामयन्ते- यं हवन्त इषुमन्त. ङ्गविष्टौ। यस्मि.न्नर्क.
श्शिश्रिये यस्मि. न्नोज- स्स^ नो मुञ्च.त्वंहसः।। 5।।

卐 यः प्रथमः कर्मकृत्याय जज्ञे- यस्य वीर्यं प्रथमस्याऽनुबुद्धम्। येनोद्यतो वज्रोऽभ्यायताहिं- स^ नो मुञ्च.त्वंहसः।। 6।।

卐 य.स्सङ्ग्रामा. न्नयति सँ युधे वशी- यः पुष्टानि संसृजति द्वयानि। स्तौमीन्द्र. न्नाथितो जोहवीमि- स^ नो मुञ्च.त्वंहसः।। 7।।

04-05-05 (1 - 7 सप्तर्चस्य सूक्तस्य मृगार ऋषिः। वायुसवितारौ देवते। 1 - 2, 4 - 6 प्रथमाद्वितीययोर्ऋचोश्चतुर्थ्योदितृचस्य च त्रिष्टुप्, 3 तृतीयाया अतिशक्करीगर्भा जगती, 7 सप्तम्याश्च पथ्याबृहती छन्दांसि।।) ❁ पापमोचनम्

卐 वायो. स्सवितु. र्विदथानि मन्महे- या.वात्मन्व.द्विशथो यौ च रक्षथः। यौ विश्वस्य परिभू~ बभूवथु- स्तौ नो मुञ्चत. मंहसः।। 1।।

卐 ययो. स्सङ्ख्याता वरिमा पार्थिवानि- याभ्यां रजो युपित. मन्तरिक्षे। ययोः प्राय. न्नान्वानशे कश्चन- तौ नो मुञ्चत. मंहसः।। 2।।

卐 तव व्रते नि विशन्ते जनास- स्त्वय्युदिते प्रेरते चित्रभानो~। युवँ वायो~ सविता च भुवनानि रक्षथ -स्तौ नो मुञ्चत. मंहसः।। 3।।

卐 अपेतो वायो~ सविता च दुष्कृत- मप रक्षांसि शिमिदाञ्च सेधतम्। सं ह्यू3(ऊ)र्जया सृजथ. स्सं बलेन- तौ नो मुञ्चत. मंहसः।। 4।।

卐 रयिं मे पोषं सवितोत वायु- स्तनू दक्ष मासुवतां सुशेवम्। अयक्ष्मतातिं मह^ इह धत्त- न्तौ नो मुञ्चत. मंहसः।। 5।।

卐 प्र सुमतिं सवित. र्वाय ऊतये- महस्वन्तं मत्सरं मादयाथः।
अर्वा.ग्वामस्य प्रवतो नि यच्छत- न्तौ नो मुञ्चत. मंहसः।। 6।।
卐 उप श्रेष्ठा^ न^ आशिषो- देवयो. र्धाम. न्नस्थिरन्न्। स्तौमि देवं सवितारञ्च
वायु- न्तौ नो मुञ्चत. मंहसः।। 7।।

## चतुर्थ काण्डे षष्ठोऽनुवाकः

04-06-01 (1 - 7 सप्तर्चस्य सूक्तस्य मृगार ऋषिः। द्यावापृथिव्यौ देवते। 1 प्रथमर्चः परोऽष्टिर्जगती, 2 - 6 द्वितीयादिपञ्चानां त्रिष्टुप्, 7 सप्तम्याश्च शाक्करागर्भातिमध्ये ज्योतिस्त्रिष्टुप् छन्दांसि।। ❀ पापमोचनम्

卐 मन्वे वा.न्द्यावापृथिवी~ सुभोजसौ सचेतसौ- ये~ अप्रथेथा. ममिता योजनानि। प्रतिष्ठे~ ह्यभवतँ वसूना- न्ते~ नो मुञ्चत. मंहसः।। 1।।
卐 प्रतिष्ठे~ ह्यभवतँ वसूनां- प्रवृद्धे~ देवी~ सुभगे~ उरूची~। द्यावापृथिवी~ भवतं मे स्योने~- ते~ नो मुञ्चत. मंहसः।। 2।।
卐 असन्तापे~ सुतपसौ हुवेऽह- मुर्वी~ गम्भीरे~ कविभि. र्नमस्ये~। द्यावापृथिवी~ भवतं मे स्योने~- ते~ नो मुञ्चत. मंहसः।। 3।।
卐 ये~ अमृतं बिभृथो ये हवींषि- ये स्रोत्या बिभृथो ये~ मनुष्यान्। द्यावापृथिवी~ भवतं मे स्योने~- ते~ नो मुञ्चत. मंहसः।। 4।।

卐 ये~ उस्रिया^ बिभृथो ये वनस्पतीन्- ययो.र्वाँ विश्वा भुवना.न्यन्तः।
द्यावापृथिवी~ भवतं मे स्योने~- ते~ नो मुञ्चत. मंहसः।। 5।।

卐 ये कीलालेन तर्पयथो ये घृतेन- याभ्या.मृते न किञ्चन शक्नुवन्ति।
द्यावापृथिवी~ भवतं मे स्योने~- ते~ नो मुञ्चत. मंहसः।। 6।।

卐 यन्मेद. मभिशोचति येनयेन वा- कृतं पौरुषेया.न्न दैवात्। स्तौमि
द्यावापृथिवी~ भवतं मे स्योने~- ते~ नो मुञ्चत. मंहसः ।। 7।।-

04-06-02 (1 - 7 सप्तर्चस्य सूक्तस्य मृगार ऋषिः। मरुतो देवताः। त्रिष्टुप् छन्दः।।)

❀ पापमोचनम्

卐 मरुतां मन्वे अधि मे ब्रुवन्तु- प्रेमँ वाजँ वाजसाते अवन्तु। आशू.निव
सुयमा. नह्व ऊतये- ते नो मुञ्च. न्त्वंहसः।। 1।।

卐 उत्स. मक्षितँ व्यचन्ति ये सदा- य आसिञ्चन्ति रस. मोषधीषु। पुरो दधे
मरुतꣳ पृश्निमातॄं- स्ते नो मुञ्च. न्त्वंहसः।। 2।।

卐 पयो धेनूनां रस. मोषधीना- ञ्जव. मर्वता. ङ्कवयो य इन्वथ। शग्मा^
भवन्तु मरुतो न. स्स्योना- स्ते नो मुञ्च. न्त्वंहसः।। 3।।

卐 अप. स्समुद्रा. द्दिव. मुद्वहन्ति- दिव. स्पृथिवी. मभि ये सृजन्ति। ये
अद्भि. रीशाना^ मरुत. श्चरन्ति- ते नो मुञ्च. न्त्वंहसः।। 4।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 ये कीलालेन तर्पयन्ति ये घृतेन- ये वा वयो मेदसा संसृजन्ति। ये अद्भि. रीशाना^ मरुतो वर्षयन्ति- ते नो मुञ्च. न्त्वंहसः।। 5।।

卐 यदी.दिदं मरुतो मारुतेन- यदि देवा^ दैव्ये.नेदृगार। यूय. मीशिध्वे वसव. स्तस्य निष्कृते-स्ते नो मुञ्च. न्त्वंहसः।। 6।।

卐 तिग्म. मनीकँ विदितं सहस्व-न्मारुतं शर्धः पृतनासूग्रम्। स्तौमि मरुतो नाथितो जोहवीमि- ते नो मुञ्च. न्त्वंहसः।। 7।।-

04-06-03 (1 - 7 सप्तर्चस्य सूक्तस्य मृगारोऽथर्वा वा ऋषिः। भवाशर्वौ रुद्रो वा देवता। 1 प्रथमर्चो द्यतिजगतगर्भा भुरिक्त्रिष्टुप्, 2 - 7 द्वितीयादिषण्णाञ्च त्रिष्टुप् छन्दासी।।) ❀ पापमोचनम्

卐 भवाशर्वौ मन्वे वा.न्तस्य वित्तँ- ययो.र्वा. मिदं प्रदिशि यद्विरोचते। या.वस्येशाथे~ द्विपदो यौ चतुष्पद- स्तौ नो मुञ्चत. मंहसः।। 1।।

卐 ययो. रभ्यध्व उत यद्दूरे चि-द्यौ विदिता. विषुभृता. मसिष्ठौ। या.वस्येशाथे~ द्विपदो यौ चतुष्पद- स्तौ नो मुञ्चत. मंहसः।। 2।।

卐 सहस्राक्षौ वृत्रहणा हुवेऽह- न्दूरेगव्यूती~ स्तुव न्नेम्युग्रौ। या.वस्येशाथे~ द्विपदो यौ चतुष्पद- स्तौ नो मुञ्चत. मंहसः।। 3।।

卐 या.वारेभाथे~ बहु साक. मग्रे- प्र चेदस्राष्ट्र. मभिभा. ञ्जनेषु। या.वस्येशाथे~ द्विपदो यौ चतुष्पद- स्तौ नो मुञ्चत. मंहसः।। 4।।

卐 ययो. र्वधा. न्नापपद्यते कश्चना-ऽन्तर्देवेषूत मानुषेषु। या.वस्येशाथे~ द्विपदो यौ चतुष्पद-स्तौ नो मुञ्चत. मंहसः।। 5।।

卐 य॒ कृत्याकृ. न्मूलकृ. द्यातुधानो- नि तस्मि. न्धत्तँ वज्र.मुग्रौ। या.वस्येशाथे~ द्विपदो यौ चतुष्पद- स्तौ नो मुञ्चतमंहसः।। 6।।

卐 अधि नो ब्रूतं पृतनासूग्रौ- सँ वज्रेण सृजतँ य॒ किमीदी। स्तौमि भवाशर्वौ नाथितो जोहवीमि- तौ नो मुञ्चत. मंहसः।। 7।।-

04-06-04 (1 - 7 सप्तर्चस्य सूक्तस्य मृगार ऋषिः। मित्रावरुणौ देवते। 1 - 6 प्रथमादिषणामृमृचां त्रिष्टुप्, 7 सप्तम्याश्च शक्करीगर्भातिजगती छन्दांसि।।) ❃ पापमोचनम्

卐 मन्वे वां मित्रावरुणा.वृतावृधौ- सचेतसौ द्रुह्वणो यौ नुदेथे~। प्र सत्यावान. मवथो भरेषु- तौ नो मुञ्चत. मंहसः।। 1।।

卐 सचेतसौ द्रुह्वणो यौ नुदेथे~ प्र सत्यावान. मवथो भरेषु। यौ गच्छथो नृचक्षसौ बभ्रुणा सुत- न्तौ नो मुञ्चत. मंहसः।। 2।।

卐 या.वङ्गिरस. मवथो या.वगस्तिं- मित्रावरुणा जमदग्नि. मत्त्रिम्। यौ कश्यप. मवथो यौ वसिष्ठ- न्तौ नो मुञ्चत. मंहसः।। 3।।

卐 यौ श्यावाश्व. मवथो वध्र्यश्वं- मित्रावरुणा पुरुमीढ. मत्रिम्। यौ विमद. मवथ. स्सप्तवध्रि- न्तौ नो मुञ्चत. मंहसः।। 4।।

卐 यौ भरद्वाज. मवथो यौ गविष्ठिरँ- विश्वामित्रँ वरुण मित्र कुत्सम्। यौ कक्षीवन्त. मवथ॰ प्रोत कण्व- न्तौ नो मुञ्चत. मंहसः।। 5।।

卐 यौ मेधातिथि. मवथो यौ त्रिशोकं- मित्रावरुणा.वुशना. ङ्काव्यँ यौ। यौ गोतम. मवथ॰ प्रोत मुद्गल- न्तौ नो मुञ्चत. मंहसः।। 6।

卐 ययो^ रथ. स्सत्यवर्त्मर्जुरश्मि- र्मिथुया चरन्त. मभियाति दूषयन्न्। स्तौमि मित्रावरुणौ नाथितो जोहवीमि- तौ नो मुञ्चत. मंहसः।। 7।।-

04-06-05 (1 - 8 अष्टर्चस्य सूक्तस्याथर्वा ऋषिः। सर्वरूपा सर्वात्मिका सर्वदेवमयो वाक् देवता। 1 – 5, 6 – 8 प्रथमादि पञ्चमी षष्ठ्यादितृचस्य त्रिष्टुप्, 6 षड्चा जगती छन्दांसि।।) ❁ राष्ट्रीदेवी

卐 अहं रुद्रेभि. र्वसुभि. श्चरा-म्यह. मादित्यै. रुत विश्वदेवैः। अहं मित्रावरुणोभा बिभ-र्म्यह. मिन्द्राग्नी~ अह मश्विनोभा।। 1।।

卐 अहं राष्ट्री सङ्गमनी वसूना- श्चिकितुषी प्रथमा यज्ञियानाम्। तां मा देवा^ व्यदधु॰ पुरुत्रा- भूरिस्थात्रां भूर्यावेशयन्तः।। 2।।

卐 अह.मेव स्वय. मिदँ वदामि- जुष्ट. न्देवाना. मुत मानुषाणाम्। यङ्कामये तन्त. मुग्र. ङ्कृणोमि- तं ब्रह्माण. न्तमृषि. न्तं सुमेधाम्।। 3।।

卐 मया सोऽन्न मत्ति यो विपश्यति- य॰ प्राणति य^ ईं शृणो. त्युक्तम्। अमन्तवो मा न्त उप क्षियन्ति- श्रुधि श्रुत श्रद्धेय. न्ते वदामि।। 4।।

卐 अहं रुद्राय धनु.रा तनोमि- ब्रह्मद्विषे शरवे हन्तवा उ। अह. ञ्जनाय समद्. ङ्कृणो-म्यह. न्द्यावापृथिवी~ आ विवेश।। 5।।

卐 अहं सोम. माहनसं बिभ-र्म्यह न्त्वष्टार. मुत पूषणं भगम्। अह. न्दधामि द्रविणा हविष्मते- सुप्राव्या3(आ) यजमानाय सुन्वते।। 6।।

卐 अहं सुवे पितर. मस्य मूर्ध- न्मम योनि. रप्स्व1(अ)न्त. स्समुद्रे। ततो वि तिष्ठे भुवनानि वि-श्वोताऽमू. न्द्याँ वर्ष्मणोप स्पृशामि।। 7।।

卐 अह.मेव वात^ इव प्र वा-म्यारभमाणा भुवनानि विश्वा। परो दिवा पर^ एना पृथि-व्यैतावती महिम्ना सं बभूव।। 8।।

## चतुर्थ काण्डे सप्तमोऽनुवाकः

04-07-01 (1 - 7 सप्तर्चस्य सूक्तस्य ब्रह्मास्कन्द ऋषिः। मन्युर्देवता। 1, 3 प्रथमा तृतीययोर्ऋचोस्त्रिष्टुप्, 2, 4 द्वितीया चतुर्थ्योर्भुरिक्त्रिष्टुप्, 5 - 7 पञ्चम्यादितृचस्य च जगती छन्दांसि।।) ❀ सेनानिरीक्षणम्

卐 त्वया मन्यो~ सरथ. मारुजन्तो- हर्षमाणा^ हृषितासो मरुत्वन्न्। तिग्मेषव^ आयुधा संशिशाना^- उप प्र यन्तु नरो अग्निरूपाः।। 1।।

卐 अग्नि.रिव मन्यो~ त्विषित. स्सहस्व- सेनानी.र्न. स्सहुरे हूत^ एधि। हत्वाय शत्रू.न्वि भजस्व वेद^- ओजो मिमानो वि मृधो नुदस्व।। 2।।

Sri Ganapati Sachchidananda Datta Peetham Mysore

卐 सहस्व मन्यो~ अभिमाति. मस्मै- रुज. न्मृण. न्प्रमृण. न्प्रेहि शत्रून्।
उग्र.न्ते पाजो नन्वा रुरुध्रे- वशी वश.न्नयासा एकज त्वम्।। 3।।

卐 एको बहूना.मसि मन्य ईडिता- विशँविशँ युद्धाय सं शिशाधि।
अकृत्तरु.त्त्वया युजा वय- न्द्युमन्त. ङ्घोषँ विजयाय कृण्मसि।। 4।।

卐 विजेषकृ.दिन्द्र इवाऽनवब्रवो3(ओ)-ऽस्माकं मन्यो~ अधिपा^ भवेह।
प्रिय.न्ते नाम सहुरे गृणीमसि- विद्मा तमुत्सँ यत^ आबभूथ।। 5।।

卐 आभूत्या सहजा वज्र सायक- सहो बिभर्षि सहभूत^ उत्तरम्। क्रत्वा नो
मन्यो~ सह मेद्येधि- महाधनस्य पुरुहूत सं सृजि।। 6।।

卐 संसृष्ट. न्धन. मुभयं समाकृत- मस्मभ्य न्धत्ताँ वरुणश्च मन्युः। भियो
दधाना^ हृदयेषु शत्रवꣳ- पराजितासो अप नि लयन्ताम्।। 7।।-

04-07-02 (1 - 7 सप्तर्चस्य सूक्तस्य ब्रह्मास्कन्द ऋषिः। मन्युर्देवता। 1 प्रथमर्चो जगती, 2 - 7 द्वितीयादिषणाञ्च त्रिष्टुप् छन्दांसि।।) ❋सेनासंयोजनम्

卐 यस्ते मन्योऽविध. द्वज्र सायक- सह^ ओजꣳ पुष्यति विश्व. मानुषक्।
साह्याम दास. मार्य. न्त्वया युजा- वयं सहस्कृतेन सहसा सहस्वता।। 1।।

卐 मन्यु. रिन्द्रो मन्यु. रेवाऽऽस देवो- मन्यु होता वरुणो जातवेदाः। मन्युं
विश^ ईडते मानुषी र्याꣳ- पाहि नो मन्यो~ तपसा सजोषाः।। 2।।

卐 अभीहि मन्यो~ तवस. स्तवीया- न्तपसा युजा वि जहि शत्रून्।
अमित्रहा वृत्रहा दस्युहा च- विश्वा वसू.न्या भरा त्वन्नः।। 3।।

卐 त्वं हि मन्यो~ अभिभूत्योजा- स्स्वयम्भू. र्भामो अभिमातिषाहः।
विश्वचर्षणि. स्सहुरि. स्सहीया- नस्मा.स्वोजः पृतनासु धेहि।। 4।।

卐 अभाग. स्सन्नप परेतो अस्मि- तव क्रत्वा तविषस्य प्रचेतः। तन्त्वा
मन्यो~ अक्रतु. र्जिहीडा-ऽहं स्वा तनू. र्बलदावा न^ एहि।। 5।।

卐 अय.न्ते अस्म्युप न^ एह्यर्वा- ङ्प्रतीचीन. स्सहुरे विश्वदावन्न्। मन्यो~
वज्रि. न्नभि न^ आ ववृत्स्व- हनाव दस्यू॰ रुत बोध्यापेः।। 6।।

卐 अभि प्रेहि दक्षिणतो भवा नो-ऽधा वृत्राणि जङ्घनाव भूरि। जुहोमि ते
धरुणं मध्वो अग्र- मुभा.वुपांशु प्रथमा पिबाव।। 7।।-

04-07-03 (1 - 8 अष्टर्चस्य सूक्तस्य ब्रह्मा ऋषिः। अग्निर्देवता। गायत्री छन्दः।।) ❁
पापनाशनम्

卐 अप न. श्शोशुच. दघ- मग्ने शुशुग्ध्या रयिम्। अप न.श्शोशुच.
दघम्।। 1।।

卐 सुक्षेत्रिया सुगातुया- वसूया च यजामहे। अप न.श्शोशुच. दघम्।।
2।।

卐 प्र य.द्दन्दिष्ठ^ एषां- प्राऽस्माकासश्च सूरयः। अप न.श्शोशुच. दघम्।।
3।।
卐 प्र यत्ते अग्ने सूरयो- जायेमहि प्र ते वयम्। अप न.श्शोशुच. दघम्।।
4।।
卐 प्र यदग्ने. स्सहस्वतो- विश्वतो यन्ति भानवः। अप न.श्शोशुच. दघम्।।
5।।
卐 त्वं हि विश्वतोमुख- विश्वतः परिभू. रसि। अप न.श्शोशुच. दघम्।।
6।।
卐 द्विषो नो विश्वतोमुखा-ऽति नावेव पारय। अप न.श्शोशुच. दघम्।।
7।।
卐 स^ न स्सिन्धु.मिव नावा-ऽति पर्षा स्वस्तये। अप न.श्शोशुच.
दघम्।। 8।।-

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

☃ 04-07-04 (1 - 5 अष्टर्चस्य सूक्तस्याथर्वा ऋषिः। ब्रह्मौदनं देवता। 1 - 3 प्रथमादितृचस्य त्रिष्टुप्, 4 चतुर्थ्या भुरिक्त्रिष्टुप्, 5 पञ्चम्याः सप्तपदा कृतिः, 6 षष्ठ्याः पञ्चपदातिशक्वरी, 7 सप्तम्याः पञ्चपदा भुरिक्शक्वरी, 8 अष्टम्याश्च जगती छन्दांसि।।) ❀ ब्रह्मौदनम्

卐 ब्रह्माऽस्य शीर्षं बृहदस्य पृष्ठँ- वामदेव्य. मुदर. मोदनस्य। छन्दांसि पक्षौ मुख.मस्य सत्यँ- विष्टारी जात. स्तपसोऽधि यज्ञः।। 1।।

卐 अनस्थाः पूताः पवनेन शुद्धा- श्शुचय. श्शुचि.मपि यन्ति लोकम्। नैषां शिश्नं प्र दहति जातवेदा- स्स्वर्गे लोके बहु स्त्रैण. मेषाम्।। 2।।

卐 विष्टारिण. मोदनँ ये पचन्ति- नैना. नवर्ति स्सचते कदा चन। आस्ते यम^ उप याति देवा-न्त्स.ङ्गन्धर्वै. र्मदते सोम्येभिः।। 3।।

卐 विष्टारिण. मोदनँ ये पचन्ति- नैना.न्यमः परि मुष्णाति रेतः। रथी ह भूत्वा रथयान^ ईयते- पक्षी ह भूत्वाऽति दिव. स्समेति।। 4।।

卐 एष^ यज्ञानाँ विततो वहिष्ठो- विष्टारिणं पक्त्वा दिव. माविवेश। आण्डीक. ङ्कुमुदं स.न्तनोति- बिसं शालूकं शफको मुलाली। एता.स्त्वा धारा^ उप यन्तु सर्वा- स्स्वर्गे लोके मधुम. त्पिन्वमाना^- उप त्वा तिष्ठन्तु पुष्करिणी. स्समन्ताः।। 5।।

卐 घृतह्रदा^ मधुकूला. स्सुरोदकाः~- क्षीरेण पूर्णा^ उदकेन दध्ना। एता.स्त्वा धारा^ उप यन्तु सर्वा- स्स्वर्गे लोके मधुम. त्पिन्वमाना^- उप त्वा तिष्ठन्तु पुष्करिणी. स्समन्ताः।। 6।।

卐 चतुरः कुम्भां. श्चतुर्धा ददामि- क्षीरेण पूर्णा॰ उदकेन दध्ना। एता.स्त्वा धारा^ उप यन्तु सर्वा- स्स्वर्गे लोके मधुम.त्पिन्वमाना^- उप त्वा तिष्ठन्तु पुष्करिणी. स्समन्ताः।। 7।।

卐 इम. मोदन. न्नि दधे ब्राह्मणेषु- विष्टारिणँ लोकजितं स्वर्गम्। स^ मे मा क्षेष्ट स्वधया पिन्वमानो- विश्वरूपा धेनुः कामदुघा मे अस्तु।। 8।।-

04-07-05 (1 - 7 सप्तर्चस्य सूक्तस्य प्रजापतिर्ऋषिः। अतिमृत्युर्देवता । 1 - 2, 5 - 7 प्रथमाद्वितीययोर्ऋचोः पञ्चम्यादितृचस्य च त्रिष्टुप्, तृतीयाया भुरिक्त्रिष्टुप्, 4 चतुर्थ्याश्च जगती छन्दांसि।।) ❀ मृत्युसंतरणम्

卐 यमोदनं प्रथमजा^ ऋतस्य- प्रजापति स्तपसा ब्रह्मणेऽपचत्। यो लोकानाँ विधृति र्नाभि.रेषा- त्तेनौदनेनाऽति तराणि मृत्युम्।। 1।।

卐 येनाऽतर. न्भूतकृतोऽति मृत्युं- यमन्वविन्द. न्तपसा श्रमेण। यं पपाच ब्रह्मणे ब्रह्म पूर्व- न्तेनौदनेनाऽति तराणि मृत्युम्।। 2।।

卐 यो दाधार पृथिवीं विश्वभोजसँ- यो अन्तरिक्ष. माऽपृणा. द्रसेन। यो अस्तभ्ना.द्दिव. मूर्ध्वो महिम्ना- तेनौदनेनाऽति तराणि मृत्युम्।। 3।।

卐 यस्मा. न्मासा^ निर्मिता. स्त्रिंशदरा- स्सँवत्सरो यस्मा. न्निर्मितो द्वादशारः। अहोरात्रा^ यं परियन्तो नाऽऽपु- स्तेनौदनेनाऽति तराणि मृत्युम्।। 4।।

卐 यꣳ प्राणदꣳ प्राणदवा. न्बभूव- यस्मै लोका^ घृतवन्तः~ क्षरन्ति। ज्योतिष्मतीꣳ प्रदिशो यस्य सर्वा- स्तेनौदनेनाऽति तराणि मृत्युम्।। 5।।

卐 यस्मा. त्पक्का. दमृतं सम्बभूव- यो गायत्र्या^ अधिपति. र्बभूव। यस्मि. न्वेदा^ निहिता^ विश्वरूपा- स्तेनौदनेनाऽति तराणि मृत्युम्।। 6।।

卐 अव बाधे द्विषन्त. न्देवपीयुं- सपत्ना^ ये मेऽप ते भवन्तु। ब्रह्मौदनँ विश्वजितं पचामि- शृण्वन्तु मे श्रद्दधानस्य देवाः।। 7।।

## चतुर्थ काण्डे अष्टमोऽनुवाकः

04-08-01 (1 - 10 दशर्चस्य सूक्तस्य चातन ऋषिः। सत्यौजा अग्निर्देवता। 1 - 8, 10 प्रथमाद्यष्टानां दशम्याश्चानुष्टुप्, 9 नवम्याश्च भुरिगनुष्टुप् छन्दांसि।।) सत्यौजा अग्निः

卐 ता.न्त्सत्यौजाꣳ प्र दह- त्वग्नि. र्वैश्वानरो वृषा। यो नो दुरस्या. द्दिप्सा च्चा-ऽथो~ यो नो अरातियात्।। 1।।

卐 यो नो दिप्सा. ददिप्सतो- दिप्सतो यश्च दिप्सति। वैश्वानरस्य दंष्ट्रयो- रग्ने. रपि दधामि तम्।। 2।।

卐 य आगरे मृगयन्ते- प्रतिक्रोशेऽमावास्ये। क्रव्यादो अन्या. न्दिप्सत-स्सर्वा. स्ता.न्त्सहसा सहे।। 3।।

卐 सहे पिशाचा न्त्सह-सैषा न्द्रविण न्ददे। सर्वा. न्दुरस्यतो हन्मि- सं म आकूतिर् ऋध्यताम्।। 4।। (सहसा, आ, एषाम्)

卐 ये देवा. स्तेन हासन्ते- सूर्येण मिमते जवम्। नदीषु पर्वतेषु- ये स^ न्तैः पशुभि. र्विदे।। 5।।

卐 तपनो अस्मि पिशाचानाँ- व्याघ्रो गोमतामिव। श्वान. स्सिंहमिव दृष्ट्वा-ते न विन्दन्ते न्यञ्चनम्।। 6।।

卐 न पिशाचै. स्सं शक्नोमि- न स्तेनै. र्न वनर्गुभिः। पिशाचा. स्तस्मा. न्नश्यन्ति- यमह. ङ्ग्राम. माविशे।। 7।।

卐 यङ्ग्राम. माविशत^- इद. मुग्रं सहो मम। पिशाचा. स्तस्मा. न्नश्यन्ति- न पाप. मुप जानते।। 8।।

卐 ये मा क्रोधयन्ति लपिता^- हस्तिनं मशका^ इव। ता.नहं मन्ये दुर्हिता-न्जने अल्पशयू.निव।। 9।।

卐 अभि तन्निरृऋति. र्धत्ता- मश्व.मिवाऽश्वाभिधान्या। मल्वो यो मह्य. ङ्क्रुध्यति- स^ उ पाशा. न्न मुच्यते।। 10।।-

04-08-02 (1 - 12 द्वादशर्चस्य सूक्तस्य बादरायणिर्ऋषिः। 1 - 2, 6 प्रथमाद्वितीया षष्ठीनामृचामजश्रृङ्ग्योषधिः, 3 - 5 तृतीयादितृचस्याप्सरसः, 7 - 12 सप्तम्यादिषणणाश्च गन्धर्वाप्सरयोषधयो देवताः। 1 - 2, 4, 6, 8 - 10 प्रथमा द्वितीया चतुर्थीषष्ठीनामष्टम्यादि तृचस्य चानुष्टुप्, 3 तृतीयायास्त्र्यवसाना षट्पदा त्रिष्टुप्, 5 पञ्चम्याः प्रस्तारपङ्क्तिः, 7 सप्तम्याः परोष्णिक्, 11 एकादश्याः षट्पदा जगती, 12 द्वादश्याश्च निचृदनुष्टुप् छन्दांसि।।) ❀ क्रिमिनाशनम्

卐 त्वया पूर्व. मथर्वाणो- जघ्नू रक्षां.स्योषधे। त्वया जघान कश्यप- स्त्वया कण्वो अगस्त्यः।। 1।।

卐 त्वया वय. मप्सरसो- गन्धर्वां. श्चातयामहे। अजश्रृङ्ग्यज रक्ष- स्सर्वां. न्गन्धेन नाशय।। 2।।

卐 नदीँ यन्त्वप्सरसोऽपा न्तार. मवश्वसम्। गुल्गुलूः पीला नलद्यौ3- (औ)क्षगन्धिः प्रमन्दनी। तत्परेताप्सरसः प्रतिबुद्धा अभूतन।। 3।।

卐 यत्राऽश्वत्था न्यग्रोधा- महावृक्षा. शिखण्डिनः। तत्परेताऽप्सरसः- प्रतिबुद्धा अभूतन।। 4।।

卐 यत्र वः प्रेङ्खा हरिता अर्जुना- उत यत्राऽऽघाटाः कर्कर्य. स्सँवदन्ति। तत्परेताऽप्सरसः प्रतिबुद्धा अभूतन।। 5।।

卐 एय. मग. न्नोषधीनाँ- वीरुधाँ वीर्यावती। अजश्रृङ्ग्यराटकी- तीक्ष्णश्रृङ्गी व्यृषतु।। 6।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 आनृत्यत. शिखण्डिनो- गन्धर्वस्याऽप्सरापतेः। भिनद्मि मुष्का-वपि यामि शेपः।। 7।।

卐 भीमा^ इन्द्रस्य हेतय- श्शतमृष्टी. रयस्मयीः। ताभिर् हविरदा. न्गन्धर्वा- नवकादा. न्व्यृषतु।। 8।।

卐 भीमा^ इन्द्रस्य हेतय- श्शतमृष्टीर्.हिरण्ययीः। ताभिर् हविरदा. न्गन्धर्वा- नवकादा. न्व्यृषतु।। 9।।

卐 अवकादा. नभिशोचा- नप्सु ज्योतय मामकान्। पिशाचा. न्त्सर्वा.नोषधे- प्र मृणीहि सहस्व च।। 10।।

卐 श्वेवैकः कपि.रिवैकः- कुमार. स्सर्वकेशकः। प्रियो दृश^ इव भूत्वा- गन्धर्व. स्सचते स्त्रिय- स्तमितो नाशयामसि- ब्रह्मणा वीर्यावता।। 11।।

卐 जाया^ इद्वो अप्सरसो- गन्धर्वाः पतयो यूयम्। अप धावताऽमर्त्या^- मर्त्या.न्मा सचध्वम्।। 12।।-

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

04-08-03 (1 - 7 सप्तर्चस्य सूक्तस्य बादरायणिर्ऋषिः। 1 - 4 प्रथमादिचतुर्ऋचामप्सराः, 5 - 7 पञ्चम्यादितृचस्य च वाजिनीवानृषभो देवते। 1 - 2, 4 प्रथमा द्वितीया चतुर्थोनामनुष्टुप्, 3 तृतीयायास्त्र्यवसाना षट्पदा जगती, 5 पञ्चम्या भुरिगत्यष्टिः, 6 षष्ठ्यास्त्रिष्टुप्, 7 सप्तम्याश्च त्र्यवसाना पञ्चपदानुष्टुब्गर्भा पुर उपरिष्टाज्ज्योतिष्मती जगती छन्दांसि।।) ❀ अष्टात्रिंशं सूक्तम्

卐 उद्भिन्दतीं सञ्जयन्ती- मप्सरां साधुदेविनीम्। ग्लहे कृतानि कृण्वाना- मप्सरा. न्ता.मिह हुवे।। 1।।

卐 विचिन्वती माकिरन्ती- मप्सरां साधुदेविनीम्। ग्लहे कृतानि गृह्णाना- मप्सरा. न्ता.मिह हुवे।। 2।।

卐 यायैः परिनृत्य-त्याददाना कृत.ङ्ग्लहात्। सा नः कृतानि सीषती- प्रहा. माप्नोतु मायया। सा नः पयस्वत्यैतु- मा नो जैषु रिद न्धनम्।।

卐 या^ अक्षेषु प्रमोदन्ते- शुच. ङ्क्रोधञ्च बिभ्रती। आनन्दिनीं प्रमोदिनी- मप्सरा. न्तामिह हुवे।। 4।।

卐 सूर्यस्य रश्मी. ननु या. स्सञ्चरन्ति- मरीचीर्वा या^ अनुसञ्चरन्ति। यासा. मृषभो दूरतो वाजिनीवा- न्त्सद्य. स्सर्वा. न्लोका. न्पर्येति रक्षन्न्। स^ न^ ऐतु होम. मिम. ञ्जुषाणो 3(ओ)-ऽन्तरिक्षेण सह वाजिनीवान्।। 5।।

卐 अन्तरिक्षेण सह वाजिनीव- न्कर्कीं वत्सा. मिह रक्ष वाजिन्न्। इमे ते स्तोका^ बहुला^ ए-ह्यर्वा.ङिय.न्ते कर्कीह ते मनोऽस्तु।। 6।।

卐 अन्तरिक्षेण सह वाजिनीव- न्कर्कीं वत्सा. मिह रक्ष वाजिन्न्। अय. ङ्घासो अयँ व्रज^- इह वत्सा. न्नि बध्नीमः। यथानाम व^ ईश्महे स्वाहा।। 7।।-

04-08-04 (1 - 10 दशर्चस्य सूक्तस्याङ्गिरा ऋषिः। 1 - 2 प्रथमाद्वितीययोः पृथिव्यग्नी, 3 - 4 तृतीयाचतुर्थोर्वाय्वन्तरिक्षे, 5 - 6 पञ्चमीषष्ठयोर्दिवादित्यौ, 7 - 8 सप्तम्यष्टम्योर्दिक्तचन्द्रमसः, 9 - 10 नवमीदशम्योश्च जातवेदा अग्निर्देवताः। 1, 3, 5, 7 प्रथमातृतीयापञ्चमीसप्तमीनां त्रिपदा महाबृहती, 2, 4, 6, 7 द्वितीयाचतुर्थीषष्ठ्यष्टमीनां संस्तारपङ्क्तिः, 9 - 10 नवमीदशम्योश्च त्रिष्टुप् छन्दांसि।।) ❃सन्नतिः

卐 पृथिव्या. मग्नये समनम.न्त्स^ आर्ध्नोत्। यथा पृथिव्या. मग्नये समनम-न्नेवा मह्यं सन्नम. स्सन्नमन्तु।। 1।।

卐 पृथिवी धेनु- स्तस्या^ अग्नि. र्वत्सः। सा मेऽग्निना वत्से-नेष. मूर्ज.ङ्काम. न्दुहाम्। आयुः प्रथमं प्रजां पोषं रयिं स्वाहा।। 2।।

卐 अन्तरिक्षे वायवे समनम.न्त्स^ आर्ध्नोत्। यथाऽन्तरिक्षे वायवे समनम - न्नेवा मह्यं सन्नम. स्स. न्नमन्तु।। 3।।

卐 अन्तरिक्ष. न्धेनु- स्तस्या^ वायु. र्वत्सः। सा मे वायुना वत्से-नेष. मूर्ज.ङ्काम. न्दुहाम्। आयु॰ प्रथमं प्रजां- पोषं रयिं स्वाहा।। 4।।

卐 दिव्यादित्याय समनम.न्त्स^ आर्ध्नोत्। यथा दिव्यादित्याय समनम- न्नेवा मह्यं सन्नम. स्स.न्नमन्तु।। 5।।

卐 द्यौ.र्धेनु- स्तस्या^ आदित्यो वत्सः। सा म आदित्येन वत्से-नेष मूर्ज.ङ्काम.न्दुहाम्। आयु॰ प्रथमं प्रजां- पोषं रयिं स्वाहा।। 6।।

卐 दिक्षु चन्द्राय समनम.न्त्स^ आर्ध्नोत्। यथा दिक्षु चन्द्राय समनम- न्नेवा मह्यं सन्नम.स्सन्नमन्तु।। 7।।

卐 दिशो धेनव- स्तासा.ञ्चन्द्रो वत्सः। ता मे चन्द्रेण वत्से-नेष. मूर्ज.ङ्काम. न्दुहाम्। आयु॰ प्रथमं प्रजां- पोषं रयिं स्वाहा।। 8।।

卐 अग्ना.वग्नि. श्चरति प्रविष्ट^- ऋषीणां पुत्रो अभिशस्तिपा^ उ। नमस्कारेण नमसा ते जुहोमि- मा देवानां मिथुया कर्मभागम्।। 9।।

卐 हृदा पूतं मनसा जातवेदो- विश्वानि देव वयुनानि विद्वान्। सप्ताऽस्यानि तव जातवेद- स्तेभ्यो जुहोमि स^ जुषस्व हव्यम्।। 10।।-

☸ 04-08-05 (1 - 8 अष्टर्चस्य सूक्तस्य शुक्र ऋषिः। सामान्यतः सर्वासामृचाञ्जातवेदाः विशेषतश्च 1 प्रथमर्चोऽग्निः, 2 द्वितीयाया यमः, 3 तृतीयाया वरुणाः, 4 चतुर्थ्याः सोमः, 5 पञ्चम्या भूमिः, 6 षष्ठ्या वायुः, 7 सप्तम्याः सूर्यः, 8 अष्टम्याश्च ब्रह्म देवताः। 1, 3 - 7 प्रथमायास्तृतीयादिपञ्चानाञ्च त्रिष्टुप् द्वितीयाया जगती, 8 अष्टम्याश्च पुरोऽतिशक्करीपादयुग्जगती छन्दांसि।।) ❀ शत्रुनाशनम्

卐 ये पुरस्ता. ज्जुहति जातवेद॰- प्राच्या^ दिशोऽभिदास.न्त्यस्मान्।
अग्नि.मृत्वा ते पराञ्चो व्यथन्तां- प्रत्यगेना. न्प्रतिसरेण हन्मि।। 1।।

卐 ये दक्षिणतो जुहति जातवेदो- दक्षिणाया^ दिशोऽभिदास.न्त्यस्मान्।
यम.मृत्वा ते पराञ्चो व्यथन्तां- प्रत्यगेना. न्प्रतिसरेण हन्मि।। 2।।

卐 ये पश्चा.ज्जुहति जातवेद॰- प्रतीच्या दिशोऽभिदास.न्त्यस्मान्।
वरुण.मृत्वा ते पराञ्चो व्यथन्तां- प्रत्यगेना. न्प्रतिसरेण हन्मि।। 3।।

卐 य उत्तरतो जुहति जातवेद^- उदीच्या^ दिशोऽभिदास.न्त्यस्मान्।
सोम.मृत्वा ते पराञ्चो व्यथन्तां- प्रत्यगेना. न्प्रतिसरेण हन्मि।। 4।।

卐 ये3(ए)ऽधस्ता. ज्जुहति जातवेदो- ध्रुवाया^ दिशोऽभिदास.न्त्यस्मान्।
भूमि.मृत्वा ते पराञ्चो व्यथन्तां- प्रत्यगेना. न्प्रतिसरेण हन्मि।। 5।।

卐 ये3(ए)ऽन्तरिक्षा. ज्जुह्वति जातवेदो- व्यध्वाया^ दिशोऽभिदास.न्त्यस्मान्। वायु.मृत्वा ते पराञ्चो व्यथन्तां- प्रत्यगेना न्प्रतिसरेण हन्मि।। 6।।

卐 य उपरिष्टा ज्जुह्वति जातवेद^- ऊर्ध्वाया^ दिशोऽभिदास.न्त्यस्मान्। सूर्य.मृत्वा ते पराञ्चो व्यथन्तां- प्रत्यगेना. न्प्रतिसरेण हन्मि।। 7।।

卐 ये दिशा. मन्तर्देशेभ्यो जुह्वति जातवेद- स्सर्वाभ्यो दिग्भ्योऽभिदास.न्त्यस्मान्। ब्रह्मर्त्वा ते पराञ्चो व्यथन्तां- प्रत्यगेना न्प्रतिसरेण हन्मि।। 8।।

।।चतुर्थ ङ्काण्डं समाप्तम्।।

## ॐ पञ्चमङ्काण्डम्

### पञ्चम काण्डे प्रथमोऽनुवाकः

05-01-01 (1-9 नवर्चस्य सूक्तस्य बृहद्दिवोऽथर्वा ऋषिः। वरुणो देवता। 1 प्रथमर्चः पराबृहतीत्रिष्टुप् 2-6,8 द्वितीयादिपञ्चानामष्टम्याश्च त्रिष्टुप् 7 सप्तम्या विराट् त्रिष्टुप् 9 नवम्याश्च त्र्यवसाना षट्पदात्यष्टिश्छन्दांसि।।) ❀ अमृतासुः

卐 ऋधङ्मन्त्रो योनिं य^ आबभूवा-ऽमृतासु. वर्धमान. स्सुजन्मा। अदब्धासु. भ्राजमानो-ऽहेव त्रितो धर्ता दाधार त्रीणि।। 1।।

卐 आ यो धर्माणि प्रथम. स्ससाद्- ततो वपूंषि कृणुषे पुरूणि। धास्यु.
योनिं प्रथम^ आ विवेशा-ऽऽ यो वाच. मनुदिता. श्चिकेत।। 2।।

卐 यस्ते शोकाय तन्वं रिरेच- क्षर.द्धिरण्यं शुचयोऽनु स्वाः। अत्रा दधेते~
अमृतानि नामा-ऽस्मे~ वस्त्राणि विश^ एरयन्ताम्।। 3।।

卐 प्र यदेते प्रतरं पूर्व्यं.ङ्गु- स्सदस्सद^ आतिष्ठन्तो अजुर्यम्। कवि. श्शुषस्य
मातरा रिहाणे- जाम्यै धुर्यं पति. मेरयेथाम्।। 4।।

卐 तदू षु ते मह.त्पृथुज्म- न्नमः कविः काव्येना कृणोमि। यत्सम्यञ्चा
वभियन्ता.वभि क्षा- मत्रा मही ~रोधचक्रे~ वावृधेते~।। 5।।

卐 सप्त मर्यादाः कवय. स्ततक्षु- स्तासा. मिदेका. मभ्यंहुरो गात्। आयोर्ह
स्कम्भ^ उपमस्य नीडे- पथाँ विसर्गे धरुणेषु तस्थौ।। 6।।

卐 उताऽमृतासु. र्व्रत^एमि कृण्व- न्नसु. रात्मा तन्व1(अ)स्त.त्सुमद्गुः। उत
वा शक्रो रत्न. न्दधा- त्यूर्जया वा यत्सचते हविर्दाः।। 7।।

卐 उत पुत्रः पितर. ङ्क्षत्र.मीडे- ज्येष्ठं मर्याद. मह्वय.न्त्स्वस्तये। दर्.श.न्नु ता
वरुण या.स्ते विष्ठा- आवर्व्रततः कृणवो वपूंषि।। 8।।

卐 अर्ध मर्धेन पयसा पृण-क्ष्यर्धेन शुष्म वर्धसे अमुर। अविँ वृधाम शग्मियं सखायँ- वरुणं पुत्र. मदित्या^ इषिरम्। कविशस्ता.न्यस्मै वपूंष्यवोचाम- रोदसी~ सत्यवाचा।। 9।।-

05-01-02 (1-9 नवर्चस्य सूक्तस्य बृहद्दिवोऽथर्वा ऋषिः। वरुणो देवता। 1-8 प्रथमाद्यष्टर्चां त्रिष्टुप् 6 नवम्याश्च भुरिक्परातिजागता त्रिष्टुप् छन्दसी।।) ❁ भुवनेषु ज्येष्ठः

卐 तदिदास भुवनेषु ज्येष्ठँ- यतो जज्ञ उग्र. स्त्वेषनृम्णः। सद्यो जज्ञानो नि रिणाति शत्रू- ननु यदेनँ मदन्ति विश्व ऊमाः।। 1।।

卐 वावृधान. श्शवसा भूर्योजा- श्शत्रु. र्दासाय भियस. न्दधाति। अव्यनच्च व्यनच्च सस्नि- सन्ते नवन्त प्रभृता मदेषु।। 2।।

卐 त्वे~ क्रतु.मपि पृञ्चन्ति भूरि- द्वि. र्यदेते त्रि.र्भव.न्त्यूमाः। स्वादो. स्स्वादीय. स्स्वादुना सृजा -स.मद. स्सु मधु मधुनाऽभि योधीः।। 3।।

卐 यदि चिन्नु त्वा धना जयन्तं- रणेरणे अनुमदन्ति विप्राः। ओजीय. श्शुष्मि. न्त्स्थिर. मा तनुष्व- मा त्वा दभ. न्दुरेवास꣡ कशोकाः।। 4।।

卐 त्वया वयं शाशद्महे रणेषु- प्रपश्यन्तो युधेन्यानि भूरि। चोदयामि त आयुधा वचोभि-स्स.न्ते शिशामि ब्रह्मणा वयांसि।। 5।।

卐 नि त.द्दधिषेऽवरे परे च- यस्मि. न्नाविथाऽवसा दुरोणे। आ स्थापयत मातर. ञ्जिगत्नु- मत^ इन्वत कर्वराणि भूरि।। 6।।

卐 स्तुष्व वर्ष्म. न्पुरुवर्त्मानं समृभ्वाण- मिनतम. माप्त. माप्त्यानाम्। आ दर्शति शवसा भूर्योजा॰- प्र सक्षति प्रतिमानं पृथिव्याः।। 7।।

卐 इमा ब्रह्म बृहद्दिव॰ कृणव- दिन्द्राय शूष. मग्रिय. स्स्वर्षाः। महो गोत्रस्य क्षयति स्वराजा- तुरश्चि. द्विश्व. मर्णव. त्तपस्वान्।। 8।।

卐 एवा महा. न्बृहद्दिवो अथर्वा-ऽवोच त्स्वा.न्तन्व1(अ)मिन्द्र.मेव। स्वसारौ मातरिभ्वरी~ अरिप्रे~- हिन्वन्ति चैने~ शवसा वर्धयन्ति च।। 9।।-

05-01-03 (1-11 एकदशर्चस्य सूक्तस्य बृहद्दिवोऽथर्वा ऋषिः। 1-2 प्रथमाद्वितीययोर्ऋचोर्विहव्योऽग्निः 3-4 तृतीयाचतुर्थोर्देवाः 5 पञ्चम्या द्रविणोदादयः 6,9-10 षष्ठीनवमीदशमीनां विश्वे देवाः 7 सप्तम्याः सोमः 8,11 अष्टम्येकादशयोश्चेन्द्रो देवताः। 1, 3-9,11 प्रथमर्चस्तृतीयादिसप्तानामेकादश्याश्च त्रिष्टुप् 2 द्वितीयाया भुरिक्त्रिष्टुप् 10 दशम्याश्च विराड्जगती छन्दांसि।।) ❃ विजयाय प्रार्थना

卐 ममाऽग्ने वर्चो विहवे.ष्वस्तु- वय.न्त्वेन्धाना. स्तन्वं पुषेम। मह्य. न्नमन्तां प्रदिश. श्चतस्र- स्त्वयाऽध्यक्षेण पृतना^ जयेम।। 1।।

卐 अग्ने मन्युं प्रतिनुद. न्परेषा- न्त्व.न्नो गोपाः परि पाहि विश्वतः। अपाञ्चो यन्तु निवता दुरस्यवो-ऽमैषा. ञ्चित्तं प्रबुधाँ वि नेशत्।। 2।।

卐 मम देवा^ विहवे सन्तु सर्व -इन्द्रवन्तो मरुतो विष्णु. रग्निः। ममाऽन्तरिक्ष. मुरुलोक. मस्तु- मह्यँ वातः पवता.ङ्कामायाऽस्मै।। 3।।

卐 मह्यँ यजन्तां मम यानीष्टा-ऽऽकूति. स्सत्या मनसो मे अस्तु। एनो मा नि गा.ङ्कतम. च्चनाऽहँ- विश्वे देवा^ अभि रक्षन्तु मेह।। 4।।

卐 मयि देवा^ द्रविण. मायजन्तां- मय्याशी. रस्तु मयि देवहूतिः। दैवा^ होतार. स्सनिष. न्न^ एत- दरिष्टा. स्स्याम तन्वा सुवीराः।। 5।।

卐 दैवी. ष्षडुर्वी. रुरु नः कृणोत- विश्वे देवास^ इह मादयध्वम्। मा नो विद. दभिभा मो~ अशस्ति-र्मा नो विद.द्वृजिना द्वेष्या या।। 6।।

卐 तिस्रो देवी. र्महि न.श्शर्म यच्छत- प्रजायै न.स्तन्वे3(ए) यच्च पुष्टम्। मा हास्महि प्रजया मा तनूभि- र्मा रधाम द्विषते सोम राजन्।। 7।।

卐 उरुव्यचा^ नो महिष श्शर्म यच्छ-त्वस्मि. न्हवे पुरुहूतः पुरुक्षु। स^ नः प्रजायै हर्यश्व मृ-डेन्द्र मा नो रीरिषो मा परा दाः।। 8।।

卐 धाता विधाता भुवनस्य य.स्पति- र्देव स्सविताऽभिमातिषाहः। आदित्या^ रुद्रा^ अश्विनोभा- देवाः पान्तु यजमान. न्निर्ऋथात्।। 9।।

卐 ये न.स्सपत्ना अप ते भव-न्त्विन्द्राग्निभ्या. मव बाधामह एनान्।
आदित्या^ रुद्रा^ उपरिस्पृशो न^- उग्र. श्चेत्तार. मधिराज. मक्रत।। 10।।
卐 अर्वाञ्च. मिन्द्र. ममुतो हवामहे- यो गोजि. द्धनजि. दश्वजि.द्यः। इम.न्नो
यज्ञँ विहवे श्रणो - त्वस्माक. मभूर् हर्यश्व मेदी।। 11।।-

05-01-04 (1-10 दशर्चस्य सूक्तस्य भृग्वङ्गिरा ऋषिः। कुष्ठो यक्ष्मनाशनञ्च देवते। 1-4, 7-9 प्रथमादिचतुर्ऋचां सप्तम्यादितृचस्य चानुष्टुप् 5 पञ्चम्या भुरिगनुष्टुप् 6 षष्ठ्या गायत्री 10 दशम्याश्च उष्णिग्गर्भा निचृदनुष्टुप् छन्दांसि।।) ❀ कुष्ठतक्मनाशन्

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 यो गिरि.ष्वजायथा^- वीरुधां बलवत्तमः। कुष्ठेहि तक्मनाशन- तक्मान
न्नाशय.न्नितः।। 1।।
卐 सुपर्णसुवने गिरौ- जातं हिमवत.स्परि। धनै. रभि श्रुत्वा यन्ति- विदुर्हि
तक्मनाशनम्।। 2।।
卐 अश्वत्थो देवसदन- स्तृतीयस्या. मितो दिवि। तत्राऽमृतस्य चक्षण-
न्देवाः कुष्ठ. मवन्वत।। 3।।
卐 हिरण्ययी नौ.रचर-द्धिरण्यबन्धना दिवि। तत्राऽमृतस्य पुष्प- न्देवाः
कुष्ठ. मवन्वत।। 4।।

卐 हिरण्यया॰ पन्थान^ आस-न्नरित्राणि हिरण्यया। नावो हिरण्ययी. रासन्- याभि॰ कुष्ठ. न्निरावहन्न्।।5।।

卐 इमं मे कुष्ठ पूरुष- न्त.मा वह तन्निष्कुरु। तमु मे अगद. ङ्कृधि।। 6।।

卐 देवेभ्यो अधि जातोऽसि- सोमस्याऽसि सखा हितः। स^ प्राणाय व्यानाय- चक्षुषे मे अस्मै मृड।। 7।।

卐 उदङ्जातो हिमवत- स्स^ प्राच्या. न्नीयसे जनम्। तत्र कुष्ठस्य नामा.- न्युत्तमानि वि भेजिरे।। 8।।

卐 उत्तमो नाम कुष्ठा-ऽस्युत्तमो नाम ते पिता। यक्ष्मञ्च सर्व. न्नाशय- तक्मान.ञ्चाऽरस. ङ्कृधि।। 9।।

卐 शीर्षाम.य मुपहत्या- मक्ष्यो स्तन्वो3(ओ) रपः। कुष्ठ. स्तत्सर्व. न्निष्कर- द्दैवं समह वृष्ण्यम्।। 10।।-

05-01-05 (1-9 नवर्चस्य सूक्तस्याथर्वा ऋषिः। लाक्षा देवता । अनुष्टुप् छन्दः।।) लाक्षा

卐 रात्री माता नभ॰ पिता-ऽर्यमा ते पितामहः। सिलाची नाम वा असि- सा देवाना.मसि स्वसा।। 1।।

卐 यस्त्वा पिबति जीवति- त्रायसे पुरुष.न्त्वम्। भर्त्री हि शश्वता.मसि-
जनानाञ्च न्यञ्चनी।। 2।।

卐 वृक्षँवृक्ष. मा रोहसि- वृषण्यन्तीव कन्यला। जयन्ती प्रत्यातिष्ठन्ती-
स्परणी नाम वा असि।। 3।।

卐 यद्दण्डेन यदिष्वा -यद्वाऽरुर् हरसा कृतम्। तस्य त्वमसि निष्कृति-
स्सेम. न्निष्कृधि पूरुषम्।। 4।।

卐 भद्रा. त्प्लक्षा. न्निस्तिष्ठ-स्यश्वत्था. त्खदिरा.द्धवात्। भद्रा. न्न्यग्रोधा.
त्पर्णा- त्सा न^ एह्यरुन्धति।। 5।।

卐 हिरण्यवर्णे सुभगे- सूर्यवर्णे वपुष्टमे। रुत. ङ्गच्छासि निष्कृते- निष्कृति.
र्नाम वा असि।। 6।।

卐 हिरण्यवर्णे सुभगे- शुष्मे लोमशवक्षणे। अपा.मसि स्वसा- लाक्षे वातो
हाऽऽत्मा बभूव ते।। 7।।

卐 सिलाची नाम कानीनो-ऽजबभ्रु पिता तव। अश्वो यमस्य य.श्श्याव-
स्तस्य हाऽस्नाऽस्युक्षिता।। 8।।

卐 अश्वस्याऽस्न. स्सम्पतिता- सा वृक्षा॰ अभि सिष्यदे। सरा पतत्रिणी
भूत्वा- सा न^ एह्यरुन्धति।। 9।।

# ॐ पञ्चम काण्डे द्वितीयोऽनुवाकः

05-02-01 (1-14 चतुर्दशर्चस्य सूक्तस्याथर्वा ऋषिः।1 प्रथमर्चो ब्रह्मादित्यः 2 द्वितीयायाः कर्माणि 3-4 तृतीयाचतुर्थ्यो रुद्रगणाः 5-8 पञ्चम्यादिचतसृणां सोमारुद्रौ 9 नवम्या हेतिः 10 दशम्या अग्निः 11-14 एकादश्यादिचतसृणाञ्च सर्वात्मा रुद्रो देवताः। 1,9 प्रथमानवम्योत्रिष्टुप् 2 द्वितीयाया अनुष्टुप् 3 तृतीयाया जगती 4 चतुर्थ्याः पञ्चपदानुष्टुबुष्णिक्त्रिष्टुब्गर्भा जगती 5-7 पञ्चम्यादितृचस्य त्रिपदा विराड्गायत्री 8 अष्टम्या एकावसाना द्विपदार्च्यनुष्टुप् 10 दशम्याः प्रस्तारपङ्क्तिः 11-13 एकादश्यादितृचस्य पङ्क्तिः 14 चतुर्दश्याश्च स्वराट् पङ्क्तिश्छन्दांसि।।) ❁ ब्रह्मविद्या

卐 ब्रह्म जज्ञानं प्रथमं पुरस्ता-द्वि सीमत. स्सुरुचो वेन^ आवः। स^ बुध्न्या^ उपमा^ अस्य विष्ठा- स्सतश्च योनि. मसतश्च विवः।। 1।।

卐 अनाप्ता^ ये वः प्रथमा- यानि कर्माणि चक्रिरे। वीरा.न्नो अत्र मा दभ-न्तद्व^ एत. त्पुरो दधे।। 2।।

卐 सहस्रधार एव ते समस्वर- न्दिवो नाके मधुजिह्वा^ असश्चतः। तस्य स्पशो न नि मिषन्ति भूर्णयः- पदेपदे पाशिन. स्सन्ति सेतवे।। 3।।

卐 पर्यू षु प्र धन्वा वाजसातये- परि वृत्राणि सक्षणिः। द्विष. स्तदध्यर्णवे.नेयसे सनिस्रसो- नामासि त्रयोदशो मास^ इन्द्रस्य गृहः।। 4।।

Sri Sacchidananda Avadhoota Datta Peetham • Mysore

卐 न्वे3(ए)तेनाऽरात्सी.रसौ स्वाहा। तिग्माऽऽयुधौ तिग्महेती~ सुशेवौ सोमारुद्रा.विह सु मृडत. न्नः।। 5।।

卐 अवैतेनाऽरात्सी.रसौ स्वाहा। तिग्माऽऽयुधौ तिग्महेती~ सुशेवौ सोमारुद्रा.विह सु मृडत.न्नः।। 6।।

卐 अपैतेनाऽरात्सी.रसौ स्वाहा। तिग्माऽऽयुधौ तिग्महेती~ सुशेवौ सोमारुद्रा.विह सु मृडत.न्नः।।।। 7।।

卐 मुमुक्त. मस्मा. न्दुरिता. दवद्या- ज्जुषेथाँ यज्ञ. ममृत. मस्मासु धत्तम्।। 8।।

卐 चक्षुषो हेते मनसो हेते- ब्रह्मणो हेते तपसश्च हेते। मेन्या^ मेनि.र- स्यमेनय स्ते सन्तु- ये3(ए)ऽस्मा॰ अभ्यघायन्ति।। 9।।

卐 यो3(ओ)ऽस्मां.श्चक्षुषा मनसा- चित्त्याऽऽकूत्या च यो अघायु. रभिदासात्। त्व.न्ता.नग्ने मेन्या मेनी. न्कृणु स्वाहा।। 10।।

卐 इन्द्रस्य गृहोऽसि। तन्त्वा प्र पद्ये- तन्त्वा प्र विशामि- सर्वगु. स्सर्वपूरुष- स्सर्वाऽऽत्मा सर्वतनू- स्सह यन्मेऽस्ति तेन।। 11।।

卐 इन्द्रस्य शर्माऽसि। तन्त्वा प्र पद्ये- तन्त्वा प्र विशामि- सर्वगु. स्सर्वपूरुष- स्सर्वाऽऽत्मा सर्वतनू- स्सह यन्मेऽस्ति तेन।। 12।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 इन्द्रस्य वर्माऽसि। तन्त्वा प्र पद्ये- तन्त्वा प्र विशामि- सर्वगु. स्सर्वपूरुष. स्सर्वाऽऽत्मा सर्वतनू- स्सह यन्मेऽस्ति तेन।। 13।।

卐 इन्द्रस्य वरूथ.म सि। तन्त्वा प्र पद्ये- तन्त्वा प्र विशामि- सर्वगु. स्सर्वपूरुष. स्सर्वाऽऽत्मा सर्वतनू- स्सह यन्मेऽस्ति तेन।। 14।।-

05-02-02 (1-10 दशर्चस्य सूक्तस्याथर्वा ऋषिः। 1-3, 6-10 प्रथमादितृचस्य षष्ठ्यादिपञ्चर्चाञ्चारातयः 4-5 चतुर्थोपञ्चम्योश्च सरस्वती देवताः। 1 प्रथमाया विराङ्गर्भा प्रस्तारपङ्क्तिः 2-3,5,7-10 द्वितीयातृतीयापञ्चमीनां सप्तम्यादिचतसृणाञ्चानुष्टुप् 4 चतुर्थ्याः मध्याबृहती 6 षषअठअयाश्च प्रस्तारपङ्क्तिश्छन्दांसि।।) ❁ अरातिनाशनम्

卐 आ^ नो भर मा परि ष्ठा^ अराते- मा नो रक्षी. र्दक्षिणा. न्नीयमानाम्। नमो वीर्त्साया असमृद्धये- नमो अस्त्वरातये।। 1।।

卐 य.मराते पुरोधत्से- पुरुषं परिरापिणम्। नमस्ते तस्मै कृण्मो- मा वनिँ व्यथयी. र्मम।। 2।।

卐 प्र णो वनि. र्देवकृता- दिवा नक्तञ्च कल्पताम्। अराति. मनुप्रेमो वय- न्नमो अस्त्वरातये।। 3।।

卐 सरस्वती मनुमतिं- भगँ यन्तो हवामहे। वाच. ञ्जुष्टां मधुमती मवादिष- न्देवाना. न्देवहूतिषु।। 4।।

卐 यँ याचा.म्यहँ वाचा- सरस्वत्या मनोयुजा। श्रद्धा त.मद्य विन्दतु- दत्ता सोमेन बभ्रुणा।। 5।।

卐 मा वनिं मा वाच.न्नो वीर्त्सी- रुभा. विन्द्राग्नी~ आभरता.न्नो वसूनि। सर्वे नो अद्य दित्सन्तो-ऽरातिं प्रति हर्यत।। 6।।

卐 परोऽपेह्यसमृद्धे- वि ते हेतिं. न्नयामसि। वेद त्वाऽह. न्निमीवन्ती- न्नितुदन्ती. मराते।। 7।।

卐 उत नग्ना बोभुवती- स्वप्नया सचसे जनम्। अराते चित्तँ वीर्त्स-न्त्याकूतिं पुरुषस्य च।। 8।।

卐 या महती महोन्माना- विश्वा^ आशा^ व्यानशे। तस्यै हिरण्यकेश्यै- निर्ऋत्या अकर. न्नमः।। 9।।

卐 हिरण्यवर्णा सुभगा- हिरण्यकशिपु. र्मही। तस्यै हिरण्यद्रापये-ऽरात्या अकर. न्नमः।। 10।।-

05-02-03 (1-9 नवर्चस्य सूक्तस्याथर्वा ऋषिः। 1-2 प्रथमाद्वितीययोर्ऋचोरग्निः 3 तृतीयाया विश्वे देवाः 4-9 चतुर्थ्यादिषण्णाञ्चेन्द्रो देवताः। 1,5,8 प्रथमापञ्चम्यष्टमीनामनुष्टुप् 2 द्वितीयायास्त्र्यवसाना षट्पदा जगती 3-4 तृतीयाचतुर्थ्योर्भुरिक्पथ्यापङ्क्तिः6 षष्ठ्या आस्तारपङ्क्तिः 7 सप्तम्या द्वयुष्णिगगर्भा पथ्यापङ्क्तिः 9 नवम्याश्च त्र्यवसाना षट्पदा द्युष्णिग्गर्भा जगती छन्दांसि।।) शत्रुनाशनम्

卐 वैकङ्कतेनेध्मेन- देवेभ्य^ आज्यँ वह। अग्ने ता॰ इह मादय- सर्व आ यन्तु मे हवम्।। 1।।

卐 इन्द्राऽऽ याहि मे हव- मिद. ङ्करिष्यामि तच्छृणु। इम ऐन्द्रा^ अतिसरा^- आकूतिं सन्नमन्तु मे। तेभि. श्शकेम वीर्य1(अ)- ञ्जातवेद. स्तनूवशिन्न्।। 2।।

卐 यदसा. वमुतो देवा- अदेव स्संश्चिकीर्षति। मा तस्याऽग्निर् हव्यं वाक्षी- द्धव. न्देवा^ अस्य मोप गु- र्ममैव हव. मेतन।। 3।।

卐 अति धावताऽतिसरा^- इन्द्रस्य वचसा हत। अविं वृक^इव मथ्नीत- स^ वो जीव. न्मा मोचि- प्राण.मस्याऽपि नह्यत।। 4।।

卐 य.ममी~ पुरोदधिरे- ब्रह्माण. मपभूतये। इन्द्र स^ ते अधस्पद- न्तं प्रत्यस्यामि मृत्यवे।। 5।।

卐 यदि प्रेयु. र्दैवपुरा- ब्रह्म वर्माणि चक्रिरे। तनूपानं परिपाण- ङ्कृण्वाना

यदुपोचिरे- सर्व. न्तदरस.ङ्कृधि।। 6।।

卐 यानसा. वतिसरां- श्चकार कृणवच्च यान्। त्व.न्तानिन्द्र वृत्रह- न्प्रतीच

पुन.रा कृधि- यथाऽमु. न्तृणहा.ञ्जनम्।। 7।।

卐 यथेन्द्र उद्वाचनँ- लब्ध्वा चक्रे अधस्पदम्। कृण्वे3(ए)ऽह. मधरां.

स्तथा-ऽमू. न्छश्वतीभ्य स्समाभ्यः।। 8।।

卐 अत्रैना. निन्द्र वृत्रह- न्नुग्रो मर्मणि विध्य। अत्रैवैना. नभि ति-ष्ठेन्द्र

मेद्य1(अ)ह. न्तव। अनु त्वेन्द्राऽऽ रभामहे- स्याम सुमतौ तव।। 9।।-

05-02-04 (1-8 अष्टर्चस्य सूक्तस्य ब्रह्मा ऋषिः। वास्तोष्पतिर्देवता। 1,5 प्रथमापञ्चम्योर्ऋचोर्दैवी बृहती 2,6 द्वितीयाषष्ठ्योर्दैवी त्रिष्टुप् 3-4 तृतीयाचतुर्थ्योर्दैवी जगती 7 सप्तम्याः पञ्चपदा विराडुष्णिग्बृहतीगर्भा पञ्चपदा जगती 8 अष्टम्याश्च त्र्यवसाना चतुष्पदा पुरस्कृतित्रिष्टुब्बृहतीगर्भाति जगती छन्दांसि।।) ❃ आत्मा

卐 दिवे स्वाहा।। 1।।

卐 पृथिव्यै स्वाहा।। 2।।

卐 अन्तरिक्षाय स्वाहा।। 3।।

卐 अन्तरिक्षाय स्वाहा।। 4।।

卐 दिवे स्वाहा।। 5।।

卐 पृथिव्यै स्वाहा।। 6।।

卐 सूर्यो मे चक्षु. र्वातः प्राणो3(ओ)-ऽन्तरिक्ष. मात्मा पृथिवी शरीरम्। अस्तृतो नामाऽह. मय. मस्मि- स^ आत्मान.न्नि दधे- द्यावापृथिवीभ्या. ङ्गोपीथाय।। 7।।

卐 उदायु. रुद्बल. मुत्कृत- मुत्कृत्या. मुन्मनीषा. मुदिन्द्रियम्। आयुष्कृ. दायुष्पत्नी स्वधावन्तौ- गोपा मे स्त. ङ्गोपायतं मा। आत्मसदौ मे स्तं- मा मा हिंसिष्टम्।। 8।।-

05-02-05

(1-8 अष्टर्चस्य सूक्तस्य ब्रह्मा ऋषिः। वास्तोष्पतिर्देवता। 1-6 प्रथमादिषड्ऋचां यवमध्या त्रिपदा गायत्री 7 सप्तम्या यवमध्या ककुप् 8 अष्टम्याश्च पुरोधृतिद्व्यनुष्टुब्गर्भा पराष्टिस्त्र्यवसाना चतुष्पदातिजगती छन्दांसि।।) ❃ आत्मरक्षा

卐 अश्मवर्म मेऽसि- यो मा प्राच्या^ दिशोऽघायु. रभिदासात्। एतत्स^ ऋच्छात् ।। 1।।

卐 अश्मवर्म मेऽसि- यो मा दक्षिणाया^ दिशोऽघायु. रभिदासात्। एतत्स^ ऋच्छात्।। 2।।

卐 अश्मवर्म मेऽसि यो मा प्रतीच्या^ दिशोऽघायु. रभिदासात्। एतत्स^ ऋच्छात् ।। 3।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 अश्मवर्म मेऽसि यो मोदीच्या^ दिशोऽघायु. रभिदासात्। एतत्स^ ऋच्छात्।। 4।।

卐 अश्मवर्म मेऽसि यो मा ध्रुवाया^ दिशोऽघायु. रभिदासात्। एतत्स^ ऋच्छात्।। 5।।

卐 अश्मवर्म मेऽसि यो मोर्ध्वाया^ दिशोऽघायु. रभिदासात्। एतत्स^ ऋच्छात्।। 6।।

卐 अश्मवर्म मेऽसि यो मा दिशा. मन्तर्देशेभ्यो^ऽघायु. रभिदासात्। एतत्स^ ऋच्छात् ।। 7।।

卐 बृहता मन^ उप ह्वये- मातरिश्वना प्राणापानौ। सूर्या. च्चक्षु. रन्तरिक्षा-च्छ्रोत्रं पृथिव्या. श्शरीरम्। सरस्वत्या^ वाच- मुप ह्वयामहे मनोयुजा।। 8।।

# ≤◊≥ पञ्चम काण्डे तृतीयोऽनुवाकः

05-03-01 (1-11 एकादशर्चस्य सूक्तस्याथर्वा ऋषिः। वरुणो देवता। 1 प्रथमर्चो भुरिक्त्रिष्टुप् 2, 4-5, 7-10 द्वितीयाचतुर्थोपञ्चमीनां सप्तम्यादिचतसृणाञ्च त्रिष्टुप् 3 तृतीयायाः पङ्क्तिः 6 षष्ठ्याः पञ्चपदातिशक्करी 11 एकादश्यश्च त्र्यवसाना षट्पदात्यष्टिछन्दांसि।।) ❃ संपत्कर्म

卐 कथं महे असुरायाऽब्रवी. रिह- कथं पित्रे हरये त्वेषनृम्णः। पृश्निँ वरुण दक्षिणा. न्ददावा- न्पुनर्मघ त्वं मनसाऽचिकित्सीः।। 1।।

卐 न कामेन पुनर्मघो भवामि- सञ्चक्षे कं पृश्नि. मेता मुपाजे। केन नु त्वमथर्व. न्काव्येन- केन जातेनाऽसि जातवेदाः।। 2।।

卐 सत्य.मह. ङ्गभीरः काव्येन- सत्य. ञ्जातेनाऽस्मि जातवेदाः। न मे दासो नाऽऽर्यो महित्वा- व्रतं मीमाय यदह. न्धरिष्ये।। 3।।

卐 न त्व.दन्यः कवितरो न मेधया- धीरतरो वरुण स्वधावन्न्। त्वन्ता विश्वा भुवनानि वेत्थ- स^ चिन्नु त्वज्जनो मायी बिभाय।। 4।।

卐 त्वं ह्य1(अ)ङ्ग वरुण स्वधाव- न्विश्वा वेत्थ जनिमा सुप्रणीते। किं रजस^ एना परो अन्य द-स्त्येना किं परेणाऽवर. ममुर।। 5।।

卐 एकं रजस^ एना परो अन्य दस्त्येना- पर^ एकेन दुर्णश.ञ्चि.दर्वाक्। तत्ते विद्वान् वरुण प्र ब्रवी-म्यधोवचस॰ पणयो भवन्तु नीचै- र्दासा^ उप सर्पन्तु भूमिम्।। 6।।

卐 त्वं ह्य1(अ)ङ्ग वरुण ब्रवीषि- पुनर्मघे.ष्ववद्यानि भूरि। मो षु पणी॰ रभ्ये3(ए)तावतो भू- न्मा त्वा वोच. न्नराधस. ञ्जनासः।। 7।।

卐 मा मा वोच. न्नराधस. ञ्जनास॰- पुनस्ते पृश्नि. ञ्जरित. र्ददामि। स्तोत्रं मे विश्व मा याहि शचीभि- रन्त. र्विश्वासु मानुषीषु दिक्षु।। 8।।

卐 आ ते स्तोत्रा.ण्युद्यतानि य-न्त्वन्त.र्विश्वासु मानुषीषु दिक्षु। देहि नु मे यन्मे अदत्तो- असि युज्यो मे सप्तपद. स्सखाऽसि।। 9।।

卐 समा नौ बन्धु. र्वरुण समा जा वेदा-ऽह न्त.द्यन्ना.वेषा समा जा। ददामि तद्यत्ते अदत्तो अस्मि- युज्यस्ते सप्तपद. स्सखाऽस्मि।। 10।।

卐 देवो देवाय गृणते वयोधा^- विप्रो विप्राय स्तुवते सुमेधाः। अजीजनो हि वरुण स्वधाव- न्नथर्वाणं पितर. न्देवबन्धुम्। तस्मा उ राध॰ कृणुहि सुप्रशस्तं - सखा नो असि परमञ्च बन्धुः।। 11।।-

05-03-02 (1-11 एकादशर्चस्य सूक्तस्याङ्गिरा ऋषिः। जातवेदा अग्निर्देवता। 1-2, 4-11 प्रथमाद्वितीययोर्ऋचोश्चतुर्थ्योद्यष्टानाञ्च त्रिष्टुप् 3 तृतीयायाश्च पङ्क्तिश्छन्दसी।।) ❁ ऋतस्य यज्ञः

卐 समिद्धो अद्य मनुषो दुरोणे- देवो देवान् यजसि जातवेदः। आ च वह मित्रमह. श्चिकित्वा- न्त्व न्दूतꣳ कवि.रसि प्रचेताः।। 1।।

卐 तनूनपा. त्पथ^ ऋतस्य याना- न्मध्वा समञ्ज. न्त्स्वदया सुजिह्व। मन्मानि धीभि. रुत यज्ञ. मृन्ध- न्देवत्रा च कृणुह्यध्वर.न्नः।। 2।।

卐 आजुह्वान^ ईड्यो वन्द्यश्चा-ऽऽ या.ह्यग्ने वसुभि. स्सजोषाः। त्व.न्देवाना. मसि यह्व होता- स^ एनान् यक्षीषितो यजीयान्।। 3।।

卐 प्राचीनं बर्हिꣳ प्रदिशा पृथिव्या- वस्तो.रस्या^ वृज्यते अग्रे अह्नाम्। व्यु प्रथते वितरँ वरीयो- देवेभ्यो अदितये स्योनम्।। 4।।

卐 व्यचस्वती. रुर्विया वि श्रयन्तां- पतिभ्यो न जनय. श्शुम्भमानाः। देवी. र्द्वारो बृहती. र्विश्वमिन्वा- देवेभ्यो भवत सुप्रायणाः।। 5।।

卐 आ सुष्वयन्ती यजते~ उपाके~- उषासानक्ता सदता.न्नि योनौ। दिव्ये~ योषणे~ बृहती~ सुरुक्मे~- अधि श्रियं शुक्रपिश. न्दधाने~।। 6।।

卐 दैव्या होतारा प्रथमा सुवाचा- मिमाना यज्ञं मनुषो यजध्यै। प्रचोदयन्ता विदथेषु कारू~- प्राचीन. ञ्ज्योतिꣳ प्रदिशा दिशन्ता।। 7।।

卐 आ नो॑ य॒ज्ञं भार॑ती॒ तूय॑. मे॒-त्विडा॑ मनु॒ष्व. दि॒ह चे॒तय॑न्ती। ति॒स्रो दे॒वी. र्ब॒र्हि. रेदं स्यो॒नं- सर॑स्वती॒. स्स्वप॑स. स्सदन्ताम्।। 8।।

卐 य॒ इ॒मे~ द्यावा॑पृथि॒वी~ जनि॑त्री- रू॒पै. रपिं॑श॒. द्भुव॑नानि॒ विश्वा॑। तम॒द्य हो॑त. रिषि॒तो यजी॑या- न्दे॒व. न्त्वष्टा॑र. मि॒ह य॑क्षि वि॒द्वान्।। 9।।

卐 उ॒पाव॑सृ॒ज त्मन्या॑ सम॒ञ्ज- न्दे॒वानां॒ पाथ॒ ऋतु॒था ह॒वींषि॑। वन॒स्पति॑. श्शमि॒ता दे॒वो अ॒ग्नि- स्स्वद॑न्तु ह॒व्यं मधु॑ना घृ॒तेन॑।। 10।।

卐 स॒द्यो जा॒तो व्य॑मिमीत य॒ज्ञ- म॒ग्नि. र्दे॒वाना॑ मभव. त्पुरो॒गाः। अ॒स्य होतुः॑ प्र॒शिष्यृ॒तस्य॑ वा॒चि- स्वाहा॑कृतं ह॒वि. रद॑न्तु दे॒वाः।। 11।।-

05-03-03

(1-11 एकादशरचस्यास्य सूक्तस्य गरुत्मानृषिः। तक्षको देवता। 1,3 प्रथमातृतीययोर्ऋचोर्जगती 2 द्वितीयाया आस्तारपङ्क्तिः4,7,8 चतुर्थोसप्तम्यष्टमीनामनुष्टुप् 5 पञ्चम्यास्त्रिष्टुप् 6 षष्ठअयाः पथ्यापङ्क्तिः 9 नवम्या भुरिग्जगती 10-11 दशम्येकादश्योश्च निचृद्गायत्री छन्दांसि।।) ❀ सर्पविषनाशनम्

卐 द॒दि॒र्हि मह्यं॒ वरु॑णो दि॒वः क॒वि- र्वचो॑भि. रु॒ग्रै.र्नि रि॑णामि ते वि॒षम्। खा॒त. मखा॑त. मुत स॒क्त. म॑ग्रभ॒- मिरे॑व॒ धन्व॒.न्नि ज॑जास ते वि॒षम्।। 1।।

卐 यत्ते॒ अपो॑दकं वि॒ष- न्तत्त॒ ए॒ता.स्व॑ग्रभम्। गृ॒ह्णामि॑ ते मध्य॒म- मु॑त्त॒मं रस॑ मु॒ता॒ऽव॒मं- भि॒यसा॑ नेश॒.दादु॑ ते।। 2।।

卐 वृषा मे रवो नभसा न तन्यतु- रुग्रेण ते वचसा बाध^ आदु ते। अह. न्त.मस्य नृभि. रग्रभं रस- न्तमस^ इव ज्योति रुदेतु सूर्यः।। 3।।

卐 चक्षुषा ते चक्षु.र्हन्मि- विषेण हन्मि ते विषम्। अहे म्रियस्व मा जीवी८- प्रत्य गभ्येतु त्वा विषम्।। 4।।

卐 कैरात पृश्न उपतृण्य बभ्र- आ मे शृणुताऽसिता^ अलीकाः। मा मे सख्यु. स्स्तामान. मपि ष्ठाता-ऽऽश्रावयन्तो नि विषे रमध्वम्।। 5।।

卐 असितस्य तैमातस्य- बभ्रो. रपोदकस्य च। सात्रासाहस्याऽहं मन्यो.- रव ज्यामिव धन्वनो- वि मुञ्चामि रथा९ इव।। 6।।

卐 आलिगी च विलिगी च- पिता च माता च। विद्म व.स्सर्वतो बन्ध्वरसा८ कि.ङ्करिष्यथ।। 7।।

卐 उरुगूलाया^ दुहिता- जाता दास्यसिक्न्या। प्रतङ्क. न्दद्रुषीणां- सर्वासा. मरसँ विषम्।। 8।।

卐 कर्णा श्वावि. त्तदब्रवी- द्गिरे. रव.चरन्तिका। या८ काश्चेमा८ खनित्रिमा- स्तासा. मरसतमँ विषम्।। 9।।

卐 ताबुव.न्न ताबुव-न्न घे.त्त्वमसि ताबुवम्। ताबुवेनाऽरसँ विषम्।। 10।।

卐 तस्तुव.न्न तस्तुव-न्न घे.त्त्वमसि तस्तुवम्। तस्तुवेनाऽरसँ विषम्।। 11।।-

05-03-04 (1-13 त्रयोदशर्चस्य सूक्तस्य शुक्र ऋषिः। 1-2 प्रथमाद्वितीययोर्ऋचोरोषधिः। 3-13 तृतीयाद्येकादशानाञ्च कृत्यापरिहरणां देवते। 1-2, 4, 6-7, 9 प्रथमाद्वितीयाचतुर्थोषष्ठीसप्तमीनवमीनामनुष्टुप् 3,5,12 तृतीयापञ्चमी द्वादशीनां भुरिगनुष्टुप् 8 अष्टम्यास्त्रिपदा विराडनुष्टुप् 10 दशम्या निचृद्बृहती 11 एकादश्यास्त्रिपदा साम्नी त्रिष्टुप् 13 त्रयोदश्याश्च स्वराडनुष्टुप् छन्दांसि।।) ❀ कृत्यापरिहरणम्

卐 सुपर्ण.स्त्वाऽन्वविन्द- त्सूकर. स्त्वाऽखन. न्नसा। दिप्सौषधे त्व.न्दिप्सन्त- मव कृत्याकृत. ञ्जहि।। 1।।

卐 अव जहि यातुधाना- नव कृत्याकृत. ञ्जहि। अथो~ यो अस्मा न्दिप्सति- तमु त्व.ञ्जह्योषधे।। 2।।

卐 रिश्यस्येव परीशासं- परिकृत्य परि त्वचः। कृत्या.ङ्कृत्याकृते देवा^- निष्कमिव प्रति मुञ्चत।। 3।।

卐 पुनꣳ कृत्या.ङ्कृत्याकृते- हस्तगृह्य परा णय। समक्ष. मस्मा आ धेहि- यथा कृत्याकृतं हनत्।।4।।

卐 कृत्या. स्सन्तु कृत्याकृते- शपथ. श्शपथीयते। सुखो रथ^ इव वर्तता- ङ्कृत्या कृत्याकृतं पुनः।। 5।।

卐 यदि स्त्री यदि वा पुमा- न्कृत्या.ञ्चकार पाप्मने। तामु तस्मै नयाम-स्यश्वमि.वाऽश्वाभिधान्या।। 6।।

卐 यदि वाऽसि देवकृता- यदि वा पुरुषैः कृता। तान्त्वा पुन.र्णयाम-सीन्द्रेण सयुजा वयम्।। 7।।

卐 अग्ने पृतनाषा-द्वृतना. स्सहस्व। पुनःकृत्या-ङ्कृत्याकृते प्रतिहरणेन हरामसि।। 8।।

卐 कृतव्यध निविध्य तँ- यश्चकार तमि.ज्जहि। न त्वा मचक्रुषे वयँ- वधाय सं शिशीमहि।। 9।।

卐 पुत्र^इव पितर.ङ्गच्छ- स्वज^ इवाभिष्ठितो दश। बन्ध.मिवाऽवक्रामी गच्छ- कृत्ये कृत्याकृतं पुनः।। 10।।

卐 उदेणीव वार-ण्यभिस्कन्दं मृगीव। कृत्या कर्तार.मृच्छतु।। 11।।

卐 इष्वा ऋजीयः पततु- द्यावापृथिवी~ तं प्रति। सा तं मृगमिव गृह्णातु-कृत्या कृत्याकृतं पुनः।। 12।।

卐 अग्नि.रिवैतु प्रतिकूल- मनुकूल. मिवोदकम्। सुखो रथ^ इव वर्तता-ङ्कृत्या कृत्याकृतं पुनः।। 13।।-

05-03-05 (1-11 एकादशर्चस्य सूक्तस्य विश्वामित्र ऋषिः। मधुलौषधिर्देवता। 1-3, 6, 10-11 प्रथमादितृचस्य षष्ठीदशम्योकादशीनामृचामनुष्टुप् 4 चतुर्थ्योः पुरस्ताद्बृहती 5,7-9 पञ्चम्याः सप्तम्यादितृचस्य च भुरिगनुष्टुप् छन्दांसि।।) रोगोपशमनम्

卐 एका च मे दश च मे-ऽपवक्तार^ ओषधे। ऋतजात ऋतावरि- मधु मे मधुला करः।। 1।।

卐 द्वे~ च मे विंशतिश्च मे-ऽपवक्तार^ ओषधे। ऋतजात ऋतावरि- मधु मे मधुला करः।। 2।।

卐 तिस्रश्च मे त्रिंशच्च मे-ऽपवक्तार^ ओषधे। ऋतजात ऋतावरि- मधु मे मधुला करः।। 3।।

卐 चतस्रश्च मे चत्वारिंशच्च मे-ऽपवक्तार^ ओषधे। ऋतजात ऋतावरि- मधु मे मधुला करः।। 4।।

卐 पञ्च च मे पञ्चाशच्च मे-ऽपवक्तार^ ओषधे। ऋतजात ऋतावरि- मधु मे मधुला करः।। 5।।

卐 षट्च मे षष्टिश्च मे-ऽपवक्तार^ ओषधे। ऋतजात ऋतावरि- मधु मे मधुला करः।। 6।।

卐 सप्त च मे सप्ततिश्च मे-ऽपवक्तार^ ओषधे। ऋतजात ऋतावरि- मधु मे मधुला करः।। 7।।

卐 अष्ट च मेऽशीतिश्च मे-ऽपवक्तार^ ओषधे। ऋतजात ऋतावरि- मधु मे मधुला करः।। 8।।

卐 नव च मे नवतिश्च मे-ऽपवक्तार^ ओषधे। ऋतजात ऋतावरि- मधु मे मधुला करः।। 9।।

卐 दश च मे शतञ्च मे-ऽपवक्तार^ ओषधे। ऋतजात ऋतावरि- मधु मे मधुला करः।। 10।।

卐 शतञ्च मे सहस्र.ञ्चाऽपवक्तार^ ओषधे। ऋतजात ऋतावरि- मधु मे मधुला करः।। 11।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

## पञ्चम काण्डे चतुर्थोऽनुवाकः

05-04-01 (1-11 एकादशर्चस्य सूक्तस्य विश्वामित्र ऋषिः। एकवृषो देवता। 1, 4-5, 7-10 प्रथमाचतुर्थोपञ्चमीनामृचां सप्तम्यादिचतसृणाञ्च साम्नुष्णिक् 2-3, 6 द्वितीयातृतीयाषष्ठीनामासुर्यनुष्टुप् 11 एकादश्याश्चासुरी गायत्री छन्दांसि। सर्वा एकावसानाः।।) ❀ वृषरोगशमनम्

卐 यद्येकवृषोऽसि सृजाऽरसोऽसि।। 1।।

卐 यदि द्विवृषोऽसि सृजाऽरसोऽसि।। 2।।

卐 यदि त्रिवृषोऽसि सृजाऽरसोऽसि।। 3।।

卐 यदि चतुर्वृषोऽसि सृजाऽरसोऽसि।। 4।।

卐 यदि पञ्चवृषोऽसि सृजाऽरसोऽसि।। 5।।

卐 यदि षड्वृषोऽसि सृजाऽरसोऽसि।। 6।।

卐 यदि सप्तवृषोऽसि सृजाऽरसोऽसि।। 7।।

卐 यद्यष्टवृषोऽसि सृजाऽरसोऽसि।। 8।।

卐 यदि नववृषोऽसि सृजाऽरसोऽसि।। 9।।

卐 यदि दशवृषोऽसि सृजाऽरसोऽसि।। 10।।

卐 यद्येकादशोऽसि सोऽपोदकोऽसि।। 11।।-

05-04-02 (1-18 अष्टादशर्चस्य सूक्तस्य मयोभूर्ऋषिः। ब्रह्मजाया देवता। 1-6 प्रथमादिषड्चां त्रिष्टुप् 7-18 सप्तम्यादिद्वादशानाञ्चानुष्टुप् छन्दांसि।।) ❃ ब्रह्मजाया

卐 तेऽवद. न्प्रथमा^ ब्रह्मकिल्बिषे-ऽकूपार. स्सलिलो मातरिश्वा। वीडुहरा. स्तप^ उग्रं मयोभू- रापो देवीः प्रथमजा^ ऋतस्य।। 1।।

卐 सोमो राजा प्रथमो ब्रह्मजायां- पुनः प्राऽयच्छ. दहृणीयमानः। अन्वर्तिता वरुणो मित्र^ आसी- दग्नि. र्होता हस्तगृह्याऽऽ निनाय।। 2।।

卐 हस्तेनैव ग्राह्य आधि.रस्या^- ब्रह्मजायेति चे.दवोचत्। न दूताय प्रहेया तस्थ एषा- तथा राष्ट्रं. ङ्गुपित. ङ्क्षत्रियस्य।। 3।।

卐 या.माहु. स्तारकैषा विकेशीति- दुच्छुना. ङ्ग्राम. मवपद्यमानाम्। सा ब्रह्मजाया वि दुनोति राष्ट्रँ- यत्र प्राऽपादि शश^ उल्कुषीमान्।। 4।।

卐 ब्रह्मचारी चरति वेविष. द्विष- स्स^ देवानां भव.त्येक.मङ्गम्। तेन जाया. मन्वविन्द. द्बृहस्पति- स्सोमेन नीता. ञ्जुह्व1(अ)न्न देवाः।। 5।।

卐 देवा वा एतस्यां. मवदन्त पूर्वे- सप्तऋषय. स्तपसा ये निषेदुः। भीमा जाया ब्राह्मणस्याऽपनीता- दुर्धां. न्दधाति परमे व्योमन्न्।। 6।।

卐 ये गर्भा^ अवपद्यन्ते- जग.द्यच्चाऽपलुप्यते। वीरा^ ये तृह्यन्ते मिथो- ब्रह्मजाया हिनस्ति तान्।। 7।।

卐 उत यत्पतयो दश- स्त्रियाः पूर्वे अब्राह्मणाः। ब्रह्मा चेद्धस्त. मग्रहीत्-स^ एव पति. रेकधा।। 8।।

卐 ब्राह्मण^ एव पति-र्न राजन्यो3(ओ) न वैश्यः। तत्सूर्यः प्रब्रुव.न्नेति- पञ्चभ्यो मानवेभ्यः।। 9।।

卐 पुन.र्वै देवा^ अददुः- पुन. र्मनुष्या^ अददुः। राजान. स्सत्य. ङ्गृह्णाना^- ब्रह्मजायां पुन.र्ददुः।। 10।।

卐 पुनर्दाय ब्रह्मजाया- ङ्कृत्वा देवै. र्निकिल्बिषम्। ऊर्जं पृथिव्या^ भ.- क्त्वोरुगाय. मुपाऽऽसते।। 11।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 नाओस्य जाया शतवाही- कल्याणी तल्प.माशये। यस्मि. न्राष्ट्रे निरुध्यते- ब्रह्मजायाऽचित्त्या।। 12।।

卐 न विकर्णः पृथुशिरा- स्तस्मि. न्वेश्मनि जायते। यस्मि.न्राष्ट्रे निरुध्यते- ब्रह्मजायाऽचित्त्या।। 13।।

卐 नास्य क्षत्ता निष्कग्रीव- स्सूनाना मेत्यग्रतः। यस्मि.न्राष्ट्रे निरुध्यते- ब्रह्मजायाऽचित्त्या।। 14।।

卐 नाऽस्य श्वेतः कृष्णकर्णो- धुरि युक्तो महीयते। यस्मि.न्राष्ट्रे निरुध्यते- ब्रह्मजायाऽचित्त्या।। 15।

卐 नाऽस्य क्षेत्रे पुष्करिणी- नाऽऽण्डीकं. ञ्जायते बिसम्। यस्मि.न्राष्ट्रे निरुध्यते- ब्रह्मजायाऽचित्त्या।। 16।।

卐 नाऽस्मै पृश्निँ वि दुहन्ति- येऽस्या दोहं. मुपाऽऽसते। यस्मि.न्राष्ट्रे निरुध्यते- ब्रह्मजायाऽचित्त्या।। 17।।

卐 नाऽस्य धेनुः कल्याणी- नाऽनड्वा. न्त्सहते धुरम्। विजानि. र्यत्र ब्राह्मणो- रात्रिँ वसति पापया।। 18।।-

05-04-03

(1-15 पञ्चदशर्चस्य सूक्तस्य मयोभूर्ऋषिः। ब्रह्मगवी ब्राह्मणाश्च देवते।1-3,6-7, 10-12, 14-15 प्रथमादितृचस्य षष्ठीसप्तम्योर्ऋचोर्दशम्यादितृचस्य चतुर्दशीपञ्चदश्योश्चानुष्टुप् 4 चतुर्थ्या भुरिक्त्रिष्टुप् 5,8-9, 13 पञ्चम्यष्टमीनवमीत्रयोदशीनाञ्च त्रिष्टुप् छन्दांसि।।) ❀ ब्रह्मगवी

卐 नैता.न्ते देवा^ अददु- स्तुभ्य. न्नृपते अत्तवे। मा ब्राह्मणस्य राजन्य- गा.ञ्जिघत्सो अनाद्याम्।। 1।।

卐 अक्षद्रुग्धो राजन्यः- पाप^ आत्मपराजितः। स^ ब्राह्मणस्य गा.मद्या- दद्य जीवानि मा श्वः।। 2।।

卐 आविष्टिताऽघविषा- पृदाकू.रिव चर्मणा। सा ब्राह्मणस्य राजन्य- तृष्टैषा गौ.रनाद्या।। 3।।

卐 निर्वै क्षत्र. न्नयति हन्ति वर्चो-ऽग्निरिवाऽऽरब्धो वि दुनोति सर्वम्। यो ब्राह्मणं मन्यते अन्न.मेव- स^ विषस्य पिबति तैमातस्य।। 4।।

卐 य^ एनं हन्ति मृदुं मन्यमानो- देवपीयु. र्धनकामो न चित्तात्। स.न्तस्येन्द्रो हृदयेऽग्निमिन्ध- उभे~ एन. न्द्विष्टो नभसी~ चरन्तम्।। 5।।

卐 न ब्राह्मणो हिंसितव्यो3(ओ)-ऽग्निः प्रियतनो.रिव। सोमो ह्यस्य दायाद^- इन्द्रो अस्याऽभिशस्तिपाः।। 6।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 शतापाष्ठा.न्नि गिरति- ता.न्न शक्नोति निःखिदन्न्। अन्नँ यो ब्रह्मणां मल्व- स्स्वाद्व1(अ)द्मीति मन्यते।। 7।।

卐 जिह्वा ज्या भवति कुल्मलँ वा-ङ्नाडीका दन्ता. स्तपसाऽभिदिग्धाः। तेभि. र्ब्रह्मा विध्यति देवपीयू- न्हृद्बलै. र्धनुर्भि र्देवजूतैः।। 8।।

卐 तीक्ष्णेषवो ब्राह्मणा^ हेतिमन्तो- यामस्यन्ति शरव्या3(आ)न्न सा मृषा। अनुहाय तपसा मन्युना -चोत दूरा. दव भिन्द.न्त्येनम्।। 9।।

卐 ये सहस्र. मराज-न्नास. न्दशशता^ उत। ते ब्राह्मणस्य गा.ञ्जग्ध्वा- वैतहव्याः पराऽभवन्न्।। 10।।

卐 गौरेव तान् हन्यमाना- वैतहव्याः अवाऽतिरत्। ये केसरप्राबन्धाया- श्चरमाजा. मपेचिरन्न्।। 11।।

卐 एकशत.न्ता जनता- या भूमि र्व्यधूनुत। प्रजां हिंसित्वा ब्राह्मणी- मसम्भव्यं पराऽभवन्न्।। 12।।

卐 देवपीयु. श्चरति मर्त्येषु -गरगीर्णो भव.त्यस्थिभूयान्। यो ब्राह्मण. न्देवबन्धुं हिनस्ति- न स^ पितृयाण. मप्येति लोकम्।। 13।।

卐 अग्नि.र्वै नः पदवाय- स्सोमो दायाद^ उच्यते। हन्ताऽभिशस्तेन्द्र- स्तथा तद्वेधसो विदुः।। 14।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 इषु.रिव दिग्धा नृपते- पृदाकू.रिव गोपते। सा ब्राह्मणस्येषु. घोरा- तया विध्यति पीयतः।। 15।।-

05-04-04 (1-15 पञ्चदशर्चस्य सूक्तस्य मयोभूर्ऋषिः। ब्रह्मगवी ब्राह्मराश्च देवते। 1, 3-6, 8-15 प्रथमर्चस्तृतीयादिचतसृणामष्टम्याद्यष्टानाञ्चानुष्टुप् 2 द्वितीयाया विराट् पुरस्ताद्बृहती 7 सप्तम्याश्चोपरिष्टाद्बृहती छन्दांसि।।) ❁ ब्रह्मगवी

卐 अतिमात्र. मवर्धन्त- नो.दिव दिव. मस्पृशन्न्। भृगुं हिंसित्वा सृञ्जया^- वैतहव्याः परा॒ऽभवन्न्।। 1।।

卐 ये बृहत्सामान. माङ्गिरस- मा॒ऽर्पय. न्ब्राह्मण.ञ्जनाः। पेत्व. स्तेषा. मुभयाद्- मविस्तोका न्या॒ऽवयत्।। 2।।

卐 ये ब्राह्मणं प्रत्यष्ठीवन्- ये वा॒ऽस्मि. न्छुल्क मीषिरे। अस्नस्ते मध्ये कुल्यायाः- केशा.न्खादन्त^ आसते।। 3।।

卐 ब्रह्मगवी पच्यमाना- याव.त्सा॒ऽभि विजङ्गहे। तेजो राष्ट्रस्य निर्हन्ति- न वीरो जायते वृषा।। 4।।

卐 क्रूर.मस्या^ आशसन- न्तृष्टं पिशित. मस्यते। क्षीरँ यदस्याः पीयते- तद्वै पितृषु किल्बिषम्।। 5।।

卐 उग्रो राजा मन्यमानो- ब्राह्मणँ यो जिघत्सति। परा तत्सिच्यते राष्ट्रं- ब्राह्मणो यत्र जीयते।। 6।।

卐 अष्टापदी चतुरक्षी- चतुश्श्रोत्रा चतुर्हनुः। द्व्यास्या द्विजिह्वा भूत्वा - सा राष्ट्र मव धूनुते ब्रह्मज्यस्य।। 7।।

卐 तद्वै राष्ट्र.मा स्रवति- नावं भिन्ना. मिवोदकम्। ब्रह्माणँ यत्र हिंसन्ति- तद्राष्ट्रं हन्ति दुच्छुना।। 8।।

卐 तँ वृक्षा^ अप सेधन्ति- छाया.न्नो मोपगा इति। यो ब्राह्मणस्य सद्धन- मभि नारद मन्यते।। 9।।

卐 विष. मेत. द्देवकृतं- राजा वरुणोऽब्रवीत्। न ब्राह्मणस्य गा.ञ्जग्ध्वा- राष्ट्रे जागार कश्चन।। 10।।

卐 नवैव ता नवतयो- या भूमि. व्यधूनुत। प्रजां हिंसित्वा ब्राह्मणी- मसम्भव्यं पराऽभवन्न्।।11।।

卐 यां मृतायाऽनुबध्नन्ति- कूद्यं पदयोपनीम्। तद्वै ब्रह्मज्य ते देवा^- उपस्तरण. मब्रुवन्न्।। 12।।

卐 अश्रूणि कृपमाणस्य- यानि जीतस्य वावृतुः। तँ वै ब्रह्मज्य ते देवा^- अपां भाग. मधारयन्न्।। 13।।

卐 येन मृतं स्नपयन्ति- श्मश्रूणि येनोन्दते। तँ वै ब्रह्मज्य ते देवा^- अपां भाग. मधारयन्न्।। 14।।

卐 न वर्षं मैत्रावरुणं- ब्रह्मज्य. मभिवर्षति। नाऽस्मै समितिꣳ कल्पते- न मित्र. न्नयते वशम्।। 15।।-

05-04-05 (1-12 द्वादशर्चस्य सूक्तस्य ब्रह्मा ऋषिः। वानस्पत्यदुन्दुभिर्देवता। 1 प्रथमर्चो जगती 2-12 द्वितीयाद्येकादशानाञ्च त्रिष्टुप् छन्दांसी।।) ❁ शत्रुसेनात्रासनम्

卐 उच्चैर्घोषो दुन्दुभि. स्सत्वनाय-न्वानस्पत्य. स्सम्भृत^ उस्रियाभिः। वाच. ङ्क्षुणुवानो दमय. न्त्सपत्ना- न्त्सिंह^इव जेष्य. न्नभि तंस्तनीहि।। 1।।

卐 सिंह^ इवाऽस्तानी. द्द्रुवयो विबद्धो-ऽभिक्रन्द. न्नृषभो वासितामिव। वृषा त्वँ वध्रयस्ते सपत्ना^- ऐन्द्र.स्ते शुष्मो अभिमातिषाहः।। 2।।

卐 वृषेव यूथे सहसा विदानो- गव्य. न्नभि रुव सन्धनाजित्। शुचा विध्य हृदयं परेषां- हित्वा ग्रामा. न्प्रच्युता यन्तु शत्रवः।। 3।।

卐 सञ्जय. न्पृतना^ ऊर्ध्व. मायु- र्गृह्या^ गृह्णानो बहुधा वि चक्ष्व। दैवीँ वाच. न्दुन्दुभ आ गुरस्व- वेधा. श्शत्रूणा. मुप भरस्व वेदः।। 4।।

卐 दुन्दुभे. र्वाचं प्रयताँ वदन्ती- माश्रृण्वती नाथिता घोषबुद्धा। नारी पुत्र. न्धावतु हस्तगृह्या-ऽमित्री भीता समरे वधानाम्।। 5।।

卐 पूर्वो दुन्दुभे प्र वदासि वाचं- भूम्याꣳ पृष्ठे वद रोचमानः। अमित्रसेना मभिजञ्जभानो- द्युम. द्वद दुन्दुभे सूनृतावत्।। 6।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 अन्तरेमे~ नभसी~ घोषो अस्तु- पृथक्ते ध्वनयो यन्तु शीभम्। अभि क्रन्द स्तनयोत्पिपान- श्लोककृ. न्मित्रतूर्याय स्वर्धी।। 7।।

卐 धीभि꞉ कृत꞉ प्र वदाति वाच- मुद्धर्षय सत्वना. मायुधानि। इन्द्रमेदी सत्वनो नि ह्वयस्व- मित्रै. रमित्रा꞉ अव जङ्घनीहि।। 8।।

卐 सङ्क्रन्दन꞉ प्रवदो धृष्णुषेण꞉- प्रवेदकृ. द्बहुधा ग्रामघोषी। श्रेयो वन्वानो वयुनानि विद्वा- न्कीर्तिं बहुभ्यो वि हर.द्विराजे।। 9।।

卐 श्रेय꞉केतो~ वसुजि. त्सहीया- न्त्सङ्ग्रामजि.त्संशितो ब्रह्मणाऽसि। अंशू.निव ग्रावाऽधिषवणे अद्रि- र्गव्य.न्दुन्दुभेऽधि नृत्य वेदः।। 10।।

卐 शत्रूषा.ण्नीषा.ऽभिमातिषाहो- गवेषण. स्सहमान^ उद्भित्। वाग्वीव मन्त्रं प्र भरस्व वाचं- साङ्ग्रामजित्यायेष. मुद्वदेह।। 11।।

卐 अच्युतच्यु. त्समदो गमिष्ठो- मृधो जेता पुरएताऽयोध्यः। इन्द्रेण गुप्तो विदथा निचिक्य-द्धृद्योतनो द्विषतां याहि शीभम्।। 12।।-

05-04-06 (1-12 द्वादशर्चस्य सूक्तस्य ब्रह्मा ऋषिः। 1-9 प्रथमादिनवर्चा वानस्पत्यदुन्दुभिः 10-12 दशम्यादितृचस्य चादित्यादयो देवताः। 1, 4-5 प्रतमाचतुर्थोपञ्चमीनां पथ्यापङ्क्ति 2-3, 7-10 द्वितीयातृतीययोः सप्तमायदिचतसृणाञ्चानुष्टुप् 6 षष्ठ्या जगती 11 एकादश्या बृहतीगर्भा त्रिष्टुप् 12 द्वादश्याश्च त्रिपदा यवमध्या गायत्री छन्दांसि।।) ❈ शत्रुसेनात्रासनम्

卐 विहृदयँ वैमनस्यँ- वदाऽमित्रेषु दुन्दुभे। विद्वेष.ङ्कश्मशं भय- ममित्रेषु निदध्म- स्यवैना. न्दुन्दुभे जहि।। 1।।

卐 उद्वेपमाना मनसा- चक्षुषा हृदयेन च। धावन्तु बिभ्यतोऽमित्राः- प्रत्रासेनाऽऽज्ये हुते।। 2।।

卐 वानस्पत्य. स्सम्भृत- उस्त्रियाभि. र्विश्वगोत्र्यः। प्रत्रास. ममित्रेभ्यो वदा-ऽऽज्येनाऽभिघारितः।। 3।।

卐 यथा मृगा. स्सँविजन्त -आरण्याः पुरुषा.दधि। एवा त्व.न्दुन्दुभेऽमित्रा- नभिक्रन्द प्र त्रासया-ऽथो~ चित्तानि मोहय।। 4।।

卐 यथा वृका. दजावयो- धावन्ति बहु बिभ्यतीः। एवा त्व.न्दुन्दुभेऽमित्रा- नभिक्रन्द प्र त्रासया-ऽथो~ चित्तानि मोहय।। 5।।

卐 यथा श्येना.त्पतत्रिण- स्सँविजन्ते अहर्दिवि- सिंहस्य स्तनथो. र्यथा। एवा त्व.न्दुन्दुभेऽमित्रा- नभिक्रन्द प्रत्रासया-ऽथोव चित्तानि मोहय।। 6।।

卐 परा॒ऽमित्रा॑.न्दुन्दु॒भिना॑- हरि॒णस्या॒ऽजिने॑न च। सर्वे॑ दे॒वा॑ अ॑तित्रस॒न्॒- ये

स॑ङ्ग्रा॒म.स्येश॑ते।। 7।।

卐 यै.रिन्द्र॑ः प्र॒क्रीड॑ते- पद्घो॒षै. श्छा॒यया॑ स॒ह। तै॒रमित्रा॑.स्त्रसन्तु नो॒-ऽमी~

ये यन्त्य॑नीक॒शः।। 8।।

卐 ज्या॒घो॒षा॑ दु॑न्दु॒भयो॒-ऽभि क्रो॑शन्तु॒ या॑ दिश॑ः। सेना॒ः परा॑जिता॑ य॒ती.-

र॒मित्रा॑णा. मनीक॒शः।। 9।।

卐 आदि॑त्य॒ चक्षु॒. राद॑त्स्व॒- मरी॑च॒योऽनु॑ धावत। प॒त्स॒ङ्गिनी॒. रास॑जन्तु॒-

वि॑गते बाहुवी॒र्ये॑।। 10।।

卐 यू॒य. मु॒ग्रा॑ म॑रुत॑ः पृश्निमात॒र॑- इन्द्रे॑ण यु॒जा प्र मृ॑णीत॒ शत्रू॑न्। सोमो॒

राजा॒ व॑रुणो॒ राजा॑- महादे॒व॑ उ॒त मृ॒त्यु. रिन्द्र॑ः।। 11।।

卐 ए॒ता॑ दे॑वसे॒ना- स्सूर्य॑केत॒व. स्सचे॑तसः। अ॒मित्रा॑.न्नो जयन्तु॒ स्वाहा॑।।

12।।

## ऽ॑ऽ पञ्चम काण्डे पञ्चमोऽनुवाकः

05-05-01 (1-14 चतुर्दशर्चस्या सूक्तस्य भृग्वङ्गिरा ऋषिः। तक्मनाशनो देवता। 1 प्रथमर्चो भुरिक्त्रिष्टुप् 2 द्वितीयायास्त्रिष्टुप् 3-4, 6-14 तृतीयाचतुर्थ्योः षष्ठश्चादिनवानाञ्चानुष्टुप् 5 पञ्चम्याश्च विराट् पथ्याबृहती छन्दांसि।।) ❃ तक्मनाशनम्

卐 अग्नि. स्तक्मान. मप बाधता. मित- स्सोमो ग्रावा वरुणः पूतदक्षाः। वेदि. र्बर्हि. स्समिध. श्शोशुचाना^- अप द्वेषांस्यमुया^ भवन्तु।। 1।।

卐 अयँ यो विश्वान् हरिता. न्कृणो-ष्युच्छोचय. न्नग्नि.रिवाऽभिदुन्वन्न्। अधा हि तक्म. न्नरसो हि भूया^- अधा न्यङ्ङधरान् वा परेहि।। 2।।

卐 यः परुषः पारुषेयो-ऽवध्वंस^ इवाऽरुणः। तक्मानँ विश्वधावी-र्याऽधराञ्चं परा सुव।। 3।।

卐 अधराञ्चं प्र हिणोमि- नमः कृत्वा तक्मने। शकम्भरस्य मुष्टिहा- पुन.रेतु महावृषान्।। 4।।

卐 ओको अस्य मूजवन्त^- ओको अस्य महावृषाः। यावज्जात. स्तक्मं-स्तावा.नसि बल्हिकेषु न्योचरः।। 5।।

卐 तक्म.न्व्याल वि गद - व्यङ्ग भूरि यावय। दासी. न्निष्टक्वरी. मिच्छ- ताँ वज्रेण समर्पय।। 6।।

卐 तक्म. न्मूजवतो गच्छ- बल्हिका.न्वा परस्तराम्। शूद्रा.मिच्छ प्रफर्व्य1(अ)- न्ता.न्तक्म. न्वीव धूनुहि।। 7।।

卐 महावृषा. न्मूजवतो- बन्ध्वद्धि परेत्य। प्रैतानि तक्मने ब्रूमो- अन्यक्षेत्राणि वा इमा।। 8।।

卐 अन्यक्षेत्रे न रमसे- वशी स.न्मृडयासि नः। अभूदु प्रार्थ. स्तक्मा- स गमिष्यति बल्हिकान्।। 9।।

卐 यत्त्वं शीतोऽथो रूर- स्सह कासावेपयः। भीमा.स्ते तक्म. न्हेतय- स्ताभि.स्स्म परि वृङ्ग्धि नः।। 10।।

卐 मा स्मैता. न्त्सखी न्कुरुथा- बलास. ङ्कास. मुद्युगम्। मा स्मातोऽर्वाङैः- पुन. स्तत्त्वा तक्म. न्नुप ब्रुवे।। 11।। (आ, ऐः)

卐 तक्म. न्भ्रात्रा बलासेन- स्वस्रा कासिकया सह। पाप्मा भ्रातृव्येण सह- गच्छा.मु मरण. ञ्जनम्।। 12।।

卐 तृतीयकँ वितृतीयं- सदन्दि. मुत शारदम्। तक्मानं शीतं रूर- ङ्ग्रैष्म. न्नाशय वार्षिकम्।। 13।।

卐 गन्धारिभ्यो मूजवद्भ्यो-ऽङ्गेभ्यो मगधेभ्यः। प्रैष्य. न्जन.मिव शेवधि- न्तक्मानं परि दद्मसि।। 14।।-

05-05-02 (1-13 त्रयोदशर्चस्य सूक्तस्य काण्व ऋषिः। इन्द्रादयो देवा देवताः। 1-12 प्रथमादिद्वादशर्चामनुष्टुप् 13 त्रयोदश्याश्च विरादनुष्टुप् छन्दांसी।।) ❀ क्रिमिघ्नम्

卐 ओते~ मे द्यावापृथिवी~- ओता देवी सरस्वती। ओतौ म इन्द्रश्चाऽग्निश्च- क्रिमिं.ञ्जम्भयता. मिति।। 1।।

卐 अस्येन्द्र कुमारस्य- क्रिमी. न्धनपते जहि। हता विश्वा^ अरातय^- उग्रेण वचसा मम।। 2।।

卐 यो अक्ष्यौ परिसर्पति- यो नासे परिसर्पति। दताँ यो मध्य. ङ्गच्छति- त.ङ्क्रिमिं.ञ्जम्भयामसि।। 3।।

卐 सरूपौ द्वौ विरूपौ द्वौ- कृष्णौ द्वौ रोहितौ द्वौ। बभ्रुश्च बभ्रुकर्णश्च- गृध्रꣳ कोकश्च ते हताः।। 4।।

卐 ये क्रिमय. श्शितिकक्षा- ये कृष्णा. श्शितिबाहवः। ये के च विश्वरूपा- स्ता.न्क्रिमी. न्जम्भयामसि।। 5।।

卐 उत्पुरस्ता. त्सूर्य^ एति- विश्वदृष्टो अदृष्टहा। दृष्टांश्च घ्न.न्नदृष्टांश्च- सर्वांश्च प्रमृण. न्क्रिमीन्।। 6।।

卐 येवाषासꣳ कष्कषास^- एजत्का. श्शिपवित्नुकाः। दृष्टश्च हन्यता. ङ्क्रिमि- रुतादृष्टश्च हन्यताम्।। 7।।

卐 हतो येवाषः क्रिमीणां- हतो नदनिमोत। सर्वा.न्नि मष्मषाऽकर- न्दृषदा खल्वाँ इव।। 8।।

卐 त्रिशीर्षाण. न्त्रिककुद- ङ्क्रिमिं सारङ्ग. मर्जुनम्। श्रृणाम्यस्य पृष्टी-रपि वृश्चामि यच्छिरः।। 9।।

卐 अत्रिव.द्वः क्रिमयो हन्मि- कण्वव. ज्जमदग्निवत्। अगस्त्यस्य ब्रह्मणा- सं पिन.ष्म्यह. ङ्क्रिमीन्।।10।।

卐 हतो राजा क्रिमीणा- मुतैषां स्थपतिर्.हतः। हतो हतमाता क्रिमिर्- हतभ्राता हतस्वसा।। 11।

卐 हतासो अस्य वेशसो- हतासः परिवेशसः। अथो~ ये क्षुल्लका^ इव- सर्वे ते क्रिमयो हताः।। 12।।

卐 सर्वेषाञ्च क्रिमीणां- सर्वासाञ्च क्रिमीणाम्। भिन.द्म्यश्मना शिरो- दहा.म्यग्निना मुखम्।। 13।।-

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

05-05-03 (1-17 सप्तदशर्चस्य सूक्तस्याथर्वा ऋषिः। प्रथमर्चः सविता 2 द्वितीयाया अग्निः 3 तृतीयाया द्यावापृथिव्यौ 4 चतुर्थ्या वरुणाः 5 पञ्चम्या मित्रावरुणौ 6 षष्ठ्या मरुतः 7 सप्तम्याः सोमः 8 अष्टम्या वायुः 9 नवम्या सूर्यः 10 दशम्याश्चन्द्रमाः 11 एकादश्या इन्द्रः 12 द्वादश्या मरुतां पिता 13 त्रयोदश्या मृत्युः 14 चतुर्दश्या यमः 15 पञ्चदश्याः पितरः 16 षोडश्या अपरे तताः 17 सप्तदश्याश्च तनस्ततामहा देवताः। 1-10, 12-14 प्रथमादिदशानां द्वादश्यादितृचस्य चातिशक्करी 11 एकादश्याः शक्करी 15-16 पञ्चदशीषोडश्योस्त्रिपदा भुरिगतिजगती सप्तदश्याश्च त्रिपदा विराट् शक्करी छन्दांसि।।) ❀ ब्रह्मकर्म

卐 सविता प्रसवाना- मधिपति. स्स^ माऽवतु। अस्मि. न्ब्रह्म-ण्यस्मि.न्कर्म-ण्यस्यां पुरोधाया- मस्यां प्रतिष्ठाया- मस्या. ञ्चित्त्या- मस्या. माकूत्या- मस्या. माशि-ष्यस्या. न्देवहूत्यां स्वाहा।। 1।।

卐 अग्नि. र्वनस्पतीना- मधिपति. स्स^ माऽवतु। अस्मि. न्ब्रह्म-ण्यस्मि.न्कर्म-ण्यस्यां पुरोधाया- मस्यां प्रतिष्ठाया- मस्या. ञ्चित्त्या- मस्या. माकूत्या- मस्या. माशि-ष्यस्या. न्देवहूत्यां स्वाहा।। 2।।

卐 द्यावापृथिवी~ दातृणा- मधिपत्नी~ ते~ माऽवताम्। अस्मि. न्ब्रह्म-ण्यस्मि.न्कर्म-ण्यस्यां पुरोधाया- मस्यां प्रतिष्ठाया- मस्या. ञ्चित्त्या- मस्या. माकूत्या- मस्या. माशि-ष्यस्या. न्देवहूत्यां स्वाहा।। 3।।

Sri Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 वरुणोऽपा- मधिपति. स्स^ माऽवतु। अस्मि. न्ब्रह्म-ण्यस्मि.न्कर्म-ण्यस्यां पुरोधाया- मस्यां प्रतिष्ठाया- मस्या. श्चित्त्या- मस्या. माकूत्या- मस्या. माशि-ष्यस्या. न्देवहूत्यां स्वाहा।। 4।।

卐 मित्रावरुणौ वृष्ट्याधिपती~- तौ माऽवताम्। अस्मि. न्ब्रह्म-ण्यस्मि.न्कर्म-ण्यस्यां पुरोधाया- मस्यां प्रतिष्ठाया- मस्या. श्चित्त्या- मस्या. माकूत्या- मस्या. माशि-ष्यस्या. न्देवहूत्यां स्वाहा।। 5।।

卐 मरुतः पर्वताना- मधिपतय.स्ते माऽवन्तु। अस्मि. न्ब्रह्म-ण्यस्मि.न्कर्म-ण्यस्यां पुरोधाया- मस्यां प्रतिष्ठाया- मस्या. श्चित्त्या- मस्या. माकूत्या- मस्या. माशि-ष्यस्या. न्देवहूत्यां स्वाहा।। 6।।

卐 सोमो वीरुधा. मधिपति- स्स^ माऽवतु। अस्मि. न्ब्रह्म-ण्यस्मि.न्कर्म-ण्यस्यां पुरोधाया- मस्यां प्रतिष्ठाया- मस्या. श्चित्त्या- मस्या. माकूत्या- मस्या. माशि-ष्यस्या. न्देवहूत्यां स्वाहा।। 7।।

卐 वायु. रन्तरिक्षस्या-ऽधिपति.स्स^ माऽवतु। अस्मि. न्ब्रह्म-ण्यस्मि.न्कर्म-ण्यस्यां पुरोधाया- मस्यां प्रतिष्ठाया- मस्या. श्चित्त्या- मस्या. माकूत्या- मस्या. माशि-ष्यस्या. न्देवहूत्यां स्वाहा।। 8।।

卐 सूर्य. श्चक्षुषा- मधिपति. स्स^ माऽवतु। अस्मि. न्ब्रह्म-ण्यस्मि.न्कर्म-ण्यस्यां पुरोधाया- मस्यां प्रतिष्ठाया- मस्या. श्चित्त्या- मस्या. माकूत्या- मस्या. माशि-ष्यस्या. न्देवहूत्यां स्वाहा।। 9।।

卐 चन्द्रमा^ नक्षत्राणा- मधिपति. स्स^ माऽवतु। अस्मि. न्ब्रह्म-ण्यस्मि.न्कर्म-ण्यस्यां पुरोधाया- मस्यां प्रतिष्ठाया- मस्या. श्चित्त्या- मस्या. माकूत्या- मस्या. माशि-ष्यस्या. न्देवहूत्यां स्वाहा।। 10।।

卐 इन्द्रो दिवो-ऽधिपति. स्स^ माऽवतु। अस्मि. न्ब्रह्म-ण्यस्मि.न्कर्म-ण्यस्यां पुरोधाया- मस्यां प्रतिष्ठाया- मस्या. श्चित्त्या- मस्या. माकूत्या- मस्या. माशि-ष्यस्या. न्देवहूत्यां स्वाहा।। 11।।

卐 मरुतां पिता पशूना- मधिपति. स्स^ माऽवतु। अस्मि. न्ब्रह्म-ण्यस्मि.न्कर्म-ण्यस्यां पुरोधाया- मस्यां प्रतिष्ठाया- मस्या. श्चित्त्या- मस्या. माकूत्या- मस्या. माशि-ष्यस्या. न्देवहूत्यां स्वाहा।। 12।।

卐 मृत्युः प्रजाना- मधिपति. स्स^ माऽवतु। अस्मि. न्ब्रह्म-ण्यस्मि.न्कर्म-ण्यस्यां पुरोधाया- मस्यां प्रतिष्ठाया- मस्या. श्चित्त्या- मस्या. माकूत्या- मस्या. माशि-ष्यस्या. न्देवहूत्यां स्वाहा।। 13।।

卐 यमः पितृणा- मधिपति. स्स^ माऽवतु। अस्मि. न्ब्रह्म-ण्यस्मि.न्कर्म-ण्यस्यां पुरोधाया- मस्यां प्रतिष्ठाया- मस्या. श्चित्त्या- मस्या. माकूत्या- मस्या. माशि-ष्यस्या. न्देवहूत्यां स्वाहा।। 14।।

卐 पितरः परे ते माऽवन्तु। अस्मि. न्ब्रह्म-ण्यस्मि.न्कर्म-ण्यस्यां पुरोधाया- मस्यां प्रतिष्ठाया- मस्या. श्चित्त्या- मस्या. माकूत्या- मस्या. माशि-ष्यस्या. न्देवहूत्यां स्वाहा।। 15।।

卐 तता^ अवरे ते माऽवन्तु। अस्मि. न्ब्रह्म-ण्यस्मि.न्कर्म-ण्यस्यां पुरोधाया- मस्यां प्रतिष्ठाया- मस्या. श्चित्त्या- मस्या. माकूत्या- मस्या. माशि-ष्यस्या. न्देवहूत्यां स्वाहा।। 16।।

卐 तत. स्ततामहा- स्ते माऽवन्तु। अस्मि. न्ब्रह्म-ण्यस्मि.न्कर्म-ण्यस्यां पुरोधाया- मस्यां प्रतिष्ठाया- मस्या. श्चित्त्या- मस्या. माकूत्या- मस्या. माशि-ष्यस्या. न्देवहूत्यां स्वाहा।। 17।।-

05-05-04 (1-13 त्रयोदशर्चस्य सूक्तस्य ब्रह्मा ऋषिः। योनिगर्भो मन्त्रोक्ता देवाश्च देवताः। 1-12 प्रथमादिद्वादशर्चानुष्टुप् 13 त्रयोदश्याश्च विराट् पुरस्ताद्बृहती छन्दसी।।) ❀ गर्भाधानम्

卐 पर्वता. द्दिवो योने- रङ्गादङ्गा. त्समाभृतम्। शेपो गर्भस्य रेतोधा- स्सरौ पर्ण.मिवाऽऽदधत्।।1।।

卐 यथेयं पृथिवी मही- भूताना. ङ्गर्भ. मादधे। एवा ऽऽदधामि ते गर्भ- न्तस्मै त्वामवसे हुवे।। 2।।

卐 गर्भ. न्धेहि सिनीवालि- गर्भ. न्धेहि सरस्वति। गर्भ.न्ते अश्वि-नोभा धत्तां पुष्करस्त्रजा।। 3।।

卐 गर्भ.न्ते मित्रावरुणौ- गर्भ. न्देवो बृहस्पतिः। गर्भ.न्त इन्द्रश्चाऽग्निश्च- गर्भ. न्धाता दधातु ते।। 4।।

卐 विष्णु. र्योनिं. ङ्कल्पयतु- त्वष्टा रूपाणि पिंशतु। आ सिञ्चतु प्रजापति- र्धाता गर्भ. न्दधातु ते।। 5।।

卐 यद्वेद राजा वरुणो- यद्वा देवी सरस्वती। यदिन्द्रो वृत्रहा वेद- तद्गर्भकरणं पिब।। 6।।

卐 गर्भो अस्योषधीना-ङ्गर्भो वनस्पतीनाम्। गर्भो विश्वस्य भूतस्य- सो अग्ने गर्भमेह धाः।। 7।।

卐 अधि स्कन्द वीरयस्व- गर्भ. माधेहि योन्याम्। वृषाऽसि वृष्ण्याव- न्प्रजायै त्वा ऽऽनयामसि।। 8।।

卐 वि जिहीष्व बार्हत्सामे- गर्भ.स्ते योनि.मा शयाम्। अदुष्टे देवाः पुत्रं- सोमपा॰ उभयाविनम्।। 9।।

卐 धात. श्श्रेष्ठेन रूपेणा-ऽस्या^ नार्या^ गवीन्योः। पुमांसं पुत्र.मा धेहि-दशमे मासि सूतवे।। 10।।

卐 त्वष्ट. श्श्रेष्ठेन रूपेणा-ऽस्या^ नार्या^ गवीन्योः। पुमांसं पुत्र.मा धेहि-दशमे मासि सूतवे।। 11।।

卐 सवित. श्श्रेष्ठेन रूपेणा-ऽस्या^ नार्या^ गवीन्योः। पुमांसं पुत्र.मा धेहि-दशमे मासि सूतवे।। 12।।

卐 प्रजापते श्रेष्ठेन रूपेणा-ऽस्या^ नार्या^ गवीन्योः। पुमांसं पुत्र.मा धेहि-दशमे मासि सूतवे।। 13।।-

05-05-05 (1-12 द्वादशर्चस्य सूक्तस्य ब्रह्मा ऋषिः। वास्तोष्पतिर्बह्वयो मन्तोक्ता वा देवताः। 1,5 प्रथमापञ्चम्योर्ऋचोर्द्विर्च्युष्णिक् 2,4, 6-8,10-11 द्वितीयाचतुर्थ्योः षष्ठ्यादितृचस्य दशम्येकादश्योश्च द्विपदा प्राजापत्या बृहती 3 तृतीयायास्त्रिपदा विराड्गायत्री 9 नवम्यास्त्रिपदा पिपीलिकमध्या पुरउष्णिक् एता एकावसानाः 12 द्वादश्याश्च परातिशक्वरी चतुष्पदा जगती छन्दांसि।।) ❀ नवशालायां वृत?होमः

卐 यजूंषि यज्ञे समिध. स्स्वाहा-ऽग्निः प्रविद्वा. निह वो युनक्तु।। 1।।

卐 युनक्तु देव. स्सविता प्रजान- न्नस्मिन् यज्ञे महिष. स्स्वाहा।। 2।।

卐 इन्द्र^ उक्थामदा-न्यस्मिन् यज्ञे प्रविद्वान् युनक्तु सुयुज स्स्वाहा।। 3।।

卐 प्रैषा^ यज्ञे निविद. स्स्वाहा- शिष्टाः पत्नीभि. र्वहतेह युक्ताः।। 4।।

卐 छन्दांसि यज्ञे मरुत. स्स्वाहा- मातेव पुत्रं पिपृतेह युक्ताः।। 5।।

卐 एय. मग. न्बर्हिषा प्रोक्षणीभि- र्यज्ञ. न्तन्वानाऽदिति. स्स्वाहा।। 6।।

卐 विष्णु. र्युनक्तु बहुधा तपां-स्यस्मिन् यज्ञे सुयुज. स्स्वाहा।। 7।।

卐 त्वष्टा युनक्तु बहुधा नु रूपा^- अस्मिन् यज्ञे सुयुज. स्स्वाहा।। 8।।

卐 भगो युनक्त्वाशिषो न्व1(अ)स्मा- अस्मिन् यज्ञे प्रविद्वान् युनक्तु सुयुज. स्स्वाहा।। 9।।

卐 सोमो युनक्तु बहुधा पयां-स्यस्मिन् यज्ञे सुयुज. स्स्वाहा।। 10।।

卐 इन्द्रो युनक्तु बहुधा वीर्या-ण्यस्मिन् यज्ञे सुयुज. स्स्वाहा।। 11।।

卐 अश्विना ब्रह्मणाऽ यात- मर्वाञ्चौ वषट्कारेण यज्ञं वर्धयन्तौ। बृहस्पते ब्रह्मणाऽ या.ह्यर्वाङ्- यज्ञो अयं स्व.रिदं यजमानाय स्वाहा।। 12।।

## ॐ पञ्चम काण्डे षष्ठोऽनुवाकः

05-06-01 (1-12 द्वादशर्चस्य सूक्तस्य ब्रह्मा ऋषिः। अग्निर्देवता । 1 प्रथमर्चो बृहतीगर्भा त्रिष्टुप् 2 द्वितीयाया द्विपदा साम्नी भुरिगनुष्टुप् 3 तृतीयाया द्विपदार्चो बृहती 4 चतुर्थ्यो द्विपदा साम्नी भुरिग्बृहती 5 पञ्चम्या द्विपदा साम्नी त्रिष्टुप् 6 षष्ठ्या द्विपदा विराड्गायत्री 7 सप्तम्या द्विपदा साम्नी बृहती द्वितीयादिषडेकावसानाः 8 अष्टम्याः संस्तारपङ्क्तिः 9 नवम्याः षड्पदानुष्टुब्गार्भा परातिजगती 10-12 दशम्यादितृचस्य च पुर उष्णिक् छन्दांसि।।) अग्निः

卐 ऊर्ध्वा अस्य समिधो भव-न्त्यूर्ध्वा शुक्रा शोचींष्यग्नेः। द्युमत्तमा सुप्रतीक. स्ससूनु- स्तनूनपा. दसुरो भूरिपाणिः।। 1।।

卐 देवो देवेषु देवः- पथो अनक्ति मध्वा घृतेन।। 2।।

卐 मध्वा यज्ञ. न्नक्षति प्रैणानो- नराशंसो अग्नि- स्सुकृ. द्देव स्सविता विश्ववारः।। 3।।

卐 अच्छाऽय मेति शवसा घृताचि- दीडानो वह्नि. र्नमसा।। 4।।

卐 अग्नि. स्स्रुचो अध्वरेषु प्रयक्षु- स यक्ष दस्य महिमान. मग्नेः।। 5।।

卐 तरी मन्द्रासु प्रयक्षु- वसव. श्चाऽतिष्ठ. न्वसुधातर.श्च।। 6।।

卐 द्वारो देवी. रन्वस्य विश्वे- व्रतं रक्षन्ति विश्वहा।। 7।।

卐 उरुव्यचसाऽग्ने. र्धाम्ना पत्यमाने। आ सुष्वयन्ती यजते उपाके- उषासानक्तेमँ यज्ञ. मवता. मध्वर.न्नः।। 8।।

卐 दैवा^ होतार^ ऊर्ध्व. मध्वर.न्नो-ऽग्ने जिह्वयाऽभिगृणत गृणता न. स्विष्टये।

卐 तिस्रो देवी. र्बर्हि. रेदं सदन्ता- मिडा सरस्वती मही भारती गृणाना।।
9।।

卐 तन्न. स्तुरीप- मद्भुतं पुरुक्षु। देव त्वष्टा राय.स्पोषँ- वि ष्य नाभि.मस्य।।
10।।

卐 वनस्पतेऽव सृजा रराणः। त्मना देवेभ्यो अग्निर्- हव्यं शमिता स्वदयतु।। 11।।

卐 अग्ने स्वाहा कृणुहि जातवेदः। इन्द्राय यज्ञँ विश्वे देवा^- हवि रिद.ञ्जुषन्ताम्।। 12।।-

☬ 05-06-02 (1-14 चतुर्दशर्चस्य सूक्तस्याथर्वा ऋषिः। अग्न्यादयो मन्त्रोक्तास्त्रिवृच्च देवताः। 1-5, 8, 11,14 प्रथमादिपञ्चर्चामष्टम्येकादशी चतुर्दशीनाञ्च त्रिष्टुप् 6 षष्ठ्याः पञ्चपदातिशक्करी 7, 9-10,12 सप्तमीनवमीदशमीद्वादशीनां ककुम्मत्यनुष्टुप् 13 त्रयोदश्याश्च पुर उष्णिक् छन्दांसि।।) ❃ दीर्घायुः

卐 नव प्राणा. न्नवभि. स्सं मिमीते- दीर्घायुत्वाय शतशारदाय। हरिते त्रीणि रजते त्री-ण्ययसि त्रीणि तपसाऽऽविष्ठितानि।। 1।।

卐 अग्नि. स्सूर्य. श्चन्द्रमा^ भूमि. रापो- द्यौरन्तरिक्षं प्रदिशो दिशश्च। आर्तवा^ ऋतुभि. स्सँविदाना^- अनेन मा त्रिवृता पारयन्तु।। 2।।

卐 त्रयः पोषा. स्त्रिवृति श्रयन्ता- मनक्तु पूषा पयसा घृतेन। अन्नस्य भूमा पुरुषस्य भूमा- भूमा पशूना.न्त इह श्रयन्ताम्।। 3।।

卐 इम. मादित्या वसुना समुक्ष-तेम. मग्ने वर्धय वावृधानः। इम.मिन्द्र सं सृज वीर्येणा-ऽस्मि न्त्रिवृ.च्छ्रयतां पोषयिष्णु।। 4।।

卐 भूमि.ष्ट्वा पातु हरितेन विश्वभृ- दग्निः पिप.र्त्वयसा सजोषाः। वीरुद्भि.ष्टे अर्जुनं सँविदान- न्दक्ष. न्दधातु सुमनस्यमानम्।। 5।।

卐 त्रेधा जात. ञ्जन्मनेदं हिरण्य- मग्ने रेकं प्रियतमं बभूव- सोमस्यैकं हिंसितस्य परा-ऽपतत्। अपा. मेकँ वेधसां रेत^ आहु- स्तत्ते हिरण्य. न्त्रिवृ. दस्त्वायुषे।। 6।।

卐 त्र्यायुष. ञ्जमदग्नेः- कश्यपस्य त्र्यायुषम्। त्रेधाऽमृतस्य चक्षण- न्त्रीण्यायूंषि तेऽकरम्।। 7।।

卐 त्रय. स्सुपर्णा. स्त्रिवृता यदाय- न्नेकाक्षर. मभिसम्भूय शक्राः। प्रत्यौह. न्मृत्यु. ममृतेन साक- मन्तर्दधाना^ दुरितानि विश्वा।। 8।।

卐 दिव.स्त्वा पातु हरितं- मध्यात्त्वा पात्वर्जुनम्। भूम्या^ अयस्मयं पातु-
प्राऽगा. द्देवपुरा^ अयम्।। 9।।

卐 इमा. स्तिस्रो देवपुरा- स्तास्त्वा रक्षन्तु सर्वतः। तास्त्वं बिभ्र.द्वर्च-
स्व्युत्तरो द्विषतां भव।। 10।।

卐 पुर. न्देवाना. ममृतं हिरण्यँ- य^ आबेधे प्रथमो देवो अग्रे। तस्मै नमो
दश प्राचीः कृणो-म्यनु मन्यता. न्त्रिवृ.दाबधे मे।। 11।।

卐 आ त्वा चृत.त्वर्यमा- पूषा बृहस्पतिः। अहर्जातस्य यन्नाम- तेन त्वाऽति
चृतामसि।। 12।।

卐 ऋतुभिष्ट्वाऽऽर्तवै- रायुषे वर्चसे त्वा। सँवत्सरस्य तेजसा- तेन संहनु
कृण्मसि।। 13।।

卐 घृता. दुल्लुप्तं मधुना समक्तं- भूमिदृंह. मच्युतं पारयिष्णु। भिन्द. त्सपत्ना.
नधरांश्च कृण्व- दा मा रोह महते सौभगाय।। 14।।-

05-06-03 (1-15 पञ्चदशर्चस्य सूक्तस्य चातन ऋषिः। जातवेदा मन्त्रोक्ता वा देवताः। 1-2, 4, 6-11 प्रथमाद्वितीयाचतुर्थोनामृचां षष्ठ्यादिषणणाञ्च त्रिष्टुप् 3 तृतीयायास्त्रिपदा विराड्गायत्री 5 पञ्चम्याः पुरोऽतिजगती विराड्गगती 12 द्वादश्या भुरिगनुष्टुप् । 13,15 त्रयोदशीपञ्चदश्योरनुष्टुप् 14 चतुर्दश्याशअच चतुष्पदा पराबृहती ककुम्मत्यनुष्टुप् छन्दांसि।।) रक्षोघ्नम्

卐 पुरस्ता.द्युक्तो वह जातवेदो-ऽग्ने विद्धि क्रियमाणँ यथेदम्। त्वं भिषग्भेषजस्याऽसि कर्ता- त्वया गा.मश्वं पुरुषं सनेम।। 1।।

卐 तथा तदग्ने कृणु जातवेदो- विश्वेभि. र्देवै. स्सह सँविदानः। यो नो दिदेव यतमो जघास- यथा सो अस्य परिधि. ष्पताति।। 2।।

卐 यथा सो अस्य परिधि.ष्पताति- तथा तदग्ने कृणु जातवेदः। विश्वेभि. र्देवै- स्सह सँविदानः।। 3।।

卐 अक्ष्यौ3(औ) नि विध्य हृदय.न्नि विध्य- जिह्वा.न्नितृन्द्धि प्र दतो मृणीहि। पिशाचो अस्य यतमो जघासा-ऽग्ने यविष्ठ प्रति तं शृणीहि।। 4।।

卐 यदस्य हृतँ विहृतँ यत्पराभृत- मात्मनो जग्धँ यतम.त्पिशाचैः। तदग्ने विद्वा. न्पुन.रा भर त्वं- शरीरे मांस. मसु. मेरयामः।। 5।।

卐 आमे सुपक्के शबले विपक्के- यो मा पिशाचो अशने ददम्भ। तदात्मना प्रजया पिशाचा^- वि यातयन्ता. मगदो3(ओ)ऽय.मस्तु।। 6।।

卐 क्षीरे मा मन्थे यतमो ददम्भा-ऽकृष्टपच्ये अशने धान्ये3(ए) यः। तदात्मना प्रजया पिशाचा^- वि यातयन्ता. मगदो3(ओ)ऽय.मस्तु।। 7।।

卐 अपां मा पाने यतमो ददम्भ- क्रव्या.द्यातूनां शयने शयानम्। तदात्मना प्रजया पिशाचा^- वि यातयन्ता. मगदो3(ओ)ऽय.मस्तु।। 8।।

卐 दिवा मा नक्तँ यतमो ददम्भ- क्रव्या. द्यातूनां शयने शयानम्। तदात्मना प्रजया पिशाचा^- वि यातयन्ता. मगदो3(ओ)ऽय.मस्तु ।। 9।।

卐 क्रव्याद. मग्ने रुधिरं पिशाचं- मनोहन.ञ्जहि जातवेदः। तमिन्द्रो वाजी वज्रेण हन्तु- च्छिनत्तु सोम. श्शिरो अस्य धृष्णुः।। 10।।

卐 सना.दग्ने मृणसि यातुधाना-न्न त्वा रक्षांसि पृतनासु जिग्युः। सहमूरा. ननु दह क्रव्यादो- मा ते हेत्या. मुक्षत दैव्यायाः।। 11।।

卐 समाहर जातवेदो- यद्धृतँ यत्पराभृतम्। गात्राण्यस्य वर्धन्ता- मंशु.रिवाऽऽप्यायता. मयम्।। 12।।

卐 सोमस्येव जातवेदो- अंशु. राप्यायता मयम्। अग्ने विरप्शिनं मेध्य-मयक्ष्म.ङ्कृणु जीवतु।। 13।।

卐 एता.स्ते अग्ने समिधः- पिशाचजम्भनीः। तास्त्व. ञ्जुषस्व प्रति चैना^-गृहाण जातवेदः।। 14।।

卐 तार्ष्टाघी. रग्ने समिधः- प्रति गृह्णाह्यर्चिषा। जहातु क्रव्या.द्रूपँ- यो अस्य मांस.ञ्जिहीर्षति।। 15।।-

05-06-04 (1-17 सप्तदशास्य सूक्तस्योन्मोचन आयुष्यकाम ऋषिः। मन्त्रोक्ता आयुर्वा देवताः। 1 प्रथमर्चः पथ्या पङ्क्तिः 2-8, 10, 11,13, 15,16 द्वितीयादिसप्तानामृचां दशम्या एकादश्यास्त्रयोदश्याः पञ्चदश्याः षोडश्याश्चानुष्टुप् 9 नवम्या भुरिगनुष्टुप् 12 द्वादश्याश्चतुष्पदा विराड्जगती 14 चतुर्दश्या विराट्प्रस्तारपङ्क्तिः 27 सप्तदश्याश्च षट्पदा जगती छन्दांसि।।) दीर्घायुष्टम्

卐 आवत.स्त आवतः- परावत.स्त आवतः। इहैव भव मा नु गा- मा पूर्वा. ननु गाः पितृ- नसुं बध्नामि ते दृढम्।। 1।।

卐 यत्त्वाऽभिचेरुः पुरुष- स्स्वो यदरणो जनः। उन्मोचनप्रमोचने~- उभे~ वाचा वदामि ते।। 2।।

卐 यद्दुद्रोहिथ शेपिषे- स्त्रियै पुंसे अचित्त्या। उन्मोचनप्रमोचने~- उभे~ वाचा वदामि ते।। 3।।

卐 यदेनसो मातृकृता- च्छेषे पितृकृता.च्च यत्। उन्मोचनप्रमोचने~- उभे~ वाचा वदामि ते।। 4।।

卐 यत्ते माता यत्ते पिता- जामि. भ्रांता च सर्जतः। प्रत्यक्सेवस्व भेषज- ञ्जरदष्टि. ङ्कृणोमि त्वा।। 5।।

卐 इहैधि पुरुष- सर्वेण मनसा सह। दूतौ यमस्य माऽनु गा^- अधि जीवपुरा^ इहि।। 6।।

卐 अनुहूतः पुन.रेहि- विद्वा. नुदयनं पथः। आरोहण. माक्रमण- ञ्जीवतो.जीवतोऽयनम्।। 7।।

卐 मा बिभे.र्न मरिष्यसि- जरदष्टि. ङ्कृणोमि त्वा। निरवोच. महँ यक्ष्म- मङ्गेभ्यो अङ्गज्वर. न्तव।। 8।।

卐 अङ्गभेदो अङ्गज्वरो- यश्च ते हृदयाऽऽमयः। यक्ष्मं. श्श्येन^ इव प्रापप्त- द्वाचा साढः परस्तराम्।। 9।।

卐 ऋषी बोध प्रतीबोधा-ऽस्वस्वप्नो यश्च जागृविः। तौ ते प्राणस्य गोप्तारौ- दिवा नक्तञ्च जागृताम्।। 10।।

卐 अय. मग्नि. रुपसद्य^- इह सूर्य^ उदेतु ते। उदेहि मृत्यो. गम्भीरा- त्कृष्णा.च्चि.त्तमस. स्परि।। 11।।

卐 नमो यमाय नमो अस्तु मृत्यवे- नमः पितृभ्य^ उत ये नयन्ति। उत्पारणस्य यो वेद तमग्निं- पुरो दधेऽस्मा अरिष्टतातये।। 12।।

卐 ऐतु प्राण^ ऐतु मन^- ऐतु चक्षु. रथो~ बलम्। शरीर.मस्य सँ विदा- न्तत्पद्भ्यां प्रति तिष्ठतु।। 13।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 प्राणेनाऽग्ने चक्षुषा सं सृजेमं- समीरय तन्वा3(आ) सं बलेन। वेत्थाऽमृतस्य मा नु गा-न्मा नु भूमिगृहो भुवत्।। 14।।

卐 मा ते प्राण^ उप दस- न्मो~ अपानोऽपि धायि ते। सूर्यस्त्वाऽधिपति. मृत्यो- रुदायच्छतु रश्मिभिः।। 15।।

卐 इय. मन्त. वदति- जिह्वा बद्धाऽपनिष्पदा। त्वया यक्ष्म. न्निरवोचं- शतं रोपीश्च तक्मनः।। 16।।

卐 अयँ लोक॰ प्रियतमो- देवाना. मपराजितः। यस्मै त्व.मिह मृत्यवे- दिष्ट॰ पुरुष जज्ञिषे। स^ च त्वाऽनु ह्वयामसि- मा पुरा जरसो मृथाः।। 17।।-

05-06-05 (1-12 द्वादशस्यास्य सूक्तस्य शुक्र ऋषिः। कृत्याप्रतिहरणां देवता । 1-10 प्रथमादिदशानामृचामनुष्टुप् 11 एकादश्या बृहतीगर्भानुष्टुप् 12 द्वादश्याश्च पथ्या बृहती छन्दांसि।।) ❋ कृत्यापरिहरणम्

卐 यान्ते चक्रु. रामे पात्रे- या.श्चक्रु. र्मिश्रधान्ये। आमे मांसे कृत्याँ या.श्चक्रु॰- पुन॰ प्रति हरामि ताम्।। 1।।

卐 यान्ते चक्रु॰ कृकवाका^- वजे वा या.ङ्कुरीरिणि। अव्या.न्ते कृत्याँ याश्चक्रु॰- पुन॰ प्रति हरामि ताम्।। 2।।

卐 या.न्ते चक्रु रेकशफे- पशूना. मुभयादति। गर्दभे कृत्याँ या.ञ्चक्रुः- पुनः प्रति हरामि ताम्।। 3।।

卐 या.न्ते चक्रु. रमूलायाँ- वलगँ वा नराच्याम्। क्षेत्रे ते कृत्याँ या.ञ्चक्रुः- पुनः प्रति हरामि ताम्।। 4।।

卐 या.न्ते चक्रु. गार्हपत्ये- पूर्वाग्ना. वुत दुश्चितः। शालाया.ङ्कृत्याँ या.ञ्चक्रुः- पुनः प्रति हरामि ताम्।। 5।।

卐 या.न्ते चक्रु. स्सभायाँ- या.ञ्चक्रु रधिदेवने। अक्षेषु कृत्याँ या.ञ्चक्रुः- पुनः प्रति हरामि ताम्।। 6।।

卐 यान्ते चक्रु. स्सेनायाँ- या.ञ्चक्रु रिष्वायुधे। दुन्दुभौ कृत्याँ या.ञ्चक्रुः- पुनः प्रति हरामि ताम्।। 7।।

卐 यान्ते कृत्या.ङ्कूपेऽवदधु- श्श्मशाने वा निचख्नुः। सद्मनि कृत्याँ या.ञ्चक्रुः- पुनः प्रति हरामि ताम्।। 8।।

卐 यान्ते चक्रुः पुरुषास्थे- अग्नौ सङ्कसुके च याम्। म्रोक. न्निर्दाह. ङ्क्रव्यादं- पुनः प्रति हरामि ताम्।। 9।।

卐 अपथेनाऽऽ जभारैणा- न्तां पथेतः प्र हिण्मसि। अधीरो मर्याधीरेभ्य- स.ञ्जभाराऽचित्त्या।। 10।।

卐 यश्चकार न शशाक- कर्तुं शश्रे पादं. मङ्गुरिम्। चकार भद्र. मस्मभ्य- मभगो भगवद्भ्यः।। 11।।

卐 कृत्याकृतँ वलगिनं- मूलिनं शपथेय्यम्। इन्द्र.स्तं हन्तु महता वधेना- ऽग्नि. र्विध्य.त्वस्तया।। 12।।

पञ्चम ङ्काण्डं समाप्तम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

# ૮ षष्ठङ्काण्डम्

## ≶◊≷ षष्ठ काण्डे प्रथमोऽनुवाकः

☃ 06-01-0 (1-3 तृचस्यास्य सूक्तस्याथर्वा ऋषिः। सविता देवता। 1 प्रथमर्चस्त्रिपदा पिपीलिकमध्या साम्नी जगती 2-3 द्वितीयातृतीययोश्च पिपीलिकमध्या पुर उष्णिक् छन्दंसी।।) ❃ अमृतप्रदाता

卐 दोषो गाय बृह- द्गाय द्युम. द्धेहि। आथर्वण स्तुहि- देवं सवितारम्।। 1।।

卐 तमु ष्टुहि यो- अन्त. स्सिन्धौ सूनुः। सत्यस्य युवान- मद्रोघवाचं सुशेवम्।। 2।।

卐 स^ घा नो देव स्सविता- ?साविष. दमृतानि भूरि। उभे~ सुष्टुती~ सुगातवे।। 3।।-

☃ 06-01-02 (1-3 तृचस्यास्य सूक्तस्याथर्वा ऋषिः। सोमो वनस्पतिर्देवता। परोष्णिक् छन्दः।।) ❃ जेता इन्द्रः

卐 इन्द्राय सोम. मृत्विज- स्सुनोताऽऽ च धावत। स्तोतु. र्यो वच- श्श्रृणव. द्धवञ्च मे।। 1।।

卐 आ यँ विशन्तीन्दवो- वयो न वृक्ष. मन्धसः। विरप्शि.न्वि मृधो जहि- रक्षस्विनीः।। 2।।

卐 सुनोता सोमपाव्ने- सोम. मिन्द्राय वज्रिणे। युवा जेतेशान- स्स पुरुष्टुतः।। 3।।-

06-01-03 (1-3 तृचस्यास्य सूक्तस्याथर्वा ऋषिः । मन्त्रोक्ता देवताः।1 प्रथमर्चः पथ्याबृहती 2-3 द्वितीययोश्च जगती छन्दसी।।) आत्मगोपनम्

卐 पात.न्न इन्द्रापूषणा-ऽदितिः पान्तु मरुतः। अपा.न्नपा.त्सिन्धव. स्सप्त पातन- पातु नो विष्णु. रुत द्यौः।। 1।।

卐 पाता. न्नो द्यावापृथिवी~ अभिष्टये- पातु ग्रावा पातु सोमो नो अंहसः। पातु नो देवी सुभगा सरस्वती- पात्वग्नि. श्शिवा ये अस्य पायवः।। 2।।

卐 पाता. न्नो देवाऽश्विना शुभस्पती~- उषासानक्तोत न उरुष्यताम्। अपा. न्नपा. दभिह्रुती गयस्य चि-द्देव त्वष्ट. वर्धय सर्वतातये।। 3।।-

06-01-04 (1-3 तृचस्यास्य सूक्तस्याथर्वा ऋषिः।मन्त्रोक्ता देवताः।1 प्रथमर्चः पथ्याबृहती 2 द्वितीयायाः संस्तारपङ्क्तिः 3 तृतीयायाश्च त्रिपदा विराड्गायत्री छन्दांसि।।) आत्मगोपनम्

卐 त्वष्टा मे दैव्यँ वचः- पर्जन्यो ब्रह्मण.स्पतिः। पुत्रै. र्भ्रातृभि. रदिति. र्नु पातु नो- दुष्टर. न्त्रायमाणं सहः।। 1।।

卐 अंशो भगो वरुणो मित्रो- अर्यमाऽदितिः पान्तु मरुतः। अप तस्य द्वेषो गमे. दभिह्रुतो- यावय.च्छत्रु. मन्तितम्।। 2।।

卐 ?धिये स.मश्विना प्रावत.न्न^- उरुष्या ण^ उरुज्म. न्नप्रयुच्छन्न्।
द्यौ3(औ)ष्पित. र्यावय दुच्छुना या।। 3।।-

06-01-05 (1-3 पञ्चस्यास्य सूक्तस्याथर्वा ऋषिः। 1,3 प्रथमातृतीययोर्ऋचोरग्निः 2 द्वितीयायाश्चेन्द्रो देवते। 1,3 प्रथमातृतीययोरनुष्टुप् 2 द्वितीयायाश्च भुरिगनुष्टुप् छन्दसी।।)
❀ वर्चःप्राप्तिः

卐 उदेन. मुत्तर. न्नया-ऽग्ने घृतेनाऽऽहुत। समेनँ वर्चसा सृज- प्रजया च
बहु. ङ्कृधि।। 1।।

卐 इन्द्रेमं प्रतर. ङ्कृधि- सजातानां. मस.द्वशी। राय.स्पोषेण सं सृज-
जीवातवे जरसे नय।। 2।।

卐 यस्य कृण्मो हवि. गृहे- तमग्ने वर्धया त्वम्। तस्मै सोमो अधि ब्रव-
दयञ्च ब्रह्मण.स्पतिः।। 3।।-

06-01-06
(1-3 तृचस्यास्य सूक्तस्याथर्वा ऋषिः। 1 प्रथमर्चो ब्रह्मणास्पतिः 2-3 द्वितीयातृतीययोश्च सोमो देवते। अनुष्टुप् छन्दः।।) ❀ शत्रुनाशनम्

卐 यो3(ओ)ऽस्मा. न्ब्रह्मणस्पते-ऽदेवो अभिमन्यते। सर्व.न्तं रन्धयासि मे-
यजमानाय सुन्वते।। 1।।

卐 यो न.स्सोम सुशंसिनो- दुश्शंस^ आदिदेशति। वज्रेणाऽस्य मुखे जहि- स^ संपिष्टो अपायति।। 2।।

卐 यो न.स्सोमाऽभिदासति- सनाभि. र्यश्च निष्ट्यः। अप तस्य बल. न्तिर- महीव द्यौ.र्वध त्मना।। 3।।-

06-01-07

(1-3 तृचस्यास्य सूक्तस्याथर्वा ऋषिः। 1-2 प्रथमाद्वितीययोर्ऋचोः सोमः3 तृतीयायाश्च विश्वे देवा देवताः। 1 प्रथमाया निचृद्गायत्री 2-3 द्वितीयातृतीययोश्च गायत्री छन्दसी।।) ❁ असुरक्षयणम्

卐 येन सोमाऽदितिः पथा- मित्रा वा य.न्त्यद्रुहः। तेना नोऽवसाऽऽगहि।। 1।।

卐 येन सोम साह-न्त्यासुरा. न्रन्धयासि नः। तेना नो अधि वोचत।। 2।।

卐 येन देवा^ असुराणा- मोजां.स्यवृणीध्वम्। तेना न.श्शर्म यच्छत।। 3।।-

06-01-08 (1-3 तृचस्यास्य सूक्तस्य जमदग्निर्ऋषिः। कामात्मा देवता। पथ्यापङ्क्तिश्छन्दः।।) ❁ कामात्मा

卐 यथा वृक्षं लिबुजा- समन्तं परिषस्वजे। एवा परिष्वजस्व माँ- यथा मा.ङ्कामि.न्यसो- यथा म.न्नाप गा^ असः।। 1।।

卐 यथा सुपर्णः प्रपत- न्पक्षौ निहन्ति भूम्याम्। एवा नि हन्मि ते मनो- यथा मा.ङ्कामिन्यसो- यथा म.न्नाप गाऽ असः।। 2।।

卐 यथेमे~ द्यावापृथिवी~- सद्यः पर्यैति सूर्यः। एवा पर्यैमि ते मनो- यथा मा.ङ्कामिन्यसो- यथा म.न्नाप गा^ असः।। 3।।-

06-01-09 (1-3 तृचस्यास्य सूक्तस्य जमदग्निर्ऋषिः। कामात्मा देवता। अनुष्टुप् छन्दः।।) ❀ कामात्मा

卐 वाञ्छ मे तन्व1(अं) पादौ- वाञ्छाक्ष्यौ3(औ) वाञ्छ सक्थ्यौ। अक्ष्यौ वृषण्यन्त्याः केशा- मा.न्ते कामेन शुष्यन्तु।। 1।।

卐 मम त्वा दोषणिश्रिष-ङ्कृणोमि हृदयश्रिषम्। यथा मम क्रता.वसो- मम चित्त. मुपायसि।। 2।।

卐 यासा. न्नाभि. रारेहणं- हृदि सँवननं. ङ्कृतम्। गावो घृतस्य मातरो-ऽमूं सँ वानयन्तु मे।। 3।।-

06-01-10 (1-3 तृचस्यास्या सूक्तस्य शान्तातिर्ऋषिः। 1 प्रथमर्चोऽग्निः2 द्वितीयायाः वायुः 3 तृतीयायाश्च सर्यो देवताः। 1 प्रथमायाः साम्नी त्रिष्टुप् 2 द्वितीयायाः प्राजापत्या बृहती 3 तृतीयायाश्च साम्नी बृहती छन्दांसि।।) ❀ संप्रोक्षणम्

卐 पृथिव्यै श्रोत्राय वनस्पतिभ्यो-ऽग्नयेऽधिपतये स्वाहा।। 1।।

卐 प्राणायाऽन्तरिक्षाय वयोभ्यो- वायवेऽधिपतये स्वाहा।। 2।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham Mysore

卐 दिवे चक्षुषे नक्षत्रेभ्य- स्सूर्यायाऽधिपतये स्वाहा।। 3।।

## ॐ षष्ठ काण्डे द्वितीयोऽनुवाकः

06-02-01 (1-3 तृचस्यास्य सूक्तस्य प्रजापतिर्ऋषिः। रेतो मन्त्रोक्ता वा देवताः।अनुष्टुप् छन्दः।।) ❁ पुंसुवनम्

卐 शमी. मश्वत्थ^ आरूढ- स्तत्र पुंसुवन.ङ्कृतम्। तद्वै पुत्रस्य वेदन-न्त.त्स्त्रीष्वा भरामसि।। 1।।

卐 पुंसि वै रेतो भवति- तत्स्त्रिया. मनु षिच्यते। तद्वै पुत्रस्य वेदन-न्त.त्प्रजापति. रब्रवीत्।। 2।।

卐 प्रजापति. रनुमति- स्सिनीवा.ल्यचीक्लृपत्। स्त्रैषूय. मन्यत्र दध-त्पुमांस.मु दध.दिह।। 3।।-

06-02-02

(1-3 तृचस्यास्य सूक्तस्य गरुत्मानृषिः। तक्षको देवता।अनुष्टुप् छन्दः।।) ❁ सर्प विष निवारणम्

卐 परि द्या.मिव सूर्यो-ऽहीना.ञ्जनि. माऽगमम्। रात्री जग.दिवान्य.द्धंसा-त्तेना ते वारये विषम्।। 1।।

卐 यद्ब्रह्मभि. र्यदृषिभि- र्यद्देवै. र्विदितं पुरा। यद्भूतं भव्य. मासन्व- त्तेना ते वारये विषम्।। 2।।

卐 मध्वा पृञ्चे नद्य1(अ॒)- पर्वता^ गिरयो मधु। मधु परुष्णी शीपाला-
शमास्ने अस्तु शं हृदे।। 3।।-

06-02-03

(1-3 तृचस्यास्य सूक्तस्याथर्वा ऋषिः। मृत्युर्देवता। अनुष्टुप् छन्दः।।) ❃ मृत्युञ्जयः

卐 नमो देववधेभ्यो- नमो राजवधेभ्यः। अथो~ ये विश्यानाँ वधा- स्तेभ्यो
मृत्यो~ नमोऽस्तु ते।। 1।।

卐 नमस्ते अधिवाकाय- परावाकाय ते नमः। सुमत्यै मृत्यो~ ते नमो-
दुर्मत्यै त इद न्नमः।। 2।।

卐 नमस्ते यातुधानेभ्यो- नमस्ते भेषजेभ्यः। नमस्ते मृत्यो~ मूलेभ्यो-
ब्राह्मणेभ्य^ इद न्नमः।। 3।।-

06-02-04

(1-3 तृचस्यास्य सूक्तस्य बभ्रपिङ्गल ऋषिः। बलासो देवता। अनुष्टुप् छन्दः।।) ❃
बलाशनाशनम्

卐 अस्थिस्त्रंसं परुस्त्रंस- मास्थितं हृदयाऽमयम्। बलासं सर्व. न्नाशया-
ऽङ्गेष्ठा^ यश्च पर्वसु।। 1।।

卐 निर्बलासं बलासिनः~- क्षिणोमि मुष्करँ यथा। छिनद्म्यस्य बन्धनं- मूल.
मुर्वार्वा^ इव।। 2।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

卐 निर्बलासेतः प्र पता-?ऽशुङ्ग. शिशाशुको यथा। अथो~ इट^इव हाय-नोप द्राह्यवीरहा।। 3।।-

☸ 06-02-05

(1-3 तृचस्यास्य सूक्तस्योद्दालक ऋषिः। वनस्पतिर्देवता। अनुष्टुप् छन्दः।।) ❁ शत्रुनिवारणम्

卐 उत्तमो अस्योषधीना- न्तव वृक्षा^ उपस्तयः। उपस्ति. रस्तु सो3(ओ)ऽस्माकँ- यो अस्मा॰ अभिदासति।। 1।।

卐 सबन्धु. श्चाऽसबन्धुश्च- यो अस्मा॰ अभिदासति। तेषां सा वृक्षाणा. मिवा-ऽहं भूयास. मुत्तमः।। 2।।

卐 यथा सोम^ ओषधीना- मुत्तमो हविषा.ङ्कृतः। तलाशा^ वृक्षाणा.मिवा-ऽहं भूयास. मुत्तमः।। 3।।-

☸ 06-02-06 (1-4 चतुर्ऋचस्यास्य सूक्तस्य शौनक ऋषिः। मन्त्रोक्ताश्चन्द्रमा वा देवता।1 प्रथमर्चो निचृत्त्रिपदा गायत्री 2 द्वितीयायास अनुष्टुप् 3 तृतीयाया बृहतीगर्भाककुम्मत्यनुष्टुप् 4 चतुर्थ्याश्च त्रिपदा प्रतिष्ठा गायत्री छन्दांसि।।) ❁ अक्षिरोगभैषजम्

卐 आबयो~ अनाबयो~- रसस्त उग्र^ आबयो~। आ ते करम्भ. मद्मसि।। 1।।

卐 विहह्लो नाम ते पिता- मदावती नाम ते माता। स^ हिन.त्वमसि य.स्त्व-

मात्मान. मावयः।। 2।।

卐 तौ विलिकेऽवेलयावाय. मैलब^ ऐलयीत्। बभ्रुश्च बभ्रुकर्ण.श्चा-ऽपेहि

निराल।। 3।।

卐 अलसालाऽसि पूर्वा- सिलाञ्जालाऽस्युत्तरा। नीलागलसाला।। 4।।-

06-02-07 (1-4 चतुर्ऋचस्यास्य सूक्तस्याथर्वा ऋषिः।गर्भदृंहणां देवता। अनुष्टुप् छन्दः।।) ❀ गर्भदृंहणम्

卐 यथेयं पृथिवी मही- भूतानां गर्भ. मादधे। एवा ते ध्रियता.ङ्गर्भो- अनु सूतुं सवितवे।। 1।।

卐 यथेयं पृथिवी मही- दाधारेमान् वनस्पतीन्। एवा ते ध्रियता.ङ्गर्भो- अनु सूतुं सवितवे।। 2।।

卐 यथेयं पृथिवी मही- दाधार पर्वता. न्गिरीन्। एवा ते ध्रियता.ङ्गर्भो- अनु सूतुं सवितवे।। 3।।

卐 यथेयं पृथिवी मही- दाधार विष्ठित.ञ्जगत्। एवा ते ध्रियता.ङ्गर्भो- अनु सूतुं सवितवे।। 4।।-

☃ 06-02-08 (1-3 तृचस्यास्य सूक्तस्याथर्वा ऋषिः। इर्ष्याविनाशनं देवता। अनुष्टुप् छन्दः।।) ❃ आर्ष्याविनाशनम्

卐 ईर्ष्याया^ ध्राजिं प्रथमां- प्रथमस्या^ उताऽपराम्। अग्निं हृदय्य1(अं) शोक- न्तन्ते नि.र्वापयामसि।। 1।।

卐 यथा भूमि. र्मृतमना- मृता.न्मृतमनस्तरा। यथोत मम्रुषो मन^- एवेर्ष्यो. र्मृतं मनः।। 2।।

卐 अदो यत्ते हृदि श्रितं- मनस्कं पतयिष्णुकम्। तत.स्त ईर्ष्यां मुञ्चामि- निरूष्माण. न्दृते.रिव।। 3।।-

☃ 06-02-09 (1-3 तृचस्यास्य सूक्तस्य शन्तातिर्ऋषिः। चन्द्रमा मन्त्रोक्ता वा देवताः। 1 प्रथर्चोऽनुष्टुप् 2-3 द्वितीयातृतीययोश्च गायत्री छन्दसी।।) ❃ पावमानम्

卐 पुनन्तु मा देवजनाः- पुनन्तु मनवो धिया। पुनन्तु विश्वा भूतानि- पवमानः पुनातु मा।। 1।।

卐 पवमानः पुनातु मा- क्रत्वे दक्षाय जीवसे। अथो~ अरिष्टतातये।। 2।।

卐 उभाभ्यां. न्देव सवितः- पवित्रेण सवेन च। अस्मा.न्पुनीहि चक्षसे।। 3।।-

Sri Ganapati Sachchidananda Avadhoota Dattapeetham Mysore

06-02-10 (1-3 तृचस्यास्य सूक्तस्य भृग्वङ्गिरा ऋषिः। यक्ष्मनाशनं मन्त्रोक्ताश्च देवताः। 1 प्रथमर्चोऽतिजगती 2 द्वितीयायाः ककुम्मती प्रस्तारपङ्क्तिः 3 तृतीयायाश्च सतः पङ्क्तिश्छन्दांसि।।) ❁ यक्ष्मनाशनम्

卐 अग्ने. रिवास्य दहत^ एति शुष्मिण^- उतेव मत्तो विलप. न्नपायति। अन्य. मस्म. दिच्छतु कञ्चि. दव्रत- स्तपुर्वधाय नमो अस्तु तक्मने।। 1।।

卐 नमो रुद्राय नमो अस्तु तक्मने- नमो राज्ञे वरुणाय त्विषीमते। नमो दिवे नमः पृथिव्यै- नम^ ओषधीभ्यः।। 2।।

卐 अयँ यो अभिशोचयिष्णु- र्विश्वा रूपाणि हरिता कृणोषि। तस्मै तेऽरुणाय बभ्रवे- नमः कृणोमि वन्याय तक्मने।। 3।।

## षष्ठ काण्डे तृतीयोऽनुवाकः

06-03-01

(1-3 तृचस्यास्य सूक्तस्य शन्तातिर्ऋषिः। चन्द्रमा देवता। अनुष्टुप् छन्दः।।) ❁ केशवर्धनी औषधिः

卐 इमा^ या.स्तिस्रः पृथिवी- स्तासां ह भूमि. रुत्तमा। तासा. मधि त्वचो अहं- भेषजं स.मु जग्रभम्।। 1।।

卐 श्रेष्ठ.मसि भेषजानां- वसिष्ठं वीरुधानाम्। सोमो भग^इव यामेषु- देवेषु वरुणो यथा।। 2।।

卐 रेवती. रनाधृष- स्सिषासव. स्सिषासथ। उत स्थ केशदृंहणी- रथो~ ह केशवर्धनीः।। 3।।-

06-03-02 (1-3 तृचस्यास्य सूक्तस्य शन्तातिर्ऋषिः। आदित्यरश्मिमर्मरुतो वा देवताः। 1,3 प्रथमातृतीययोर्ऋचोस्त्रिष्टुप् 2 द्वितीयायाश्च चतुष्पदा भुरिग्जगती छन्दांसि।।) ❀ भैषज्यम्

卐 कृष्ण. न्नियानं हरय. स्सुपर्णा^- अपो वसाना^ दिव. मुत्पतन्ति। त आऽववृत्र. न्त्सदना दृतस्या- ऽऽदिद्घृतेन पृथिवीँ व्यूदुः।। 1।।

卐 पयस्वतीः कृणुथाऽप^ ओषधी- श्शिवा^ यदेजथा मरुतो रुक्मवक्षसः। ऊर्जञ्च तत्र सुमतिञ्च पिन्वत- यत्रा नरो मरुत. स्सिञ्चथा मधु।। 2।।

卐 उदप्रुतो मरुत. स्ताँ इयर्त वृष्टि- र्या विश्वा निवत. स्पृणाति। एजाति ग्लहा कन्येव तु-न्नैरु न्तुन्दाना पत्येव जाया।। 3।।-

06-03-03 (1-3 तृचस्यास्य सूक्तस्य शन्तातिर्ऋषिः। आपो देवताः। 1 प्रथमर्चोऽनुष्टुप् 2 द्वितीयायास्त्रिपदा गायत्री 3 तृतीयायाश्च परोष्णिक् छन्दांसि।।) ❀ अपां भैषज्यम्

卐 सस्रुषी. स्त.दपसो- दिवा नक्तञ्च सस्रुषीः। वरेण्यक्रतु. रह- मपो देवी. रुप ह्वये।। 1।।

卐 ओता^ आपः कर्मण्या^- मुञ्च.न्त्वितः प्रणीतये। सद्यः कृण्व.न्त्वेतवे।। 2।।

卐 दे॒वस्य॑ सवि॒तु. स्स॒वे- कर्म॑ कृण्वन्तु॒ मानु॑षाः। शन्नो॑ भव.न्त्व॒प^-
ओष॑धी. श्शि॒वाः।। 3।।-

☸ 06-03-04 (1-3 तृचस्यास्य सूक्तस्य शन्तातिरऋषिः। आपो देवताः। अनुष्टुप् छन्दः।।) ❃ अपां भैषज्यम्

卐 हि॒मव॑त॒ः प्र स्र॑वन्ति॒- सिन्धौ॑ समह सङ्ग॒मः। आपो॑ ह॒ मह्य॒. न्तद्दे॒वी- र्दद॑.
न्हृद्योतभे॒षजम्।। 1।।

卐 यन्मे॑ अ॒क्ष्यो. रा॑दि॒द्योत॒- पाष्ण्यो॒ः प्रप॑दो॒श्च यत्। आप॒.स्त. त्सर्व॒.
न्निष्क॑र- न्भि॒षजां॒ सुभि॑षक्तमाः।। 2।।

卐 सिन्धु॑पत्नी॒. स्सिन्धु॑राज्ञी- स्स॒र्वा^ या^ न॒द्य1(अ॒) स्थन॑। द॒त्त न॒.स्तस्य॑
भे॒षज- न्तेना॑ वो भुनजामहै।। 3।।-

☸ 06-03-05 (1-3 तृचस्यास्य सूक्तस्य शुनः शेप ऋषिः। मन्याविनाशनं देवता। अनुष्टुप् छन्दः।।) ❃ मन्याविनाशनम्

卐 पञ्च॑ च॒ याः पञ्चा॒शच्च॑- स॒यन्ति॒ मन्या॑^ अ॒भि। इ॒त.स्ता. स्सर्वा॑^
नश्यन्तु- वा॒का^ अप॑चि॒ता॑.मिव।। 1।।

卐 स॒प्त च॒ या. स्स॑प्त॒तिश्च॑- स॒यन्ति॒ ग्रैव्या॑^ अ॒भि। इ॒त.स्ता. स्सर्वा॑^
नश्यन्तु- वा॒का^ अप॑चि॒ता॑.मिव।। 2।।

卐 नव च या नवतिश्च- सँयन्ति स्कन्ध्या^ अभि। इत.स्ता. स्सर्वा^ नश्यन्तु- वाका^ अपचिता.मिव।। 3।।-

06-03-06 (1-3 तृचस्यास्य सूक्तस्य ब्रह्मा ऋषिः। पाप्मा देवता। अनुष्टुप्छन्दः।।) ❀ पाप्मनाशनम्

卐 अव मा पाप्म. न्त्सृज- वशी स.न्मृडयासि नः। आ मा भद्रस्य लोके- पाप्म न्धेह्यविह्रुतम्।। 1।।

卐 यो नः पाप्म. न्न जहाति- तमु त्वा जहिमो वयम्। पथा. मनु व्यावर्तने- ऽन्यं पाप्माऽनु पद्यताम्।। 2।।

卐 अन्यत्राऽस्म. न्न्युच्यतु- सहस्राक्षो अमर्त्यः। यन्द्वेषाम तमृच्छतु- य.मु द्विष्म. स्त.मिज्जहि।। 3।।-

06-03-07 (1-3 तृचस्यास्य सूक्तस्य भृगुर्ऋषिः। यमो निर्ऋतिर्वा देवता। 1,3 प्रथमातृतीययोर्ऋचो जगती 2 द्वितीयायाश्च त्रिष्टुप् छन्दांसि।।) ❀ अरिष्टक्षयणम्

卐 देवाः कपोत^ इषितो यदिच्छ-न्दूतो निरृत्या^ इद. माजगाम। तस्मा अर्चाम कृणवाम निष्कृतिं- शन्नो अस्तु द्विपदे श.ञ्चतुष्पदे।। 1।।

卐 शिवः कपोत^ इषितो नो अ-स्त्वनागा^ देवा. श्शकुनो गृह.न्नः। अग्निर्.हि विप्रो जुषतां हवि.र्नः- परि हेतिः पक्षिणी नो वृणक्तु।। 2।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 हेतिः पक्षिणी न दभा.त्यस्मा- नाष्ट्री पद. क्कृणुते अग्निधाने। शिवो गोभ्य^ उत पुरुषेभ्यो नो अस्तु- मा नो देवा^ इह हिंसी.त्कपोतः।। 3।।-

06-03-08

(1-3 तृचस्यास्य सूक्तस्य भृगुर्ऋषिः। यमो निर्ऋतिर्वा देवता।1 प्रथमर्चस्त्रिष्टुप् 2 द्वितीयाया अनुष्टुप् 3 तृतीयायाश्च जगती छन्दांसि।।) ❃ अरिष्टक्षयणम्

卐 ऋचा कपोत. न्नुदत प्रणोद-मिषं मदन्तः परि गा.न्नयामः। सँलोभयन्तो दुरिता पदानि- हित्वा न^ ऊर्जं प्रपदा. त्पथिष्ठः।। 1।।

卐 परीमे3(ए)ऽग्नि. मर्षत- परीमे गा.मनेषत। देवेष्वक्रत श्रवः- क^ इमा९ आ दधर्षति।। 2।।

卐 यः प्रथमः प्रवत. माससाद- बहुभ्यः पन्था.मनुपस्पशानः। यो3(ओ)ऽस्येशे द्विपदो यश्चतुष्पद- स्तस्मै यमाय नमो अस्तु मृत्यवे।। 3।।-

06-03-09 (1-3 तृचस्यास्य सूक्तस्य भृगुर्ऋषिः। यमो निर्ऋतिर्वा देवता।1-2 प्रथमाद्वितीययो ऋचो र्विराड्गायत्री 3 तृतीयायाश्च त्र्यवसाना सप्तपदा विराडष्टिश्छन्दसी।।) ❃ अरिष्टक्षयणम्

卐 अमू. न्हेतिः पतत्रिणी न्येतु- यदुलूको वदति मोघ. मेतत्। यद्वा कपोतः पद. मग्नौ कृणोति।। 1।।

卐 यौ ते दूतौ निरृऋत इद मेतो-ऽप्रहितौ प्रहितौ वा गृह. न्नः। कपोतोलूकाभ्या. मपद. न्तदस्तु।। 2।।

卐 अवैरहत्यायेद.मा पपत्या-त्सुवीरताया^ इद.मा ससद्यात्। पराङेव परा वद- पराची. मनु सँवतम्। यथा यमस्य त्वा गृहेऽरसं- प्रतिचाकशा. नाभूकं प्रतिचाकशान्।। 3।।-

06-03-10

(1-3 तृचस्यास्य सूक्तस्योपरिबभ्रव ऋषिः।शमि देवता। 1 प्रथमर्चो जगती 2 द्वितीयायास्त्रिष्टुप् 3 तीयायाश्च चतुष्पदा शङ्कुमत्यनुष्टुप् छन्दांसि।।) ❃ पापनाशनम्

卐 देवा^ इमं मधुना सँयुतँ यवं- सरस्वत्या.मधि मणा.वचर्कृषुः। इन्द्र^ आसी. त्सीरपति. श्शतक्रतुः- कीनाशा^ आस. न्मरुत. स्सुदानवः।। 1।।

卐 यस्ते मदोऽवकेशो विकेशो- येनाऽभिहस्यं पुरुष. ङ्कृणोषि। आरा.त्त्व. दन्या वनानि वृक्षि- त्वं शमि शतवल्शा वि रोह।। 2।।

卐 बृहत्पलाशे सुभगे- वर्षवृद्ध ऋतावरि। मातेव पुत्रेभ्यो मृड- केशेभ्य. श्शमि।। 3।।-

06-03-11 (1-3 तृचस्यास्य सूक्तस्योपरिबभ्रव ऋषिः। गौर्देवता। गायत्री छन्दः।।)
गौः

卐 आऽय. ङ्गौः पृश्नि. रक्रमी- दसद. न्मातरं पुरः। पितरञ्च प्रय.न्त्स्वः।। 1।।

卐 अन्त. श्चरति रोचना- अस्य प्राणा. दपानतः। व्यख्य. न्महिष. स्स्वः।। 2।।

卐 त्रिंश.द्धामा वि राजति- वाक्पतङ्गो अशिश्रियत्। प्रति वस्तो. रह. र्द्युभिः।। 3।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore • SGS

## ꗃ षष्ठ काण्डे चतुर्थोऽनुवाकः

☸ 06-04-01 1-3 तृचस्यास्य सूक्तस्य 1-2 प्रथमाद्वितीययोर्ऋचोश्चातनः 3 तृतीयायाश्चाथर्वा ऋषिः। 1 प्रथमाया अग्निः। 2 द्वितीयाया रुद्रः 3 तृतीयायाश्च मित्रावरुणौ देवताः। 1,3 प्रथमातृतीययोस्त्रिष्टुप् 2 द्वितीयायाश्च प्रस्तारपङ्क्तिश्छनादसी।।)

❀ यातुधानक्षयणम्

卐 अन्तर्दावे जुहुता स्वे3(ए)त- द्यातुधानक्षयण. ङ्घृतेन। आरा. द्रक्षांसि प्रति दह त्व.मग्ने- न नो गृहाणा. मुप तीतपासि।। 1।।

卐 रुद्रो वो ग्रीवा^ अशरै.त्पिशाचाः- पृष्टी वोऽपि श्रृणातु यातुधानाः। वीरु.द्वो विश्वतोवीर्या- यमेन समजीगमत्।। 2।।

卐 अभयं मित्रावरुणा.विहास्तु नो-ऽर्चिषाऽत्त्रिणो नुदतं प्रतीचः। मा ज्ञातारं मा प्रतिष्ठाँ विदन्त- मिथो विघ्नाना^ उप यन्तु मृत्युम्।। 3।।-

☸ 06-04-02 (1-3 तृचस्यास्य सूक्तस्य जाटिकायन ऋषिः। इन्द्रो देवता। 1,3 प्रथमातृतीययोर्ऋचोर्गायत्री 2 द्वितीयायाश्चानुष्टुप् छन्दसी।।) ❀ इन्द्रस्तवः

卐 यस्येद.मा रजो युज- स्तुजे जना^ वनं स्वः। इन्द्रस्य रन्त्यं बृहत्।। 1।।

卐 नाधृष आ दधृषते- धृषाणो धृषित. श्शवः। पुरा यथा व्यथि. श्श्रव^- इन्द्रस्य नाधृषे शवः।। 2।।?

卐 स॒ नो॑ द॒दा॒तु॒ तां र॒यि- मु॒रुं पि॒शङ्ग॑सन्दृशम्। इन्द्र॒ः पति॑. स्तु॒विष्ट॑मो॒- ज॒ने॒ष्वा।। 3।।-

☸ 06-04-03 (1-5 पञ्चर्चस्य सूक्तस्य चातन ऋषिः। अग्निर्देवता। गायत्री छन्दः।।) ❀ शत्रुनाशनम्

卐 प्राग्नये॒ वाच॑. मीरय- वृष॒भाय॑ क्षिती॒नाम्। स॒ नः॑ पर्॒ष.द॒ति॒ द्विषः।। 1।।

卐 यो रक्षां॑सि नि॒जूर्व॑- त्य॒ग्नि. स्ति॒ग्मेन॑ शो॒चिषा॑। स॒ नः॑ पर्॒ष.द॒ति॒ द्विष॑ः।। 2।।

卐 य॒ः पर॑स्या॒ः परा॒वत॑- स्ति॒रो धन्वा॑ऽति॒रोच॑ते। स॒ नः॑ पर्॒ष.द॒ति॒ द्विष॑ः।। 3।।

卐 यो विश्वा॒ऽभि वि॒पश्य॑ति॒- भुव॑ना॒ सञ्च॒ पश्य॑ति। स॒ नः॑ पर्॒ष.द॒ति॒ द्विष॑ः।। 4।।

卐 यो अ॒स्य पा॒रे रज॑स-श्शु॒क्रो अ॒ग्नि.रजा॑यत। स॒ नः॑ पर्॒ष.द॒ति॒ द्विषः।। 5।।-

06-04-04 (1-3 तृचस्यास्य सूक्तस्य कौशिक ऋषिः। वैश्वानरो देवता।गायत्री छन्दः।।) वैश्वानरः

卐 वैश्वानरो न^ ऊतय^- आ प्र यातु परावतः। अग्नि.र्न स्सुष्टुती. रुप।।

1।।

卐 वैश्वानरो न^ आऽगम- दिमँ यज्ञं सजू.रुप। अग्नि. रुक्थेष्वंहसु।। 2।।

卐 वैश्वानरोऽङ्गिरसां- स्तोम. मुक्थञ्च चाऽक्लृपत्। ऐषु द्युम्नं स्व.र्यमत्।।

3।।-

06-04-05 (1-3 तृचस्यास्य सूक्तस्याथर्वा ऋषिः। अग्निर्देवता। गायत्री छन्दः।।) वैश्वानरः

卐 ऋतावानँ वैश्वानर- मृतस्य ज्योतिष.स्पतिम्। अजस्र. ङ्घर्म.मीमहे।।

1।।

卐 स^ विश्वा प्रति चाक्लृप- ऋतू१ रुत्सृजते वशी। यज्ञस्य वय^ उत्तिरन्न्।।

2।।

卐 अग्निः परेषु धामसु- कामो भूतस्य भव्यस्य। सम्रा.डेको वि राजति।।

3।।-

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

☫ 06-04-06 (1-3 तृचस्यास्य सूक्तस्याथर्वा ऋषिः। चन्द्रमा देवता। अनुष्टुप् छन्दः।।) ❃ शापनाशनम्

卐 उप प्राऽगा.त्सहस्राक्षो- युक्त्वा शपथो रथम्। शप्तार. मन्विच्छ.न्मम- वृक^ इवाऽविमतो गृहम्।। 1।।

卐 परि णो वृङ्धि शपथ- ह्रद. मग्नि. रिवाऽऽदहन्न्। शप्तार. मत्र नो जहि- दिवो वृक्ष.मिवाऽशनिः।। 2।।

卐 यो न.श्शपा. दशपत- श्शपतो यश्च न.श्शपात्। शुने पेष्ट्र.मिवाऽवक्षाम- न्तं प्रत्यस्यामि मृत्यवे।। 3।।-

☫ 06-04-07 (1-4 चतुर्ऋचस्या सूक्तस्याथर्वा ऋषिः। बृहस्पतिस्त्विषिर्वा देवता। त्रिष्टुप् छन्दः।।) ❃ वर्चस्यम्

卐 सिंहे व्याघ्र^ उत या पृदाकौ- त्विषि. रग्नौ ब्राह्मणे सूर्ये या। इन्द्रँ या देवी सुभगा जजान- सा न^ ऐतु वर्चसा सँविदाना।।

卐 या हस्तिनि द्वीपिनि या हिरण्ये- त्विषि. रप्सु गोषु या पुरुषेषु। इन्द्रँ या देवी सुभगा जजान- सा न^ ऐतु वर्चसा सँविदाना।। 2।।

卐 रथे अक्षेष्वृषभस्य वाजे- वाते पर्जन्ये वरुणस्य शुष्मे। इन्द्रँ या देवी सुभगा जजान- सा न^ ऐतु वर्चसा सँविदाना।। 3।।

卐 राजन्ये दुन्दुभा.वायताया- मश्वस्य वाजे पुरुषस्य मायौ। इन्द्रँ या देवी सुभगा जजान- सा न^ ऐतु वर्चसा सँविदाना।। 4।।-

06-04-08 (1-3 तृचस्यास्य सूक्तस्याथर्वा ऋषिः। बृहस्पतिर्देवता। 1 प्रथमर्चो जगती 2 द्वितीयायास्त्रिष्टुप् 3 तृतीयायाश्चानुष्टुप् छन्दांसि।।) ❃ वर्चस्यम्

卐 यशो हवि. र्वर्धता. मिन्द्रजूतं- सहस्रवीर्यं सुभृतं सहस्कृतम्। प्रसस्राण. मनु दीर्घाय चक्षसे- हविष्मन्तं मा वर्धय ज्येष्ठतातये।। 1।।

卐 अच्छा न इन्द्रँ यशसँ यशोभि- र्यशस्विनं नमसाना^ विधेम। स^ नो रास्व राष्ट्र. मिन्द्रजूत- न्तस्य ते रातौ यशस. स्स्याम।। 2।।

卐 यशा^ इन्द्रो यशा^ अग्नि- र्यशा. स्सोमो अजायत। यशा^ विश्वस्य भूतस्या-ऽह.मस्मि यशस्तमः।। 3।।-

06-04-09 (1-3 तृचस्यास्य सूक्तस्याथर्वा ऋषिः। 1-2 प्रथमाद्वितीययोर्ऋचोर्मन्त्रोक्ताः 3 तृतीयायाश्चेन्द्रो देवताः। 1-2 प्रथमाद्वितीययोर्जगती 3 तृतीयायाश्चनुष्टुप् छन्दांसी।।) ❃ अभयम्

卐 अभय. न्द्यावापृथिवी~ इहास्तु नो-ऽभयं सोम. स्सविता नः कृणोतु। अभय. न्नोऽस्तूर्व1(अ)न्तरिक्षं- सप्तऋषीणाञ्च हविषाऽभय.न्नो अस्तु।। 1।।

卐 अस्मै ग्रामाय प्रदिश. श्चतस्र^- ऊर्जं सुभूतं स्वस्ति सविता नः कृणोतु। अशत्रिन्द्रो अभय.न्नः कृणो- त्वन्यत्र राज्ञा.मभि यातु मन्युः।। 2।।

卐 अनमित्र.न्नो अधरा- दनमित्र.न्न^ उत्तरात्। इन्द्राऽनमित्र.न्नः पश्चा- दनमित्रं पुर.स्कृधि।। 3।।-

06-04-10 (1-3 तृचस्यास्य सूक्तस्य ब्रह्मा ऋषिः। मन्त्रोक्ताश्चन्द्रमा वा देवता।1 प्रथमर्चो भुरिगनुष्टुप् 2 द्वितीयाया अनुष्टुप् 3 तृतीयायाश्च त्रिष्टुप् छन्दांसि।।) ❃ दूर्घायुःप्राप्तिः

卐 मनसे चेतसे धिय^- आकूतय^ उत चित्तये। मत्यै श्रुताय चक्षसे- विधेम हविषा वयम्।। 1।।

卐 अपानाय व्यानाय- प्राणाय भूरि धायसे। सरस्वत्या उरुव्यचे- विधेम हविषा वयम्।। 2।।

卐 मा नो हासिषुर् ऋषयो दैव्या^- ये तनूपा ये न.स्तन्व. स्तनूजाः। अमर्त्या^ मर्त्याँ अभि न.स्सचध्व- मायु. र्धत्त प्रतर. ञ्जीवसे नः।। 3।।

# षष्ठ काण्डे पञ्चमोऽनुवाकः

06-05-01 (1-3 तृचस्यास्य सूक्तस्य भृग्वङ्गिरा ऋषिः। मन्युर्देवता। 1-2 प्रथमाद्वितीययोर्ऋचोर्भुरिगनुष्टुप् 3 तृतीयायाश्चनुष्टुप् छन्दांसी।।) परस्परचित्तैकीकरणम्

卐 अव ज्या.मिव धन्वनो- मन्यु. न्तनोमि ते हृदः। यथा संमनसौ भूत्वा- सखाया.विव सचावहै।। 1।।

卐 सखाया.विव सचावहा- अव मन्यु. न्तनोमि ते। अध.स्ते अश्मनो मन्यु- मुपास्यामसि यो गुरुः।। 2।।

卐 अभि तिष्ठामि ते मन्युं- पार्ष्ण्या प्रपदेन च। यथा वशो न वादिषो- मम चित्त. मुपायसि।। 3।।-

06-05-02 (1-3 तृचस्यास्य सूक्तस्य भृग्वङ्गिरा ऋषिः। मन्युशमनं देवता। अनुष्टुप् छन्दः।।) मन्युशमनम्

卐 अय. न्दर्भो विमन्युक- स्स्वाय चारणाय च। मन्यो. र्विमन्युकस्याऽयं मन्युशमन^ उच्यते।। 1।।

卐 अयँ यो भूरिमूल- स्समुद्र. मवतिष्ठति। दर्भः पृथिव्या^ उत्थितो- मन्युशमन^ उच्यते।। 2।।

卐 वि ते हनव्यां शरणिँ- वि ते मुख्या. न्नयामसि। यथा वशो न वादिषो- मम चित्त. मुपायसि।। 3।।-

☃ 06-05-03 (1-3 तृचस्यास्य सूक्तस्य विश्वामित्र ऋषिः। मन्त्रोक्ता वनस्पतिर्वा देवता। 1-2 प्रथमाद्वितीययोर्ऋचोरनुष्टुप् 3 तृतीयायाश्च त्रिपदा महाबृहती छन्दसी।।) ❃ रोगनाशनम्

卐 अस्था.द्यौ. रस्था. त्पृथि-व्यस्था. द्विश्वं. मिद. ञ्जगत्। अस्थु. वृक्षा^ ऊर्ध्वस्वप्ना- स्तिष्ठा. द्रोगो अय. न्तव।। 1।।

卐 शतँ या भेषजानि ते- सहस्रं सङ्गतानि च। श्रेष्ठ. मास्रावभेषजं- वसिष्ठं रोगनाशनम्।। 2।।

卐 रुद्रस्य मूत्र म-स्यमृतस्य नाभिः। विषाणका नाम वा असि- पितॄणां मूला. दुत्थिता- वातीकृतनाशनी।। 3।।-

☃ 06-05-04 (1-3 तृचस्यास्य सूक्तस्याङ्गिरसः प्रचेता यमश्च ऋषयः। दुःस्वप्नाशनं देवता। 1 प्रथमर्चः पथ्यापङ्क्तिः 2 द्वितीयाया भुरिक्त्रिष्टुप् 3 तृतीयायाश्चानुष्टुप् छन्दांसि।।) ❃ दुस्स्वप्ननाशनम्

卐 परोऽपेहि मनस्पाप- कि.मशस्तानि शंससि। परेहि न त्वा कामये- वृक्षाँ वनानि सञ्चर- गृहेषु गोषु मे मनः।। 1।। (पापनाशनम्)

卐 अवशसा निश्शसा य.त्पराश-सोपाऽऽरिम जाग्रतो यत्स्वपन्तः। अग्नि. र्विश्वा. न्यप दुष्कृता.न्यजुष्टा-न्यारे अस्म. द्दधातु।। 2।।

卐 यदिन्द्र ब्रह्मणस्पते-ऽपि मृषा चरामसि। प्रचेता^ न आङ्गिरसो- दुरिता. त्पात्वंहसः।। 3।।-

06-05-05 (1-3 तृचस्यास्य सूक्तस्याङ्गिरसः प्रचेता यमश्च ऋषयः। दुःस्वप्नाशनं स्वप्नो वा देवता। 1 प्रथमर्चः ककुम्मती विष्टारपङ्क्तिः 2 द्वितीयायास्त्र्यवसावना पञ्चपदा शक्करीगर्भा जगती 3 तृतीयायाश्चानुष्टुप् छन्दांसि।।) ❀ दुस्स्वप्ननाशनम्

卐 यो न जीवोऽसि न मृतो- देवाना. ममृतगर्भोऽसि स्वप्न। वरुणानी ते माता- यमः पिताऽररु. र्नामाऽसि।। 1।।

卐 विद्म ते स्वप्न जनित्र- न्देवजामीनां पुत्रोऽसि यमस्य करणः। अन्तकोऽसि मृत्यु. रसि। तन्त्वा स्वप्न तथा सँ विद्म- स^ न.स्स्वप्न दुष्वप्न्या. त्पाहि।। 2।।

卐 यथा कलाँ यथा शफँ- यथर्णं सन्नयन्ति। एवा दुष्वप्न्यं सर्व- न्द्विषते स.न्नयामसि।। 3।।-

06-05-06 (1-3 तृचस्यास्य सूक्तस्याङ्गिरसः प्रचेता यमश्च ऋषयः। 1 प्रथमर्चोऽग्निः 2 द्वितीयाया विश्वे देवाः 3 तृतीयायाश्च सौधन्वना देवताः। त्रिष्टुप् छन्दः।।) ❀ दीर्घायुःप्राप्तिः

卐 अग्निः प्रातस्सवने पा.त्वस्मान्- वैश्वानरो विश्वकृ. द्विश्वशम्भूः। स^ नः पावको द्रविणे दधा- त्वायुष्मन्त. स्सहभक्षा. स्स्याम।। 1।।

卐 विश्वे देवा^ मरुत^ इन्द्रो अस्मा- नस्मि. न्द्वितीये सवने न जह्युः। आयुष्मन्तः प्रिय.मेषाँ वदन्तो- वय. न्देवानां सुमतौ स्याम।। 2।।

卐 इद. न्तृतीयं सवन.ङ्कवीना- मृतेन ये चमस. मैरयन्त। ते सौधन्वना.

स्स्व.रानशाना-स्स्विष्टि.न्नो अभि वस्यो नयन्तु।। 3।।-

☫ 06-05-07 (1-3 तृचस्यास्य सूक्तस्याङ्गिरसः प्रचेता यमश्च ऋषयः। मन्त्रोक्ता देवताः। उष्णिक् छन्दः।।) ❃ स्वस्तिवाचनम्

卐 श्येनोऽसि गायत्रच्छन्दा^- अनु त्वाऽऽ रभे। स्वस्ति मा सँ वहा-ऽस्य

यज्ञस्योदृचि स्वाहा।। 1।।

卐 ऋभु.रसि जगच्छन्दा^- अनु त्वाऽऽ रभे। स्वस्ति मा सँ वहा-ऽस्य

यज्ञस्योदृचि स्वाहा।। 2।।

卐 वृषाऽसि त्रिष्टुप्छन्दा^- अनु त्वाऽऽ रभे। स्वस्ति मा सँ वहा-ऽस्य

यज्ञस्योदृचि स्वाहा।। 3।।-

☫ 06-05-08 (1-3 तृचस्यास्य सूक्तस्य गार्ग्य ऋषिः। अग्निर्देवता। 1 प्रथमर्चोऽनुष्टुप् 2 द्वितीयाया जगती 3 तृतीयायाश्च विराड्जगती छन्दांसि।।) ❃ अग्निस्तवः

卐 नहि ते अग्ने तन्वः- क्रूर. मानंश मर्त्यः। कपि. र्बभस्ति तेजनं-

स्व.ञ्जरायु गौ.रिव।। 1।।

卐 मेष^इव वै सञ्च वि चोर्वच्यसे- य.दुत्तरद्रा. वुपरश्च खादतः। शीर्ष्णा

शिरोऽप्ससाप्सो अर्दय- न्नंशू. न्बभस्ति हरितेभि. रासभिः।। 2।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

卐 सुपर्णा^ वाच मक्रतोप द्य-व्याखरे कृष्णा^ इषिरा^ अनर्तिषुः। नि यन्निय.
न्त्युपरस्य निष्कृतिं- पुरू रेतो दधिरे सूर्यश्रितः।। 3।।-

06-05-09 (1-3 तृचस्यास्य सूक्तस्याथर्वा ऋषिः। अश्विनौ देवते। 1 प्रथमर्चो विराड्जगती 2-3 द्वितीयातृतीययोश्च पथ्यापङ्क्तिश्छन्दसी।।) अभययाचना

卐 हत. न्तर्दं समङ्क. माखु. मश्विना- छिन्तं शिरो अपि पृष्टी. श्शृणीतम्।
यवा. ?न्नेददा. नपि नह्यतं मुख- मथाऽभय.ङ्कृणुत.न्धान्याय।। 1।।

卐 तर्द है पतङ्ग है- जभ्य हा उप क्वस। ब्रह्मेवाऽसंस्थितं हवि- रनदन्त^
इमान् यवा- नहिंसन्तो अपोदित।। 2।।

卐 तर्दापते वघापते- तृष्टजम्भा^ आ शृणोत मे। य आरण्या^ व्यद्वरा^- ये के
च स्थ व्यद्वरा^- स्ता.न्त्सर्वा.न्जम्भयामसि।। 3।।-

06-05-10 (1-3 तृचस्यास्य सूक्तस्य शन्तातिर्ऋषिः। 1-2 प्रथमाद्वितीययोरापः 3 तृतीयायाश्च वरुणो देवताः। प्रथमर्चो गायत्री 2 द्वितीयायास्त्रिष्टुप् 3 तृतीयायाश्च जगती छन्दांसि।।) एनोनाशनम्

卐 वायोꣳ पूतꣳ पवित्रेण- प्रत्य.ङ्क्सोमो अतिद्रुतः। इन्द्रस्य युज्य. स्सखा।।
1।।

卐 आपो अस्मा. न्मातर. स्सूदयन्तु- घृतेन नो घृतप्वꣳ पुनन्तु। विश्वं हि
रिप्रं प्रवहन्ति देवी- रु.दि.दाभ्य. श्शुचि.रा पूत^ एमि।। 2।।

卐 यत्किञ्चेदं वरुण दैव्ये- जनेऽभिद्रोहं मनुष्या3(आ)श्चरन्ति। अचित्त्या चे.त्तव धर्मा युयोपिम- मा न.स्तस्मा देनसो देव रीरिषः।। 3।।-

## ≋◊≋ षष्ठ काण्डे षष्ठोऽनुवाकः

06-06-01 (1-3 तृचस्यास्य सूक्तस्य भागलिर्ऋषिः।मन्त्रोक्ता देवताः। अनुष्टुप् छन्दः।।) ❀ भैषज्म्

卐 उत्सूर्यो दिव^ एति- पुरो रक्षांसि निजूर्वन्न्। आदित्य꣫ पर्वतेभ्यो- विश्वदृष्टो अदृष्टहा।। 1।।

卐 नि गावो गोष्ठे असद्- न्नि मृगासो अविक्षत। न्यू3(ऊ)र्मयो नदीना- न्न्य1(अ)दृष्टा^ अलिप्सत।। 2।।

卐 आयुर्ददं विपश्चितं- श्रुता.ङ्कण्वस्य वीरुधम्। आऽभारिषं विश्वभेषजी- मस्यादृष्टा. न्नि शमयत्।। 3।।-?

06-06-02

卐 द्यौश्च म इदं पृथिवी च प्रचेतसौ- शुक्रो बृह.न्दक्षिणया पिपर्तु। अनु स्वधा चिकितां सोमो अग्नि- र्वायु.र्न꣫ पातु सविता भगश्च।। 1।।

卐 पुन꣫ प्राण꣫ पुन. रात्मा न^ ऐतु- पुन. श्चक्षु꣫ पुन. रसु.र्न^ ऐतु। वैश्वानरो नो अदब्ध. स्तनूपा^- अन्त. स्तिष्ठाति दुरितानि विश्वा।। 2।।

卐 सँ वर्चसा पयसा स.न्तनूभि- रगन्महि मनसा सं शिवेन। त्वष्टा नो अत्र वरीयः कृणो-त्वनु नो मार्ष्टु तन्वो3(ओ) य.द्विरिष्टम्।। 3।।-

06-06-03

卐 इद.न्त.द्युज^ उत्तर- मिन्द्रं शुम्भा.म्यष्टये। अस्य क्षत्रं श्रियं महीं- वृष्टि.रिव वर्धया तृणम्।। 1।।

卐 अस्मै क्षत्र. मग्नीषोमा-वस्मै धारयतं रयिम्। इमं राष्ट्रस्याऽभीवर्गे- कृणुतँ युज^ उत्तरम्।। 2।।

卐 सबन्धु. श्चाऽसबन्धुश्च- यो अस्मा॑ अभिदासति। सर्व.न्तं रन्धयासि मे- यजमानाय सुन्वते।। 3।।-

06-06-04

卐 ये पन्थानो बहवो देवयाना^- अन्तरा द्यावापृथिवी~ सञ्चरन्ति। तेषा. मज्यानिँ यतमो वहाति- तस्मै मा देवाः परि धत्तेह सर्वे।। 1।।

卐 ग्रीष्मो हेमन्त. श्शिशिरो वसन्त- श्शर.द्वर्षा. स्स्विते नो दधात। आ नो गोषु भजता ऽऽ प्रजाया- न्निवात इ.द्व. श्शरणे स्याम।। 2।।

卐 इदावत्सराय परिवत्सराय- सँवत्सराय कृणुता बृह.न्नमः। तेषाँ वयं सुमतौ यज्ञियाना- मपि भद्रे सौमनसे स्याम।। 3।।-

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

06-06-05

卐 मा नो देवा^ अहिः वधी-त्सतोका. न्त्सहपूरुषान्। सँयत.न्न विष्पर.द्व्यात्त-न्न सँयम. न्नमो देवजनेभ्यः।। 1।।

卐 नमोऽस्त्वसिताय- नम. स्तिरश्चिराजये। स्वजाय बभ्रवे नमो- नमो देवजनेभ्यः।। 2।।

卐 सन्ते हन्मि दता दत- स्स.मु ते हन्वा हनू। सन्ते जिह्वया जिह्वां- सम्वास्नाह आस्यम्।। 3।।-

06-06-06

卐 इद. मि.द्वा उ भेषज- मिदं रुद्रस्य भेषजम्। येनेषु. मेकतेजनां- शतशल्या. मपब्रवत्।। 1।।

卐 जालाषेणाभि.षिञ्चत- जालाषेणोप सिञ्चत। जालाष. मुग्रं भेषज- न्तेन नो मृड जीवसे।। 2।।

卐 शञ्च नो मयश्च नो- मा च नः किञ्च नाऽऽममत्। क्षमा रपो विश्वन्नो अस्तु भेषजं- सर्वन्नो अस्तु भेषजम्।। 3।।-

06-06-07

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 यशसं मेन्द्रो मघवा. न्कृणोतु- यशस. न्द्यावापृथिवी~ उभे~ इमे~।
यशसं मा देव. स्सविता कृणोतु- प्रियो दातु. र्दक्षिणाया^ इह स्याम्।। 1।।

卐 यथेन्द्रो द्यावापृथिव्यो. र्यशस्वान्- यथाऽऽप^ ओषधीषु यशस्वतीः। एवा
विश्वेषु देवेषु- वयं सर्वेषु यशस. स्स्याम।। 2।।

卐 यशा^ इन्द्रो यशा^ अग्नि- र्यशा. स्सोमो अजायत। यशा^ विश्वस्य
भूतस्या-ऽह. मस्मि यशस्तमः।। 3।।-

06-06-08

卐 अनडुद्ध्य.स्त्वं प्रथम- न्धेनुभ्य.स्त्व. मरुन्धति। अधेनवे वयसे- शर्म
यच्छ चतुष्पदे।। 1।।

卐 शर्म यच्छ त्वोषधि- स्सह देवी. ररुन्धती। कर.त्पयस्वन्त.ङ्गोष्ठ-
मयक्ष्माँ उत पूरुषान्।। 2।।

卐 विश्वरूपां सुभगा- मच्छा वदामि जीवलाम्। सा नो रुद्रस्याऽस्तां हेति-
न्दूर. न्नयतु गोभ्यः।। 3।।-

06-06-09

卐 अय. माया.त्यर्यमा- पुरस्ता. द्विषितस्तुपः। अस्या इच्छ. न्नग्रुवै पति.-
मुत जाया. मजानये।। 1।।

卐 अश्रम. दिय. मर्यम- न्नन्यासां समनँ यती। अङ्गो न्वर्यम. न्नस्या-? अन्या. स्समन. मायति।। 2।।

卐 धाता दाधार पृथिवी- न्धाता द्या. मुत सूर्यम्। धाताऽस्या अग्रुवै पति- न्दधातु प्रतिकाम्यम्।। 3।।-

06-06-10

卐 मह्य. मापो मधुम. देरयन्तां- मह्यं सूरो अभर. ज्ज्योतिषे कम्। मह्य. न्देवा^ उत विश्वे तपोजा^- मह्य.न्देव. स्सविता व्यचो धात्।। 1।।

卐 अहँ विवेच पृथिवी. मुत द्या-मह. मृतू॰ रजनयं सप्त साकम्। अहं सत्य. मनृतँ यद्वदा-म्यह. न्दैवीं परि वाचँ विशश्च।। 2।।

卐 अह.ञ्जजान पृथिवी. मुत द्या-मह. मृतू॰ रजनयं सप्त सिन्धून्। अहं सत्य. मनृतँ यद्वदामि- यो अग्नीषोमा.वजुषे सखाया।। 3।।

## षष्ठ काण्डे सप्तमोऽनुवाकः

06-07-01

卐 वैश्वानरो रश्मिभि र्न॰ पुनातु- वात॰ प्राणेनेषिरो नभोभिः। द्यावापृथिवी~ पयसा पयस्वती~- ऋतावरी~ यज्ञिये~ न॰ पुनीताम्।। 1।।

卐 वैश्वानरीं सूनृता.मा रभध्वँ- यस्या^ आशा. स्तन्वो वीतपृष्ठाः। तया गृणन्त. स्सधमादेषु- वयं स्याम पतयो रयीणाम्।। 2।।

卐 वैश्वानरीँ वर्चस^ आ रभध्वं- शुद्धा^ भवन्त. श्शुचयः पावकाः। इहेडया सधमादं मदन्तो- ज्योक्पश्येम सूर्य. मुच्चरन्तम्।। 3।।-

06-07-02

卐 यत्ते देवी निरृऋति. राबबन्ध- दाम ग्रीवास्वविमोक्यँ यत्। तत्ते विष्या.म्यायुषे वर्चसे- बलायाऽदोमद. मन्न. मद्धि प्रसूतः।। 1।।

卐 नमोऽस्तु ते निरृऋते तिग्मतेजो-ऽयस्मयान् वि चृता बन्धपाशान्। यमो मह्यं पुन.रित्त्वा. न्ददाति- तस्मै यमाय नमो अस्तु मृत्यवे।। 2।।

卐 अयस्मये द्रुपदे बेधिष इहा-ऽभिहितो मृत्युभि. र्ये सहस्रम्। यमेन त्वं पितृभि. स्सँविदान^- उत्तम. न्नाक. मधि रोहयेमम्।। 3।।

卐 संस मिद्युवसे वृष- न्नग्ने विश्वा.न्यर्य^ आ। इड. स्पदे समिध्यसे- स^ नो वसू.न्या भर।। 4।।-

06-07-03

卐 सञ्ज्ञानीध्वं सं पृच्यध्वं- सँ वो मनांसि जानताम्। देवा^ भागँ यथा पूर्वे- सञ्ज्ञानाना^ उपाऽऽसते।। 1।।

卐 समानो मन्त्र. स्समिति. स्समानी- समानँ व्रतं सह चित्त. मेषाम्।
समानेन वो हविषा जुहोमि- समान. श्चेतो अभिसँविशध्वम्।। 2।।
卐 समानी व^ आकूति- स्समाना हृदयानि वः। समान. मस्तु वो मनो-
यथा व.स्सुसहाऽसति।। 3।।-

06-07-04

卐 अव मन्यु. रवायता-ऽव बाहू~ मनोयुजा। पराशर त्व.न्तेषां- पराञ्चं
शुष्म मर्दया-धा नो रयि.मा कृधि।। 1।।
卐 निर्हस्तेभ्यो नैर्हस्तँ- य.न्देवा. श्शरु. मस्यथ। वृश्चामि शत्रूणां बाहू-
ननेन हविषाऽहम्।। 2।।
卐 इन्द्र.श्चकार प्रथम- न्नैर्हस्त मसुरेभ्यः। जयन्तु सत्वानो मम-
स्थिरेणेन्द्रेण मेदिना।। 3।।-

06-07-05

卐 निर्हस्त. श्शत्रु. रभिदास. न्नस्तु- ये सेनाभि. र्युध. माय.न्त्यस्मान्।
समर्पयेन्द्र महता वधेन- द्रात्वेषा. मघहारो विविद्धः।। 1।।
卐 आतन्वाना^ आयच्छन्तो-ऽस्यन्तो ये च धावथ। निर्हस्ता. श्शत्रव.
स्स्थ-नेन्द्रो वोऽद्य पराशरीत्।। 2।।

卐 निरूहस्ता. स्सन्तु शत्रवो-ऽङ्गैषां म्लापयामसि। अथैषा. मिन्द्र वेदांसि-
शतशो वि भजामहै।। 3।।-

06-07-06

卐 परि वर्त्मानि सर्वत^- इन्द्रः॰ पूषा च सस्रतुः। मुह्य.न्त्वद्या॰मू. स्सेना-
अमित्राणां परस्तराम्।। 1।।

卐 मूढा^ अमित्रा. श्चरता-ऽशीर्षाण इवाहयः। तेषाँ वो अग्निमूढाना-
मिन्द्रो हन्तु वरँवरम्।। 2।।

卐 ऐषु नह्य वृषाजिनं- हरिणस्या भिय.ङ्कृधि। परा.ङमित्र^ एष- त्वर्वाची
गौ.रुपेषतु।। 3।।-

06-07-07

卐 आऽय. मग.न्त्सविता क्षुरे-णोष्णेन वाय उदकेनेहि। आदित्या^ रुद्रा^
वसव^ उन्दन्तु सचेतस- स्सोमस्य राज्ञो वपत प्रचेतसः।। 1।।

卐 अदिति. श्श्मश्रु वप-त्वाप^ उन्दन्तु वर्चसा। चिकित्सतु प्रजापति-
दीर्घायुत्वाय चक्षसे।। 2।।

卐 येनाऽवप.त्सविता क्षुरेण- सोमस्य राज्ञो वरुणस्य विद्वान्। तेन ब्रह्माणो
वपतेद मस्य- गोमा नश्ववा. नय. मस्तु प्रजावान्।। 3।।-

☸ 06-07-08

卐 गिरावरगराटेषु- हिरण्ये गोषु यद्यशः। सुरायां सिच्यमानाया- ङ्कीलाले मधु तन्मयि।। 1।।

卐 अश्विना सारघेण मा- मधुनाऽङ्क्तं शुभस्पती~। यथा भर्गस्वतीँ वाच- मावदानि जनाँ॒ अनु।। 2।।

卐 मयि वर्चो अथो~ यशो-ऽथो~ यज्ञस्य यत्पयः। तन्मयि प्रजापति- र्दिवि द्यामिव दृंहतु।। 3।।-

☸ 06-07-09

卐 यथा मांसँ यथा सुरा- यथाऽक्षा^ अधिदेवने। यथा पुंसो वृषण्यत- स्त्रिया. न्निहन्यते मनः। एवा ते अघ्न्ये मनो-ऽधि वत्से नि हन्यताम्।। 1।।

卐 यथा हस्ती हस्तिन्याः- पदेन पद. मुद्युजे। यथा पुंसो वृषण्यत- स्त्रिया. न्निहन्यते मनः। एवा ते अघ्न्ये मनो-ऽधि वत्से नि हन्यताम्।। 2।।

卐 यथा प्रधि. र्यथोपधि- र्यथा नभ्यं प्रधा.वधि। यथा पुंसो वृषण्यत- स्त्रिया. न्निहन्यते मनः। एवा ते अघ्न्ये मनो-ऽधि वत्से नि हन्यताम्।। 3।।-

☸ 06-07-10

卐 यदन्न. मद्मि बहुधा विरूपं- हिरण्य. मश्व. मुत गा. मजा. मविम्। यदेव किञ्च प्रतिजग्रहाऽह- मग्नि.ष्टद्धोता सुहुत. ङ्कृणोतु।। 1।।

卐 यन्मा हुत. महुत. माजगाम- दत्तं पितृभि. रनुमतं मनुष्यैः। यस्मा.न्मे मन^ उदिव रारजी- त्यग्नि. ष्टद्धोता सुहुत. ङ्कृणोतु।। 2।।

卐 यदन्न. मद्म्यनृतेन देवा^- दास्य. न्नदास्य. न्नुत सङ्गृणामि। वैश्वानरस्य महतो महिम्ना- शिवं मह्यं मधुम. दस्त्वन्नम्।। 3।। (आहार जीर्ण मन्त्रः)

06-07-11

卐 यथाऽसितः प्रथयते वशाँ॒ अनु- वपूंषि कृण्व. न्नसुरस्य मायया। एवा ते शेप. स्सहसाऽय. मर्कोऽङ्गेनाङ्गं संसमक. ङ्कृणोतु।। 1।। (वाजीकरण तृचः)

卐 यथा पस. स्तायादरँ- वातेन स्थूलभ.ङ्कृतम्। याव. त्परस्वतः पस-स्तावत्ते वर्धतां पसः।। 2।।

卐 यावदङ्गीनं पारस्वतं- हास्तिनं गार्दभञ्च यत्। याव.दश्वस्य वाजिन-स्तावत्ते वर्धतां पसः।। 3।।

## षष्ठ काण्डे अष्टमोऽनुवाकः

06-08-01

卐 एह यातु वरुण. स्सोमो अग्नि- र्बृहस्पति. र्वसुभि. रेह यातु। अस्य श्रिय. मुपसँयात सर्व -उग्रस्य चेत्तु. स्संमनस. स्सजाताः।। 1।।

卐 यो व. श्शुष्मो हृदयेष्वन्त- राकूति. र्या वो मनसि प्रविष्टा। ता.न्त्सीवयामि हविषा घृतेन- मयि सजाता रमति.र्वो अस्तु।। 2।। (बन्धु प्रसादार्थः मन्त्रः)

卐 इहैव स्त. माऽप याताऽध्यस्म- त्पूषा परस्ता. दपथँ वꣳ कृणोतु। वास्तोष्पति. रनु वो जोहवीतु- मयि सजाता रमति.र्वो अस्तु।। 3।।(बन्धु प्रसादार्थः मन्त्रः)

06-08-02

卐 सँ वꣳ पृच्यन्तां तन्व1(अ)- स्सं मनांसि समु व्रता। सँ वोऽयं ब्रह्मणस्पति- र्भग. स्सँ वो अजीगमत्।। 1।।

卐 संज्ञपनँ वो मनसो-ऽथो~ संज्ञपनं हृदः। अथो~ भगस्य यच्छ्रान्त- न्तेन सञ्ज्ञपयामि वः।। 2।।

卐 यथाऽऽदित्या वसुभि. स्सम्बभूवु- र्मरुद्भि. रुग्रा^ अहृणीयमानाः। एवा त्रिणाम. न्नहृणीयमान- इमा. न्जना. न्त्संमनस.स्कृधीह।। 3।।-

06-08-03

卐 नि.रमु.न्नुद ओकस- स्सपत्नो यः पृतन्यति। नैर्बाध्येन हवि-षेन्द्र^ एनं पराशरीत्।। 1।।

卐 परमा.न्तं परावत- मिन्द्रो नुदतु वृत्रहा। यतो न पुन. राऽयति- शश्वतीभ्य. स्समाभ्यः।। 2।।

卐 एतु तिस्रः परावत^- एतु पञ्च जनाः अति। एतु तिस्रोऽति रोचना- यतो न पुन.राऽयति- शश्वतीभ्य. स्समाभ्यो- याव.त्सूर्यो अस.द्दिवि।। 3।।-

06-08-04

卐 य एनं परिषीदन्ति- समादधति चक्षसे। संप्रेद्धो अग्नि. र्जिह्वाभि- रुदेतु हृदया. दधि।। 1।।

卐 अग्ने. स्सान्तपनस्या-ऽह. मायुषे पद. मारभे। अद्धाति. र्यस्य पश्यति- धूम. मुद्यन्त. मास्यतः।। 2।।

卐 यो अस्य समिधँ वेद- क्षत्रियेण समाहिताम्। नाभि ह्वारे पद. न्नि दधाति- स^ मृत्यवे।। 3।।

卐 नैन. घ्नन्ति पर्यायिणो- न सन्नाः अव गच्छति। अग्ने.र्यः~ क्षत्रियो विद्वा- न्नाम गृह्णा.त्यायुषे।। 4।।-

☸ 06-08-05

卐 अस्था. द्यौ. रस्था. त्पृथि-व्यस्था. द्विश्व. मिद. ञ्जगत्। आस्थाने पर्वता^ अस्थु- स्स्थाम्यश्वा॰ अतिष्ठिपम्।। 1।।

卐 य^ उदान.ड्परायणँ- य^ उदान.ण्न्यायनम्। आवर्तन. न्निवर्तनँ- यो गोपा^ अपि तं हुवे।। 2।।

卐 जातवेदो नि वर्तय- शत.न्ते सन्त्वावृतः। सहस्त्र.न्त उपाऽऽवृत- स्ताभि.र्नः पुन.रा कृधि।। 3।।-

☸ 06-08-06

卐 तेन भूतेन हविषा-ऽय. माप्यायतां पुनः। जायाँ या.मस्मा आवाक्षु- स्तां रसेनाऽभि वर्धताम्।। 1।।

卐 अभि वर्धतां पयसा-ऽभि राष्ट्रेण वर्धताम्। रय्या सहस्त्रवर्च-सेमौ स्ता. मनुपक्षितौ।। 2।।

卐 त्वष्टा जाया. मजनय- त्त्वष्टाऽस्यै त्वां पतिम्। त्वष्टा सहस्त्र.मायूंषि- दीर्घ. मायुः कृणोतु वाम्।। 3।।-

☸ 06-08-07

Sri Ganapati Sachchidananda Avadhoota Dattapeetham • Mysore •

卐 अय.न्नो नभस.स्पति- स्संस्फानो अभि रक्षतु। असमाति. ङ्गृहेषु नः।।
1।।

卐 त्व.न्नो नभस.स्पत- ऊर्जं. ङ्गृहेषु धारय। आ पुष्ट. मेत्वा वसु।। 2।।

卐 देव संस्फान सहस्रा-ऽऽपोषस्येशिषे। तस्य नो रास्व- तस्य नो धेहि-
तस्य ते भक्तिवांस.स्स्याम।। 3।।-

06-08-08

卐 अन्तरिक्षेण पतति- विश्वा भूताऽवचाकशत्। शुनो दिव्यस्य यन्मह-
स्तेना ते हविषा विधेम।। 1।।

卐 ये त्रयः कालकाञ्जा- दिवि देवा इव श्रिताः। ता.न्त्सर्वा. नह्व ऊतये-
ऽस्मा अरिष्टतातये।। 2।।

卐 अप्सु ते जन्म दिवि ते सधस्थं- समुद्रे अन्त. र्महिमा ते पृथिव्याम्।
शुनो दिव्यस्य यन्मह- स्तेना ते हविषा विधेम।। 3।।-

06-08-09

卐 यन्ताऽसि यच्छसे हस्ता-वप रक्षांसि सेधसि। प्रजा.न्धनञ्च गृह्णानः-
परिहस्तो अभू.दयम्।। 1।।

卐 परिहस्त वि धारय- योनि.ङ्गर्भाय धातवे। मर्यादे पुत्र. मा धेहि- तन्त्व.मा गमयाऽऽगमे।। 2।।

卐 यं परिहस्त. मबिभ- रदितिः पुत्रकाम्या। त्वष्टा तमस्या^ आ ऽबध्ना- द्यथा पुत्र.ञ्जना.दिति।। 3।।-

06-08-10

卐 आगच्छत^ आगतस्य- नाम गृह्णा.म्यायतः। इन्द्रस्य वृत्रघ्नो वन्वे- वासवस्य शतक्रतोः।। 1।।

卐 येन सूर्यां सावित्री- मश्विनोहतुः पथा। तेन मा.मब्रवी. द्भगो- जाया.मा वहता.दिति।। 2।।

卐 यस्तेऽङ्कुशो वसुदानो- बृह.न्निन्द्र हिरण्ययः। तेना जनीयते जायां- मह्य. न्धेहि शचीपते।। 3।।-

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

## ಽ೦ಽ षष्ठ काण्डे नवमोऽनुवाकः

06-09-01

卐 अपचित॒ः प्र पतत- सुप॒र्णो व॒सते॒.रिव। सूर्यः कृ॒णोतु भेष॒ज- ञ्च॒न्द्रमा॒ वोऽपोच्छतु।। 1।।

卐 एन्येका॒ श्येन्येका- कृ॒ष्णैका॒ रोहि॒णी द्वे~। सर्वासा. मग्रभ॒. न्नामा- ऽवीरघ्नी॒. रपेतन।। 2।।

卐 अ॒सूतिका रामा॒य-ण्य॒पचि.त्प्र पतिष्यति। ग्लौ.रि॒तः प्र पतिष्यति॒- स गलु॒न्तो नशिष्यति।। 3।।

卐 वी॒हि स्वा. माहुति-ञ्जुषाणो मनसा॒ स्वाहा- मनसा॒ यदि॒द.ञ्जु॒होमि।। 4।।-

06-09-02

卐 यस्या. स्त आ॒सनि घो॒रे जु॒हो-म्ये॒षां ब॒द्धाना. मव॒सर्जना॒य कम्। भूमि॒. रिति त्वाऽभि॒ प्र मन्वते॒ जना॒- निर्ऋति॒ रिति त्वा॒ऽहं परि वेद स॒र्वतः।। 1।।

卐 भूते ह॒विष्मती भ-वै॒ष ते भा॒गो यो अ॒स्मासु। मुञ्चेमा. न॒मू. नेनस॒. स्स्वाहा।। 2।।

卐 एवो ष्व1(अ)स्म. न्निर्ऋते ऽनेहा- त्व.मयस्मयान् विचृता बन्धपाशान्।
यमो मह्यं पुन.रित्त्वा. न्ददाति- तस्मै यमाय नमो अस्तु मृत्यवे।। 3।।

卐 अयस्मये द्रुपदे बेधिष इहा-ऽभिहितो मृत्युभि.र्यै सहस्त्रम्। यमेन त्वं पितृभि. स्सँविदान^- उत्तम. न्नाक. मधि रोहयेमम्।। 4।।-

06-09-03

卐 वरणो वारयाता- अय. न्देवो वनस्पतिः। यक्ष्मो यो अस्मि. न्नाविष्ट-स्त.मु देवा^ अवीवरन्न्।। 1।।

卐 इन्द्रस्य वचसा वयं- मित्रस्य वरुणस्य च। देवानां सर्वेषाँ वाचा-यक्ष्म.न्ते वारयामहे।। 2।।

卐 यथा वृत्र^ इमा^ आप- स्तस्तम्भ विश्वधा यतीः। एवा ते अग्निना यक्ष्मँ-वैश्वानरेण वारये।। 3।।-

06-09-04

卐 वृषेन्द्रस्य वृषा दिवो- वृषा पृथिव्या^ अयम्। वृषा विश्वस्य भूतस्य-त्व.मेकवृषो भव।। 1।।

卐 समुद्र^ ईशे स्त्रवता-मग्निः पृथिव्या^ वशी। चन्द्रमा^ नक्षत्राणा.मीशे-त्व.मेकवृषो भव।। 2।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore SGS

卐 सम्रा.डस्यसुराणा-ङ्ककु.न्मनुष्याणाम्। देवाना.मर्धभागसि- त्व.मेकवृषो भव।। 3।।-

06-09-05

卐 आ त्वाऽहार्ष. मन्त.रभू- र्ध्रुव. स्तिष्ठाऽविचाचलत्। विश.स्त्वा सर्वा^ वाञ्छन्तु- मा त्व.द्राष्ट्र. मधि भ्रशत्।। 1।।

卐 इहैवैधि माऽपच्योष्ठाः- पर्वत^ इवाऽविचाचलत्। इन्द्र^इवेह ध्रुव. स्तिष्ठेह राष्ट्र.मु धारय।। 2।।

卐 इन्द्र^ एत. मदीधर- द्ध्रुव. न्ध्रुवेण हविषा। तस्मै सोमो अधि ब्रव- दयञ्च ब्रह्मणस्पतिः।। 3।।-

06-09-06

卐 ध्रुवा द्यौ.र्ध्रुवा पृथिवी- ध्रुवँ विश्व. मिद.ञ्जगत्। ध्रुवासः पर्वता^ इमे- ध्रुवो राजा विशा.मयम्।। 1।।

卐 ध्रुव.न्ते राजा वरुणो- ध्रुव.न्देवो बृहस्पतिः। ध्रुव.न्त इन्द्र श्चाऽग्निश्च- राष्ट्र. न्धारयता. न्ध्रुवम्।। 2।।

卐 ध्रुवोऽच्युतः प्र मृणीहि शत्रू-न्छत्रूयतोऽधरा. न्पादयस्व। सर्वा^ दिश. स्संमनस. स्सध्रीची- र्ध्रुवाय ते समितिः कल्पता. मिह।। 3।।-

06-09-07

卐 इदँ य.त्प्रेण्य. श्शिरो- दत्तं सोमेन वृष्ण्यम्। तत.स्परि प्रजातेन- हार्दि.न्ते शोचयामसि।। 1।।

卐 शोचयामसि ते हार्दि- शोचयामसि ते मनः। वात.न्धूम^ इव सध्र्य1(अ)-ङ्मा मेवाऽन्वेतु ते मनः।। 2।।

卐 मह्य.न्त्वा मित्रावरुणौ- मह्य. न्देवी सरस्वती। मह्यन्त्वा मध्यं भूम्या^- उभावन्तौ समस्यताम्।। 3।।-

06-09-08

卐 यान्ते रुद्र^ इषु. मास्य- दङ्गेभ्यो हृदयाय च। इद.न्ता. मद्य त्व.द्वयँ- विषूचीँ वि वृहामसि।। 1।।

卐 या.स्ते शत. न्धमनयो-ऽङ्गा.न्यनु विष्ठिताः। तासा.न्ते सर्वासाँ वय- न्नि.र्विषाणि ह्वयामसि।। 2।।

卐 नमस्ते रुद्रास्य ते- नमः प्रतिहितायै। नमो विसृज्यमानायै- नमो निपतितायै।। 3।।-

06-09-09

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 इमँ यव.मष्टायोगै- ष्षड्योगेभि. रचर्कृषुः। तेना ते तन्वो3(ओ)रपो-ऽपाचीन. मप व्यये।। 1।।

卐 न्य1(अ)ग्वातो वाति- न्यक्तपति सूर्यः। नीचीन. मघ्न्या दुहे- न्यग्भवतु ते रपः।। 2।।

卐 आप^ इद्वा उ भेषजी- रापो अमीवचातनीः। आपो विश्वस्य भेषजी-स्ता. स्ते कृण्वन्तु भेषजम्।। 3।।-

06-09-10

卐 वातरंहा^ भव वाजिन् युज्यमान^- इन्द्रस्य याहि प्रसवे मनोजवाः। युञ्जन्तु त्वा मरुतो विश्ववेदस^- आ ते त्वष्टा पत्सु जव. न्दधातु।। 1।।

卐 जव.स्ते अर्व.न्निहितो गुहा य-श्श्येने वात उत योऽचर. त्परीत्तः। तेन त्वँ वाजि. न्बलवा. न्बलेना-ऽऽजि.ञ्जय समने पारयिष्णुः।। 2।।

卐 तनू.ष्टे वाजि. न्तन्व1(अ) न्नयन्ती- वाम. मस्मभ्य. न्धावतु शर्म तुभ्यम्। अह्रुतो महो धरुणाय देवो- दिवीव ज्योति.स्स्व.मा मिमीयात्।।3।।

## षष्ठ काण्डे दशमोऽनुवाकः

06-10-01

卐 यमो मृत्यु. रघमारो निर्ऋथो- बभ्रु श्शर्वोऽस्ता नीलशिखण्डः। देवजना. स्सेनयोत्तस्थिवांस.स्ते- अस्माकं परि वृञ्जन्तु वीरान्।। 1।।

卐 मनसा होमैर् हरसा घृतेन- शर्वायास्त्र उत राज्ञे भवाय। नमस्येभ्यो नम^ एभ्यः कृणो-म्यन्यत्राऽस्म.दघविषा नयन्तु।। 2।।

卐 त्रायध्व. न्नो अघविषाभ्यो- वधा. द्विश्वे देवा^ मरुतो विश्ववेदसः। अग्नीषोमा वरुणः पूतदक्षा- वातापर्जन्ययो. स्सुमतौ स्याम।। 3।।-

## 06-10-02

卐 सँ वो मनांसि सँ व्रता- समाकूती. र्नमामसि। अमी~ ये विव्रता.स्स्थन-ता.न्व.स्स.न्नमयामसि।। 1।।

卐 अह. ङ्गृभ्णामि मनसा मनांसि- मम चित्त. मनु चित्तेभि.रेत। मम वशेषु हृदयानि वः कृणोमि- मम यात. मनुवर्त्मान^ एत।। 2।।

卐 ओते~ मे द्यावापृथिवी~- ओता देवी सरस्वती। ओतौ म इन्द्र.श्चा-ऽग्नि.श्चर्ध्यास्मेदं सरस्वति।। 3।।-

## 06-10-03

卐 अश्वत्थो देवसदन- स्तृतीयस्या. मितो दिवि। तत्राऽमृतस्य चक्षण-न्देवाः कुष्ठ. मवन्वत।। 1।।

卐 हिरण्ययी नौ.रचर- द्धिरण्यबन्धना दिवि। तत्राऽमृतस्य पुष्प- न्देवा॰ कुष्ठ. मवन्वत।। 2।।

卐 गर्भो अस्योषधीना-ङ्गर्भो हिमवता. मुत। गर्भो विश्वस्य भूत-स्येमं मे अगद.ङ्कृधि।। 3।।-

06-10-04

卐 या^ ओषधय. स्सोमराज्ञी- र्बह्वी. श्शतविचक्षणाः। बृहस्पतिप्रसूता-स्ता^ नो मुञ्च.न्त्वंहसः।। 1।।

卐 मुञ्चन्तु मा शपथ्या3(आ)-दथो~ वरुण्या.दुत। अथो~ यमस्य पड्बीशा-द्विश्वस्मा. द्देवकिल्बिषात्।। 2।।

卐 यच्चक्षुषा मनसा यच्च वा-चोपारिम जाग्रतो यत्स्वपन्तः। सोम. स्तानि स्वधया न॰ पुनातु।। 3।।-

06-10-05

卐 अभिभू. र्यज्ञो अभिभू. रग्नि- रभिभू. स्सोमो अभिभू. रिन्द्रः। अभ्य1(अ)हँ विश्वा॰ पृतना^- यथाऽसा.न्येवा विधेमाऽग्निहोत्रा^ इदं हविः।। 1।।

卐 स्वधाऽस्तु मित्रावरुणा विपश्चिता- प्रजाव.त्क्षत्रं मधुनेह पिन्वतम्।
बाधेथा.न्दूर. न्निरृऋतिं पराचैः- कृत.ञ्चिदेनः प्र मुमुक्त. मस्मत्।। 2।।
卐 इमँ वीर. मनु हर्षध्व. मुग्र- मिन्द्रं सखायो अनु सं रभध्वम्।
ग्रामजित.ङ्गोजितँ वज्रबाहु-ञ्जयन्त. मज्म प्रमृणन्त.मोजसा।। 3।।-

06-10-07

卐 इन्द्रो जयाति न परा जयाता- अधिराजो राजसु राजयातै। चर्कृत्य
ईड्यो वन्द्य- श्चोपसद्यो नमस्यो भवेह।। 1।।
卐 त्वमिन्द्राधिराज. श्श्रवस्यु- स्त्वं भू.रभिभूति. र्जनानाम्। त्वन्दैवी. र्विश
इमा वि रा-जाऽऽयुष्म.त्क्षत्र. मजर.न्ते अस्तु।। 2।।
卐 प्राच्या दिश. स्त्व.मिन्द्राऽसि रा-जोतोदीच्या दिशो वृत्रह.
न्छत्रुहोऽसि। यत्र यन्ति स्रोत्या. स्त-ज्जित न्ते दक्षिणतो वृषभ एषि
हव्यः।। 3।।-

06-10-08

卐 अभि त्वेन्द्र वरिमतः- पुरा त्वांऽहूरणा. द्धुवे। ह्वया.म्युग्र. ञ्चेत्तारं-
पुरुणामान. मेकजम्।। 1।।

卐 यो अद्य सेन्यो वधो- जिघांस.न्न उदीरते। इन्द्रस्य तत्र बाहू~- समन्तं परि दद्मः।। 2।।

卐 परि दद्म^ इन्द्रस्य बाहू~- समन्त. न्त्रातु. स्त्रायता.न्नः। देव सवित. स्सोम राज- न्त्सुमनसं मा कृणु स्वस्तये।। 3।।-

06-10-09

卐 देवा^ अदु. स्सूर्यो अदा-द्यौ. रदा. त्पृथिव्यदात्। तिस्र. स्सरस्वती. रदु- स्सचित्ता विषदूषणम्।। 1।।

卐 यद्वो देवा^ उपजीका^- आ सिञ्च.न्धन्व.न्युदकम्। तेन देवप्रसूते-नेद. न्दूषयता विषम्।। 2।।

卐 असुराणा. न्दुहिताऽसि- सा देवाना. मसि स्वसा। दिव.स्पृथिव्या. स्सम्भूता- सा चकर्था^रसँ विषम्।। 3।।-

06-10-10

卐 आ वृषायस्व श्वसिहि- वर्धस्व प्रथयस्व च। यथाऽङ्गँ वर्धतां शेप- स्तेन योषित. मिज्जहि।। 1।।

卐 येन कृशँ वाजयन्ति- येन हिन्व.न्त्यातुरम्। तेनाऽस्य ब्रह्मणस्पते- धनु.रिवाऽऽ तानया पसः।। 2।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 आऽह. न्तनोमि ते पसो- अधि ज्या.मिव धन्वनि। क्रमस्वर्.श^इव रोहित- मनवग्लायता सदा।। 3।।-

06-10-11

卐 यथाऽयँ वाहो अश्विना- समैति सञ्च वर्तते। एवा मा. मभि ते मन- स्समैतु सञ्च वर्तताम्।। 1।।

卐 आऽह. ङ्खिदामि ते मनो- राजाऽश्वः पृष्ठ्या.मिव। रेष्मच्छिन्नँ यथा तृणं- मयि ते वेष्टतां मनः।। 2।।

卐 आञ्जनस्य मदुघस्य- कुष्ठस्य नलदस्य च। तुरो भगस्य हस्ताभ्या- मनुरोधन. मुद्भरे।। 3।।-

## षष्ठ काण्डे एकादशोऽनुवाकः

06-11-01

卐 सन्दानँ वो बृहस्पति- स्सन्दानं सविता करत्। सन्दानं मित्रो अर्यमा- सन्दानं भगो अश्विना।। 1।।

卐 सं परमा.न्त्स. मवमा- नथो~ स.न्द्यामि मध्यमान्। इन्द्र.स्ता. न्पर्यहा.र्दाम्ना- ता.नग्ने सन्द्या त्वम्।। 2।।

卐 अमी~ ये युध. मायन्ति- केतू न्कृत्वाऽनीकशः। इन्द्र.स्ता न्पर्यहा.र्दाम्ना- ता.नग्ने सन्द्या त्वम्।। 3।।-

06-11-02

卐 आदानेन सन्दानेना-ऽमित्रा. नाद्यामसि। अपाना^ ये चैषां प्राणा^- असुनाऽसू. न्त्स.मच्छिदन्न्।। 1।।

卐 इद. मादान. मकर- न्तपसेन्द्रेण संशितम्। अमित्रा येऽत्र न.स्सन्ति- ता.नग्न आ द्या त्वम्।। 2।।

卐 ऐना. न्द्यता. मिन्द्राग्नी~- सोमो राजा च मेदिनौ। इन्द्रो मरुत्वा. नादान- ममित्रेभ्यः कृणोतु नः।। 3।।-

06-11-03

卐 यथा मनो मनस्केतैः- परापत.त्याशुमत्। एवा त्व.ङ्कासे प्र पत- मनसोऽनु प्रवाय्यम्।। 1।।

卐 यथा बाण. स्सुसंशितः- परापत.त्याशुमत्। एवा त्व.ङ्कासे प्र पत- पृथिव्या^ अनु सँवतम्।। 2।।

卐 यथा सूर्यस्य रश्मयः- परापत.न्त्याशुमत्। एवा त्व.ङ्कासे प्र पत- समुद्रस्याऽनु विक्षरम्।। 3।।-

06-11-04

卐 आऽयने ते परायणे- दूर्वा^ रोहन्तु पुष्पिणीः। उत्सो वा तत्र जायतां-

ह्रदो वा पुण्डरीकवान्।। 1।।

卐 अपा.मिद.न्न्ययनं- समुद्रस्य निवेशनम्। मध्ये ह्रदस्य नो गृहा४-

पराचीना^ मुखा कृधि।। 2।।

卐 हिमस्य त्वा जरायुणा- शाले परि व्ययामसि। शीतह्रदा^ हि नो भुवो-

ऽग्नि.ष्कृणोतु भेषजम्।। 3।।-

06-11-05

卐 विश्वजि. त्त्रायमाणायै- मा परि देहि। त्रायमाणे द्विपाच्च सर्व.न्नो- रक्ष

चतुष्पा.द्यच्च न.स्स्वम्।। 1।।

卐 त्रायमाणे विश्वजिते- मा परि देहि। विश्वजि.द्विपाच्च सर्व.न्नो- रक्ष

चतुष्पा.द्यच्च न.स्स्वम्।। 2।।

卐 विश्वजि.त्कल्याण्यै- मा परि देहि। कल्याणि द्विपाच्च सर्व.न्नो- रक्ष

चतुष्पा.द्यच्च न.स्स्वम्।। 3।।

卐 कल्याणि सर्वविदे- मा परि देहि। सर्ववि.द्विपाच्च सर्व.न्नो- रक्ष

चतुष्पा.द्यच्च न.स्स्वम्।। 4।।-

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

06-11-06

卐 त्व.न्नो मेधे प्रथमा- गोभि. रश्वेभि.रा गहि। त्वं सूर्यस्य रश्मिभि- स्त्व.न्नो असि यज्ञिया।। 1।।

卐 मेधा. महं प्रथमां ब्रह्मण्वतीं- ब्रह्मजूता. मृषिष्टुताम्। प्रपीतां ब्रह्मचारिभि- र्देवाना. मवसे हुवे।। 2।।

卐 यां मेधा. मृभवो विदु- र्यां मेधा. मसुरा^ विदुः। ऋषयो भद्रां मेधाँ याँ विदु- स्तां म.य्या वेशयामसि।। 3।।

卐 या.मृषयो भूतकृतो- मेधां मेधाविनो विदुः। तया मा.मद्य मेधया-ऽग्ने मेधाविन.ङ्कृणु।। 4।।

卐 मेधां सायं मेधां प्रात- र्मेधां मध्यन्दिनं परि। मेधां सूर्यस्य रश्मिभि- र्वचसा ऽऽवेशयामहे।। 5।।-

06-11-07

卐 पिप्पली क्षिप्तभेषज्यु3-(उ)ताऽतिविद्धभेषजी। ता.न्देवा. स्समकल्पय- न्निय.ञ्जीवितवा अलम्।। 1।।

卐 पिप्पल्य1(अ) स्समवदन्ता-ऽऽयती. र्जनना. दधि। यञ्जीव. मश्नवामहै- न स^ रिष्याति पूरुषः।। 2।।

卐 असुरा.स्त्वा.न्यखन- न्देवा. स्त्वोदवप. न्पुनः। वातीकृतस्य भेषजी-
मथो~ क्षिप्तस्य भेषजीम्।। 3।।-

06-11-08

卐 प्रत्नो हि क.मीड्यो अध्वरेषु- सनाच्च होता नव्यश्च सत्सि। स्वा.ञ्चाऽग्ने
तन्वं पिप्रायस्वा-ऽस्मभ्यञ्च सौभग.मा यजस्व।। 1।।

卐 ज्येष्ठघ्न्या.ञ्जातो विचृतो.र्यमस्य- मूलबर्हणा. त्परि पाह्येनम्। अत्येन.
न्नेष. दुरितानि विश्वा- दीर्घायुत्वाय शतशारदाय।। 2।।

卐 व्याघ्रेऽह्न्यजनिष्ट वीरो- नक्षत्रजा^ जायमान. स्सुवीरः। स^ मा वधी.
त्पितरं वर्धमानो- मा मातरं प्र मिनी.ज्जनित्रीम्।। 3।।-

06-11-09

卐 इमं मे अग्ने पुरुषं मुमु-ग्ध्ययँ यो बद्ध. स्सुयतो लालपीति। अतोऽधि ते
कृणव.द्भागधेयँ- यदाऽनुन्मदितोऽसति।। 1।।

卐 अग्निष्टे नि शमयतु- यदि ते मन^ उद्युतम्। कृणोमि विद्वा.न्भेषजँ-
यथाऽनुन्मदितोऽससि।। 2।।

卐 देवैनसा. दुन्मदित- मुन्मत्तं रक्षस.स्परि। कृणोमि विद्वा.न्भेषजँ
यदाऽनुन्मदितोऽसति।। 3।।

卐 पुन.स्त्वाऽदु. रप्सरस॒- पुन. रिन्द्र॒ पुन. र्भगः। पुनस्त्वाऽदु. र्विश्वे देवा॒- यथाऽनुन्मदितोऽससि।। 4।।-

06-11-10

卐 मा ज्येष्ठँ वधी. दय. मग्न एषां- मूलबर्हणा.त्परि पाह्येनम्। स॒ ग्राह्या॒ पाशान् वि चृत प्रजान- न्तुभ्य. न्देवा॒ अनु जानन्तु विश्वे।। 1।।

卐 उन्मुञ्च पाशां.स्त्व. मग्न एषां- त्रय. स्त्रिभि. रुत्सिता येभि. रासन्न्। स॒ ग्राह्या॒ पाशान् वि चृत प्रजान- न्पितापुत्रौ मातरं मुञ्च सर्वान्।। 2।।

卐 येभि॒ पाशै॒ परिवित्तो विबद्धो-ऽङ्गेअङ्ग आऽर्पित॒ उत्सितश्च। वि ते मुच्यन्ताँ विमुचो हि सन्ति- भ्रूणघ्नि पूष.न्दुरितानि मृक्ष्व।। 3।।-

06-11-11

卐 त्रिते देवा॒ अमृजतैत. देन- स्त्रित॒ एन. न्मनुष्येषु ममृजे। ततो यदि त्वा ग्राहि. रानशे- ता.न्ते देवा॒ ब्रह्मणा नाशयन्तु।। 1।।

卐 मरीची. र्धूमा. न्प्र विशाऽनु पाप्म- न्नुदारा. न्गच्छोत वा नीहारान्। नदीनां फेना॒ अनु तान् वि नश्य- भ्रूणघ्नि पूष. न्दुरितानि मृक्ष्व।। 2।।

卐 द्वादशधा निहित. न्त्रितस्या-ऽपमृष्टं मनुष्यैनसानि। ततो यदि त्वा ग्राहि. रानशे- ता.न्ते देवा॒ ब्रह्मणा नाशयन्तु।। 3।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

## षष्ठ काण्डे द्वादशोऽनुवाकः

06-12-01

卐 यद्देवा॒ देवहेडन- न्देवास. श्चकृमा वयम्। आदित्या. स्तस्मा.न्नो यूय-
मृतस्यर्तेन मुञ्चत।। 1।।

卐 ऋतस्यर्तेनाऽऽदित्या॒- यजत्रा॒ मुञ्चतेह नः। यज्ञँ यद्यज्ञवाहस-
श्शिक्षन्तो नोप शेकिम।। 2।।

卐 मेदस्वता यजमाना- स्स्रुचाऽऽज्यानि जुह्वतः। अकामा॒ विश्वे वो देवा-
श्शिक्षन्तो नोपशेकिम।। 3।।-

06-12-02

卐 यद्विद्वांसो यदविद्वांस॒- एनांसि चकृमा वयम्। यूय.न्न.स्तस्मा. न्मुञ्चत-
विश्वे देवा. स्सजोषसः।। 1।।

卐 यदि जाग्र.द्यदि स्वप- न्नेन॒ एनस्योऽकरम्। भूतं मा तस्मा.द्भव्यञ्च-
द्रुपदा. दिव मुञ्चताम्।। 2।।

卐 द्रुपदा.दिव मुमुचान- स्स्विन्न. स्स्नात्वा मला.दिव। पूतं
पवित्रेणेवाऽऽज्यँ- विश्वे शुम्भन्तु मैनसः।। 3।।-

06-12-03

卐 यद्याम.ञ्चक्रु. र्निखनन्तो अग्रे- कार्षीवणा अन्नविदो न विद्यया। वैवस्वते राजनि तज्जुहो-म्यथ यज्ञियं मधुम.दस्तु नोऽन्नम्।। 1।।

卐 वैवस्वतः कृणव. द्भागधेयं- मधुभागो मधुना सं सृजाति। मातु. र्यदेन इषित.न्न आगन्- यद्वा पिताऽपराद्धो जिहीडे।। 2।।

卐 यदीदं मातु. र्यदि वा पितु र्नः- परि भ्रातुः पुत्रा. च्चेतस एन आगन्न्। यावन्तो अस्मा. न्पितर. स्सचन्ते- तेषां सर्वेषां शिवो अस्तु मन्युः।। 3।।-

06-12-04

卐 अपमित्य. मप्रतीत्तँ यदस्मि- यमस्य येन बलिना चरामि। इद. न्तदग्ने अनृणो भवामि- त्वं पाशा.न्विचृतँ वेत्थ सर्वान्।। 1।।

卐 इहैव सन्तः प्रति दद्म एन- ज्जीवा जीवेभ्यो नि हराम एनत्। अपमित्य धान्य1(अँ) य.ज्जघसाऽह- मिद. न्तदग्ने अनृणो भवामि।। 2।।

卐 अनृणा अस्मि. न्ननृणाः परस्मि- न्तृतीये लोके अनृणा. स्स्याम। ये देवयानाः पितृयाणाश्च लोका- स्सर्वा. न्पथो अनृणा आ क्षियेम।। 3।।-

06-12-05

卐 यद्धस्ताभ्या. ञ्चकृम किल्बिषा-ण्यक्षाणा. ङ्गत्नु. मुपलिप्समानाः। उग्रंपश्ये उग्रजितौ तद.द्या-ऽप्सरसा वनु दत्ता. मृण. न्नः।। 1।।

卐 उग्रंपश्ये राष्ट्रभृ.त्किल्बिषाणि- यदक्षवृत्त. मनु दत्त.न्न^ एतत्। ऋणा.न्नो नर्ण. मेर्त्समानो- यमस्य लोके अधि रज्जु.राऽयत्।। 2।।

卐 यस्मा ऋणँ यस्य जाया. मुपैमि- यँ याचमानो अभ्यैमि देवाः। ते वाचँ वादिषु.र्मोत्तरां- म.द्देवपत्नी अप्सरसा. वधीतम्।। 3।।-

06-12-06

卐 यद्दीव्य. न्नृण. मह.ङ्कृणो-म्यदास्य.न्नग्न उत सङ्गृणामि। वैश्वानरो नो अधिपा वसिष्ठ^- उदि.न्नयाति सुकृतस्य लोकम्।। 1।।

卐 वैश्वानराय प्रति वेदयामि- यद्यृणं सङ्गरो देवतासु। स^ एता. न्पाशा. न्विचृतँ वेद सर्वा- नथ पक्वेन सह सं भवेम।। 2।।

卐 वैश्वानरः पविता मा पुनातु- यत्सङ्गर. मभिधावा.म्याशाम्। अनाजान. न्मनसा याचमानो- यत्तत्रैनो अप तत्सुवामि।। 3।।-

06-12-07

卐 यदन्तरिक्षं पृथिवी. मुत द्याँ- यन्मातरं पितरँ वा जिहिंसिम। अय.न्तस्मा.द्गार्हपत्यो नो अग्नि- रुदि.न्नयाति सुकृतस्य लोकम्।। 1।।

卐 भूमि. र्माताऽदिति. र्नो जनित्रं- भ्राताऽन्तरिक्ष. मभिशस्त्या नः। द्यौ र्नः पिता पित्र्या.च्छं भवाति- जामि. मृत्वा माऽव पत्सि लोकात्।। 2।।

卐 यत्रा सुहार्द. स्सुकृतो मदन्ति- विहाय रोग न्तन्व1(अ) स्स्वायाः।
अश्लोणा^ अङ्गै. रह्रुता. स्स्वर्गे- तत्र पश्येम पितरौ च पुत्रान्।। 3।।-

06-12-08

卐 विषाणा पाशान् विष्याऽध्यस्म-द्य उत्तमा^ अधमा वारुणा^ ये। दुष्वप्न्य.
न्दुरित. न्निष्वाऽस्म- दथ गच्छेम सुकृतस्य लोकम्।। 1।।

卐 यद्दारुणि बध्यसे यच्च रज्ज्वाँ- यद्भूम्यां बध्यसे यच्च वाचा। अय.
न्तस्मा.द्गार्हपत्यो नो अग्नि- रुदि.न्नयाति सुकृतस्य लोकम्।। 2।।

卐 उदगातां भगवती~- विचृतौ नाम तारके। प्रेहामृतस्य यच्छतां- प्रैतु
बद्धकमोचनम्।। 3।।

卐 वि जिहीष्व लोक.ङ्कृणु- बन्धा. न्मुञ्चासि बद्धकम्। योन्या^ इव प्रच्युतो-
गर्भः पथ. स्सर्वा॰ अनु क्षिय।। 4।।-

06-12-09

卐 एतं भागं परि ददामि विद्वान्- विश्वकर्म. न्प्रथमजा^ ऋतस्य। अस्माभि.
र्दत्त. ञ्जरसः परस्ता- दच्छिन्न. न्तन्तु मनु. सन्तरेम।। 1।।

卐 तत. न्तन्तु मन्वेके तरन्ति- येषा. न्दत्तं पित्र्य. माऽयनेन। अबन्ध्वेके
ददतः प्रयच्छन्तो- दातु.ञ्चे.च्छिक्षा. न्त्स^ स्वर्ग^ एव।। 2।।

卐 अन्वारभेथा. मनुसंरभेथा- मेतँ लोकं श्रद्दधाना. स्सचन्ते। यद्वां पक्वं परिविष्ट मग्नौ- तस्य गुप्तये दम्पती~ सं श्रयेथाम्।। 3।।

卐 यज्ञँ यन्तं मनसा बृहन्त- मन्वारोहामि तपसा सयोनिः। उपहूता^ अग्ने जरसः परस्ता- त्तृतीये नाके सधमादं मदेम।। 4।।

卐 शुद्धाः पूता^ योषितो यज्ञिया^ इमा- ब्रह्मणां हस्तेषु प्रपृथ.क्सादयामि। यत्काम^ इद. मभिषिञ्चामि वोऽह- मिन्द्रो मरुत्वा. न्त्स^ ददातु तन्मे।। 5।।-

06-12-10

卐 एतं सधस्थाः परि वो ददामि- यं शेवधि. माऽवहा. ज्ज्ञातवेदाः। अन्वागन्ता यजमान. स्स्वस्ति- तं स्म जानीत परमे व्योमन्न्।। 1।।

卐 जानीत स्मैनं परमे व्योम- न्देवा. स्सधस्था^ विद. लोक. मत्र। अन्वागन्ता यजमान. स्स्व-स्तीष्टापूर्तं स्म कृणुताऽऽवि. रस्मै।। 2।।

卐 देवाः पितरः- पितरो देवाः। यो अस्मि- सो अस्मि।। 3।।

卐 स^ पचामि स^ ददामि- स^ यजे स^ दत्ता न्मा यूषम्।। 4।।

卐 नाके राज. न्प्रति तिष्ठ- तत्रैत. त्प्रति तिष्ठतु। विद्धि पूर्तस्य नो राज-न्त्स^ देव सुमना^ भव।। 5।।-

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

06-12-11

卐 दिवो नु मां बृहतो अन्तरिक्षा- दपां स्तोको अभ्यपप्त. द्रसेन। समिन्द्रियेण पयसाऽह. मग्ने- छन्दोभि. र्यज्ञै. स्सुकृता.ङ्कृतेन।। 1।।

卐 यदि वृक्षा. दभ्यपप्त. त्फल.न्त-द्य.द्यन्तरिक्षा.त्स^ उ वायु. रेव। यत्राऽस्पृक्ष. त्तन्वो3(ओ) यच्च वासस^- आपो नुदन्तु निरृतिं पराचैः।। 2।।

卐 अभ्यञ्जनं सुरभि सा समृद्धिर्-हिरण्यँ वर्च. स्त.दु. पूत्रिम.मेव। सर्वा पवित्रा वितताऽध्यस्म- त्त.न्मा तारी न्निरृतिर्- र्मो अरातिः।। 3।।

## षष्ठ काण्डे त्रयोदशोऽनुवाकः

06-13-01

卐 वनस्पते वीड्वङ्गो हि भूया^- अस्मत्सखा प्रतरण. स्सुवीरः। गोभि. स्सन्नद्धो असि वीडयस्वा-ऽऽस्थाता ते जयतु जेत्वानि।। 1।।

卐 दिव. स्पृथिव्याः पर्योज^ उद्धृतँ- वनस्पतिभ्यः पर्याभृतं सहः। अपा. मोज्मानं परि गोभि. रावृत- मिन्द्रस्य वज्रं हविषा रथँ यज।। 2।।

卐 इन्द्रस्यौजो मरुता. मनीकं- मित्रस्य गर्भो वरुणस्य नाभिः। स^ इमा. न्नो हव्यदाति.ञ्जुषाणो- देव रथ प्रति हव्या गृभाय।। 3।।-

☫ 06-13-02

卐 उप श्वासय पृथिवी. मुत द्यां- पुरुत्रा ते वन्वताँ विष्ठित.ञ्जगत्। स^ दुन्दुभे सजू. रिन्द्रेण देवै- दूरा. द्दवीयो अप सेध शत्रून्।। 1।।

卐 आ क्रन्दय बल मोजो न^ आ धा- अभि ष्टन दुरिता बाधमानः। अप सेध दुन्दुभे दुच्छुना- मित^ इन्द्रस्य मुष्टि. रसि वीडयस्व।। 2।।

卐 प्राऽमू. ञ्जयाभी3(ई)मे जयन्तु- केतुम.द्दुन्दुभि. र्वावदीतु। समश्वपर्णा॰ पतन्तु नो नरो-ऽस्माक. मिन्द्र रथिनो जयन्तु।। 3।।-

☫ 06-13-03

卐 विद्रधस्य बलासस्य- लोहितस्य वनस्पते। विसल्पक.स्यौषधे- मोच्छिष॰ पिशित.ञ्चन।। 1।।

卐 यौ ते बलास तिष्ठत॰- कक्षे मुष्का. वपश्रितौ। वेदाऽह न्तस्य भेषज- ञ्चीपुद्रु. रभिचक्षणम्।। 2।।

卐 यो अङ्ग्यो य॰ कर्ण्यो- यो अक्ष्यो. र्विसल्पकः। वि वृहामो विसल्पकँ- विद्रधं हृदयाऽऽमयम्। परा त.मज्ञातँ यक्ष्म- मधराञ्चं सुवामसि।। 3।।-

☫ 06-13-04

卐 शकधूम. न्नक्षत्राणि- यद्राजान. मकुर्वत। भद्राह.मस्मै प्रा॒ऽयच्छ- न्निदं राष्ट्र. मसादिति।। 1।। (शुभदिनम्)

卐 भद्राह. न्नो मध्यन्दिने- भद्राहं साय.मस्तु नः। भद्राह.न्नो अह्नां प्राता-रात्री भद्राह. मस्तु नः।। 2।।

卐 अहोरात्राभ्या. न्नक्षत्रेभ्य- स्सूर्याचन्द्रमसाभ्याम्। भद्राह. मस्मभ्यं राज.-न्छकधूम त्व.ङ्कृधि।। 3।।

卐 यो नो भद्राह. मकर- स्साय.न्नक्त. मथो~ दिवा। तस्मै ते नक्षत्रराज-शकधूम सदा नमः।। 4।।-

06-13-05

卐 भगेन मा शांशपेन- साक. मिन्द्रेण मेदिना। कृणोमि भगिनं मा-ऽप द्रा.न्त्वरातयः।। 1।।

卐 येन वृक्षा॰ अभ्यभवो- भगेन वर्चसा सह। तेन मा भगिन.ङ्कृ-ण्वप द्रा.न्त्वरातयः।। 2।।

卐 यो अन्धो यः पुनस्सरो- भगो वृक्षे.ष्वाहितः। तेन मा भगिन.ङ्कृ-ण्वप द्रा.न्त्वरातयः।। 3।।-

06-13-06

卐 रथजितां राथजितेयीना- मप्सरसा. मयं स्मरः। देवाः प्र हिणुत स्मर- मसौ मा.मनु शोचतु।। 1।। (स्त्रीवशीकरणम्)

卐 असौ मे स्मरता. दिति- प्रियो मे स्मरता. दिति। देवाः प्र हिणुत स्मर- मसौ मा.मनु शोचतु।। 2।।

卐 यथा मम स्मरा- दसौ नाऽमुष्याऽह.ङ्कदा चन। देवाः प्र हिणुत स्मर- मसौ मा.मनु शोचतु।। 3।।

卐 उन्मादयत मरुत^- उदन्तरिक्ष मादय। अग्न उन्मादया त्व.मसौ- मा.मनु शोचतु।। 4।।-

06-13-07

卐 नि शीर्षतो नि पत्तत^- आध्यो3(ओ) नि तिरामि ते। देवाः प्र हिणुत स्मर- मसौ मा.मनु शोचतु।। 1।।

卐 अनुमतेऽन्विदं मन्यस्वा-ऽऽकूते स.मिद. न्नमः। देवाः प्र हिणुत स्मर- मसौ मा.मनु शोचतु।। 2।।

卐 यद्धावसि त्रियोजनं- पञ्चयोजन. माश्विनम्। तत.स्त्वं पुन.राऽयसि- पुत्राणा.न्नो असः पिता।। 3।।-

06-13-08

卐 यन्दे॒वा.स्स्म॒र. मसि॑ञ्च- न्न॒प्स्व॑1(अ॒)न्त. श्शो॒शु॑चानं स॒हाध्या। तन्ते॑ तपामि॒- व॒रु॒णस्य॒ धर्म॑णा।। 1।।

卐 यँ विश्वे॑ दे॒वा.स्स्म॒र. मसि॑ञ्च- न्न॒प्स्व॑1(अ॒)न्त. श्शो॒शु॑चानं स॒हाध्या। तन्ते॑ तपामि॒ व॒रु॒णस्य॒ धर्म॑णा।। 2।।

卐 यमि॑न्द्रा॒णी स्म॒र. मसि॑ञ्च- दु॒प्स्व॑1(अ॒)न्त. श्शो॒शु॑चानं स॒हाध्या। तन्ते॑ तपामि॒ व॒रु॒णस्य॒ धर्म॑णा।। 3।।

卐 यमि॑न्द्रा॒ग्नी~ स्म॒र. मसि॑ञ्चता- म॒प्स्व॑1(अ॒)न्त. श्शो॒शु॑चानं स॒हाध्या। तन्ते॑ तपामि॒ व॒रु॒णस्य॒ धर्म॑णा।। 4।।

卐 यं मि॒त्रावरु॑णौ स्म॒र. मसि॑ञ्चता- म॒प्स्व॑1(अ॒)न्त. श्शो॒शु॑चानं स॒हाध्या। तन्ते॑ तपामि॒ व॒रु॒णस्य॒ धर्म॑णा।। 5।।-

06-13-09

卐 य^ इ॒मा. न्दे॒वो मेख॑लाय माब॒बन्ध॒- य.स्स॑न्न॒नाह॒ य^ उ नो यु॒योज। यस्य॑ दे॒वस्य॑ प्र॒शिषा॒ चरा॑म॒- स्स^ पार॒. मि॑च्छा॒.त्स^ उ नो॒ वि मु॑ञ्चात्॒।। 1।।

卐 आहु॑ताऽस्य॒भिहु॑त॒^- ऋषी॑णा.म॒स्याऽऽयु॑धम्। पूर्वा॑ व्र॒तस्य॑ प्रा॒श्नती॒- वी॑र॒घ्नी भ॑व मेखले।। 2।।

卐 मृत्यो. रहं ब्रह्मचारी यदस्मि- निर्याच.न्भूता. त्पुरुषँ यमाय। तमहं ब्रह्मणा तपसा श्रमेणा-ऽनयैनं मेखलया सिनामि।। 3।।

卐 श्रद्धाया^ दुहिता तपसोऽधि जाता- स्वस ऋषीणां भूतकृतां बभूव। सा नो मेखले मति. मा धेहि मेधा- मथो~ नो धेहि तप^ इन्द्रियञ्च।। 4।।

卐 यान्त्वा पूर्वे भूतकृत^- ऋषयः परिबेधिरे। सा त्वं परिष्वजस्व मा-न्दीर्घायुत्वाय मेखले।। 5।।-

06-13-10

卐 अयँ वज्र. स्तर्पयता.मृतस्या-ऽवास्य राष्ट्र. मप हन्तु जीवितम्। श्रृणातु ग्रीवाः प्र श्रृणातूष्णिहा- वृत्रस्येव शचीपतिः।। 1।।

卐 अधरोऽधर^ उत्तरेभ्यो- गूढः पृथिव्या. मोत्सृपत्। वज्रेणाऽवहत. श्शयाम्।। 2।।

卐 यो जिनाति त.मन्विच्छ- यो जिनाति त.मिज्जहि। जिनतो वज्र त्वं सीमन्त- मन्वञ्च. मनु पातय।। 3।।-

06-13-11

卐 य.दश्नामि बल.ङ्कुर्व -इत्थँ वज्र.मा ददे। स्कन्धा. नमुष्य शातय-न्वृत्रस्येव शचीपतिः।। 1।।

卐 य.त्पिबामि सं पिबामि- समुद्र^ इव संपिबः। प्राणा. नमुष्य सम्पाय- सं पिबामो अमुँ वयम्।। 2।।

卐 य.द्गिरामि सङ्गिरामि- समुद्र^इव सङ्गिरः। प्राणा. नमुष्य सङ्गीर्य- सङ्गिरामो अमुँ वयम्।। 3।।-

06-13-12

卐 देवी देव्या. मधि जाता- पृथिव्या. मस्योषधे। ता.न्त्वा नितत्नि केशेभ्यो- दृंहणाय खनामसि।। 1।।

卐 दृंह प्रत्ना. न्जनयाऽजाता- न्जाता.नु वर्षीयस. स्कृधि।। 2।।

卐 य.स्ते केशोऽवपद्यते- समूलो यश्च वृश्चते। इद.न्तँ विश्वभेषज्या- ऽभि.षिञ्चामि वीरुधा।। 3।।-

06-13-13

卐 या.ञ्जमदग्नि. रखन- दुहित्रे केशवर्धनीम्। ताँ वीतहव्य^ आऽभर- दसितस्य गृहेभ्यः।। 1।। (केशवर्धन्यः ऋचः)

卐 अभीशुना मेया^ आस-न्व्यामेनाऽनुमेयाः। केशा^ नडा^इव वर्धन्तां- शीर्ष्ण.स्ते असिताः परि।। 2।।

卐 दृंह मूल माऽग्रँ यच्छ- वि मध्यँ यामयौषधे। केशा^ नडा^इव वर्धन्तां-शीर्ष्ण.स्ते असिताः परि।। 3।।-

⚱ 06-13-14

卐 त्वँ वीरुधां श्रेष्ठतमा-ऽभिश्रुताऽस्योषधे। इमं मे अद्य पूरुष-ङ्क्लीब. मोपशिन. ङ्कृधि।। 1।।

卐 क्लीब.ङ्कृध्योपशिन- मथो~ कुरीरिण.ङ्कृधि। अथाऽस्येन्द्रो ग्रावभ्या-मुभे~ भिन.त्त्वाण्ड्यौ।। 2।।

卐 क्लीब क्लीब.न्त्वाऽकरं- वध्रे वध्रि.न्त्वाऽकर- मरसाऽरस. न्त्वाऽकरम्। कुरीर. मस्य शीर्षणि- कुम्ब.ञ्चाधि नि दध्मसि।। 3।।

卐 ये ते नाड्यौ देवकृते~- ययो. स्तिष्ठति वृष्ण्यम्। ते ते भिनद्मि शम्यया-ऽमुष्या^ अधि मुष्कयोः।। 4।।

卐 यथा नड.ङ्कशिपुने- स्त्रियो भिन्द.न्त्यश्मना। एवा भिनद्मि ते शेपो-ऽमुष्या^ अधि मुष्कयोः।। 5।।-

⚱ 06-13-15

卐 न्यस्तिका रुरोहिथ- सुभाग.ङ्करणी मम। शत.न्तव प्रताना- स्त्रयस्त्रिंश. न्नितानाः। तया सहस्रपर्ण्या- हृदयं शोषयामि ते।। 1।।

Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 शुष्यतु मयि ते हृदय- मथो~ शुष्य.त्वास्यम्। अथो~ नि शुष्य मा.ङ्कामेना-ऽथो~ शुष्काऽऽस्या चर।। 2।।

卐 सँवननी समुष्पला- बभ्रु कल्याणि सन्नुद। अमूञ्च माञ्च सन्नुद- समानं हृदय.ङ्कृधि।। 3।।

卐 यथोदक. मपपुषो-ऽपशुष्य.त्यास्यम्। एवा नि शुष्य मा.ङ्कामेना-ऽथो~ शुष्काऽऽस्या चर।। 4।।

卐 यथा नकुलो विच्छिद्य- सन्दधा. त्यहिं पुनः। एवा कामस्य विच्छिन्नं- सन्धेहि वीर्यावति।। 5।।-

06-13-16

卐 यौ व्याघ्रा. ववरूढौ- जिघत्सतः पितरं मातरञ्च। तौ दन्तौ ब्रह्मणस्पते- शिवौ कृणु जातवेदः।। 1।।

卐 व्रीहिमत्तँ यवमत्त-मथो~ माष. मथो~ तिलम्। एष^ वां भागो निहितो रत्नधेयाय दन्तौ- मा हिंसिष्टं पितरं मातरञ्च।। 2।।

卐 उपहूतौ सयुजौ- स्योनौ दन्तौ सुमङ्गलौ। अन्यत्र वा.ङ्घोरं तन्व1(अः) परैतु दन्तौ- मा हिंसिष्टं पितरं मातरञ्च।। 3।।

06-13-17

卐 वायु.रेना. स्समाकर-त्त्वष्टा पोषाय ध्रियताम्। इन्द्र^ आभ्यो अधि ब्रव-
द्रुद्रो भूम्ने चिकित्सतु।। 1।।

卐 लोहितेन स्वधितिना- मिथुन.ङ्कर्णयोः कृधि। अकर्ता. मश्विना लक्ष्म-
तदस्तु प्रजया बहु।। 2।।

卐 यथा चक्रु. र्देवासुरा^- यथा मनुष्या उत। एवा सहस्रपोषाय- कृणुतं
लक्ष्मा^श्विना।। 3।।-

06-13-18

卐 उच्छ्रयस्व बहु.र्भव- स्वेन महसा यव। मृणीहि विश्वा पात्राणि- मा त्वा
दिव्याऽशनि. र्वधीत्।। 1।।

卐 आश्रृण्वन्तँ यवँ देवँ- यत्र त्वाऽच्छा वदामसि। तदुच्छ्रयस्व द्यौ.रिव-
समुद्र^ इवैध्यक्षितः।। 2।।

卐 अक्षिता स्त उपसदो-ऽक्षिता. स्सन्तु राशयः। पृणन्तो अक्षिता.स्स-
न्त्वत्तार स्स.न्त्वक्षिताः।। 3।।

षष्ठ ङ्काण्डं समाप्तम्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore SGS

## ꣸सप्तमङ्काण्डम्

### ꣸ सप्तम काण्डे प्रथमोऽनुवाकः

☸ 07-01-01

卐 धीती वा ये अनय.न्वाचो अग्रं- मनसा वा येऽवद. न्नृतानि। तृतीयेन ब्रह्मणा वावृधाना- स्तुरीयेणा ऽमन्वत नाम धेनोः।। 1।।

卐 स^ वेद पुत्रः पितरं स^ मातरं- स^ सूनु. र्भुव.त्स^ भुव. त्पुनर्मघः। स^ द्या. मौर्णो. दन्तरिक्षं- स्व1(अ) स्स^ इदँ विश्व. मभव.त्स^ आऽभवत्।। 2।।-

☸ 07-01-02

卐 अथर्वाणं पितर. न्देवबन्धुं- मातु. र्गर्भं पितु. रसुँ युवानम्। य^ इमँ यज्ञं मनसा चिकेत- प्र णो वोच.स्त. मिहेह ब्रवः।। 1।।-

☸ 07-01-03

卐 अया^ विष्ठा^ जनय.न्कर्वराणि- स^ हि घृणि. रुरु. र्वराय गातुः। स^ प्रत्युदै.द्धरुणं मध्वो अग्रं- स्वया तन्वा तन्व. मैरयत।। 1।।-

☸ 07-01-04

卐 एकया च दशभिश्चा सुहुते- द्वाभ्या. मिष्टये विंशत्या च। तिसृभिश्च वहसे त्रिंशता च- वियुग्भि. र्वाय इह ता^ वि मुञ्च।। 1।।-

07-01-05

卐 यज्ञेन यज्ञ. मयजन्त देवा- स्तानि धर्माणि प्रथमा.न्यासन्न्। ते ह नाकं महिमान. स्सचन्त- यत्र पूर्वे साध्या. स्सन्ति देवाः।। 1।।

卐 यज्ञो बभूव स^ आ बभूव- स^ प्र जज्ञे स^ उ वावृधे पुनः। स^ देवाना. मधिपति. र्बभूव- सो अस्मासु द्रविण. मादधातु।। 2।।

卐 य.द्देवा^ देवा. न्हविषाऽयजन्ता-ऽमर्त्या. न्मनसाऽमर्त्येन। मदेम तत्र परमे व्योम-न्पश्येम तदुदितौ सूर्यस्य।। 3।।

卐 यत्पुरुषेण हविषा- यज्ञ. न्देवा^ अतन्वत। अस्ति नु तस्मा. दोजीयो- य.द्विहव्ये.नेजिरे।। 4।।

卐 मुग्धा^ देवा^ उत शुनाऽयज-न्तोत गो.रङ्गैः पुरुधाऽयजन्त। य^ इमँ यज्ञं मनसा चिकेत- प्र णो वोच.स्त मिहेह ब्रवः।। 5।।-

07-01-06

卐 अदिति. र्द्यौ. रदिति.रन्तरिक्ष- मदिति. र्माता स^ पिता स^ पुत्रः। विश्वे देवा^ अदितिः पञ्च जना^- अदिति. र्जात. मदिति. र्जनित्वम्।। 1।।

卐 म॒ही.मू॒ षु मा॒तरं॑ सुव्र॒ताना॑- मृ॒तस्य॒ पत्नी॒. मव॑से हवामहे। तु॒वि॒क्ष॒त्रा.
म॒जर॑न्ती. मुरू॒चीं- सु॒शर्मा॑ण॒. मदि॑तिं सु॒प्रणी॑तिम्।। 2।।

07-01-07

卐 सु॒त्रामा॑णं पृ॒थि॒वी.न्द्या. मने॒ह॑सं- सु॒शर्मा॑ण॒ मदि॑तिं सु॒प्रणी॑तिम्।
दैवी॒.न्नाव॑ स्वरि॒त्रा. मना॑गसो॒- अस्र॑वन्ती॒.मा रु॑हेमा॑ स्व॒स्तये॑।। 1।।

卐 वाज॑स्य॒ नु प्र॑स॒वे मा॒तरं॑ म॒ही- मदि॑ति॒.न्नाम॒ वच॑सा करामहे। यस्या॑^
उ॒पस्थ॑^उ॒र्व1(अ॒)न्तरि॑क्षं॒- सा न॒. श्शर्म॑ त्रि॒वरू॑थ॒.न्नि य॑च्छात्।। 2।।-

07-01-08

卐 दिते॑ः पु॒त्राणा॒. मदि॑ते. रकारि॒षं- मव॑ दे॒वानां॑ बृ॒ह॒ता. मन॒र्मणा॑म्। तेषां॒ हि
धाम॑ गभि॒ष.क्स॑मु॒द्रि॒य-न्नैना॒. न्नम॑सा परो अ॑स्ति॒ कश्च॒न।। 1।।-

07-01-09

卐 भ॒द्रा. दधि॒ श्रेय॒ः प्रेहि॒- बृ॒हस्पति॑ः पुर^ए॒ता ते॑ अस्तु। अथे॒म. म॒स्या^ वर॒
आ पृ॑थि॒व्या^- आ॒रे शत्रु॒.ङ्कृणुहि॒ सर्व॑वीरम्।। 1।।-

07-01-10

卐 प्रप॑थे प॒था. मज॑निष्ट पू॒षा- प्रप॑थे दि॒वः प्रप॑थे पृथि॒व्याः। उ॒भे~ अ॒भि
प्रि॒यत॑मे स॒धस्थे॒- आ च॒ परा॑ च चरति प्रजा॒नन्न्।। 1।।

卐 पूषेमा^ आशा^ अनु वेद सर्वा^- स्सो अस्मा॰ अभयतमेन नेषत्। स्वस्तिदा^ आघृणि. स्सर्ववीरो-ऽप्रयुच्छ. न्पुर^ एतु प्रजानन्न्।। 2।।

卐 पूष. न्तव व्रते वय-न्न रिष्येम कदा चन। स्तोतार.स्त इह स्मसि।। 3।।

卐 परि पूषा परस्ता-द्धस्त. न्दधातु दक्षिणम्। पुन.र्नो नष्ट. माजतु- सन्नष्टेन गमेमहि।। 4।।-

07-01-11

卐 यस्ते स्तन. श्शशयु.र्यो मयोभू-र्य.स्सुम्नयु. स्सुहवो य.स्सुदत्रः। येन विश्वा पुष्यसि वार्याणि- सरस्वति तमिह धातवे कः।। 1।।-

07-01-12

卐 यस्ते पृथु स्तनयित्नु र्य^ ऋष्वो- दैवः केतु. र्विश्व. माभूषतीदम्। मा नो वधी. र्विद्युता देव सस्यं- मोत वधी. रश्मिभि. स्सूर्यस्य।। 1।।-

07-01-13

卐 सभा च मा समिति. श्चावतां- प्रजापते.र्दुहितरौ सँविदाने~। येना सङ्गच्छा उप मा स^ शिक्षा- च्चारु वदानि पितर.स्सङ्गतेषु।। 1।।

卐 विद्म ते सभे नाम- नरिष्टा नाम वा असि। ये ते के च सभासद- स्ते मे सन्तु सवाचसः।। 2।।

卐 एषा. महं समासीनानाँ- वर्चो विज्ञान. मा ददे। अस्या. स्सर्वस्या. स्संसदो- मा. मिन्द्र भगिन. ङ्कृणु।। 3।।

卐 यद्वो मनः परागतँ- यद्बद्ध. मिह वेह वा। तद्व आ वर्तयामसि- मयि वो रमतां मनः।। 4।।-

07-01-14

卐 यथा सूर्यो नक्षत्राणा- मुद्यं.स्तेजां.स्याददे। एवा स्त्रीणा.ञ्च पुंसाञ्च- द्विषताँ वर्च आ ददे।। 1।।

卐 यावन्तो मा सपत्नाना- मायन्तं प्रतिपश्यथ। उद्य.न्त्सूर्य इव सुप्तानां- द्विषताँ वर्च आ ददे।। 2।।

सप्तम काण्डे द्वितीयोऽनुवाकः

07-02-01

卐 अभि त्य.न्देवं सवितार- मोण्यः कविक्रतुम्। अर्चामि सत्यसवं- रत्नधा. मभि प्रियं मतिम्।। 1।।

卐 ऊर्ध्वा यस्याऽमति.र्भा- अदिद्युत. त्सवीमनि। हिरण्यपाणि. रमिमीत- सुक्रतुः कृपा.त्स्वः।। 2।।

卐 सावीर्.हि देव प्रथमाय पित्रे- वर्ष्माणं.मस्मै वरिमाणं. मस्मै।
अथास्मभ्यं सवित. र्वार्याणि- दिवोदिव^ आ सुवा भूरि पश्वः।। 3।।

卐 दमूना देव. स्सविता वरेण्यो- दध.द्रत्न.न्दक्षं पितृभ्य^ आयूंषि। पिबा.
त्सोमं ममद.देन. मिष्टे- परिज्मा चि.त्क्रमते अस्य धर्मणि।। 4।।-

07-02-02

卐 तां सवित. स्सत्यसवां सुचित्रा- माऽहँ वृणे सुमतिं विश्ववाराम्।
या.मस्य कण्वो अदुह.त्प्रपीनां- सहस्रधारां महिषो भगाय।। 1।।-

07-02-03

卐 बृहस्पते सवित. र्वर्धयैन-ज्योतयैनं महते सौभगाय। संशित.श्चि.त्सन्तरं
सं शिशाधि- विश्व एन. मनु मदन्तु देवाः।। 1।।-

07-02-04

卐 धाता दधातु नो रयि- मीशानो जगत.स्पतिः। स^ नः॰ पूर्णेन यच्छतु।।
1।।

卐 धाता दधातु दाशुषे- प्राची.ञ्जीवातु. मक्षिताम्। वय. न्देवस्य धीमहि-
सुमतिँ विश्वराधसः।। 2।।

Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 धाता विश्वा वार्या दधातु- प्रजाकामाय दाशुषे दुरोणे। तस्मै देवा^ अमृतं सँ व्ययन्तु- विश्वे देवा^ अदिति. स्सजोषाः।। 3।।

卐 धाता राति. स्सवितेद.ञ्जुषन्तां- प्रजापति. र्निधिपति.र्नो अग्निः। त्वष्टा विष्णुः प्रजया^ संरराणो- यजमानाय द्रविण. न्दधातु।। 4।।-

07-02-05

卐 प्र नभस्व पृथिवि- भिन्द्धी3-(ई)द. न्दिव्य न्नभः। उद्नो दिव्यस्य नो धात- रीशानो वि ष्या दृतिम्।। 1।।

卐 न घ्रं.स्तताप न हिमो जघान- प्र नभतां पृथिवी जीरदानुः। आप.श्चि.दस्मै घृत. मित्क्षरन्ति- यत्र सोम. स्सद.मि.त्तत्र भद्रम्।। 2।।-

07-02-06

卐 प्रजापति. र्जनयति प्रजा^ इमा^- धाता दधातु सुमनस्यमानः। सञ्जानाना. स्संमनस. स्सयोनयो- मयि पुष्टं पुष्टपति. र्दधातु।। 1।।-

07-02-07

卐 अन्वद्य नोऽनुमति- र्यज्ञ. न्देवेषु मन्यताम्। अग्निश्च हव्यवाहनो- भवता. न्दाशुषे मम।। 1।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 अन्वि.दनुमते त्वं- मंससे शञ्च न.स्कृधि। जुषस्व हव्य. माहुतं- प्रजा. न्देवि ररास्व नः।। 2।।

卐 अनु मन्यता. मनुमन्यमानः- प्रजावन्तं रयि. मक्षीयमाणम्। तस्य वयं हेडसि माऽपि भूम- सुमृडीके अस्य सुमतौ स्याम।। 3।।

卐 यत्ते नाम सुहवं सुप्रणीते-ऽनुमते अनुमतं सुदानु। तेना नो यज्ञं पिपृहि विश्ववारे- रयि.न्नो धेहि सुभगे सुवीरम्।। 4।।

卐 एमँ यज्ञ. मनुमति. र्जगाम- सुक्षेत्रतायै सुवीरतायै सुजातम्। भद्रा ह्यस्याः प्रमति. र्बभूव- सेमँ यज्ञ. मवतु देवगोपा।। 5।।

卐 अनुमति. स्सर्व. मिदं बभूव- य.त्तिष्ठति चरति य.दु च विश्व मेजति। तस्या.स्ते देवि सुमतौ स्यामा-ऽनुमते अनु हि मंससे नः।। 6।।-

07-02-08

卐 समेत विश्वे वचसा पति. न्दिव॑- एको विभू. रतिथि. र्जनानाम्। स॑ पूर्व्यो नूतन. माविवास- त्तँ वर्तनि. रनु वावृत एक. मित्पुरु।। 1।।-

07-02-09

卐 अयं सहस्र.मा नो दृशे कवीनां- मति. ज्योति. र्विधर्मणि।। 1।।

卐 ब्रध्न. स्समीची- रुषस. स्समैरयन्न्। अरेपस. स्सचेतस. स्स्वसरे-

मन्युमत्तमा.श्चिते गोः।। 2।।

## ॐ सप्तम काण्डे तृतीयोऽनुवाकः

07-03-01

卐 दौष्वंप्य. न्दौर्जीवित्यं- रक्षो अभ्व. मराय्यः। दुर्णाम्नी.स्सर्वा^ दुर्वाच-

स्ता^ अस्म.न्नाशयामसि।। 1।

07-03-02

卐 य.न्न इन्द्रो अखन.द्यदग्नि- र्विश्वे देवा^ मरुतो यत्स्वर्काः। तदस्मभ्यं

सविता सत्यधर्मा- प्रजापति. रनुमति. र्नि यच्छात्।। 1।।-

07-03-03

卐 ययो. रोजसा स्कभिता रजांसि- यौ वीर्यै. र्वीरतमा शविष्ठा। यौ पत्येते~

अप्रतीतौ सहोभि- र्विष्णु. मग. न्वरुणं पूर्वहूतिः।। 1।।

卐 यस्येदं प्रदिशि यद्विरोचते- प्र चानति वि च चष्टे शचीभिः। पुरा देवस्य

धर्मणा सहोभि- र्विष्णु. मग. न्वरुणं पूर्वहूतिः।। 2।।-

07-03-04

卐 विष्णो.र्नुकं प्राऽवोचँ वीर्याणि- यः पार्थिवानि विममे रजांसि। यो अस्कभाय. दुत्तरं सधस्थँ- विचक्रमाण. स्त्रेधोरुगायः।। 1।।

卐 प्र त.द्विष्णु. स्स्तवते वीर्याणि- मृगो न भीमः कुचरो गिरिष्ठाः। परावत^ आ जगम्या.त्परस्याः।। 2।।

卐 यस्योरुषु त्रिषु विक्रमणे-ष्वधिक्षियन्ति भुवनानि विश्वा। उरु विष्णो~ वि क्रम-स्वोरु क्षयाय न.स्कृधि। घृत. ङ्घृतयोने पिब- प्रप्र यज्ञपति. न्तिर।।

3।।

卐 इदँ विष्णु.र्वि चक्रमे- त्रेधा नि दधे पदा। समूढ.मस्य पांसुरे।। 4।।

卐 त्रीणि पदा वि चक्रमे- विष्णु. र्गोपा^ अदाभ्यः। इतो धर्माणि धारयन्न्।।5।।

卐 विष्णोः कर्माणि पश्यत- यतो व्रतानि पस्पशे। इन्द्रस्य युज्य. स्सखा।।

6।।

卐 तद्विष्णोः परमं पदं-सदा पश्यन्ति सूरयः। दिवीव चक्षु.राततम्।। 7।।

卐 दिवो विष्ण उत वा पृथिव्या^- महो विष्ण उरो. रन्तरिक्षात्। हस्तौ पृणस्व बहुभि. र्वसव्यै- रा प्र यच्छ दक्षिणा.दोत सव्यात्।। 8।।-

07-03-05

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

卐 इडैवास्मा॒ऽ अनु॑ वस्ताँ व्र॒ते॒न- यस्या॑ः प॒दे पु॒नते॑ दे॒व॒यन्त॑ः। घृ॒तप॑दी॒ शक्व॑री॒ सोम॑पृ॒-ष्ठोप॑ य॒ज्ञ. म॑स्थित वैश्वदे॒वी।। 1।।-

07-03-06

卐 वे॒द. स्स्व॒स्ति. द्रु॒घ॒ण. स्स्व॒स्तिः- प॑र॒शु. र्वेदि॑ः पर॒शु. र्न.स्स्व॒स्ति। ह॒वि॒ष्कृतो॑ य॒ज्ञिया॑ य॒ज्ञकामा॒-स्ते दे॒वासो॑ य॒ज्ञ. मि॒म. ञ्जुषन्ताम्।। 1।।-

07-03-07

卐 अग्ना॑विष्णू॒ महि॒ तद्वां॑ महि॒त्वं- पा॒थो घृ॒तस्य॒ गुह्य॑स्य॒ नाम॑। दमे॑दमे स॒प्त रत्ना॒ दधा॑नौ॒- प्रति॑ वा.ञ्जि॒ह्वा घृ॒त.मा च॑रण्यात्।। 1।।

卐 अग्ना॑विष्णू॒ महि॒ धाम॑ प्रि॒यँ वाँ॑- वी॒थो घृ॒तस्य॒ गुह्या॑ जुषा॒णौ। दमे॑दमे सुष्टुत्या वा॑वृधा॒नौ- प्रति॑ वा.ञ्जि॒ह्वा घृ॒त. मुच्च॑रण्यात्।। 2।।-

07-03-08

卐 स्वाक्तं॑ मे॒ द्यावा॑पृथि॒वी- स्वाक्तं॑ मि॒त्रो अ॑क.॒रयम्। स्वाक्तं॑ मे॒ ब्रह्म॒णस्प॒ति- स्स्वाक्तं॑ सवि॒ता क॑रत्।। 1।।-

07-03-09

卐 इन्द्रो॒तिभि॑. र्बहुलाभि॑. र्नो अ॒द्य- या॑वच्छ्रे॒ष्ठाभि॑. र्मघव.न्छूर जिन्व। यो नो॒ द्वेष्ट्यध॑र.॒स्स.स्प॑दीष्ट॒- य.मु॑ द्वि॒ष्म.स्तमु॑ प्रा॒णो ज॑हातु।। 1।।-

🕉 07-03-10

卐 उप प्रियं पनिप्नतं- युवान माहुती वृधम्। अगन्म बिभ्रतो नमो-दीर्घ.मायुः कृणोतु मे।। 1।।-

🕉 07-03-11

卐 सं मा सिञ्चन्तु मरुत- स्सं पूषा सं बृहस्पतिः। सं माऽय मग्नि.स्सिञ्चतु- प्रजया च धनेन च- दीर्घमायुः कृणोतु मे।। 1।।-

🕉 07-03-12

卐 अग्ने जाता.न्प्र णुदा मे सपत्ना- न्प्रत्यजाता.न्जातवेदो नुदस्व। अधस्पद.ङ्कृणुष्व ये पृतन्यवो-ऽनागस.स्ते वय. मदितये स्याम।। 1।।-

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

🕉 07-03-13

卐 प्रान्या.न्त्सपत्ना.न्त्सहसा सहस्व- प्रत्यजाता.न्जातवेदो नुदस्व। इदं राष्ट्रं पिपृहि सौभगाय- विश्व एन. मनु मदन्तु देवाः।। 1।।

卐 इमा^ यास्ते शतं हिरा- स्सहस्र. न्धमनी. रुत। तासा.न्ते सर्वासा. मह-मश्मना बिल. मप्यधाम्।। 2।।

卐 परँ योने. रवर.न्ते कृणोमि- मा त्वा प्रजाऽभि भू.न्मोत सूनुः। अस्व1(अ)न्त्वाऽप्रजस. ङ्कृणो-म्यश्मान.न्ते अपिधान. ङ्कृणोमि।। 3।।-

07-03-14

卐 अक्ष्यौ नौ मधुसङ्काशे- अनीक.न्नौ समञ्जनम्। अन्तः कृणुष्व मां हृदि- मन^ इन्नौ सहाऽसति।। 1।।-

07-03-15

卐 अभि त्वा मनुजातेन- दधामि मम वाससा। यथाऽसो मम केवलो- नाऽन्यासा. ङ्कीर्तया.श्चन।। 1।।-

07-03-16

卐 इद.ङ्खनामि भेषजं- मां पश्य.मभिरोरुदम्। परायतो निवर्तन-मायतः प्रतिनन्दनम्।। 1।।

卐 येना निचक्र आसु-रीन्द्र. न्देवेभ्य.स्परि। तेना नि कुर्वे त्वा.महँ- यथा तेऽसानि सुप्रिया।। 2।।

卐 प्रतीची सोम.मसि- प्रतीच्युत सूर्यम्। प्रतीची विश्वा. न्देवा- न्ता. न्त्वाऽच्छाऽऽ वदामसि।। 3।।

卐 अहँ वदामि नेत्त्वं- सभाया. मह त्वँ वद। ममेदस.स्त्व.ङ्केवलो- नाऽन्यासा. ङ्कीर्तया.श्चन।। 4।।

卐 यदि वाऽसि तिरोजनँ- यदि वा नद्य.स्तिरः। इयं ह मह्य.न्त्वा. मोषधि-
र्बद्धेव न्यानयत्।। 5।।-

## ऽ॒ऽ सप्तम काण्डे चतुर्थोऽनुवाकः

07-04-01

卐 दिव्यं सुपर्णं पयसं बृहन्त- मपा. ङ्गर्भँ वृषभ. मोषधीनाम्। अभीपतो वृष्ट्या तर्पयन्त-मा नो गोष्ठे रयिष्ठां स्थापयाति।। 1।।-

07-04-02

卐 यस्य व्रतं पशवो यन्ति सर्वे- यस्य व्रत उपतिष्ठन्त आपः। यस्य व्रते पुष्टपति. र्निविष्ट-स्तं सरस्वन्त. मवसे हवामहे।। 1।।

卐 आ प्रत्यञ्च. न्दाशुषे दाश्वंसं- सरस्वन्तं पुष्टपतिं रयिष्ठाम्। रायस्पोषं श्रवस्युँ वसाना^- इह हुवेम सदनं रयीणाम्।। 2।।-

07-04-03

卐 अति धन्वा.न्यत्यप.स्ततर्द- श्येनो नृचक्षा^ अवसानदर्शः। तर.न्विश्वा.न्यवरा रजां-सीन्द्रेण सख्या शिव^ आ जगम्यात्।। 1।।

卐 श्येनो नृचक्षा दिव्य. स्सुपर्ण- स्सहस्रपा.च्छतयोनि. र्वयोधाः। स^ नो नि यच्छा. द्वसु यत्पराभृत- मस्माक. मस्तु पितृषु स्वधावत्।। 2।।

07-04-04

卐 सोमारुद्रा वि वृहतँ विषूची- ममीवा या नो गय. माविवेश। बाधेथा. न्दूर. न्निर्ऋतिं पराचैः- कृत.श्चिदेनः प्र मुमुक्त. मस्मत्।। 1।।

卐 सोमारुद्रा युव मेता.न्यस्म- द्विश्वा तनूषु भेषजानि धत्तम्। अव स्यतं मुञ्चतँ यन्नो अस- त्तनूषु बद्ध.ङ्कृत. मेनो अस्मत्।। 2।।-

07-04-05

卐 शिवा.स्त एका अशिवा.स्त एका- स्सर्वा^ बिभर्षि सुमनस्यमानः। तिस्रो वाचो निहिता^ अन्त रस्मि- न्तासा.मेका वि पपाताऽनु घोषम्।। 1।।-

07-04-06

卐 उभा जिग्यथु.र्न परा जयेथे~- न परा जिग्ये कतर.श्चनैनयोः। इन्द्रश्च विष्णो~ य.दपस्पृधेथा- न्त्रेधा सहस्रँ वि त.दैरयेथाम्।। 1।।-

07-04-07

卐 जना. द्विश्वजनीना- त्सिन्धुत.स्पर्याभृतम्। दूरा.त्त्वा.मन्य उद्भृत- मीर्ष्याया^ नाम भेषजम्।। 1।।-

07-04-08

卐 अग्ने. रिवास्य दहतो- दावस्य दहतः पृथक्। एता. मेतस्येर्ष्या-
मुद्राऽग्नि. मिव शमय।। 1।।-

07-04-09

卐 सिनीवालि पृथुष्टुके- या देवाना. मसि स्वसा। जुषस्व हव्य. माहुतं-
प्रजा. न्देवि दिदिड्ढि नः।। 1।।

卐 या सुबाहु.स्स्वङ्गुरि- स्सुषूमा बहुसूवरी। तस्यै विश्पत्न्यै हवि-
स्सिनीवाल्यै जुहोतन।। 2।।

卐 या विश्पत्नीन्द्र. मसि प्रतीची- सहस्रस्तुकाऽभियन्ती देवी। विष्णोः
पत्नि तुभ्यं राता हवींषि- पति.न्देवि राधसे चोदयस्व।। 3।।-

07-04-10

卐 कुहू.न्देवीं सुकृतँ विद्मनापस- मस्मि.न्यज्ञे सुहवा जोहवीमि। सा नो
रयिँ विश्ववार.न्नि यच्छा-द्ददातु वीरं शतदाय. मुक्थ्यम्।। 1।।

卐 कुहू. र्देवाना. ममृतस्य पत्नी- हव्या नो अस्य हविषो जुषेत। शृणोतु
यज्ञ. मुशती नो अद्य- राय.स्पोष.श्चिकितुषी दधातु।। 2।।-

07-04-11

卐 राका. महं सुहवा सुष्टुती हुवे- शृणोतु न.स्सुभगा बोधतु त्मना। सीव्य.
त्वप.स्सूच्याऽच्छिद्यमानया- ददातु वीरं शतदाय. मुक्थ्यम्।। 1।।

卐 यास्ते राके सुमतय.स्सुपेशसो- याभि. र्ददासि दाशुषे वसूनि। ताभि.र्नो
अद्य सुमना^ उपाऽऽगहि- सहस्राऽऽपोषं सुभगे रराणा।। 2।।-

07-04-12

卐 देवानां पत्नी. रुशती.रवन्तु नः- प्रावन्तु न.स्तुजये वाजसातये। याः
पार्थिवासो या^ अपा. मपि व्रते- ता नो देवी. स्सुहवा. श्शर्म यच्छन्तु।।
1।।

卐 उत ग्ना^ व्यन्तु देवपत्नी- रिन्द्राण्य1(अ)ग्न्या.य्यश्विनी राट्। आ
रोदसी~ वरुणानी शृणोतु- व्यन्तु देवी.र्य^ ऋतु. र्जनीनाम्।। 2।।-

07-04-13

卐 यथा वृक्ष. मशनि- र्विश्वाहा हन्त्यप्रति। एवाह. मद्य कितवा-
नक्षै.र्बध्यास. मप्रति।। 1।।

卐 तुराणा. मतुराणाँ- विशा. मवर्जुषीणाम्। समैतु विश्वतो भगो-
अन्तर्हस्त.ङ्कृतं मम।। 2।।

卐 ईडे अग्निं स्वावसुं. न्नमोभि- रिह प्रसक्तो वि चय.त्कृत.न्नः। रथै.रिव प्र भरे वाजयद्भिः- प्रदक्षिणं मरुतां स्तोम.मृध्याम्।। 3।।

卐 वय.ञ्जयेम त्वया युजा वृत- मस्माक. मंश मुद्वा भरेभरे। अस्मभ्य. मिन्द्र वरीय. स्सुग.ङ्कृधि- प्र शत्रूणां मघव.न्वृष्ण्या रुज।। 4।।

卐 अजैष.न्त्वा सँलिखित- मजैष. मुत संरुधम्। अविं वृको यथा मथ-देवा मथ्नामि ते कृतम्।। 5।।

卐 उत प्रहा. मतिदीवा जयति- कृत.मिव श्वघ्नी वि चिनोति काले। यो देवकामो न धनं रुणद्धि- स मि.त्तं राय. स्सृजति स्वधाभिः।। 6।।

卐 गोभिष्टरेमाऽमतिं.न्दुरेवाँ- यवेन वा क्षुधं पुरुहूत विश्वे। वयं राजसु प्रथमा धना-न्यरिष्टासो वृजनीभि.र्जयेम।। 7।।

卐 कृतं मे दक्षिणे हस्ते- जयो मे सव्य आहितः। गोजि.द्भूयास. मश्वजि-द्धनञ्जयो हिरण्यजित्।। 8।।

卐 अक्षाः फलवती. न्द्युव- न्दत्त गा.क्षीरिणी. मिव। सं मा कृतस्य धारया-धनु. स्स्नाव्नेव नह्यत।। 9।।-

07-04-14

卐 बृहस्पति.र्नः परि पातु पश्चा- दुतोत्तरस्मा. दधरा.दघायोः। इन्द्रः पुरस्ता.दुत मध्यतो न- स्सखा सखिभ्यो वरीयः कृणोतु।। 1।।

### सप्तमकाण्डे पञ्चमोऽनुवाकः

07-05-01

卐 संज्ञान.न्न. स्स्वेभि- स्संज्ञान. मरणेभिः। संज्ञान. मश्विना युव- मिहाऽस्मासु नि यच्छतम्।। 1।।

卐 सज्ञानामहै मनसा सञ्चिकित्वा- मा युष्महि मनसा दैव्येन। मा घोषा^ उत्स्थु. र्बहुले विनिर्हते- मेषुः पप्त.दिन्द्रस्याऽह.न्यागते।। 2।।-

07-05-02

卐 अमुत्रभूया. दधि य.द्यमस्य- बृहस्पते रभिशस्ते. रमुञ्चः। प्रत्यौहता. मश्विना मृत्यु. मस्म-द्देवाना. मग्ने भिषजा शचीभिः।। 1।।

卐 सङ्क्रामतं मा जहीतं शरीरं- प्राणापानौ ते सयुजा.विह स्ताम्। शत.ञ्जीव शरदो वर्धमानो-ऽग्नि.ष्टे गोपा^ अधिपा^ वसिष्ठः।। 2।।

卐 आयु. र्यत्ते अतिहितं पराचै- रपानः प्राणः पुन.रा ताविताम्। अग्नि.ष्टदाहा. र्निर्ऋते. रुपस्था- त्तदात्मनि पुन.रा वेशयामि ते।। 3।।

卐 मेमं प्राणो हासी. न्मो~ अपानो-ऽवहाय परा गात्। सप्तरृषिभ्य^ एनं परि ददामि- त एनं स्वस्ति जरसे वहन्तु।। 4।।

卐 प्र विशतं प्राणापाना- वनड्वाहा.विव व्रजम्। अय.ञ्जरिम्ण. श्शेवधि-ररिष्ट^ इह वर्धताम्।। 5।।

卐 आ ते प्राणं सुवामसि- परा यक्ष्मं सुवामि ते। आयु.र्नो विश्वतो दध- दय. मग्नि. र्वरेण्यः।। 6।।

卐 उद्वय. न्तमस. स्परि- रोहन्तो नाक. मुत्तमम्। देव. न्देवत्रा सूर्य-मगन्म ज्योति.रुत्तमम्।। 7।।-

07-05-03

卐 ऋचं साम यजामहे- याभ्या.ङ्कर्माणि कुर्वते। एते सदसि राजतो-यज्ञ.न्देवेषु यच्छतः।। 1।।

卐 ऋचं साम यदप्राक्षं- हवि.रोजो यजु. र्बलम्। एष^ मा तस्मा-न्मा हिंसी-द्वेदः पृष्ट. श्शचीपते।। 2।।-

07-05-04

卐 ये ते पन्थानोऽव दिवो- येभि. र्विश्व. मैरयः। तेभि. स्सुम्नया धेहि नो वसो~।। 1।।-

07-05-05

卐 तिरश्चिराजे.रसिता-त्पृदाकोः परि सम्भृतम्। तत्कङ्कपर्वणो विष- मियँ वीरु.दनीनशत्।।1।।

卐 इयँ वीरु. न्मधुजाता- मधुश्चु.न्मधुला मधूः। सा विह्रुतस्य भेष-ज्यथो~ मशकजम्भनी।। 2।।

卐 यतो दष्टँ यतो धीत- न्ततं.स्ते निर्ह्वयामसि। अर्भस्य तृप्रदंशिनो- मशकस्याऽरसँ विषम्।। 3।।

卐 अयँ यो वक्रो विपरु. र्व्यङ्गो- मुखानि वक्रा वृजिना कृणोषि। तानि त्वं ब्रह्मणस्पत- इषीका.मिव स.न्नमः।। 4।।

卐 अरसस्य शर्कोटस्य- नीचीन.स्योपसर्पतः। विषं ह्य1(अ)स्याऽऽदि- ष्यथो~ एन. मजीजभम्।। 5।।

卐 न ते बाह्वो. र्बल. मस्ति- न शीर्षे नोत मध्यतः। अथ किं पापयाऽमुया- पुच्छे बिभर्ष्यर्भकम्।। 6।।

卐 अदन्ति त्वा पिपीलिका^- वि वृश्चन्ति मयूर्यः। सर्वे भल ब्रवाथ- शार्कोट. मरसँ विषम्।। 7।।

卐 य^ उभाभ्यां प्रहरसि- पुच्छेन चाऽऽस्येन च। आस्ये3(ए) न ते विष- क्कि.मु ते पुच्छधा.वसत्।। 8।।-

07-05-06

卐 यदाशसा वदतो मे विचुक्षुभे- यद्याचमानस्य चरतो जनाँ अनु। यदात्मनि तन्वो मे विरिष्टं- सरस्वती त.दापृण.द्धृतेन।। 1।।

卐 सप्त क्षरन्ति शिशवे मरुत्वते- पित्रे पुत्रासो अप्यवीवृत.न्नृतानि। उभे~ इदस्योभे~ अस्य राजत^- उभे~ यतेते~ उभे~ अस्य पुष्यतः।। 2।।-

07-05-07

卐 इन्द्रावरुणा सुतपा. विमं सुतं- सोमं पिबतं मद्य.न्धृतव्रतौ। युवो रथो अध्वरो देववीतये- प्रति स्वसर. मुप यातु पीतये।। 1।।

卐 इन्द्रावरुणा मधुमत्तमस्य- वृष्ण. स्सोमस्य वृषणा वृषेथाम्। इदँ वा.मन्धः परिषिक्त- मासद्याऽस्मि. न्बर्हिषि मादयेथाम्।। 2।।-

07-05-08

卐 यो न.श्शपा.दशपत-श्शपतो यश्च न.श्शपात्। वृक्ष^इव विद्युता हत^- आ मूला. दनु शुष्यतु।। 1।।

## ꗃ सप्तम काण्डे षष्ठोऽनुवाकः

07-06-01

卐 ऊर्जं बिभ्र.द्वसुवनि.स्सुमेधा- अघोरेण चक्षुषा मित्रियेण। गृहा.नैमि सुमना^ वन्दमानो- रमध्वं मा बिभीत मत्।। 1।।

卐 इमे गृहा^ मयोभुव^- ऊर्जस्वन्तः पयस्वन्तः। पूर्णा^ वामेन तिष्ठन्त-स्ते नो जान.न्त्वायतः।। 2।।

卐 येषा. मध्येति प्रवस-न्येषु सौमनसो बहुः। गृहा. नुप ह्वयामहे- ते नो जान.न्त्वायतः।। 3।।

卐 उपहूता^ भूरिधना- स्सखाय. स्स्वादुसम्मुदः। अक्षुध्या^ अतृष्या.स्स्त- गृहा^ माऽस्म. द्बिभीतन।। 4।।

卐 उपहूता^ इह गाव^- उपहूता^ अजावयः। अथो~ अन्नस्य कीलाल^- उपहूतो गृहेषु नः।। 5।।

卐 सूनृतावन्त. स्सुभगा^- इरावन्तो हसामुदाः। अतृष्या^ अक्षुध्या.स्स्त- गृहा^ माऽस्म. द्बिभीतन।। 6।।

卐 इहैव स्त माऽनु गात- विश्वा रूपाणि पुष्यत। ऐष्यामि भद्रेणा सह- भूयांसो भवता मया।। 7।।-

07-06-02

卐 यदग्ने तपसा तप^- उपतप्यामहे तपः। प्रिया.श्श्रुतस्य भूयास्मा-
ऽयुष्मन्त. स्सुमेधसः।। 1।।

卐 अग्ने तप.स्तप्यामह- उप तप्यामहे तपः। श्रुतानि शृण्वन्तो वय-
मायुष्मन्त. स्सुमेधसः।। 2।।-

07-06-03

卐 अय.मग्नि. स्सत्पति. र्वृद्धवृष्णो- रथीव पत्ती. नजय.त्पुरोहितः। नाभा
पृथिव्या.न्निहितो दविद्युत-दधस्पद.ङ्कृणुताँ ये पृतन्यवः।। 1।।-

07-06-04

卐 पृतनाजितं सहमान. मग्नि- मुक्थैर् हवामहे परमा.त्सधस्थात्। स^ नः
परष. दति दुर्गाणि विश्वा- क्षाम द्देवोऽति दुरिता.न्यग्निः।। 1।।-

07-06-05

卐 इदँ यत्कृष्ण. श्शकुनि- रभिनिष्पत.न्नपीपतत्। आपो मा तस्मा.
त्सर्वस्मा- द्दुरिता.त्पान्त्वंहसः।। 1।।

卐 इदँ यत्कृष्ण. श्शकुनि- रवाऽमृक्ष. न्निरृऋते ते मुखेन। अग्नि.र्मा तस्मा.
देनसो- गार्हपत्यः प्र मुञ्चतु।। 2।।-

☫ 07-06-06

卐 प्रतीचीनफलो हि त्व-मपामार्ग रुरोहिथ। सर्वा.न्मच्छपथा॒ अधि-वरीयो यावया इतः।। 1।।?

卐 यद्दुष्कृतँ यच्छमलँ- यद्वा चेरिम पापया। त्वया तद्विश्वतोमुखा-ऽपामार्गाऽप मृज्महे।। 2।।

卐 श्यावदता कुनखिना- बण्डेन यत्सहाऽऽसिम। अपामार्ग त्वया वयं-सर्व. न्तदप मृज्महे।। 3।।-

☫ 07-06-07

卐 यद्यन्तरिक्षे यदि वात^ आस- यदि वृक्षेषु यदि वोलपेषु। यदश्रव. न्पशव^ उद्यमान- न्तद्ब्राह्मणं पुन.रस्मा. नुपैतु।। 1।।-

☫ 07-06-08

卐 पुन. मैत्विन्द्रियं पुन-रात्मा द्रविणं ब्राह्मण.ञ्च। पुन.रग्नयो धिष्ण्या^-यथास्थाम कल्पयन्ता. मिहैव।। 1।।-

☫ 07-06-09

卐 सरस्वति व्रतेषु ते- दिव्येषु देवि धामसु। जुषस्व हव्य. माहुतं- प्रजा. न्देवि ररास्व नः।। 1।।

卐 इद.न्ते हव्य. ङ्घृतव.त्सरस्व-तीदं पितृणां हवि. रास्य1(अँ) यत्। इमानि त उदिता शन्तमानि- तेभि. र्वयं मधुमन्त. स्स्याम।। 2।।-

07-06-10

卐 शिवा न.श्शन्तमा भव- सुमृडीका सरस्वति। मा ते युयोम सन्दृशः।। 1।।-

07-06-11

卐 श.न्नो वातो वातु- शन्न. स्तपतु सूर्यः। अहानि शं भवन्तु न- श्शं रात्री प्रति धीयतां- श.मुषा^ नो व्युच्छतु।। 1।।-

07-06-12

卐 यत्किञ्चासौ मनसा यच्च वाचा- यज्ञै. र्जुहोति हविषा यजुषा। तन्मृत्युना निरृत्ति. स्सँविदाना- पुरा सत्या.दाहुतिं हन्त्वस्य।। 1।।

卐 यातुधाना निरृत्ति. रादु रक्ष- स्ते अस्य घ्न.न्त्वनृतेन सत्यम्। इन्द्रेषिता^ देवा^ आज्य मस्य मथ्नन्तु- मा तत्सं पादि यदसौ जुहोति।। 2।।

卐 अजिराधिराजौ श्येनौ- सम्पातिना.विव। आज्यं पृतन्यतो हताँ- यो न꣫ क.श्चाऽभ्यघायति।। 3।।

卐 अपाञ्चौ त उभौ बाहू~- अपि नह्या.म्यास्यम्। अग्ने. दैवस्य मन्युना-
तेन तेऽवधिषं हविः।। 4।।

卐 अपि नह्यामि ते बाहू~- अपि नह्या.म्यास्यम्। अग्ने. घोरस्य मन्युना-
तेन तेऽवधिषं हविः।। 5।।-

07-06-13

卐 परि त्वाऽग्ने पुरँ वयँ- विप्रं सहस्य धीमहि। धृषद्वर्ण. न्दिवेदिवे- हन्तारं
भङ्गुरावतः।। 1।।-

07-06-14

卐 उत्तिष्ठताऽव पश्य-तेन्द्रस्य भाग.मृत्वियम्। यदि श्रात.ञ्जुहोतन-
यद्यश्रातं ममत्तन।। 1।।

卐 श्रातं हवि.रो ष्विन्द्र प्र याहि- जगाम सूरो अध्वनो वि मध्यम्। परि
त्वाऽऽसते निधिभि. स्सखायः- कुलपा^ न व्राजपति.श्चरन्तम्।। 2।।-

07-06-15

卐 श्रातं मन्य ऊधनि श्रात. मग्नौ- सुश्रृतं मन्ये तदृत.न्नवीयः।
माध्यन्दिनस्य सवनस्य दध्नः- पिबेन्द्र वज्रि.न्पुरुकृ.ज्जुषाणः।। 1।।-

07-06-16

卐 समिद्धो अग्नि. र्वृषणा रथी दिव- स्तप्तो घर्मो दुह्यते वा.मिषे मधु। वयं हि वां पुरुदमासो अश्विना- हवामहे सधमादेषु कारवः।। 1।।

卐 समिद्धो अग्नि.रश्विना- तप्तो वा.ङ्घर्म^ आ गतम्। दुह्यन्ते नूनँ वृषणेह धेनवो- दस्रा मदन्ति वेधसः।। 2।।

卐 स्वाहाकृत.श्शुचि. र्देवेषु यज्ञो- यो अश्विनो. श्चमसो देवपानः। त.मु विश्वे अमृतासो जुषाणा^- गन्धर्वस्य प्रत्यास्ना रिहन्ति।। 3।।

卐 यदुस्त्रिया^ स्वाहुत.ङ्घृतं पयो-ऽयं स^ वा.मश्विना भाग^ आ गतम्। माध्वी धर्तारा विदथस्य सत्पती~- तप्त. ङ्घर्मं पिबतं रोचने दिवः।। 4।।

卐 तप्तो वा.ङ्घर्मो नक्षतु स्वहोता- प्र वा.मध्वर्यु.श्चरतु पयस्वान्। मधो. र्दुग्धस्याऽश्विना तनाया- वीतं पातं पयस^ उस्त्रियायाः।। 5।।

卐 उप द्रव पयसा गोधुगोष-मा घर्मे सिञ्च पय^ उस्त्रियायाः। वि नाक. मख्य.त्सविता वरेण्यो-ऽनुप्रयाण मुषसो वि राजति।। 6।।

卐 उप ह्वये सुदुघा.न्धेनु. मेतां- सुहस्तो गोधु.गुत दोह.देनाम्। श्रेष्ठं सवं सविता साविष.न्नो-ऽभीद्धो घर्म.स्त.दु षु प्र वोचत्।। 7।।

卐 हिङ्कृण्वती वसुपत्नी वसूनाँ- वत्स. मिच्छन्ती मनसा न्यागन्न्। दुहा. मश्विभ्यां पयो अघ्न्येयं- सा वर्धतां महते सौभगाय।। 8।।

卐 जुष्टो दमूना अतिथि. र्दुरोण- इम.न्नो यज्ञ. मुप याहि विद्वान्। विश्वा अग्ने अभियुजो विहत्य- शत्रूयता. मा भरा भोजनानि।। 9।।

卐 अग्ने शर्ध महते सौभगाय- तव द्युम्ना. न्युत्तमानि सन्तु। सञ्जास्पत्यं सुयम.मा कृणुष्व- शत्रूयता. मभि तिष्ठा महांसि।। 10।।

卐 सूयवसा.द्भगवती हि भूया- अधा वयं भगवन्त.स्स्याम। अद्धि तृण.मघ्न्ये विश्वदानीं- पिब शुद्ध. मुदक माचरन्ती।। 11।।-

## सप्तम काण्डे सप्तमोऽनुवाकः

07-07-01

卐 अपचितां लोहिनीना-ङ्कृष्णा मातेति शुश्रुम। मुने. र्देवस्य मूलेन- सर्वा विध्यामि ता अहम्।। 1।।

卐 विध्या.म्यासां प्रथमाँ- विध्या.म्युत मध्यमाम्। इद.ञ्जघन्या. मासा-माच्छिनद्मि स्तुका.मिव।। 2।।

卐 त्वाष्ट्रेणाऽहँ वचसा- वि त ईर्ष्या.ममीमदम्। अथो यो मन्युष्टे पते- त.मु ते शमयामसि।। 3।।

卐 व्रतेन त्वँ व्रतपते समक्तो- विश्वाहा सुमना दीदिहीह। तन्त्वा वय.ञ्जातवेद. स्समिद्धं- प्रजावन्त उप सदेम सर्वे।। 4।।-

卐 07-07-02

卐 प्रजावती. स्सूयवसे रुशन्ती- श्शुद्धा^ अप. स्सुप्रपाणे पिबन्तीः। मा व.स्तेन^ ईशत माऽघशंसः- परि वो रुद्रस्य हेति. र्वृणक्तु।। 1।।

卐 पदज्ञा. स्स्थ रमतय- स्संहिता^ विश्वनाम्नीः। उप मा देवी. र्देवेभि रेत। इम.ङ्गोष्ठ. मिदं सदो- घृतेनाऽस्मा.न्त्समुक्षत।। 2।।-

卐 07-07-03

卐 आ सुस्रस.स्सुस्रसो- असतीभ्यो असत्तराः। सेहो. ररसतरा^- लवणा.द्विक्लेदीयसीः।। 1।।

卐 या^ ग्रैव्या अपचितो-ऽथो~ या उपपक्ष्याः। विजाम्नि या^ अपचित. स्स्वयंस्रसः।। 2।।

卐 यः कीकसाः प्रशृणाति- तलीद्य.मवतिष्ठति। निर्हास्तं सर्व.ञ्जायान्यं- यः कश्च ककुदि श्रितः।। 3।।

卐 पक्षी जायान्यः पतति- स^ आ विशति पूरुषम्। तदक्षितस्य भेषज- मुभयो. स्सुक्षतस्य च।। 4।।-

卐 07-07-04

卐 विघ्न वै ते जायान्य जानँ- यतो जायान्य जायसे। कथं ह तत्र त्वं हनो-
यस्य कृण्मो हवि.र्गृहे।। 1।।

卐 धृष.त्पिब कलशे सोम. मिन्द्र- वृत्रहा शूर समरे वसूनाम्। माध्यन्दिने
सवन आ वृषस्व- रयिष्ठा नो रयि. मस्मासु धेहि।। 2।।-

07-07-05

卐 सान्तपना^ इदं हवि- र्मरुत.स्तज्जुजुष्टन। अस्मा.कोती^ रिशादसः।।
1।।

卐 यो नो मर्तो मरुतो दुर्हृणायु-स्तिर.श्चित्तानि वसवो जिघांसति। द्रुहः
पाशा. न्प्रति मुञ्चतां स- स्तपिष्ठेन तपसा हन्तना तम्।। 2।।

卐 सँवत्सरीणा^ मरुत.स्स्वर्का^- उरुक्षया. स्सगणा^ मानुषासः। ते अस्म.
त्पाशा.न्प्र मुञ्च. न्त्वेनस- स्सान्तपना^ मत्सरा^ मादयिष्णवः।। 3।।

07-07-06

卐 वि ते मुञ्चामि रशनाँ- वि योक्त्रँ वि नियोजनम्। इहैव त्व.मजस्र^
एध्यग्ने।। 1।।

卐 अस्मै क्षत्राणि धारयन्त.मग्ने- युनज्मि त्वा ब्रह्मणा दैव्येन।
दीदिह्य1(अ)स्मभ्य. न्द्रविणेह भद्रं- प्रेमँ वोचो हविर्दा. न्देवतासु।। 2।।-

07-07-07

卐 यत्ते देवा^ अकृण्व. न्भागधेय-ममावास्ये सँवसन्तो महित्वा। तेना नो यज्ञं पिपृहि विश्ववारे- रयि.न्नो धेहि सुभगे सुवीरम्।। 1।।

卐 अह मेवाऽस्म्यमावास्या3(आ)-ऽमा. मावसन्ति सुकृतो मयीमे। मयि देवा^ उभये साध्या-श्चेन्द्रज्येष्ठा. स्समगच्छन्त सर्वे।। 2।।

卐 आग.न्रात्री सङ्गमनी वसूना- मूर्जं पुष्टं वस्वावेशयन्ती। अमावास्यायै हविषा विधे-मोर्ज. न्दुहाना पयसा न^ आऽगन्न्।। 3।।

卐 अमावास्ये न त्व.देता.न्यन्यो- विश्वा रूपाणि परिभू. र्जजान। यत्कामा.स्ते जुहुम. स्त.न्नो अस्तु- वयं स्याम पतयो रयीणाम्।। 4।।

07-07-08

卐 पूर्णा पश्चा.दुत पूर्णा पुरस्ता- दुन्मध्यतः पौर्णमासी जिगाय। तस्या. न्देवै. स्सँवसन्तो महित्वा- नाकस्य पृष्ठे समिषा मदेम।। 1।।

卐 वृषभँ वाजिनँ वयं- पौर्णमासँ यजामहे। स^ नो ददा.त्वक्षितां- रयि. मनुपदस्वतीम्।। 2।।

卐 प्रजापते न त्व.देता.न्यन्यो- विश्वा रूपाणि परिभू.र्जजान। यत्कामा.स्ते जुहुम.स्त.न्नो अस्तु- वयं स्याम पतयो रयीणाम्।। 3।।

卐 पौर्णमासी प्रथमा यज्ञियाऽऽसी-दह्नां रात्रीणा. मतिशर्वरेषु। ये त्वाँ यज्ञै. र्यज्ञिये अर्धय-न्त्यमी~ ते नाके सुकृत॰ प्रविष्टाः।। 4।।-

07-07-09

卐 पूर्वापर.ञ्चरतो माययैतौ- शिशू~ क्रीडन्तौ परि यातोऽर्णवम्। विश्वाऽन्यो भुवना विचष्ट -ऋतू॰ रन्यो विदध. ज्जायसे नवः।। 1।।

卐 नवोनवो भवसि जायमानो-ऽह्ना.ङ्केतु. रुषसा. मेष्यग्रम्। भाग.न्देवेभ्यो वि दधा.स्याय-न्प्र चन्द्रम. स्तिरसे दीर्घ.मायुः।। 2।।

卐 सोमस्यांशो युधांपते-ऽनूनो नाम वा असि। अनून.न्दर्श. मा कृधि-प्रजया च धनेन च।। 3।।

卐 दर्शोऽसि दर्शतोऽसि- समग्रोऽसि समन्तः। समग्र.स्समन्तो भूयास-ङ्गोभि.रश्वै॰ प्रजया पशुभि. गृहै धनेन।। 4।।

卐 यो3(ओ)ऽस्मा.न्द्वेष्टि- यँ वय.न्द्विष्म-स्तस्य त्वं प्राणेनाऽऽ प्यायस्व। आ वयं प्यासिषीमहि- गोभि.रश्वै॰ प्रजया पशुभि.गृहै.धनेन।। 5।।

卐 यन्देवा^ अंशु माप्याययन्ति- यमक्षित. मक्षिता^ भक्षयन्ति। तेनास्मा.निन्द्रो वरुणो बृहस्पति-रा प्याययन्तु भुवनस्य गोपाः।। 6।।

## ॐ सप्तम काण्डे अष्टमोऽनुवाकः

07-08-01

卐 अभ्यर्चत सुष्टुति.ङ्गव्य.माजि- मस्मासु भद्रा^ द्रविणानि धत्त। इमँ यज्ञ. न्नयत देवता^ नो- घृतस्य धारा. मधुम. त्पवन्ताम्।। 1।।

卐 मय्यग्रे अग्नि.ङ्गृह्णामि- सह क्षत्रेण वर्चसा बलेन। मयि प्रजां मय्यायु. र्दधामि- स्वाहा मय्यग्निम्।। 2।।

卐 इहैवाऽग्ने अधि धारया रयिं- मा त्वा नि क्र.न्पूर्वचित्ता निकारिणः। क्षत्रेणाऽग्ने सुयम. मस्तु तुभ्य- मुपसत्ता वर्धता.न्ते अनिष्टृतः।। 3।।

卐 अन्वग्नि.रुषसा. मग्र.मख्य- दन्वहानि प्रथमो जातवेदाः। अनु सूर्य^ उषसो अनु रश्मी-ननु द्यावापृथिवी~ आ विवेश।। 4।।

卐 प्रत्यग्नि.रुषसा. मग्र. मख्य-त्प्रत्यहानि प्रथमो जातवेदाः। प्रति सूर्यस्य पुरुधा च रश्मी- न्प्रति द्यावापृथिवी~ आ ततान।। 5।।

卐 घृतन्ते अग्ने दिव्ये सधस्थे- घृतेन त्वां मनु.रद्या समिन्धे। घृतन्ते देवी. र्नप्त्य1(अ^) आ वहन्तु- घृत.न्तुभ्य. न्दुह्रता.ङ्गावो अग्ने।। 6।।

07-08-02

卐 अप्सु ते राज.न्वरुण- गृहो हिरण्ययो मिथः। ततो धृतव्रतो राजा- सर्वा धामानि मुञ्चतु।। 1।।

卐 धाम्नोधाम्नो राज- न्नितो वरुण मुञ्च नः। यदापो अघ्न्या^ इति- वरुणेति यदूचिम- ततो वरुण मुञ्च नः।। 2।।

卐 उदुत्तमँ वरुण पाश मस्म-दवाऽधमँ वि मध्यमं श्रथाय। अधा वय मादित्य व्रते तवा-ऽनागसो अदितये स्याम।। 3।।

卐 प्रास्म.त्पाशा.न्वरुण मुञ्च सर्वान्- य उत्तमा^ अधमा^ वारुणा ये। दुष्वप्न्यं. न्दुरित.न्निष्वास्म- दथ गच्छेम सुकृतस्य लोकम्।। 4।।-

07-08-03

卐 अनाधृष्यो जातवेदा^ अमर्त्यो- विरा.डग्ने क्षत्रभृ. द्दीदिहीह। विश्वा^ अमीवाः प्रमुञ्च.न्मानुषीभि- श्शिवाभि. रद्य परि पाहि नो गयम्।। 1।।

卐 इन्द्र क्षत्र.मभि वाम.मोजो-ऽजायथा^ वृषभ चर्षणीनाम्। अपाऽनुदो जनं. ममित्रायन्त- मुरु.न्देवेभ्यो अकृणो.रु लोकम्।। 2।।

卐 मृगो न भीमः कुचरो गिरिष्ठाः- परावत^ आ जगम्या.त्परस्याः। सृकं संशाय पवि. मिन्द्र तिग्मँ- वि शत्रू.न्ताढि वि मृधो नुदस्व।। 3।।-

07-08-04

卐 त्यमू षु वाजिनं. न्देवजूतं- सहोवान. न्तरुतारं रथानाम्। अरिष्टनेमिं पृतनाजि.माशुं- स्वस्तये तार्क्ष्यं.मिहाऽऽ हुवेम।। 1।।-

07-08-05

卐 त्रातार. मिन्द्र मवितार. मिन्द्रं- हवेहवे सुहवं शूर. मिन्द्रम्। हुवे नु शक्रं पुरुहूत. मिन्द्रं- स्वस्ति न^ इन्द्रो मघवा.न्कृणोतु।। 1।।-

07-08-06

卐 यो अग्नौ रुद्रो यो अप्स्व1(अ)न्त- र्य^ ओषधी. र्वीरुध^ आविवेश। य^ इमा विश्वा भुवनानि चाक्लृपे- तस्मै रुद्राय नमो अस्त्वग्नये।। 1।।-

07-08-07

卐 अपे ह्यरि.र-स्यरि वा असि। विषे विष. मपृक्था^- विष.मि.द्वा अपृक्थाः। अहिं. मेवाऽभ्यपेहि त.ञ्जहि।। 1।।-

07-08-08

卐 अपो दिव्या^ अचायिषं- रसेन समपृक्ष्महि। पयस्वा.नग्न आऽगम-न्तं मा सं सृज वर्चसा।। 1।।

卐 सं माऽग्ने वर्चसा सृज- सं प्रजया स^ मायुषा। विद्यु.र्मे अस्य देवा^- इन्द्रो विद्या.त्सह ऋषिभिः।। 2।।

卐 इद. मापः प्र वहता-ऽवद्यञ्च मलञ्च यत्। यच्चाऽभिदुद्रोहाऽनृतँ- यच्च शेपे अभीरुणम्।। 3।।

卐 एधोऽस्येधिषीय- समि,दसि समेधिषीय। तेजोऽसि तेजो मयि धेहि।। 4।।-

07-08-09

卐 अपि वृश्च पुराणव-द्व्रतते.रिव गुष्पितम्। ओजो दासस्य दम्भय।। 1।।

卐 वय.न्तदस्य सम्भृतँ- वस्विन्द्रेण वि भजामहै। म्लापयामि भ्रज.श्शिभ्रँ- वरुणस्य व्रतेन ते।। 2।।

卐 यथा शेपो अपायातै- स्त्रीषु चास.दनावयाः। अवस्थस्य क्नदीवत- श्शाङ्कुरस्य नितोदिनः। य.दातत.मव त.त्तनु- य.दुत्तत.न्नि त.त्तनु।। 3।।

## सप्तम काण्डे नवमोऽनुवाकः

07-09-01

卐 इन्द्र. स्सुत्रामा स्ववाँ अवोभि- स्सुमृडीको भवतु विश्ववेदाः। बाधता.न्द्वेषो अभय.न्नः कृणोतु- सुवीर्यस्य पतय.स्स्याम।। 1।।-

07-09-02

Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 स^ सुत्रामा स्ववा॒ँ इन्द्रो अस्म- दारा. च्चिद्द्वेष. स्सनुत. र्युयोतु। तस्य वयं सुमतौ यज्ञियस्या-ऽपि भद्रे सौमनसे स्याम।। 1।।-

☸ 07-09-03

卐 इन्द्रेण मन्युना वय- मभि.ष्याम पृतन्यतः। घ्नन्तो वृत्राण्यप्रति।। 1।।-

☸ 07-09-04

卐 ध्रुव.न्ध्रुवेण हविषा-ऽव सोम.न्नयामसि। यथा न^ इन्द्र॒ः केवली-र्विश. स्संमनस.स्करत्।।1।।-

☸ 07-09-05

卐 उदस्य श्यावौ विथुरौ- गृध्रौ द्या.मिव पेततुः। उच्छोचनप्रशोचना-वस्योच्छोचनौ हृदः।। 1।।

卐 अह. मेना. वुदतिष्ठिप-ङ्गावौ श्रान्तसदा.विव। कुर्कुराविव कूजन्ता-वुदवन्तौ वृका.विव।। 2।।

卐 आतोदिनौ नितोदिना- वथो~ सन्तोदिना.वुत। अपि नह्याम्यस्य मेढ्रँ-य^ इत.स्त्री पुमा.न्जभार।। 3।।-

☸ 07-09-06



Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 असद्.न्गाव. स्सदने-ऽपप्त.द्वसतिँ वयः। आस्थाने पर्वता^ अस्थु-स्स्थाम्नि वृक्का.वतिष्ठिपम्।। 1।।-

07-09-07

卐 यदद्य त्वा प्रयति यज्ञे अस्मि- न्होत. श्चिकित्व.न्नवृणीमहीह। ध्रुवमयो ध्रुव मुताऽशविष्ठ- प्रविद्वान् यज्ञ. मुप याहि सोमम्।। 1।।

卐 समिन्द्र णो मनसा नेष गोभि- स्सं सूरिभिर् हरिव.न्त्सं स्वस्त्या। सं ब्रह्मणा देवहितँ यदस्ति- सन्देवानां सुमतौ यज्ञियानाम्।। 1।।

卐 या ना.ऽवह^ उशतो देव देवां- स्ता. न्प्रेरय स्वे अग्ने सधस्थे। जक्षिवांसः पपिवांसो मधू-न्यस्मै धत्त वसवो वसूनि।। 3।।

卐 सुगा वो देवा. स्सदना^ अकर्म- य^ आजग्म सवने मा जुषाणाः। वहमाना^ भरमाणा.स्स्वा वसूनि- वसु.ङ्घर्म. न्दिव मा रोहताऽनु।। 4।।

卐 यज्ञ यज्ञ.ङ्गच्छ- यज्ञपति.ङ्गच्छ। स्वाँ योनि.ङ्गच्छ स्वाहा।। 5।।

卐 एष^ ते यज्ञो यज्ञपते- सहसूक्तवाकः। सुवीर्य.स्स्वाहा।। 6।।

卐 वष.ड्डुतेभ्यो- वष.डहुतेभ्यः। देवा^ गातुविदो- गातुं वित्त्वा गातु मित।। 7।।

卐 मनस.स्पत इम.न्नो- दिवि देवेषु यज्ञम्। स्वाहा दिवि स्वाहा पृथिव्यां-
स्वाहाऽन्तरिक्षे- स्वाहा वाते धां स्वाहा।। 8।।-

07-09-08

卐 सं बर्हि.रक्तं हविषा घृतेन- समिन्द्रेण वसुना सं मरुद्भिः। सन्देवै.
र्विश्वदेवेभि. रक्त- मिन्द्र.ङ्गच्छतु हवि.स्स्वाहा।। 1।।-

07-09-09

卐 परि स्तृणीहि परि धेहि वेदिं- मा जामिं मोषी. रमुया शयानाम्।
होतृषदनं हरितं हिरण्यय-न्निष्का^ एते यजमानस्य लोके।। 1।।-

07-09-10

卐 पर्यावर्ते दुष्वप्न्या-त्पापा.त्स्वप्न्या. दभूत्याः। ब्रह्माऽह.मन्तर.ङ्कृण्वे- परा
स्वप्नमुखा. श्शुचः।। 1।।-

07-09-11

卐 यत्स्वप्ने अन्न. मश्नामि- न प्रात.रधिगम्यते। सर्व.न्तदस्तु मे शिव- न्नहि
त.द्दृश्यते दिवा।। 1।।-

07-09-12

卐 नमस्कृत्य द्यावापृथिवीभ्या- मन्तरिक्षाय मृत्यवे। मेक्षा.म्यूर्ध्व.स्तिष्ठ-न्मा मा हिंसिषु. रीश्वराः।। 1।।

## सप्तम काण्डे दशमोऽनुवाकः

07-10-01

卐 को अस्या^ नो द्रुहोऽवद्यवत्या^- उन्नेष्यति क्षत्रियो वस्य^ इच्छन्न्। को यज्ञकामः क^ उ पूर्तिकामः- को देवेषु वनुते दीर्घ.मायुः।। 1।।-

07-10-02

卐 कः पृश्नि. न्धेनुँ वरुणेन दत्ता- मथर्वणे सुदुघा. न्नित्यवत्साम्। बृहस्पतिना सख्य.ञ्जुषाणो- यथावश.न्तन्वः कल्पयाति।। 1।।-

07-10-03

卐 अपक्राम.न्पौरुषेया-द्वृणानो दैव्यँ वचः। प्रणीती.रभ्यावर्तस्व- विश्वेभि. स्सखिभि. स्सह।। 1।।-

07-10-04

卐 यदस्मृति चकृम किञ्चि.दग्न- उपारिम चरणे जातवेदः। ततः पाहि त्वन्नः प्रचेत- श्शुभे सखिभ्यो अमृतत्व.मस्तु नः।। 1।।-

07-10-05

卐 अव दिव.स्तारयन्ति- सप्त सूर्यस्य रश्मयः। आप. स्समुद्रिया^ धारा-स्ता. स्ते शल्य. मसिस्त्रसन्न्।।1।।-

07-10-06

卐 यो न.स्ताय.द्दिप्सति यो न^ आवि- स्स्वो विद्वा नरणो वा नो अग्ने। प्रतीच्ये.त्वरणी दत्वती ता- न्मैषा. मग्ने वास्तु भू. न्मो~ अपत्यम्।। 1।।

卐 यो न.स्सुप्ता.न्जाग्रतो वाऽभिदासा-त्तिष्ठतो वा चरतो जातवेदः। वैश्वानरेण सयुजा सजोषा-स्ता. न्प्रतीचो नि.दह जातवेदः।। 2।।-

07-10-07

卐 इद. मुग्राय बभ्रवे नमो- यो अक्षेषु तनूवशी। घृतेन कलिं शिक्षामि- स^ नो मृडातीदृशे।। 1।।

卐 घृत. मप्सराभ्यो वह त्वमग्ने- पांसू. नक्षेभ्य. स्सिकता^ अपश्च। यथाभागं हव्यदाति.ञ्जुषाणा^- मदन्ति देवा^ उभयानि हव्या।। 2।।

卐 अप्सरस. स्सधमादं मदन्ति- हविर्धान. मन्तरा सूर्यञ्च। ता मे हस्तौ सं सृजन्तु घृतेन- सपत्नं मे कितवं रन्धयन्तु।। 3।।

卐 आदिनवं प्रतिदीव्ने- घृतेनाऽस्मा९ अभि क्षर। वृक्ष.मिवाऽशन्या जहि-यो अस्मा. न्प्रतिदीव्यति।। 4।।

卐 यो नो घुवे धनं. मिदं.ञ्चकार- यो अक्षणा.ङ्ग्लहनं शेषणञ्च। स॑ नो देवो हवि. रिद.ञ्जुषाणो- गन्धर्वेभि. स्सधमादं मदेम।। 5।।

卐 सँवसव॑ इति वो नामधेयं- मुग्रंपश्या राष्ट्रभृतो ह्य1(अ)क्षाः। तेभ्यो व॑ इन्दवो हविषा विधेम- वयं स्याम पतयो रयीणाम्।। 6।।

卐 देवा.न्य.न्नाथितो हुवे- ब्रह्मचर्यं यदूषिम। अक्षान् यद्बभ्रू. नालभे- ते नो मृड.न्त्वीदृशे।। 7।।-

07-10-08

卐 अग्न इन्द्रश्च दाशुषे- हतो वृत्राण्यप्रति। उभा हि वृत्रहन्तमा।। 1।।

卐 याभ्या.मजय.न्त्स्व1(अ)रग्र एव- या.वातस्थतु. भुवनानि विश्वा। प्रचर्षणी॑ वृषणा वज्रबाहू॑- अग्नि. मिन्द्रँ वृत्रहणा हुवेऽहम्।। 2।।

卐 उप त्वा देवो अग्रभी-च्चमसेन बृहस्पतिः। इन्द्र गीर्भि. र्न॑ आ विश- यजमानाय सुन्वते।। 3।।-

07-10-09

卐 इन्द्रस्य कुक्षि.रसि सोमधान॑- आत्मा देवाना. मुत मानुषाणाम्। इह प्रजा॑ जनय या.स्त आसु- या अन्यत्रेह ता.स्ते रमन्ताम्।। 1।।-

07-10-10

卐 शुम्भनी~ द्यावापृथिवी~- अन्तिसुम्ने~ महिव्रते~। आप.स्सप्त सुस्रुवु र्देवी- स्ता^ नो मुञ्च. न्त्वंहसः।। 1।।

卐 मुञ्चन्तु मा शपथ्या3(आ)-दथो~ वरुण्या दुत। अथो~ यमस्य पड्वीशा-द्विश्वस्मा.द्देवकिल्बिषात्।। 2।।-

07-10-11

卐 तृष्टिके तृष्टवन्दन- उदमू.न्छिन्धि तृष्टिके। यथा कृतद्विष्टाऽसो-ऽमुष्मै शेप्यावते।। 1।।

卐 तृष्टाऽसि तृष्टिका- विषा विषातक्यसि। परिवृक्ता यथाऽस-स्यृषभस्य वशेव।। 2।।-

07-10-12

卐 आ ते ददे वक्षणाभ्य^- आ तेऽहं हृदया.द्ददे। आ ते मुखस्य सङ्काशा-त्सर्व.न्ते वर्च^ आ ददे।। 1।।

卐 प्रेतो यन्तु व्याध्य॰- प्रानुध्या॰ प्रो≈ अशस्तयः। अग्नी रक्षस्विनीर् हन्तु- सोमो हन्तु दुरस्यतीः।। 2।।-

07-10-13

卐 प पतेत॒ पापि लक्ष्मि- नश्येत॒ प्राऽमुत॒ पत। अयस्मयेनाऽङ्केन - द्विषते त्वाऽऽ सजामसि।। 1।।

卐 या मा लक्ष्मी॒ पतयालू रजुष्टा-ऽभिचस्कन्द वन्दनेव वृक्षम्। अन्यत्राऽस्म. त्सवित.स्ता. मितो धा^- हिरण्यहस्तो वसु नो रराणः।। 2।।

卐 एकशतँ लक्ष्म्यो3(ओ) मर्त्यस्य साक- न्तन्वा जनुषोऽधि जाताः। तासां पापिष्ठा^ निरित॒ प्र हिण्म-श्शिवा^ अस्मभ्य.ञ्जातवेदो नि यच्छ।। 3।।

卐 एता^ एना^ व्याकर-ङ्खिले गा^ विष्ठिता^ इव। रमन्तां पुण्या^ लक्ष्मी-र्या॒ पापी.स्ता^ अनीनशम्।। 4।।-

07-10-14

卐 नमो रूराय च्यवनाय- नोदनाय धृष्णवे। नम.श्शीताय-पूर्वकामकृत्वने।। 1।।

卐 यो अन्येद्यु.रुभयद्यु. रभ्ये-तीमं मण्डूक.मभ्ये.त्वव्रतः।। 2।।-

07-10-15

卐 आ मन्द्रै. रिन्द्र हरिभि- र्याहि मयूररोमभिः। मा त्वा केचि.द्वि यम न्वि.न्न पाशिनो-ऽति धन्वेव ता९ इहि।। 1।।-

☸ 07-10-16

卐 मर्माणि ते वर्मणा छादयामि- सोम.स्त्वा राजाऽमृतेनाऽनु वस्ताम्।
उरो.र्वरीयो वरुण.स्ते कृणोतु- जयन्त.न्त्वाऽनु देवा^ मदन्तु।।1।।-
सप्तम ङ्काण्डं समाप्तम्

## अष्टमं काण्डम् (1-5)

### अष्टम काण्डे प्रथमोऽनुवाकः

☸ 08-01-01

卐 अन्तकाय मृत्यवे नमः- प्राणा^ अपाना^ इह ते रमन्ताम्। इहाऽय.
मस्तु पुरुष. स्सहाऽसुना- सूर्यस्य भागे अमृतस्य लोके।। 1।।

卐 उदेनं भगो अग्रभी- दुदेनं सोमो अंशुमान्। उदेनं मरुतो देवा^-
उदिन्द्राग्नी~ स्वस्तये।। 2।।

卐 इह तेऽसु. रिह प्राण^- इहाऽऽयु. रिह ते मनः। उत्त्वा निर्ऋत्याः
पाशेभ्यो- दैव्या वाचा भरामसि।। 3।।

卐 उत्क्रामाऽतः पुरुष माऽव पत्था^- मृत्योः पड्वीश. मवमुञ्चमानः। मा
च्छित्था^ अस्मा. ल्लोका- दग्ने. स्सूर्यस्य सन्दृशः।। 4।।

卐 तुभ्यँ वातः पवतां मातरिश्वा- तुभ्यँ वर्ष.न्त्वमृता.न्यापः। सूर्य.स्ते तन्वे3(ए) शन्तपाति- त्वां मृत्यु.र्दयतां मा प्र मेष्ठाः।। 5।।

卐 उद्यान.न्ते पुरुष नावयान- ज्जीवातु.न्ते दक्षताति.ङ्कृणोमि। आ हि रोहेम.ममृतं सुखं रथ- मथ जिर्वि. र्विदथ.मा वदासि।। 6।।

卐 मा ते मन. स्तत्र गा.न्मा तिरो भू - न्मा जीवेभ्यः प्र मदो माऽनु गाः पितॄन्। विश्वे देवा^ अभि रक्षन्तु त्वेह।। 7।।

卐 मा गताना.मा दीधीथा^- ये नयन्ति परावतम्। आ रोह तमसो ज्योति- रेह्या ते हस्तौ रभामहे।। 8।।

卐 श्यामश्च त्वा मा शबलश्च प्रेषितौ- यमस्य यौ पथिरक्षी~ श्वानौ। अर्वा.ङेहि मा वि दीध्यो- माऽत्र तिष्ठः पराङ्मनाः।। 9।।

卐 मैतं पन्था. मनु गा^ भीम^ एष^- येन पूर्व.न्नेयथ तं ब्रवीमि। तम^ एत. त्पुरुष मा प्र पत्था^- भयं परस्ता. दभय.न्ते अर्वाक्।। 10।। {1}

卐 रक्षन्तु त्वाऽग्नयो ये अप्स्व1(अ)न्ता- रक्षतु त्वा मनुष्या3(आ) यमिन्धते। वैश्वानरो रक्षतु जातवेदा^- दिव्य.स्त्वा मा प्र धा.ग्विद्युता सह।। 11।।

卐 मा त्वा क्रव्या.दभिमंस्ता-ऽऽरा.त्सङ्कसुका. च्चर। रक्षतु त्वा द्यौ^ रक्षतु पृथिवी- सूर्यश्च त्वा रक्षता.श्चन्द्रमाश्च। अन्तरिक्षं रक्षतु देवहेत्याः।। 12।।

卐 बोधश्च त्वा प्रतीबोधश्च रक्षता- मस्वप्नश्च त्वाऽनवद्राणश्च रक्षताम्। गोपायंश्च त्वा जागृविश्च रक्षताम्।। 13।।

卐 ते त्वा रक्षन्तु ते त्वा गोपायन्तु- तेभ्यो नम.स्तेभ्य. स्स्वाहा।। 14।।

卐 जीवेभ्य.स्त्वा समुदे वायु.रिन्द्रो- धाता दधातु सविता त्रायमाणः। मा त्वा प्राणो बलं हासी- दसु.न्तेऽनु ह्वयामसि।। 15।।

卐 मा त्वा जम्भ. स्संहनु र्मा तमो विद- न्मा जिह्वा बर्हि॰ प्रमयु॰ कथा स्याः। उत्त्वाऽऽदित्या^ वसवो भर-न्तूदिन्द्राग्नी~ स्वस्तये।। 16।।

卐 उत्त्वा द्यौ.रुत्पृथि-व्युत्प्रजापति.रग्रभीत्। उत्त्वा मृत्यो. रोषधय- स्सोमराज्ञी. रपीपरन्न्।। 17।।

卐 अय. न्देवा^ इहैवा-स्त्वयं माऽमुत्र गा.दितः। इमं सहस्रवीर्येण- मृत्यो.रुत्पारयामसि।। 18।।

卐 उत्त्वा मृत्यो.रपीपरं- सन्धमन्तु वयोधसः। मा त्वा व्यस्तकेश्यो3(ओ)- मा त्वाऽघरुदो रुदन्न्।। 19।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham Mysore

卐 आऽहार्ष. मविद.न्त्वा- पुन.राऽगाः पुनर्णवः। सर्वाङ्ग सर्वन्ते चक्षु-स्सर्व. मायुश्च तेऽविदम्।। 20।।

卐 व्यवा.त्ते ज्योति.रभू- दप त्व.त्तमो अक्रमीत्। अप त्व.न्मृत्यु. न्निर्ऋति-मप यक्ष्म. न्निदध्मसि।। 21।। {2}

08-01-02

卐 आ रभस्वेमा. ममृतस्य श्नुष्टि- मच्छिद्यमाना जरदष्टि. रस्तु ते। असुन्त आयुः पुन.रा भरामि- रज. स्तमो मोप गा^ मा प्र मेष्ठाः।। 1।।

卐 जीवता.ञ्ज्योति. रभ्ये.ह्यर्वा-ङा त्वा हरामि शतशारदाय। अवमुञ्च.न्मृत्युपाशा. नशस्ति- न्द्राघीय^ आयुः प्रतर.न्ते दधामि।। 2।।

卐 वाता.त्ते प्राण. मविदं- सूर्या.चक्षु.रह.न्तव। यत्ते मन. स्त्वयि तद्धारयामि- सँवि.त्स्वाङ्गैः. वद जिह्वयाऽलपन्न्।। 3।।

卐 प्राणेन त्वा द्विपदा.ञ्चतुष्पदा- मग्नि. मिव जात मभि सन्धमामि। नमस्ते मृत्यो~ चक्षुषे- नमः प्राणाय तेऽकरम्।। 4।।

卐 अय.ञ्जीवतु मा मृ-तेमं समीरयामसि। कृणो.म्यस्मै भेषजं- मृत्यो^ मा पुरुषं वधीः।। 5।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 जीवला.न्नघारिषा-ञ्जीवन्ती. मोषधी. महम्। त्रायमाणां सहमानां-सहस्वती मिह हुवे-ऽस्मा अरिष्टतातये।। 6।।

卐 अधि ब्रूहि मा रभथा. स्सृजेम- न्तवैव स.न्त्सर्वहाया इहास्तु। भवाशर्वौ मृडतं शर्म यच्छत- मपसिध्य दुरित.न्धत्त.मायुः।। 7।।

卐 अस्मै मृत्यो~ अधि ब्रू-हीम. न्दयस्वोदितो3(ओ)ऽय.मेतु। अरिष्ट. स्सर्वाङ्ग. स्सुश्रु-ज्जरसा शतहायन^- आत्मना भुज. मश्नुताम्।। 8।।

卐 देवानां हेतिः परि त्वा वृणक्तु- पारयामि त्वा रजस^ उत्त्वा मृत्यो. रपीपरम्। आरा. दग्नि.ङ्क्रव्याद. न्निरूह-ञ्जीवातवे ते परिधि. न्दधामि।। 9।।

卐 यत्ते नियानं रजसं- मृत्यो~ अनवधर्ष्यम्। पथ^ इम. न्तस्मा. द्रक्षन्तो-ब्रह्माऽस्मै वर्म कृण्मसि।। 10।। {3}

卐 कृणोमि ते प्राणापानौ- जरां मृत्यु. न्दीर्घ. मायु. स्स्वस्ति। वैवस्वतेन प्रहितान् यमदूतां श्चरतो-ऽप सेधामि सर्वान्।। 11।।

卐 आरा. दराति. न्निर्ऋतिं परो- ग्राहिं.ङ्क्रव्यादः पिशाचान्। रक्षो यत्सर्व. न्दुर्भूत- न्तत्तम^ इवाऽप हन्मसि।। 12।।

卐 अग्ने.ष्टे प्राण. ममृता- दायुष्मतो वन्वे जातवेदसः। यथा न रिष्या^ अमृत. स्सजू^ रस- स्तत्ते कृणोमि तदु ते समृध्यताम्।। 13।।

卐 शिवे~ ते स्ता.न्द्यावापृथिवी~- असन्तापे~ अभिश्रियौ। शन्ते सूर्य^ आ तपतु- शँ वातो वातु ते हृदे। शिवा^ अभि क्षरन्तु त्वा-ऽऽपो दिव्याः पयस्वतीः।। 14।।

卐 शिवा.स्ते सन्त्वोषधय^- उत्त्वाऽऽहार्ष. मधरस्या^- उत्तरां पृथिवी. मभि। तत्र त्वाऽऽदित्यौ रक्षतां- सूर्याचन्द्रमसा.वुभा।। 15।।

卐 यत्ते वासः परिधानं- या.न्नीविं. क्कृणुषे त्वम्। शिवन्ते तन्वे3(ए)तत्कृण्म- स्संस्पर्शो.द्रूक्ष्ण. मस्तु ते।। 16।।

卐 यत्क्षुरेण मर्चयता सुतेजसा- वप्ता वपसि केशश्मश्रु। शुभं मुखं- मा न^ आयुः प्र मोषीः।। 17।।

卐 शिवौ ते स्ताँ व्रीहियवा- वबलासा. वदोमधौ। एतौ यक्ष्मँ वि बाधेते~- एतौ मुञ्चतो अंहसः।। 18।।

卐 यदश्नासि यत्पिबसि- धान्य.ङ्कृष्याः पयः। यदाद्य1(अँ) यदनाद्यं- सर्वन्ते अन्न. मविष.ङ्कृणोमि।। 19।।

卐 अह्ने च त्वा रात्रये -चोभाभ्यां परि दद्मसि। अरायेभ्यो जिघत्सुभ्य^- इमं मे परि रक्षत।। 20।। {4}

卐 शतन्तेऽयुतं हायना-न्द्वे~ युगे~ त्रीणि चत्वारि कृण्मः। इन्द्राग्नी~ विश्वे देवा- स्तेऽनु मन्यन्ता. महृणीयमानाः।। 21।।

卐 शरदे त्वा हेमन्ताय- वसन्ताय ग्रीष्माय परि दद्मसि। वर्षाणि तुभ्यं स्योनानि- येषु वर्धन्त ओषधीः।। 22।।

卐 मृत्यु. रीशे द्विपदां- मृत्यु. रीशे चतुष्पदाम्। तस्मा.त्त्वां मृत्यो. र्गोपते- रुद्भरामि स^ मा बिभेः।। 23।।

卐 सोऽरिष्ट न मरिष्यसि- न मरिष्यसि मा बिभेः। न वै तत्र म्रियन्ते- नो~ यन्त्यधम. न्तमः।। 24।।

卐 सर्वो वै तत्र जीवति- गौरश्वꣳ पुरुषꣳ पशुः। यत्रेदं ब्रह्म क्रियते- परिधि. र्जीवनाय कम्।। 25।।

卐 परि त्वा पातु समानेभ्यो-ऽभिचारा.त्सबन्धुभ्यः। अमम्रि. र्भवाऽमृतोऽतिजीवो- मा ते हासिषु. रसव श्शरीरम्।। 26।।

卐 ये मृत्यव^ एकशतँ- या^ नाष्ट्रा^ अतितार्याः। मुञ्चन्तु तस्मा.त्त्वा. न्देवा^- अग्ने. र्वैश्वानरा. दधि।। 27।।

卐 अग्ने. श्शरीर. मसि पारयिष्णु- रक्षोहाऽसि सपत्नहा। अथो~ अमीवचातनः- पूतुद्रु.र्नाम भेषजम्।। 28।। {5} इति प्रथमोऽनुवाकः

## अष्टम काण्डे द्वितीयोऽनुवाकः

08-02-01

卐 रक्षोहणँ वाजिन. मा जिघर्मि- मित्रं प्रथिष्ठ. मुप यामि शर्म। शिशानो अग्निः क्रतुभि. स्समिद्ध- स्स^ नो दिवा स^ रिषः पातु नक्तम्।। 1।।

卐 अयोदंष्ट्रो अर्चिषा यातुधाना- नुप स्पृश जातवेद. स्समिद्धः। आ जिह्वया मूरदेवा. न्रभस्व- क्रव्यादो वृष्ट्वाऽपि धत्स्वाऽऽसन्।। 2।।

卐 उभोभयावि. न्नुप धेहि दंष्ट्रौ- हिंस्र श्शिशानोऽवरँ परञ्च। उताऽन्तरिक्षे परि याह्यग्ने- जम्भै स्सन्धे.ह्यभि यातुधानान्।। 3।।

卐 अग्ने त्वचँ यातुधानस्य भिन्धि- हिंस्राशनिर् हरसा हन्त्वेनम्। प्र पर्वाणि जातवेद. श्शृणीहि- क्रव्या. त्क्रविष्णु. र्वि चिनो. त्वेनम्।। 4।।

卐 यत्रेदानीं पश्यसि जातवेद- स्तिष्ठन्त. मग्न उत वा चरन्तम्। उताऽन्तरिक्षे पतन्तँ यातुधान-न्त. मस्ता विध्य शर्वा शिशानः।। 5।।

卐 यज्ञै. रिषू. स्सन्नममानो अग्ने- वाचा शल्याँ अशनिभि. र्दिहानः। ताभि. र्विध्य हृदये यातुधाना- न्प्रतीचो बाहू. न्प्रति भङ्ग्ध्येषाम्।। 6।।

Sri Ganapati Sachidananda Avadhoota Datta Peetham Mysore

卐 उताऽऽरब्धा. न्त्स्पृणुहि जातवेद^- उतारेभाणाॅ ऋष्टिभि. र्यातुधानान्।
अग्ने पूर्वो नि जहि शोशुचान^- आमाद꣡ क्ष्विङ्का. स्तमद. न्त्वेनीः।। 7।।

卐 इह प्र ब्रूहि यतम. स्सो अग्ने- यातुधानो य^ इद.ङ्कृणोति। त.मा रभस्व
समिधा यविष्ठ- नृचक्षस. श्चक्षुषे रन्धयैनम्।। 8।।

卐 तीक्ष्णेनाऽग्ने चक्षुषा रक्ष यज्ञं- प्राञ्चँ वसुभ्य꣡ प्रणय प्रचेतः। हिंस्त्रं
रक्षांस्यभि शोशुचानं- मा त्वा दभ.न्यातुधाना^ नृचक्षः।। 9।।

卐 नृचक्षा^ रक्ष꣡ परि पश्य विक्षु- तस्य त्रीणि प्रति शृणी.ह्यग्रा। तस्याग्ने
पृष्टीर् हरसा शृणीहि- त्रेधा मूलँ यातुधानस्य वृश्च।। 10।।

卐 त्रि.र्यातुधान꣡ प्रसिति.न्त ए-त्वृतँ यो अग्ने अनृतेन हन्ति। तमर्चिषा
स्फूर्जय. न्जातवेद-स्समक्ष. मेन.ङ्गृणते नि युङ्ग्धि।। 11।।

卐 यदग्ने अद्य मिथुना शपातो- यद्वाच. स्तृष्ट.ञ्जनयन्त रेभाः। मन्यो.
र्मनस. श्शरव्या3(आ) जायते- या तया विध्य हृदये यातुधानान्।। 12।।

卐 परा शृणीहि तपसा यातुधाना-न्पराऽग्ने रक्षो हरसा शृणीहि। पराऽर्चिषा
मूरदेवा. न्छृणीहि- पराऽसुतृप. श्शोशुचत. श्शृणीहि।। 13।।

卐 पराऽद्य देवा^ वृजिनं शृणन्तु- प्रत्य.गेनं शपथा यन्तु सृष्टाः। वाचा स्तेनं
शरव^ ऋच्छन्तु मर्म- न्विश्वस्यैतु प्रसितिँ यातुधानः।। 14।।

卐 यः पौरुषेयेण क्रविषा समङ्क्ते- यो अश्व्येन पशुना यातुधानः। यो अघ्न्याया भरति क्षीर. मग्ने- तेषां शीर्षाणि हरसाऽपि वृश्च।। 15।।

卐 विष.ङ्गवाँ यातुधाना भरन्ता-मा वृश्चन्ता. मदितये दुरेवाः। परैणा. न्देव. स्सविता ददातु- परा भाग. मोषधीना.ञ्जयन्ताम्।। 16।।

卐 सँवत्सरीणं पय उस्रियाया -स्तस्य माऽऽशी.द्यातुधानो नृचक्षः। पीयूष. मग्ने यतम.स्तितृप्सा- त्तं प्रत्यञ्च. मर्चिषा विध्य मर्मणि।। 17।।

卐 सना. दग्ने मृणसि यातुधाना- न्न त्वा रक्षांसि पृतनासु जिग्युः। सहमूरा. ननु दह क्रव्यादो- मा ते हेत्या. मुक्षत दैव्यायाः।। 18।।

卐 त्व.न्नो अग्ने अधरा. दुदक्त- स्त्वं पश्चा. दुत रक्षा पुरस्तात्। प्रति त्ये ते अजरास. स्तपिष्ठा- अघशंसं शोशुचतो दहन्तु।। 19।।

卐 पश्चा. त्पुरस्ता. दधरा. दुतोत्तरा- त्कविः काव्येन परि पाह्यग्ने। सखा सखाय. मजरो जरिम्णे- अग्ने मर्ता अमर्त्य.स्त्वन्नः।। 20।।

卐 तदग्ने चक्षुः प्रति धेहि रेभे- शफारुजो येन पश्यसि यातुधानान्। अथर्वव.ज्ज्योतिषा दैव्येन- सत्य. न्धूर्वन्त. मचित.न्न्योष।। 21।।

卐 परि त्वाऽग्ने पुरँ वयँ- विप्रं सहस्य धीमहि। धृषद्वर्ण. न्दिवेदिवे- हन्तारं भङ्गुरावतः।। 22।।

卐 विषेण भङ्गुरावतः- प्रति स्म रक्षसो जहि। अग्ने तिग्मेन शोचिषा-तपुरग्राभि. रर्चिभिः।। 23।।

卐 वि ज्योतिषा बृहता भात्यग्नि- रावि. र्विश्वानि कृणुते महित्वा। प्राऽदेवी. र्माया. स्सहते दुरेवा-श्शिशीते श्रृङ्गे~ रक्षोभ्यो विनिक्ष्वे।। 24।।

卐 ये~ ते श्रृङ्गे~ अजरे~ जातवेद- स्तिग्महेती~ ब्रह्मसंशिते~। ताभ्या. न्दुर्हार्द. मभिदासन्त.ङ्किमीदिनं- प्रत्यञ्च. मर्चिषा जातवेदो वि निक्ष्व।। 25।।

卐 अग्नी रक्षांसि सेधति- शुक्रशोचि. रमर्त्यः। शुचिः पावक^ ईड्यः।। 26।।-

08-02-02

卐 इन्द्रासोमा तपतं रक्ष^ उब्जत- न्न्यर्पयतँ वृषणा तमोवृधः। परा श्रृणीत मचितो न्योषतं- हत. न्नुदेथा. न्निशिशीत. मत्त्रिणः।। 1।।

卐 इन्द्रासोमा समघशंस. मभ्य1(अ)घ- न्तपु. र्ययस्तु चरु. रग्निमाॅ इव। ब्रह्मद्विषे क्रव्यादे घोरचक्षसे- द्वेषो धत्त मनवाय.ङ्किमीदिने।। 2।।

卐 इन्द्रासोमा दुष्कृतो वव्रे अन्त- रनारम्भणे तमसि प्र विध्यतम्। यतो नैषां पुन.रेक श्चनोदय- त्तद्वा. मस्तु सहसे मन्युम. च्छवः।। 3।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 इन्द्रासोमा वर्तयत. न्दिवो वधं- सं पृथिव्या^ अघशंसाय तर्हणम्।
उत्तक्षतं स्वर्य1(अं) पर्वतेभ्यो- येन रक्षो वावृधान.न्निजूर्वथः।। 4।।

卐 इन्द्रासोमा वर्तयत. न्दिव. स्प-र्यग्नितप्तेभि. र्युव. मश्महन्मभिः।
तपुर्वधेभि. रजरेभि. रत्त्रिणो- नि पर्शाने विध्यतँ यन्तु निस्वरम्।। 5।।

卐 इन्द्रासोमा परि वां भूतु विश्वत^- इयं मतिः कक्ष्याश्वेव वाजिना। याँ वां
होत्रां परिहिनोमि मेध-येमा ब्रह्माणि नृपती~इव जिन्वतम्।। 6।।

卐 प्रति स्मरेथां तुजयद्भि. रेवैर्-हत. न्द्रुहो रक्षसो भङ्गुरावतः। इन्द्रासोमा
दुष्कृते मा सुगं भू- द्यो मा कदा चि.दभिदासति द्रुहुः।। 7।।

卐 यो मा पाकेन मनसा चरन्त- मभिचष्टे अनृतेभि. र्वचोभिः। आप^इव
काशिना सङ्गृभीता^- असन्न.स्त्वाऽसत^ इन्द्रवक्ता।। 8।।

卐 ये पाकशंसँ विहरन्त^ एवै- र्ये वा भद्र. न्दूषयन्ति स्वधाभिः। अहये वा
ता.न्प्रददातु सोम^- आ वा दधातु निर्ऋते. रुपस्थे।। 9।।

卐 यो नो रस. न्दिप्सति पित्वो अग्ने- अश्वाना.ङ्गवाँ य.स्तनूनाम्। रिपु.
स्तेन. स्तेयकृ. द्दभ्र मेतु- नि ष हीयता न्तन्वा3(आ) तना च।। 10।।

卐 पर. स्सो अस्तु तन्वा3(आ) तना च- तिस्त्र॰ पृथिवी. रधो अस्तु विश्वाः। प्रति शुष्यतु यशो अस्य देवा^- यो मा दिवा दिप्सति यश्च नक्तम्।। 11।।

卐 सुविज्ञान.श्चिकितुषे जनाय- सच्चासच्च वचसी~ पस्पृधाते~। तयो. र्यत्सत्यँ यतर.द्दजीय- स्तादि. त्सोमोऽवति हन्त्यासत्।। 12।।

卐 न वा उ सोमो वृजिनं हिनोति- न क्षत्रियं मिथुया धारयन्तम्। हन्ति रक्षो हन्त्यास.द्वदन्त- मुभा. विन्द्रस्य प्रसितौ शयाते~।। 13।।

卐 यदि वाऽह. मनृतदेवो अस्मि- मोघँ वा देवा॰ अप्यूहे अग्ने। किमस्मभ्य.ञ्जातवेदो हृणीषे- द्रोघवाच.स्ते निर्ऋथं सचन्ताम्।। 14।।

卐 अद्या मुरीय यदि यातुधानो- अस्मि यदि वायु. स्ततप पूरुषस्य। अधा स^ वीरै. र्दशभि. र्वि यूया^- यो मा मोघँ यातुधानेत्याह।। 15।।

卐 यो माऽयातुँ यातुधानेत्याह- यो वा रक्षा. श्शुचि रस्मी.त्याह। इन्द्र.स्तं हन्तु महता वधेन- विश्वस्य जन्तो. रधम. स्पदीष्ट।। 16।।

卐 प्र या जिगाति खर्गलेव नक्त- मप द्रुहु. स्तन्व1(अ)ङ्गूहमाना। वव्र. मनन्त. मव सा पदीष्ट- ग्रावाणो घ्नन्तु रक्षस^ उपब्दैः।। 17।।

卐 वि तिष्ठध्वं मरुतो विक्ष्वि1(इ)च्छत- गृभायत रक्षस. स्सं पिनष्टन। वयो ये भूत्वा पतयन्ति नक्तभि- र्ये वा रिपो दधिरे देवे अध्वरे।। 18।।

卐 प्र वर्तय दिवोऽश्मान. मिन्द्र- सोमशितं मघव.न्त्सं शिशाधि। प्राक्तो अपाक्तो अधरा दुदक्तो3(ओ)-ऽभि जहि रक्षसः पर्वतेन।। 19।।

卐 एत उ त्ये पतयन्ति श्वयातव- इन्द्र. न्दिप्सन्ति दिप्सवोऽदाभ्यम्। शिशीते शक्रः पिशुनेभ्यो वध- न्नूनं सृज.दशनिँ यातुमद्भ्यः।। 20।।

卐 इन्द्रो यातूना. मभव. त्पराशरो- हविर्मथीना. मभ्या3(आ) विवासताम्। अभीदु शक्रः परशु. र्यथा वनं- पात्रेव भिन्द.न्त्सत एतु रक्षसः।। 21।।

卐 उलूकयातुं शुशुलूकयातु-ञ्जहि श्वयातु. मुत कोकयातुम्। सुपर्णयातु. मुत गृध्रयातु-न्दृषदेव प्र मृण रक्ष इन्द्र।। 22।।

卐 मा नो रक्षो अभिन.ड्यातुमाव- दपोच्छन्तु मिथुना ये किमीदिनः। पृथिवी नः पार्थिवा.त्पात्वंहसो-ऽन्तरिक्ष. न्दिव्या. त्पात्वस्मान्।। 23।।

卐 इन्द्र जहि पुमांसँ यातुधान- मुत स्त्रियं मायया शाशदानाम्। विग्रीवासो मूरदेवा ऋदन्तु- मा ते दृश. न्त्सूर्य. मुच्चरन्तम्।। 24।।

卐 प्रति चक्ष्व वि च-क्ष्वेन्द्रश्च सोम जागृतम्। रक्षोभ्यो वध. मस्यत- मशनिँ यातुमद्भ्यः।। 25।।

## ॐ अष्टम काण्डे तृतीयोऽनुवाकः

08-03-01

卐 अयं प्रतिसरो मणि- र्वीरो वीराय बध्यते। वीर्यवा. न्त्सपत्नहा शूरवीरꣳ- परिपाण. स्सुमङ्गलः।। 1।।

卐 अयं मणि. स्सपत्नहा सुवीर- स्सहस्वान् वाजी सहमान॑ उग्रः। प्रत्यक्कृत्या दूषय. न्नेति वीरः।। 2।।

卐 अनेनेन्द्रो मणिना वृत्र. मह- न्ननेनाऽसुरा. न्पराऽभावय. न्मनीषी। अनेनाऽजय. द्द्यावापृथिवी~ उभे~ इमे~- अनेनाऽजय.त्प्रदिश. श्चतस्त्रः।। 3।।

卐 अयं स्राक्त्यो मणिꣳ- प्रतीवर्तꣳ प्रतिसरः। ओजस्वान् विमृधो वशी- सो अस्मा.न्पातु सर्वतः।। 4।।

卐 तदग्नि. राह तदु सोम॑ आह- बृहस्पति.स्सविता तदिन्द्रः। ते मे देवाꣳ पुरोहिताꣳ प्रतीचीꣳ- कृत्याꣳ प्रतिसरै. रजन्तु।। 5।।

卐 अन्त.र्दधे द्यावापृथिवी~- उताह. रुत सूर्यम्। ते मे देवाꣳ पुरोहिताꣳ प्रतीचीꣳ- कृत्याꣳ प्रतिसरै. रजन्तु।। 6।।

卐 ये स्राक्त्यं मणि-ञ्जना^ वर्माणि कृण्वते। सूर्य^इव दिव. मारुह्य- वि कृत्या बाधते वशी।। 7।।

卐 स्राक्त्येन मणिन- ऋषिणेव मनीषिणा। अजैषं सर्वा꞉ पृतना^- वि मृधो हन्मि रक्षसः।।

卐 या꞉ कृत्या^ आङ्गिरसी- र्या꞉ कृत्या^ आसुरी- र्या꞉ कृत्या स्स्वयङ्कृता^- या^ उ चाऽन्येभि.राभृताः। उभयी.स्ता꞉ परा यन्तु परावतो- नवति. न्नाव्या3(आ)^ अति।। 9।।

卐 अस्मै मणिँ वर्म बध्नन्तु देवा^- इन्द्रो विष्णु. स्सविता रुद्रो अग्निः। प्रजापति꞉ परमेष्ठी विरा- ड्वैश्वानर^ ऋषयश्च सर्वे।। 10।।

卐 उत्तमो अस्योषधीना- मनड्वा. न्जगता.मिव- व्याघ्र. श्श्वपदा. मिव। य.मैच्छामाऽविदाम- तं प्रतिस्पाशन. मन्तितम्।। 11।।

卐 स^ इ.द्व्याघ्रो भव-त्यथो~ सिंहो अथो~ वृषा। अथो~ सपत्नकर्शनो- यो बिभर्तीमं मणिम्।। 12।।

卐 नैन.ङ्घ्न.न्त्यप्सरसो- न गन्धर्वा^ न मर्त्याः। सर्वा^ दिशो वि राजति- यो बिभर्तीमं मणिम्।। 13।।

卐 कश्यप.स्त्वा. मसृजत- कश्यप.स्त्वा समैरयत्। अबिभ.स्त्वेन्द्रो मानुषे-
बिभ्र. त्संश्रेषिणेऽजयत्। मणिं सहस्रवीर्यँ- वर्म देवा^ अकृण्वत।। 14।।

卐 य.स्त्वा कृत्याभि- र्यस्त्वा दीक्षाभि- र्यज्ञै. र्यस्त्वा जिघांसति।
प्रत्यक्त्व.मिन्द्र त.ञ्जहि- वज्रेण शतपर्वणा।। 15।।

卐 अय. मिद्वै प्रतीवर्त^- ओजस्वा. न्त्सञ्जयो मणिः। प्रजा. न्धनञ्च रक्षतु-
परिपाण. स्सुमङ्गलः।। 16।।

卐 असपत्न.न्नो अधरा- दसपत्न.न्न^ उत्तरात्। इन्द्राऽसपत्न.न्नः पश्चा-
ज्ज्योति.श्शूर पुर.स्कृधि।। 17।।

卐 वर्म मे द्यावापृथिवी~- वर्माह. र्वर्म सूर्यः। वर्म म इन्द्र श्चाऽग्निश्च- वर्म
धाता दधातु मे।। 18।।

卐 ऐन्द्राग्नँ वर्म बहुलँ यदुग्रँ- विश्वे देवा^ नातिविध्यन्ति सर्वे। तन्मे तन्व.
न्त्रायतां सर्वतो बृह- दायुष्मा. न्जरदष्टि. र्यथाऽसानि।। 19।।

卐 आ माऽरुक्ष. द्देवमणि- र्मह्या अरिष्टतातये। इमं मेथि. मभिसँविशध्व-
न्तनूपान. न्त्रिवरूथ. मोजसे।। 20।।

卐 अस्मि. न्निन्द्रो नि दधातु नृम्ण- मिम. न्देवासो अभिसँविशध्वम्।
दीर्घायुत्वाय शतशारदाया-ऽऽयुष्मा. न्जरदष्टि. र्यथाऽसत्।। 21।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 स्वस्तिदा^ विशां पति- र्वृत्रहा विमृधो वशी। इन्द्रो बध्नातु ते मणि- ञ्जिगीवाꣳ अपराजित- स्सोमपा^ अभयङ्करो वृषा। स^ त्वा रक्षतु सर्वतो- दिवा नक्तञ्च विश्वतः।। 22।।-

08-03-02

卐 यौ ते मातोन्ममार्ज- जातायाꣳ पतिवेदनौ। दुर्णामा तत्र मा गृध- दलिंश^ उत वत्सपः।। 1।।

卐 पलालानुपलालौ शर्कु-ङ्कोकं मलिम्लुचं पलीजकम्। आश्रेषँ वव्रिवाससं- मृक्षग्रीवं प्रमीलिनम्।। 2।।

卐 मा सँ वृतो मोप सृप^- ऊरू~ माऽव सृपोऽन्तरा। कृणो.म्यस्यै भेषजं- बज. न्दुर्णामचातनम्।। 3।।

卐 दुर्णामा च सुनामा -चोभा सँवृत. मिच्छतः। अराया. नप हन्म- स्सुनामा स्त्रैण. मिच्छताम्।। 4।।

卐 यꣳ कृष्णꣳ केशयसुर- स्स्तम्बज^ उत तुण्डिकः। अराया. नस्या^ मुष्काभ्यां- भंससोऽप हन्मसि।। 5।।

卐 अनुजिघ्रं प्रमृशन्त- ङ्क्रव्याद मुत रेरिहम्। अराया.न्छ्वकिष्किणो- बजꣳ पिङ्गो अनीनशत्।। 6।।

卐 यस्त्वा स्वप्ने निपद्यते- भ्राता भूत्वा पितेव च। बज. स्ता.न्त्सहता. मितঃ- क्लीबरूपां. स्तिरीटिनः।। 7।।

卐 यस्त्वा स्वपन्ती. न्त्सरति- यस्त्वा दिप्सति जाग्रतीम्। छाया.मिव प्र ता. न्त्सूर्यঃ- परिक्राम. न्ननीनशत्।। 8।।

卐 यঃ कृणोति मृतवत्सा- मवतोका. मिमां स्त्रियम्। तमोषधे त्व.न्नाशया-ऽस्याঃ कमल. मञ्जिवम्।। 9।।

卐 ये शालाঃ परिनृत्यन्ति- साय.ङ्गर्दभनादिनः। कुसूला^ ये च कुक्षिलাঃ- ककुभাঃ करुमा.स्स्रिमाः। ता.नोषधे त्व.ङ्गन्धेन विषूचीनान् वि नाशय।। 10।।

卐 ये कुकुन्धाঃ कुकुरभাঃ- कृत्ती. र्दूर्शानि बिभ्रति। क्लीबा^इव प्रनृत्यन्तो- वने ये कुर्वते घोष- न्ता.नितो नाशयामसि।। 11।।

卐 ये सूर्य.न्न तितिक्षन्त- आतपन्त. ममु. न्दिवः। अराया. न्बस्तवासिनो- दुर्गन्धी. न्लोहिताऽऽस्या- न्मकका. न्नाशयामसि।। 12।।

卐 य आत्मान. मतिमात्र- मंस आधाय बिभ्रति। स्त्रीणां श्रोणिप्रतोदिन^- इन्द्र रक्षांसि नाशय।। 13।।

卐 ये पूर्वे वध्वो3(ओ) यन्ति- हस्ते श्रृङ्गाणि बिभ्रतः। आपाकेष्ठाः प्रहासिन- स्स्तम्बे ये कुर्वते ज्योति- स्ता.नितो नाशयामसि।। 14।।

卐 येषां पश्चा. त्प्रपदानि- पुरः पार्ष्णीः पुरोमुखा। खलजा. श्शकधूमजा^- उरुण्डा^ ये च मट्टटाः- कुम्भमुष्का^ अयाशवः। ता.नस्या^ ब्रह्मणस्पते- प्रतीबोधेन नाशय।। 15।।

卐 पर्यस्ताक्षा^ अप्रचङ्कशा^- अस्त्रैणा. स्सन्तु पण्डगाः। अव भेषज पादय- य ^इमां सँविवृत्स-त्यपति. स्स्वपतिं स्त्रियम्।। 16।।

卐 उद्धर्षिणं मुनिकेश- ञ्जम्भयन्तं मरीमृशम्। उपेषन्त. मुदुम्बल- न्तुण्डेल. मुत शालुडम्। पदा प्र विध्य पार्ष्ण्या- स्थाली.ङ्गौ.रिव स्पन्दना।। 17।।

卐 यस्ते गर्भं प्रतिमृशा- ज्जातँ वा मारयाति ते। पिङ्ग.स्त. मुग्रधन्वा- कृणोतु हृदयाविधम्।। 18।।

卐 ये अम्नो जाता. न्मारयन्ति- सूतिका^ अनुशेरते। स्त्रीभागा. न्पिङ्गो गन्धर्वा-न्वातो अभ्र. मिवाऽजतु।। 19।।

卐 परिसृष्ट. न्धारयतु- य.द्धितं माऽव पादि तत्। गर्भन्त उग्रौ रक्षतां- भेषजौ नीविभार्यौ।। 20।।

卐 पवीनसा. त्तङ्गल्वा3(आ)-च्छायका. दुत नग्नकात्। प्रजायै पत्ये त्वा पिङ्गः- परि पातु किमीदिनः।। 21।।

卐 द्यास्या.च्चतुरक्षा-त्पञ्चपादा. दनङ्गुरेः। वृन्ता. दभि प्रसर्पतः- परि पाहि वरीवृतात्।। 22।।

卐 य आमं मांस मदन्ति- पौरुषेयञ्च ये क्रविः। गर्भा. न्खादन्ति केशवा-स्ता.नितो नाशयामसि।। 23।।

卐 ये सूर्या. त्परिसर्पन्ति- स्नुषेव श्वशुरा दधि। बजश्च तेषां पिङ्गश्च-हृदयेऽधि नि विध्यताम्।। 24।।

卐 पिङ्ग रक्ष जायमानं- मा पुमांसं स्त्रिय.ङ्कन्न्। आण्डादो गर्भा. न्मा दभ-न्बाधस्वेतः किमीदिनः।। 25।।

卐 अप्रजा.स्त्वं मार्तवत्स- माद्रोद. मघ. मावयम्। वृक्षा.दिव स्रज. ङ्कृत्वा-ऽप्रिये प्रति मुञ्च तत्।। 26।। तृतीयोऽनुवाक स्समाप्तः

## अष्टम काण्डे चतुर्थोऽनुवाकः

08-04-01

卐 या^ बभ्रवो याश्च शुक्रा^- रोहिणी. रुत पृश्नयः। असिक्नीः कृष्णा^ ओषधी- स्सर्वा^ अच्छाऽ वदामसि।। 1।।

卐 त्रायन्ता. मिमं पुरुषँ- यक्ष्मा. द्देवेषिता. दधि। यासा. न्द्यौ. ष्पिता पृथिवी माता- समुद्रो मूलँ वीरुधां बभूव।। 2।।

卐 आपो अग्र- न्दिव्या^ ओषधयः। ता.स्ते यक्ष्म. मेनस्य1(अ)- मङ्गादङ्गा. दनीनशन्न्।। 3।।

卐 प्रस्तृणती. स्स्तम्बिनी. रेकशुङ्गाः- प्रतन्वती. रोषधी.रा वदामि। अंशुमतीः काण्डिनी. र्या^ विशाखा- ह्वयामि ते वीरुधो वैश्वदेवी- रुग्राः पुरुषजीवनीः।। 4।।

卐 यद्व. स्सह. स्सहमाना^- वीर्य1(अँ) यच्च वो बलम्। तेनेम. मस्मा. द्यक्ष्मा- त्पुरुषं मुञ्चतौषधी- रथो~ कृणोमि भेषजम्।। 5।।

卐 जीवला.न्नघारिषा-ञ्जीवन्ती. मोषधी. महम्। अरुन्धती. मुन्नयन्तीं- पुष्पां मधुमती. मिह हुवे-ऽस्मा अरिष्टतातये।। 6।।

卐 इहाऽ यन्तु प्रचेतसो- मेदिनी. र्वचसो मम। यथेमं पारयामसि- पुरुष. न्दुरिता. दधि।। 7।।

卐 अग्ने. र्घासो अपा. ङ्गर्भो- या^ रोहन्ति पुनर्णवाः। ध्रुवा. स्सहस्त्रनाम्नी-भेषजी. स्सन्त्वाभृताः।। 8।।

卐 अवकोल्बा उदका ऽत्मान^ ओषधयः। व्यृषन्तु दुरित. न्तीक्ष्णशृङ्ग्यः।। 9।।

卐 उन्मुञ्चन्ती. र्विवरुणा^- उग्रा^ या^ विषदूषणीः। अथो बलासनाशनीः-कृत्यादूषणीश्च या- स्ता^ इहा ऽ यन्त्वोषधीः।। 10।।

卐 अपक्रीता. स्सहीयसी- र्वीरुधो या^ अभिष्टुताः। त्रायन्ता. मस्मि. न्ग्रामे- गा.मश्वं पुरुषं पशुम्।। 11।।

卐 मधुम. न्मूलं मधुम. दग्र. मासां- मधुम. न्मध्यँ वीरुधां बभूव। मधुम. त्पर्णं मधुम. त्पुष्पं. मासां- मधो. स्सम्भक्ता^ अमृतस्य भक्षो- घृत. मन्न न्दुह्रता.ङ्गो पुरोगवम्।। 12।।

卐 यावतीः कियती. श्चेमाः- पृथिव्या. मध्योषधीः। ता^ मा सहस्त्रपर्ण्यो- मृत्यो. र्मुञ्चन्त्वंहसः।। 13।।

卐 वैयाघ्रो मणि. र्वीरुधा- न्त्रायमाणोऽभिशस्तिपाः। अमीवा. स्सर्वा रक्षां-स्यप ह.न्त्वधि दूर. मस्मत्।। 14।।

卐 सिंहस्येव स्तनथो. स्सँ विजन्ते-ऽग्ने रिव विजन्त आभृताभ्यः। गवाँ यक्ष्मः पुरुषाणाँ- वीरुद्भि. रतिनुत्तो- नाव्या^ एतु स्रोत्याः।। 15।।

卐 मुमुचाना^ ओषधयो-ऽग्ने. वैँश्वानरा. दधि। भूमिं सन्तन्वती. रित- यासां राजा वनस्पतिः।। 16।।

卐 या^ रोह.न्त्याङ्गिरसीः- पर्वतेषु समेषु च। ता^ नः पयस्वती. श्शिवा- ओषधी. स्सन्तु शं हृदे।। 17।।

卐 या.श्चाऽहँ वेद वीरुधो- याश्च पश्यामि चक्षुषा। अज्ञाता^ जानीम.श्च या^- यासु विद्म च सम्भृतम्।। 18।।

卐 सर्वा. स्समग्रा^ ओषधी- र्बोधन्तु वचसो मम। यथेमं पारयामसि- पुरुष. न्दुरिता. दधि।। 19।।

卐 अश्वत्थो दर्भो वीरुधां- सोमो राजाऽमृतं हविः। व्रीहि. र्यवश्च भेषजौ- दिव. स्पुत्रा.वमर्त्यौ।। 20।।

卐 उज्जिहीध्वे स्तनय- त्यभिक्रन्द. त्योषधीः। यदा वः पृश्निमातरः- पर्जन्यो रेतसाऽवति।। 21।।

卐 तस्याऽमृतस्येमं बलं- पुरुषं पाययामसि। अथो~ कृणोमि भेषजं- यथाऽस. च्छतहायनः।। 22।।

卐 वराहो वेद वीरुध- न्नकुलो वेद भेषजीम्। सर्पा^ गन्धर्वा^ या^ विदु-स्ता^ अस्मा अवसे हुवे।। 23।।

卐 या. स्सुपर्णा^ आङ्गिरसी- र्दिव्या^ या^ रघटो विदुः। वयांसि हंसा^ या^ विदु- र्याश्च सर्वे पतत्रिणः। मृगा^ या^ विदु. रोषधी- स्ता^ अस्मा अवसे हुवे।। 24।।

卐 यावतीना. मोषधीना-ङ्गाव॰ प्राश्न.न्त्यघ्न्या^- यावतीना. मजावयः। तावती. स्तुभ्य. मोषधी- श्शर्म यच्छ.न्त्वाभृताः।। 25।।

卐 यावतीषु मनुष्या^- भेषजं भिषजो विदुः। तावती. र्विश्वभेषजी-रा भरामि त्वा.मभि।। 26।।

卐 पुष्पवती॰ प्रसूमती॰- फलिनी. रफला^ उत। संमातर^इव दुह्रा- मस्मा अरिष्टतातये।। 27।।

卐 उत्त्वाऽहार्षं पञ्चशला- दथो~ दशशला. दुत। अथो~ यमस्य पड्वीशा-द्विश्वस्मा. द्देवकिल्बिषात्।। 28।।-

08-04-02

卐 इन्द्रो मन्थतु मन्थिता- शक्र. श्शूर॰ पुरन्दरः। यथा हनाम सेना^-अमित्राणां सहस्रशः।। 1।।

卐 पूतिरज्जु. रुपध्मानी- पूतिं सेना.ङ्कृणो.त्वमूम्। धूम. मग्निं परादृश्या-
ऽमित्रा^ हृ.त्स्वा दधतां भयम्।। 2।।

卐 अमू. नश्वत्थ नि श्शृणीहि- खादाऽमू. न्खदिराऽजिरम्। ताज. द्भङ्ग^इव
भज्यन्तां- हन्त्वेना. न्वधको वधैः।। 3।।

卐 परुषा.नमू. न्परुषाह्वः कृणोतु- हन्त्वेना. न्वधको वधैः। क्षिप्रं शर^इव
भज्यन्तां- बृहज्जालेन सन्दिताः।। 4।।

卐 अन्तरिक्ष.ञ्जाल. मासी- ज्जालदण्डा^ दिशो महीः। तेनाभिधाय दस्यूनां-
शक्र. स्सेना. मपाऽवपत्।। 5।।

卐 बृहद्धि जालं बृहत- श्शक्रस्य वाजिनीवतः। तेन शत्रू. नभि सर्वा.न्न्युब्ज-
यथा न मुच्यातै कतम.श्चनैषाम्।। 6।।

卐 बृहत्ते जालं बृहत^ इन्द्र शूर- सहस्रार्घस्य शतवीर्यस्य। तेन शतं सहस्र.
मयुत. न्न्यर्बुद.ञ्जघान- शक्रो दस्यूना. मभिधाय सेनया।। 7।।

卐 अयँ लोको जाल. मासी- च्छक्रस्य महतो महान्। तेनाऽह मिन्द्र
जालेनाऽमूं-स्तमसाऽभि दधामि सर्वान्।। 8।।

卐 सेदि. रुग्रा व्यृद्धि- रार्ति. श्चाऽनपवाचना। श्रम. स्तन्द्रीश्च मोहश्च-
तै.रमू. नभि दधामि सर्वान्।। 9।।

卐 मृत्यवेऽमू. न्प्र यच्छामि- मृत्युपाशै रमी~ सिताः। मृत्यो.र्ये अघला^

दूता- स्तेभ्य^ एना. न्प्रति नयामि बद्ध्वा।। 10।।

卐 नयताऽमू. न्मृत्युदूता^- यमदूता^ अपोम्भत। परस्सहस्रा^ हन्यन्तां-

तृणेढ्वेना.न्मत्यं भवस्य।। 11।।

卐 साध्या^ एक.ञ्जालदण्ड- मुद्यत्य यन्त्योजसा। रुद्रा^ एकँ वसव^ एक-

मादित्यै. रेक^ उद्यतः।। 12।।

卐 विश्वे देवा उपरिष्टा- दुब्जन्तो यन्त्वोजसा। मध्येन घ्नन्तो यन्तु- सेना.

मङ्गिरसो महीम्।। 13।।

卐 वनस्पती. न्वानस्पत्या- नोषधी. रुत वीरुधः। द्विपा.च्चतुष्पा. दिष्णामि-

यथा सेना. ममूं हनन्न्।। 14।।

卐 गन्धर्वाप्सरस. स्सर्पा- न्देवा. न्पुण्यजना. न्पितृन्। दृष्टा. नदृष्टा.

निष्णामि- यथा सेना.ममूं हनन्न्।। 15।।

卐 इम उप्ता^ मृत्युपाशा^- या.नाक्रम्य न मुच्यसे। अमुष्या^ हन्तु सेनाया^-

इद.ङ्कूटं सहस्रशः।। 16।।

卐 घर्म. स्समिद्धो अग्निना-ऽयं होम.स्सहस्रहः। भवश्च पृश्निबाहुश्च- शर्व

सेना. ममूं हतम्।। 17।। (सहस्रशः)



Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 मृत्यो.राष मा पद्यन्ता- क्षुधं सेदिं वधं भयम्। इन्द्र श्चाऽक्षुजालाभ्यां-
शर्व सेना ममूं हतम्।। 18।।

卐 पराजिताः प्र त्रसता-ऽमित्रा^ नुत्ता धावत ब्रह्मणा। बृहस्पतिप्रणुत्तानां-
माऽमीषां मोचि कश्चन।। 19।।

卐 अव पद्यन्ता. मेषा मायुधानि- मा शक. न्प्रतिधा. मिषुम्। अथैषां बहु
बिभ्यता- मिषवो घ्नन्तु मर्मणि।। 20।।

卐 सङ्क्रोशता. मेना. न्द्यावापृथिवी~- स.मन्तरिक्षं सह देवताभिः। मा
ज्ञातारं मा प्रतिष्ठाँ विदन्त- मिथो विघ्नाना^ उप यन्तु मृत्युम्।। 21।।

卐 दिश. श्चतस्रोऽश्वतर्यो- देवरथस्य पुरोडाशा- श्शफा^ अन्तरिक्ष. मुद्धिः।
द्यावापृथिवी~ पक्षसी~ ऋतवोऽभीशवो- ऽन्तर्देशाः किङ्करा^
वाक्परिरथ्यम्।। 22।।

卐 सँवत्सरो रथः- परिवत्सरो रथोपस्थो- विरा. डीषा-ग्नी रथमुखम्। इन्द्र.
स्सव्यष्ठा- श्चन्द्रमा. स्सारथिः।। 23।।

卐 इतो जयेतो वि जय- सञ्जय जय स्वाहा। इमे जयन्तु पराऽमी~ जयन्तां
स्वाहैभ्यो दुराहाऽमीभ्यः। नीललोहितेनाऽमू. नभ्यव तनोमि।। 24।।

## ॐ अष्टम काण्डे पञ्चमोऽनुवाकः

08-05-01

卐 कुत.स्तौ जातौ कतम. स्सो अर्ध॰- कस्मा.ल्लोका.त्कतमस्या॰ पृथिव्याः। वत्सौ विराज. स्सलिला. दुदैता- न्तौ त्वा पृच्छामि कतरेण दुग्धा।। 1।।

卐 यो अक्रन्दय. त्सलिलं महित्वा- योनि.ङ्कृत्वा त्रिभुजं शयानः। वत्स॰ कामदुघो विराज- स्स^ गुहा चक्रे तन्व॰ पराचैः।। 2।।

卐 यानि त्रीणि बृहन्ति येषां- चतुर्थं वियुनक्ति वाचम्। ब्रह्मैन. द्विद्या. त्तपसा विपश्चि- द्यस्मि. न्नेकँ युज्यते यस्मि. न्नेकम्।। 3।।

卐 बृहत॰ परि सामानि- षष्ठा. त्पञ्चाऽधि निर्मिता। बृह. द्बृहत्या^ निर्मित- ङ्कुतोऽधि बृहती मिता।। 4।।

卐 बृहती परि मात्राया^- मातु. र्मात्राऽधि निर्मिता। माया ह जज्ञे मायाया^- मायाया^ मातली परि।। 5।।

卐 वैश्वानरस्य प्रतिमोपरि द्यौ- र्याव. द्रोदसी~ विबबाधे अग्निः। तत. ष्षष्ठा. दाऽमुतो यन्ति स्तोमा^- उदितो य.न्त्यभि षष्ठ. मह्नः।। 6।।

卐 षड्वा पृच्छाम^ ऋषय॰ कश्यपेमे- त्वं हि युक्तँ युयुक्षे योग्यञ्च। विराज.
माहु. र्ब्रह्मण॰ पितर- न्तान्नो वि धेहि यतिधा सखिभ्यः।। 7।।
卐 यां प्रच्युता. मनु यज्ञा॰- प्रच्यवन्त उपतिष्ठन्त उपतिष्ठमानाम्। यस्या^
व्रते प्रसवे यक्ष. मेजति- सा विरा. ड्डृषय॰ परमे व्योमन्न्।। 8।।
卐 अप्राणैति प्राणेन प्राणतीनाँ- विरा. ड्स्वराज मभ्येति पश्चात्। विश्वं
मृशन्ती. मभिरूपाँ विराजं- पश्यन्ति त्वे~ न त्वे~ पश्य.न्त्येनाम्।। 9।।
卐 को विराजो मिथुनत्वँ प्र वेद- क^ ऋतू. न्क^ उ कल्प. मस्याः। क्रमा.
न्को अस्या॰ कतिधा विदुग्धा-न्को अस्या^ धाम कतिधा व्युष्टीः।। 10।।
卐 इय. मेव सा या प्रथमा व्यौच्छ- दास्वितरासु चरति प्रविष्टा। महान्तो
अस्यां महिमानो अन्त- र्वधू. र्जिगाय नवग.ज्जनित्री।। 11।।
卐 छन्द॰पक्षे~ उषसा पेपिशाने~- समानँ योनि. मनु सञ्चरेते~।
सूर्यपत्नी~ सञ्चरत॰ प्रजानती~- केतुमती~ अजरे~ भूरिरेतसा।। 12।।
卐 ऋतस्य पन्था. मनु तिस्र^ आऽगु- स्त्रयो घर्मा^ अनु रेत आऽगुः। प्रजा.
मेका जिन्व.त्यूर्ज. मेका- राष्ट्र. मेका रक्षति देवयूनाम्।। 13।।

卐 अग्नीषोमा. वदधु. र्या तुरीयाऽऽसी- द्यज्ञस्य पक्षा.वृषयः कल्पयन्तः।
गायत्री. न्त्रिष्टुभ. ञ्जगती. मनुष्टुभं- बृहदर्कीं यजमानाय स्व.राभरन्तीम्।।
14।।

卐 पञ्च व्युष्टी. रनु पञ्च दोहा^- गां पञ्चनाम्नी. मृतवोऽनु पञ्च। पञ्च दिशः
पञ्चदशेन क्लृप्ता- स्ता^ एकमूर्ध्नी. रभि लोक. मेकम्।। 15।।

卐 षड्जाता^ भूता^ प्रथमजर्तस्य- षडु सामानि षडहँ वहन्ति। षड्योगं सीर.
मनु सामसाम- षडाहु. र्द्यावापृथिवी~ ष्षडुर्वीः।। 16।।

卐 षडाहु. श्शीता.न्थषडु मास^ उष्णा- नृतु.न्नो ब्रूत यतमोऽतिरिक्तः। सप्त
सुपर्णाः कवयो निषेदु- स्सप्त च्छन्दां.स्यनु सप्त दीक्षाः।। 17।।

卐 सप्त होमा. स्समिधो ह सप्त- मधूनि सप्तर्तवो ह सप्त। सप्ताऽऽज्यानि परि
भूत. माय- न्ता. स्सप्तगृध्रा^ इति शुश्रुमा वयम्।। 18।।

卐 सप्त च्छन्दांसि चतुरुत्तरा-ण्यन्यो अन्यस्मि. न्नध्याऽर्पितानि। कथं
स्तोमाः प्रति तिष्ठन्ति तेषु- तानि स्तोमेषु कथ. माऽर्पितानि।। 19।।

卐 कथ.ङ्गायत्री त्रिवृतँ व्याप- कथ. न्त्रिष्टु. प्पञ्चदशेन कल्पते। त्रयस्त्रिंशेन
जगती कथ. मनुष्टु- प्कथ. मेकविंशः।। 20।।

卐 अष्ट जाता भूता प्रथम-जर्तस्याष्टे.न्द्रर्त्विजो दैव्या^ ये। अष्टयोनि. रदिति. रष्टपुत्रा-ऽष्टमीं रात्रि. मभि हव्य. मेति।। 21।।

卐 इत्थं श्रेयो मन्यमानेद. माऽगमँ- युष्माकं सख्ये अह. मस्मि शेवा। समानजन्मा क्रतु. रस्ति व.श्शिव- स्स^ व.स्सर्वा. स्सञ्चरति प्रजानन्न्।। 22।।

卐 अष्टेन्द्रस्य षड्यमस्य- ऋषीणां सप्त सप्तधा। अपो मनुष्या3(आ) नोषधी- स्ता^ उ पञ्चाऽनु सेचिरे।। 23।।

卐 केवलीन्द्राय दुदुहे हि गृष्टि- र्वशं पीयूषं प्रथम. न्दुहाना। अथाऽतर्पय. च्चतुर. श्चतुर्धा- देवा. न्मनुष्या3(आ^) असुरा. नुत ऋषीन्।। 24।।

卐 को नु गौः क^ एकऋषिः- कि.मु धाम का^ आशिषः। यक्षं पृथिव्या^ मेकवृ-देकर्तुः कतमो नु सः।। 25।।

卐 एको गौ रेक^ एकऋषि- रेक.न्धामैकधाऽऽशिषः। यक्षं पृथिव्या. मेकवृ-देकर्तु. र्नाऽति रिच्यते।। 26।।-

08-05-02

卐 विराड्वा इद. मग्र आसी- त्तस्या^ जाताया. स्सर्व. मबिभे- दिय. मेवेदं भविष्यतीति।। 1।।

卐 सोद॑क्रामत्सा गार्ह॑पत्ये॒ न्य॑क्रामत्॥ 2॥

卐 गृ॒ह॒मे॒धी गृ॒हप॑तिः भवति॒- य॑ ए॒वं वेद॑॥ 3॥

卐 सोद॑क्रामत्सा॑ऽऽह॒व॒नी॒ये॒ न्य॑क्रामत्॥ 4॥

卐 यन्त्य॑स्य दे॒वा दे॒वहू॑तिं- प्रि॒यो दे॒वानां॑ भवति॒- य॑ ए॒वं वेद॑॥ 5॥

卐 सोद॑क्रामत्सा द॑क्षिणा॒ग्नौ न्य॑क्रामत्॥ 6॥

卐 य॒ज्ञर्तो॑ द॒क्षि॒णी॒यो॒ वास॑तेयो भवति॒- य॑ ए॒वं वेद॑॥ 7॥

卐 सोद॑क्रामत्सा स॒भा॒यां॒ न्य॑क्रामत्॥ 8॥

卐 यन्त्य॑स्य स॒भां- स॒भ्यो॑ भवति॒- य॑ ए॒वं वेद॑॥ 9॥

卐 सोद॑क्रामत्सा समि॑तौ॒ न्य॑क्रामत्॥ 10॥

卐 यन्त्य॑स्य॒ समि॑तिं- सामि॒त्यो भ॑वति॒- य॑ ए॒वं वेद॑॥ 11॥

卐 सोद॑क्रामत्सा॑ऽऽमन्त्र॑णे॒ न्य॑क्रामत्॥ 12॥

卐 यन्त्य॑स्या॒ऽऽमन्त्र॑णं- आमन्त्र॒णीयो॑ भवति॒- य॑ ए॒वं वेद॑॥ 13॥-

08-05-03

卐 सोद॑क्रामत्सा॑ऽन्तरि॑क्षे चतु॒र्धा विक्रा॑न्ताऽतिष्ठत्॥ 1॥

卐 तां दे॒वम॑नु॒ष्या॑ अब्रुव- न्नि॒यं मे॒व तद्वे॒द- यदु॒भय॑ उप॒जीवे॑-मे॒मां मुप

ह्वयाम॒हा इति॑॥ 2॥

卐 ता.मुपाऽह्वयन्त।। 3।।

卐 ऊर्ज एहि स्वध एहि सूनृत एहीरावत्येहीति।। 4।।

卐 तस्या^ इन्द्रो वत्स^ आसी- द्गायत्र्यभिधा-न्यभ्र. मूधः।। 5।।

卐 बृहच्च रथन्तरञ्च द्वौ स्तना. वास्ताँ- यज्ञायज्ञियञ्च वामदेव्यञ्च द्वौ।। 6।।

卐 ओषधी. रेव रथन्तरेण- देवा^ अदुह्र. न्व्यचो बृहता।। 7।।

卐 अपो वामदेव्येन- यज्ञँ यज्ञायज्ञियेन।। 8।।

卐 ओषधी. रेवास्मै रथन्तर. न्दुहे- व्यचो बृहत्।। 9।।

卐 अपो वामदेव्यँ यज्ञँ यज्ञायज्ञियँ- य^ एवँ वेद।। 10।-

08-05-04

卐 सोदक्राम-त्सा वनस्पती. नाऽगच्छ- त्ताँ वनस्पतयोऽघ्नत- सा सँवत्सरे समभवत्।। 1।।

卐 तस्मा.द्वनस्पतीनां सँवत्सरे वृक्ण. मपि रोहति- वृश्चतेऽस्याऽप्रियो भ्रातृव्यो- य^ एवँ वेद।। 2।।

卐 सोदक्राम-त्सा पितृ नाऽगच्छ-त्तां पितरोऽघ्नत- सा मासि समभवत्।। 3।।

卐 तस्मा.त्पितृभ्यो मास्युपमास्य. न्ददति- प्र पितृयाणं पन्था.ञ्जानाति- य^ एवँ वेद।। 4।।

卐 सोदक्राम-त्सा देवा.नाऽगच्छ-त्ता.न्देवा^ अघ्नत- साऽर्धमासे समभवत्।। 5।।

卐 तस्मा. द्देवेभ्योऽर्धमासे वषङ्कुर्वन्ति- प्र देवयानं पन्था.ञ्जानाति- य^ एवँ वेद।। 6।।

卐 सोदक्राम-त्सा मनुष्या3(आ)नाऽगच्छ-त्तां मनुष्या^ अघ्नत- सा सद्य. स्समभवत्।। 7।।

卐 तस्मा. न्मनुष्येभ्य^ उभयद्यु.रुप हर- न्त्युपाऽस्य गृहे हरन्ति- य^ एवँ वेद।। 8।।-

08-05-05

卐 सोदक्राम-त्साऽसुरा.नाऽगच्छ-त्ता. मसुरा^ उपाह्वयन्त- माय एहीति।। 1।।

卐 तस्या^ विरोचनः प्राह्रादि. र्वत्स^ आसी- दयस्पात्रं पात्रम्।। 2।।

卐 ता.न्द्विमूर्धाऽऽत्व्योऽधो-क्तां माया. मेवाऽधोक्।। 3।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 तां माया. मसुरा^ उप जीव- न्त्युपजीवनीयो भवति- य^ एवँ वेद।।

4।।

卐 सोदक्राम-त्सा पितृ नाऽगच्छ-त्तां पितर^ उपाऽह्वयन्त- स्वध एहीति।।

5।।

卐 तस्या^ यमो राजा वत्स^ आसी-द्रजतपात्रं पात्रम्।। 6।।

卐 ता.मन्तको मार्त्यवोऽधो- क्तां स्वधा. मेवाऽधोक्।। 7।।

卐 तां स्वधां पितर^ उप जीव- न्त्युपजीवनीयो भवति य^ एवँ वेद।। 8।।

卐 सोदक्राम-त्सा मनुष्या3(आ)नाऽगच्छ- त्तां मनुष्या3(आ) उपाऽह्वय-न्तेरावत्येहीति ।। 9।।

卐 तस्या. मनु. वैंवस्वतो वत्स^ आसी- त्पृथिवी पात्रम्।। 10।।

卐 तां पृथी वैन्योऽधो.क्ताङ्कृषिञ्च सस्य.ञ्चाऽधोक्।। 11।।

卐 ते कृषिञ्च सस्यञ्च मनुष्या3(आ)^ उप जीवन्ति- कृष्टराधि. रुपजीवनीयो भवति- य^ एवँ वेद।। 12।।

卐 सोदक्राम-त्सा सप्तऋषी नाऽगच्छ-त्तां सप्तऋषय^ उपाह्वयन्त-ब्रह्मण्वत्येहीति।। 13।।

卐 तस्या. स्सोमो राजा वत्स^ आसी- च्छन्दः पात्रम्।। 14।।

卐 तां बृहस्पति. राङ्गिरसोऽधो- क्तां ब्रह्म च तप.श्चाऽधोक्।। 15।।

卐 तद्ब्रह्म च तपश्च सप्तऋषय^ उप जीवन्ति-ब्रह्मवर्च.स्युपजीवनीयो भवति-य^ एवँ वेद।। 16।।-

08-05-06

卐 सोदक्राम-त्सा देवा.नाऽगच्छ- त्ता. न्देवा^ उपाह्वय.न्तोर्ज एहीति।। 1।।

卐 तस्या^ इन्द्रो वत्स^ आसी.च्चमसꣳ पात्रम्।। 2।।

卐 तान्देव. स्सविताऽधो- क्ता. मूर्जा. मेवाऽधोक्।। 3।।

卐 ता. मूर्जा. न्देवा^ उप जीव- न्त्युपजीवनीयो भवति- य^ एवँ वेद।। 4।।

卐 सोदक्राम-त्सा गन्धर्वाप्सरस^ आऽगच्छ-त्ता.ङ्गन्धर्वाऽप्सरस^ उपाऽह्वयन्त- पुण्यगन्ध एहीति।। 5।।

卐 तस्या. श्चित्ररथ. स्सौर्यवर्चसो वत्स^ आसी-त्पुष्करपर्णं पात्रम्।। 6।।

卐 ताँ वसुरुचि. स्सौर्यवर्चसोऽधो- क्तां पुण्य. मेव गन्ध. मधोक्।। 7।।

卐 तं पुण्य.ङ्गन्ध.ङ्गन्धर्वाप्सरस^ उप जीवन्ति- पुण्यगन्धि. रुपजीवनीयो भवति- य^ एवँ वेद।। 8।।

卐 सोदक्राम-त्सेतरजना नाऽगच्छ-त्ता. मितरजना^ उपाऽह्वयन्त- तिरोध एहीति।। 9।।

卐 तस्या॰ कुबेरो वैश्रवणो वत्स^ आसी- दामपात्रं पात्रम्।। 10।।

卐 तां रजतनाभि॰ काबेरकोऽधो-क्ता. न्तिरोधा. मेवाऽधोक्।। 11।।

卐 ता.न्तिरोधा. मितरजना^ उप जीवन्ति- तिरो धत्ते सर्वं पाप्मान-मुपजीवनीयो भवति- य^ एवँ वेद।। 12।।

卐 सोदक्राम-त्सा सर्पा. नाऽगच्छ- त्तां सर्पा उपाऽह्वयन्त-विषवत्येहीति।। 13।।

卐 तस्या. स्तक्षको वैशालेयो वत्स^ आसी- दलाबुपात्रं पात्रम्।। 14।।

卐 ता.न्धृतराष्ट्र^ ऐरावतोऽधो- क्ताँ विष. मेवाऽधोक्।। 15।।

卐 तद्विषं सर्पा^ उप जीव.न्त्युपजीवनीयो भवति- य^ एवँ वेद।। 16।।-

08-05-07

卐 तद्यस्मा एवँविदुषे-ऽलाबुनाऽभिषिञ्चे-त्प्रत्याहन्यात्।। 1।।

卐 न च प्रत्याहन्या- न्मनसा त्वा प्रत्याहन्मीति- प्रत्याहन्यात्।। 2।।

卐 यत्प्रत्याहन्ति- विष. मेव तत्प्रत्याहन्ति।। 3।।

卐 विष. मेवास्याऽप्रियं भ्रातृव्य. मनु विषिच्यते- य^ एवँ वेद।। 4।।

अष्टमकाण्डं समाप्तम्

## ℧नवमं काण्डम्

### ≶◊≶ नवम काण्डे प्रथमोऽनुवाकः

☸ 09-01-01

卐 दिव. स्पृथिव्या^ अन्तरिक्षा. त्समुद्रा- दग्ने. र्वाता. न्मधुकशा हि जज्ञे।

ता.श्चायित्वाऽमृतँ वसानां- हृद्भिः॰ प्रजाः॰ प्रति नन्दन्ति सर्वाः।। 1।।

卐 मह. त्पयो विश्वरूप. मस्या- स्समुद्रस्य त्वोत रेत^ आहुः। यत^ ऐति

मधुकशा रराणा- तत्प्राण. स्तदमृत. न्निविष्टम्।। 2।।

卐 पश्य.न्त्यस्या. श्चरितं पृथिव्यां- पृथ.ङ्नरो बहुधा मीमांसमानाः। अग्ने.

र्वाता. न्मधुकशा हि जज्ञे- मरुता. मुग्रा नप्तिः।। 3।।

卐 माताऽऽदित्याना. न्दुहिता वसूनां- प्राणः॰ प्रजाना. ममृतस्य नाभिः।

हिरण्यवर्णा मधुकशा घृताची- महा न्भर्ग. श्चरति मर्त्येषु।। 4।। (न्गार्भ.)

卐 मधोः॰ कशा. मजनयन्त देवा- स्तस्यान्गर्भ गर्भो अभव. द्विश्वरूपः।

तञ्जात. न्तरुणं पिपर्ति माता- स^ जातो विश्वा भुवना वि चष्टे।। 5।।

卐 कस्तँ प्र वेद क^ उ तञ्चिकेत- यो अस्या^ हृदः कलशः स्सोमधानो अक्षितः। ब्रह्मा सुमेधा. स्सो अस्मि. न्मदेत।। 6।।

卐 स^ तौ प्र वेद स^ उ तौ चिकेत- या.वस्या. स्स्तनौ सहस्रधारा.वक्षितौ। ऊर्ज. न्दुहाते~ अनपस्फुरन्तौ।। 7।।

卐 हिङ्करिक्रती बृहती वयोधा^- उच्चैर्घोषाऽभ्येति या व्रतम्। त्रीन्घर्मा. नभि वावशाना- मिमाति मायुं पयते पयोभिः।। 8।।

卐 या.मापीना. मुपसीद न्त्यापः- श्शाक्वरा^ वृषभा^ ये स्वराजः। ते वर्षन्ति ते वर्षयन्ति- तद्विदे काम. मूर्ज. मापः।। 9।।

卐 स्तनयित्नु. स्ते वाक्प्रजापते- वृषा शुष्म.क्षिपसि भूम्या. मधि। अग्ने. र्वाता. न्मधुकशा हि जज्ञे- मरुता. मुग्रा नप्तिः।। 10।।

卐 यथा सोमः प्रातस्सवने- अश्विनो. र्भवति प्रियः। एवा मे अश्विना वर्च^- आत्मनि ध्रियताम्।। 11।।

卐 यथा सोमो द्वितीये सवन- इन्द्राग्न्यो. र्भवति प्रियः। एवा म इन्द्राग्नी~ वर्च^- आत्मनि ध्रियताम्।। 12।।

卐 यथा सोम. स्तृतीये सवन- ऋभूणां भवति प्रियः। एवा म ऋभवो वर्च^- आत्मनि ध्रियताम्।। 13।।

卐 मधु जनिषीय- मधु वंशिषीय। पयस्वा. नग्न आऽगम- न्तं मा सं सृज वर्चसा।। 14।।

卐 सं माऽग्ने वर्चसा सृज- सं प्रजया स^ मायुषा। विद्यु.र्मे अस्य देवा^- इन्द्रो विद्या.त्सह ऋषिभिः।। 15।।

卐 यथा मधु मधुकृत- स्सम्भरन्ति मधा.वधि। एवा मे अश्विना वर्च^- आत्मनि ध्रियताम्।। 16।।

卐 यथा मक्षा इदं मधु- न्यञ्जन्ति मधा.वधि। एवा मे अश्विना वर्च- स्तेजो बल. मोजश्च ध्रियताम्।। 17।।

卐 यद्गिरिषु पर्वतेषु- गोष्वश्वेषु यन्मधु। सुरायां सिच्यमानायाँ- यत्तत्र मधु तन्मयि।। 18।।

卐 अश्विना सारघेण मा- मधुनाऽङ्क्तं शुभस्पती~। यथा वर्चस्वतीँ वाच- मावदानि जना॰ अनु।। 19।।

卐 स्तनयित्नु.स्ते वाक्प्रजापते- वृषा शुष्म.ङ्क्षिपसि भूम्या. न्दिवि। तां पशव^ उप जीवन्ति सर्वे- तेनो~ सेष. मूर्जं पिपर्ति।। 20।।

卐 पृथिवी दण्डो3(ओ)ऽन्तरिक्ष.ङ्गर्भो द्यौ॰ कशा- विद्युत्प्रकशो हिरण्ययो बिन्दुः।। 21।।

卐 यो वै कशाया. स्सप्त मधूनि वेद- मधुमा. न्भवति। ब्राह्मणश्च राजा च धेनु. श्चाऽनड्वांश्च- व्रीहिश्च यवश्च मधु सप्तमम्।। 22।।

卐 मधुमा. न्भवति- मधुम.दस्याऽऽहार्यं भवति। मधुमतो लोका. न्जयति- य॑ एवँ वेद।। 23।।

卐 य.द्वीध्रे स्तनयति- प्रजापति. रेव तत्प्रजाभ्यः प्रादु.र्भवति। तस्मा. त्प्राचीनोपवीत. स्तिष्ठे- प्रजापतेऽनु मा बुध्यस्वेति। अन्वेनं प्रजा॑ अनु प्रजापति. र्बुध्यते- य॑ एवँ वेद।। 24।।-

09-01-02

卐 सपत्नहन. मृषभ. ङ्घृतेन- कामं शिक्षामि हविषाऽऽज्येन। नीचै. स्सपत्ना. न्मम पादय त्व-मभिष्टुतो महता वीर्येण।। 1।।

卐 यन्मे मनसो न प्रिय.न्न चक्षुषो- यन्मे बभस्ति नाऽभिनन्दति। तद्दुष्वप्न्यं प्रति मुञ्चामि सपत्ने- कामं स्तुत्वोदहं भिदेयम्।। 2।।

卐 दुष्वप्न्य.ङ्काम दुरितञ्च कामा-ऽप्रजस्ता. मस्वगता. मवर्तिम्। उग्र॑ ईशानः प्रति मुञ्च तस्मि- न्यो अस्मभ्य. मंहूरणा चिकित्सात्।। 3।।

卐 नुदस्व काम प्र णुदस्व कामा-ऽवर्तिँ यन्तु मम ये सपत्नाः। तेषा. न्नुत्ताना. मधमा तमां-स्यग्ने वास्तूनि नि.र्दह त्वम्।। 4।।

卐 सा ते काम दुहिता धेनु. रुच्यते- या. माहु वाच.ङ्कवयो विराजम्। तया सपत्ना. न्परिवृङ्धि ये मम- पर्यैना. न्प्राणꣳ पशवो जीवनँ वृणक्तु।। 5।।

卐 कामस्येन्द्रस्य वरुणस्य राज्ञो- विष्णो. र्बलेन सवितु. स्सवेन। अग्ने. र्होत्रेण प्र णुदे सपत्ना- न्छम्ब्वीव नाव. मुदकेषु धीरः।। 6।।

卐 अध्यक्षो वाजी मम काम^ उग्रꣳ- कृणोतु मह्य. मसपत्न. मेव। विश्वे देवा^ मम नाथं भवन्तु- सर्वे देवा^ हव. मा यन्तु म इमम्।। 7।।

卐 इद. माज्य.ङ्घृतव. ज्जुषाणाꣳ- कामज्येष्ठा^ इह मादयध्वम्। कृण्वन्तो मह्य. मसपत्न. मेव।। 8।।

卐 इन्द्राग्नी~ काम सरथं हि भूत्वा- नीचै. स्सपत्ना. न्मम पादयाथः। तेषां पन्नाना. मधमा तमां-स्यग्ने वास्तू.न्यनु नि.र्दह त्वम्।। 9।।

卐 जहि त्व.ङ्काम मम ये सपत्ना^- अन्धा तमांस्यव पादयैनान्। निरिन्द्रिया^ अरसा. स्सन्तु सर्वे- मा ते जीविषुꣳ कतम. च्चनाहः।। 10।।

卐 अवधी. त्कामो मम ये सपत्ना^- उरुँ लोक. मकर. न्मह्य. मेधतुम्। मह्य. न्नमन्तां प्रदिश. श्चतस्रो- मह्यं षडुर्वी. र्घृत. मावहन्तु।। 11।।

卐 तेऽधराञ्चꣳ प्र प्लवन्ता- ञ्छिन्ना नौ.रिव बन्धनात्। न सायकप्रणुत्तानां- पुन.रस्ति निवर्तनम्।। 12।।

卐 अग्नि.र्यव^ इन्द्रो यव. स्सोमो यवः। यवयावानो देवा- यावय.न्त्वेनम्।।
13।।

卐 असर्ववीर. श्चरतु प्रणुत्तो द्वेष्यो- मित्राणां परिवर्ग्य1(अ) स्स्वानाम्। उत
पृथिव्या. मवस्यन्ति विद्युत^- उग्रो वो देवः प्र मृण. त्सपत्नान्।। 14।।

卐 च्युता चेयं बृहत्यच्युता च- विद्यु. द्बिभर्ति स्तनयित्नूंश्च सर्वान्।
उद्य.न्नादित्यो द्रविणेन तेजसा- नीचै. स्सपत्ना.न्नुदतां मे सहस्वान्।।15।।

卐 यत्ते काम शर्म त्रिवरूथ. मुद्भु- ब्रह्म वर्म विततं. मनतिव्याध्य.ङ्कृतम्।
तेन सपत्ना. न्परि वृङ्ग्धि ये मम- पर्येना. न्प्राणः पशवो जीवनं वृणक्तु।।
16।।

卐 येन देवा^ असुरा. न्प्राणुदन्त- येनेन्द्रो दस्यू. नधम. न्तमो निनाय। तेन
त्व.ङ्काम मम ये सपत्ना- स्ता. नस्मा. ल्लोका. त्प्रणुदस्व दूरम्।। 17।।

卐 यथा देवा^ असुरा. न्प्राणुदन्त- यथेन्द्रो दस्यू.नधम. न्तमो बबाधे। तथा
त्व.ङ्काम मम ये सपत्ना- स्ता. नस्मा. ल्लोका. त्प्रणुदस्व दूरम्।।18।।

卐 कामो जज्ञे प्रथमो नैन- न्देवा^ आपुः पितरो न मर्त्याः। तत.स्त्व. मसि
ज्याया. न्विश्वहा महां- स्तस्मै ते काम नम^ इत्कृणोमि।। 19।।

卐 यावती~ द्यावापृथिवी~ वरिम्णा- याव.दाप. स्सिष्यदु. र्याव.दग्निः। तत.स्त्व. मसि ज्याया. न्विश्वहा महां- स्तस्मै ते काम नम^ इत्कृणोमि।। 20।। {4}

卐 यावती. र्दिशः प्रदिशो विषूची- र्यावती. राशा^ अभिचक्षणा^ दिवः। तत.स्त्व. मसि ज्याया. न्विश्वहा महां- स्तस्मै ते काम नम^ इत्कृणोमि।। 21।।

卐 यावती. र्भृङ्गा जत्वः कुरूरवो- यावती. र्वघा^ वृक्षसर्प्यो बभूवुः। तत.स्त्व. मसि ज्याया. न्विश्वहा महां- स्तस्मै ते काम नम^ इत्कृणोमि।। 22।।

卐 ज्याया. न्निमिषतोऽसि तिष्ठतो- ज्याया. न्त्समुद्रा. दसि काम मन्यो। तत.स्त्व. मसि ज्याया. न्विश्वहा महां- स्तस्मै ते काम नम^ इत्कृणोमि।। 23।।

卐 न वै वात. श्चन काम. माप्नोति- नाऽग्नि स्सूर्यो नोत चन्द्रमाः। तत.स्त्व. मसि ज्याया. न्विश्वहा महां- स्तस्मै ते काम नम^ इत्कृणोमि।। 24।।

卐 या.स्ते शिवा. स्तन्वः काम भद्रा- याभि. स्सत्यं भवति यद्वृणीषे। ताभि.ष्ट्व मस्मा॑ अभिसँविशस्वा-ऽन्यत्र पापी. रप वेशया धियः।। 25।।

इति प्रथमोऽनुवाकः

## नवम काण्डे द्वितीयोऽनुवाकः

09-02-01

卐 उपमितां प्रतिमिता- मथो॒ परिमिता. मुत। शालाया विश्ववाराया- नद्धानि वि चृतामसि।। 1।।

卐 य.त्ते नद्धँ विश्ववारे- पाशो ग्रन्थिश्च यः कृतः। बृहस्पति. रिवाऽहं बलँ- वाचा वि स्त्रंसयामि तत्।। 2।।

卐 आ ययाम सं बबर्ह- ग्रन्थीं.श्चकार ते दृढान्। परूंषि विद्वा. न्छस्ते- वेन्द्रेण वि चृतामसि।। 3।।

卐 वंशाना.न्ते नहनानां- प्राणाहस्य तृणस्य च। पक्षाणाँ विश्ववारे ते- नद्धानि वि चृतामसि।। 4।।

卐 सन्दंशानां पलदानां- परिष्वञ्जल्यस्य च। इदं मानस्य पत्न्या- नद्धानि वि चृतामसि।। 5।।

卐 यानि तेऽन्त. श्शिक्वा-न्याबेधू रण्याय कम्। प्र ते तानि चृतामसि-

शिवा मानस्य पत्नी न^- उद्धिता तन्वे भव।। 6।।

卐 हविर्धान. मग्निशालं- पत्नीनां सदनं सदः। सदो देवाना. मसि- देवि

शाले।। 7।।

卐 अक्षु. मोपशँ विततं- सहस्राक्षँ विषूवति। अवनद्ध. मभिहितं- ब्रह्मणा वि

चृतामसि।। 8।।

卐 यस्त्वा शाले प्रतिगृह्णाति- येन चासि मिता त्वम्। उभौ मानस्य पत्नि-

तौ जीवता.ञ्जरदष्टी~।। 9।।

卐 अमुत्रैन.मा गच्छता- दृढा नद्धा परिष्कृता। यस्या.स्ते विचृताम-

स्यङ्गमङ्गं परुष्परुः।। 10।।

卐 यस्त्वा शाले निमिमाय- सञ्जभार वनस्पतीन्। प्रजायै चक्रे त्वा शाले-

परमेष्ठी प्रजापतिः।। 11।।

卐 नम. स्तस्मै नमो दात्रे- शालापतये च कृण्मः। नमोऽग्नये प्रचरते-

पुरुषाय च ते नमः।। 12।।

卐 गोभ्यो अश्वेभ्यो नमो- यच्छालायाँ विजायते। विजावति प्रजावति- वि

ते पाशाँ. श्रृतामसि।। 13।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 अग्नि. मन्त. श्छादयसि- पुरुषा. न्पशुभि. स्सह। विजावति प्रजावति-
वि ते पाशां. श्चृतामसि।। 14।।
卐 अन्तरा द्याञ्च पृथिवीञ्च यद्व्यच- स्तेन शालां प्रति गृह्णामि त इमाम्।
यदन्तरिक्षं रजसो विमान- न्तत्कृण्वेह मुदरं शेवधिभ्यः। तेन शालां प्रति
गृह्णामि तस्मै।। 15।।
卐 ऊर्जस्वती पयस्वती- पृथिव्या. न्निमिता मिता। विश्वान्नं बिभ्रती शाले-
मा हिंसीः प्रतिगृह्णतः।। 16।।
卐 तृणै. रावृता पलदान् वसाना- रात्रीव शाला जगतो निवेशनी। मिता
पृथिव्या. न्तिष्ठसि हस्तिनीव पद्वती।। 17।।
卐 इटस्य ते वि चृता-म्यपिनद्ध. मपोर्णुवन्न्। वरुणेन समुब्जितां- मित्रः
प्रात. र्व्युब्जतु।। 18।।
卐 ब्रह्मणा शाला. न्निमिता- ङ्कविभि. र्निमितां मिताम्। इन्द्राग्नी~ रक्षतां
शाला- ममृतौ सोम्यं सदः।। 19।।
卐 कुलायेऽधि कुलाय- ङ्कोशे कोश. स्समुब्जितः। तत्र मर्तो वि जायते-
यस्मा. द्विश्वं प्रजायते।। 20।। {7}

卐 या द्विपक्षा चतुष्पक्षा- षट्पक्षा या निमीयते। अष्टापक्षा. न्दशपक्षां- शालां मानस्य पत्नी- मग्नि. र्गर्भइवाऽऽशये।। 21।।

卐 प्रतीची.न्त्वा प्रतीचीन- श्शाले प्रैम्यहिंसतीम्। अग्नि.र्ह्य1(अ)न्त राप- श्चर्तस्य प्रथमा द्वाः।। 22।।

卐 इमा^ आपः प्र भरा- म्ययक्ष्मा^ यक्ष्मनाशनीः। गृहा. नुप प्र सीदा- म्यमृतेन सहाऽग्निना।। 23।।

卐 मा नः पाशं प्रति मुचो- गुरु. र्भारो लघु. र्भव। वधू.मिव त्वा शाले- यत्रकामं भरामसि।। 24।।

卐 प्राच्या^ दिश. श्शालाया^ नमो- महिम्ने स्वाहा देवेभ्य. स्स्वाह्येभ्यः।। 25।।

卐 दक्षिणाया^ दिश. श्शालाया^ नमो- महिम्ने स्वाहा देवेभ्य. स्स्वाह्येभ्यः।। 26।।

卐 प्रतीच्या^ दिश^ श्शालाया^ नमो- महिम्ने स्वाहा देवेभ्य. स्स्वाह्येभ्यः।। 27।।

卐 उदीच्या^ दिश. श्शालाया^ नमो- महिम्ने स्वाहा देवेभ्य. स्स्वाह्येभ्यः।। 28।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 ध्रुवाया^ दिश. श्शालाया^ नमो- महिम्ने स्वाहा देवेभ्य. स्स्वाह्येभ्यः।।
29।।

卐 ऊर्ध्वाया^ दिश. श्शालाया^ नमो- महिम्ने स्वाहा देवेभ्य. स्स्वाह्येभ्यः।।
30।।

卐 दिशोदिश. श्शालाया^ नमो- महिम्ने स्वाहा देवेभ्य. स्स्वाह्येभ्यः।।
31।।

09-02-02

卐 साहस्र. स्त्वेष^ ऋषभ॰ पयस्वान्- विश्वा रूपाणि वक्षणासु बिभ्रत्। भद्र. न्दात्रे यजमानाय शिक्ष- न्बार्हस्पत्य^ उस्रिय. स्तन्तु. मातान्।। 1।।

卐 अपाँ यो अग्रे प्रतिमा बभूव- प्रभू. स्सर्वस्मै पृथिवीव देवी। पिता वत्सानां पति. रघ्न्यानां- साहस्रे पोषे अपि न॰ कृणोतु।। 2।।

卐 पुमा. नन्तर्वा. न्त्स्थविर॰ पयस्वान्- वसो॰ कबन्ध. मृषभो बिभर्ति। तमिन्द्राय पथिभि. र्दैवयानै- र्हुत. मग्नि. र्वहतु जातवेदाः।। 3।।

卐 पिता वत्सानां पति. रघ्न्याना- मथो~ पिता महता.ङ्गर्गराणाम्। वत्सो जरायु प्रतिधु.क्पीयूष^- आमिक्षा घृत. न्तद्वस्य रेतः।। 4।।

卐 देवानां भाग^ उपनाह^ एषो3(ओ)-ऽपां रस^ ओषधीना.ङ्घृतस्य। सोमस्य भक्ष. मवृणीत शक्रो- बृह. न्नद्रि. रभव.द्यच्छरीरम्।। 5।।

卐 सोमेन पूर्ण. ङ्कलशं बिभर्षि- त्वष्टा रूपाणा.ञ्जनिता पशूनाम्। शिवा.स्ते सन्तु प्रजन्व^ इह या- इमा न्य1(अ)स्मभ्यं स्वधिते यच्छ या^ अमूः।। 6।।

卐 आज्यं बिभर्ति घृत. मस्य रेत- स्साहस्रः पोष. स्तमु यज्ञ. माहुः। इन्द्रस्य रूप. मृषभो वसान- स्सो अस्मा. न्देवा^ श्शिव^ ऐतु दत्तः।। 7।।

卐 इन्द्रस्यौजो वरुणस्य बाहू~- अश्विनो. रंसौ मरुता. मियं.ङ्ककुत्। बृहस्पतिं सम्भृत. मेत. माहु- र्यें धीरासः कवयो ये मनीषिणः।। 8।।

卐 दैवी. र्विशः पयस्वा. नातनोषि- त्वा.मिन्द्र. न्त्वां सरस्वन्त. माहुः। सहस्रं स^ एकमुखा ददाति- यो ब्राह्मण^ ऋषभ. माजुहोति।। 9।।

卐 बृहस्पति. स्सविता ते वयो दधौ- त्वष्टु. र्वायोः पर्यात्मा त आभृतः। अन्तरिक्षे मनसा त्वा जुहोमि- बर्हि.ष्टे द्यावापृथिवी~ उभे~स्ताम्।। 10।।

卐 य^ इन्द्र^इव देवेषु- गोष्वेति विवावदत्। तस्य ऋषभस्याऽङ्गानि- ब्रह्मा संस्तौतु भद्रया।। 11।।

卐 पार्श्वे आस्ता. मनुमत्या- भगस्याऽस्ता. मनूवृजौ। अष्ठीवन्ता. वब्रवी. न्मित्रो- ममैतौ केवला.विति।। 12।।

卐 भसदासी. दादित्यानां- श्रोणी आस्तां बृहस्पतेः। पुच्छँ वातस्य देवस्य- तेन धूनो.त्योषधीः।। 13।।

卐 गुदा आस.न्त्सिनीवाल्या.- स्सूर्याया. स्त्वचं. मब्रुवन्न्। उत्थातु. रब्रुव. न्पद- ऋषभँ यदकल्पयन्न्।। 14।।

卐 क्रोड आसी. ज्जामिशंसस्य- सोमस्य कलशो धृतः। देवा. स्सङ्गत्य यत्सर्व - ऋषभँ व्यकल्पयन्न्।। 15।।

卐 ते कुष्ठिका. स्सरमायै- कूर्मेभ्यो अदधु. श्शफान्। ऊबध्य. मस्य कीटेभ्य- श्श्ववर्तेभ्यो अधारयन्न्।। 16।।

卐 श्रृङ्गाभ्यां रक्ष ऋष- त्यवर्तिं हन्ति चक्षुषा। श्रृणोति भद्र.ङ्कर्णाभ्या- ङ्गवाँ यः पतिरघ्न्यः।। 17।।

卐 शतयाजं स यजते- नैनं. न्दुन्व. न्त्यग्नयः। जिन्वन्ति विश्वे त.न्देवा- यो ब्राह्मण ऋषभ. माजुहोति।। 18।।

卐 ब्राह्मणेभ्य ऋषभ. न्दत्त्वा- वरीयः कृणुते मनः। पुष्टिं सो अघ्न्यानां- स्वे गोष्ठेऽव पश्यते।। 19।।

卐 गाव. स्सन्तु प्रजा. स्स-न्त्वथो~ अस्तु तनूबलम्। तत्सर्व. मनु मन्यन्ता- न्देवा^ ऋषभदायिने।। 20।।

卐 अयं पिपान^ इन्द्र इ-द्रयि. न्दधातु चेतनीम्। अय. न्धेनुं सुदुघा. न्नित्यवत्सा- वश. न्दुहाँ विपश्चितं परो दिवः।। 21।।

卐 पिशङ्गरूपो नभसो वयोधा^- ऐन्द्र. श्शुष्मो विश्वरूपो न^ आगन्न्। आयु. रस्मभ्य. न्दध.त्प्रजाञ्च- रायश्च पोषै. रभि न.स्सचताम्।। 22।।

卐 उपे होपपर्चना-ऽस्मि. न्गोष्ठ उप पृञ्च नः। उप ऋषभस्य यद्रेत^- उपेन्द्र तव वीर्यम्।। 23।।

卐 एतँ वो युवानं प्रति दध्मो अत्र- तेन क्रीडन्ती. श्चरत वशा॒ अनु। मा नो हासिष्ट जनुषा सुभागा^- रायश्च पोषै. रभि न.स्सचध्वम्।। 24।। इति द्वितीयोऽनुवाकः

## नवम काण्डे तृतीयोऽनुवाकः

09-03-01

卐 आ नयैत. मा रभस्व सुकृताँ- लोक. मपि गच्छतु प्रजानन्न्। तीर्त्वा तमांसि बहुधा महा- न्त्यजो नाक. मा क्रमता. न्तृतीयम्।। 1।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 इन्द्राय भागं परि त्वा नया- म्यस्मि. न्यज्ञे यजमानाय सूरिम्। ये नो द्विष.न्त्यनु ता.न्रभस्वा-ऽनागसो यजमानस्य वीराः।। 2।।

卐 प्र पदोऽव नेनिग्धि दुश्चरितँ यच्चचार- शुद्धै. श्शफै. रा क्रमतां प्रजानन्न्। तीर्त्वा तमांसि बहुधा विपश्य- न्नजो नाक. माक्रमता. न्तृतीयम्।। 3।।

卐 अनुच्छ्य श्यामेन त्वच. मेताँ विशस्त- र्यथापर्व1(अ)सिना माऽभि मंस्थाः। माऽभि द्रुहः परुशः कल्पयैन- न्तृतीये नाके अधि वि श्रयैनम्।। 4।।

卐 ऋचा कुम्भी. मध्यग्नौ श्रया- म्यासिञ्चोदक. मव धेह्येनम्। पर्याधत्ताऽग्निना शमितार.- श्शृतो गच्छतु सुकृताँ यत्र लोकः।। 5।।

卐 उत्क्रामाऽतः परि चे.दतप्त- स्तप्ता. च्चरो. रधि नाक. न्तृतीयम्। अग्ने. रग्नि. रधि सं बभूविथ- ज्योतिष्मन्त. मभि लोक.ञ्जयैतम्।। 6।।

卐 अजो अग्नि. रज.मु ज्योति. राहु- रज.ञ्जीवता ब्रह्मणे देय माहुः। अज. स्तमां.स्यप हन्ति दूर- मस्मि. न्लोके श्रद्दधानेन दत्तः।। 7।।

卐 पञ्चौदनः पञ्चधा वि क्रमता- माक्रंस्यमान.स्त्रीणि ज्योतींषि। ईजानानां सुकृतां प्रेहि मध्य- न्तृतीये नाके अधि वि श्रयस्व।। 8।।

Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 अजाऽऽरोह सुकृतांँ यत्र लोक- श्शरभो न चत्तोऽति दुर्गाण्येषः। पञ्चौदनो ब्रह्मणे दीयमान- स्स॑ दातार. न्तृप्त्या तर्पयाति।। 9।।

卐 अज. स्त्रिनाके त्रिदिवे त्रिपृष्ठे- नाकस्य पृष्ठे ददिवांस. न्दधाति। पञ्चौदनो ब्रह्मणे दीयमानो- विश्वरूपा धेनुः कामदुघाऽस्येका।। 10।।

卐 एत.द्वो ज्योतिः पितर. स्तृतीयं- पञ्चौदनं ब्रह्मणेऽज. न्ददाति। अज स्तमांस्यप हन्ति दूर- मस्मि. न्लोके श्रद्दधानेन दत्तः।। 11।।

卐 ईजानानां सुकृतांँ लोक. मीप्स- न्पञ्चौदनं ब्रह्मणेऽज. न्ददाति। स॑ व्याप्ति. मभि लोक.ञ्जयैतं- शिवो3(ओ)ऽस्मभ्यं प्रतिगृहीतो अस्तु।। 12।।

卐 अजो ह्य1(अ)ग्ने. रजनिष्ट शोका- द्विप्रो विप्रस्य सहसो विपश्चित्। इष्टं पूर्त. मभिपूर्तँ वषट्कृत- न्तद्देवा॑ ऋतुशः कल्पयन्तु।। 13।।

卐 अमोतँ वासो दद्या- द्धिरण्य. मपि दक्षिणाम्। तथा लोका. न्त्समाप्नोति- ये दिव्या॑ ये च पार्थिवाः।। 14।।

卐 एता. स्त्वाऽजोप यन्तु धारा- स्सोम्या॑ देवी. र्घृतपृष्ठा॑ मधुश्चुतः। स्तभान पृथिवी. मुत द्या- न्नाकस्य पृष्ठेऽधि सप्तरश्मौ।। 15।।

卐 अजो3(ओ)ऽस्यज. स्वर्गोऽसि- त्वया लोक. मङ्गिरसः प्राऽजानन्न्। तँ लोकं पुण्यं प्रज्ञेषम्।। 16।।

卐 येना सहस्रँ वहसि- येनाऽग्ने सर्ववेदसम्। तेनेमँ यज्ञ.न्नो वह- स्व.र्देवेषु गन्तवे।। 17।।

卐 अजः पक्व. स्स्वर्गे लोके दधाति- पञ्चौदनो निर्ऋतिं बाधमानः। तेन लोका.न्त्सूर्यवतो जयेम।। 18।।

卐 यं ब्राह्मणे निदधे यञ्च विक्षु- या विप्रुष^ ओदनाना. मजस्य। सर्व. न्तदग्ने सुकृतस्य लोके- जानीता.न्न. स्सङ्गमने पथीनाम्।। 19।।

卐 अजो वा इद. मग्रे व्यक्रमत- तस्योर^ इय. मभव. द्यौः पृष्ठम्। अन्तरिक्षं मध्य. न्दिशः पार्श्वे~ समुद्रौ कुक्षी~।। 20।।

卐 सत्य. चर्तञ्च चक्षुषी~ विश्वं- सत्यं श्रद्धा प्राणो विरा.ट्छिरः। एष^ वा अपरिमितो यज्ञो- यदजः पञ्चौदनः।। 21।।

卐 अपरिमित. मेव यज्ञ. माप्नो- त्यपरिमितँ लोक. मव रुन्द्धे। यो3(ओ)ऽजं पञ्चौदन. न्दक्षिणाज्योतिष. न्ददाति।। 22।।

卐 नास्याऽस्थीनि भिन्द्या-न्न मज्ज्ञो निर्धयेत्। सर्व. मेनं समादा.येदमिदं प्र वेशयेत्।। 23।।

卐 इदमिद. मेवास्य रूपं भवति- तेनैनं सङ्गमयति। इषं मह^ ऊर्जं मस्मै दुहे- यो3(ओ)ऽजं पञ्चौदन- न्दक्षिणाज्योतिष. न्ददाति।। 24।।

卐 पञ्च रुक्मा पञ्च नवानि वस्त्रा- पञ्चास्मै धेनवः कामदुघा भवन्ति। योऽ3(ओ)ऽजं पञ्चौदन. न्दक्षिणाज्योतिष. न्ददाति।। 25।।

卐 पञ्च रुक्मा ज्योति.रस्मै भवन्ति- वर्म वासांसि तन्वे भवन्ति। स्वर्गं लोक. मश्नुते- यो3(ओ)ऽजं पञ्चौदन- न्दक्षिणाज्योतिष. न्ददाति।। 26।।

卐 या पूर्वं पतिँ वित्त्वा-ऽथान्यँ विन्दतेऽपरम्। पञ्चौदनञ्च ता.वज- न्ददातो न वि योषतः।। 27।।

卐 समानलोको भवति- पुनर्भुवापरः पतिः। यो3(ओ)ऽजं पञ्चौदन. न्दक्षिणाज्योतिष. न्ददाति।। 28।।

卐 अनुपूर्ववत्सा. न्धेनु- मनड्वाह. मुपबर्हणम्। वासो हिरण्य. न्दत्त्वा- ते यन्ति दिव. मुत्तमाम्।। 29।।

卐 आत्मानं पितरं पुत्रं- पौत्रं पितामहम्। जाया.ञ्जनित्रीं मातरँ- ये प्रिया. स्ता.नुप ह्वये।। 30।।

卐 यो वै नैदाघ. न्नामर्तुँ वेद। एष वै नैदाघो नामर्तु- र्यदजः पञ्चौदनः। निरेवाऽप्रियस्य भ्रातृव्यस्य श्रिय. न्दहति भव.त्यात्मना। यो3(ओ)ऽजं पञ्चौदन. न्दक्षिणाज्योतिष. न्ददाति।। 31।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

卐 यो वै कुर्वन्त. न्नामर्तुँ वेद। कुर्वतीङ्कुर्वती. मेवाऽप्रियस्य भ्रातृव्यस्य श्रिय.मा दत्ते। एष^ वै कुर्व. न्नामर्तु- र्यदजः पञ्चौदनः। निरेवाऽप्रियस्य भ्रातृव्यस्य श्रिय न्दहति- भव.त्यात्मना। यो3(ओ)ऽजं पञ्चौदन. न्दक्षिणाज्योतिष. न्ददाति।। 32।।

卐 यो वै सँयन्त.न्नामर्तुँ वेद। सँयतींसँयती. मेवाऽप्रियस्य भ्रातृव्यस्य श्रिय.मा दत्ते। एष^ वै सँय.न्नामर्तु- र्यदजः पञ्चौदनः। निरेवाऽप्रियस्य भ्रातृव्यस्य श्रिय. न्दहति- भवत्यात्मना। यो3(ओ)ऽजं पञ्चौदन. न्दक्षिणाज्योतिष. न्ददाति।। 33।।

卐 यो वै पिन्वन्त.न्नामर्तुँ वेद। पिन्वतींपिन्वती. मेवाऽप्रियस्य भ्रातृव्यस्य श्रिय.मा दत्ते। एष^ वै पिन्व.न्नामर्तु- र्यदजः पञ्चौदनः। निरेवाऽप्रियस्य भ्रातृव्यस्य श्रिय. न्दहति- भवत्यात्मना। यो3(ओ)ऽजं पञ्चौदन. न्दक्षिणाज्योतिष. न्ददाति।। 34।।

卐 यो वा उद्यन्त.न्नामर्तुँ वेद। उद्यतीमुद्यती. मेवाऽप्रियस्य भ्रातृव्यस्य श्रिय.मा दत्ते। एष^ वा उद्य.न्नामर्तु- र्यदजः पञ्चौदनः। निरेवाऽप्रियस्य भ्रातृव्यस्य श्रिय. न्दहति- भवत्यात्मना। यो3(ओ)ऽजं पञ्चौदन. न्दक्षिणाज्योतिष. न्ददाति।। 35।।

卐 यो वा अभिभुव.न्नामर्तुं वेद। अभिभवन्ती.मभिभवन्ती. मेवाऽप्रियस्य भ्रातृव्यस्य श्रिय.मा दत्ते। एष^ वा अभिभू. र्नामर्तु. र्यदजः पञ्चौदनः। निरेवाऽप्रियस्य भ्रातृव्यस्य श्रिय. न्दहति- भवत्यात्मना। यो3(ओ)ऽजं पञ्चौदन. न्दक्षिणाज्योतिष. न्ददाति।। 36।।

卐 अजञ्च पचत- पञ्च चौदनान्। सर्वा^ दिश. स्संमनस. स्सध्रीची- स्सान्तर्देशाः प्रति गृह्णन्तु त एतम्।। 37।।

卐 तास्ते रक्षन्तु तव तुभ्य मेत- न्ताभ्य^ आज्यं हवि.रिद.ञ्जुहोमि।। 38।।-

09-03-02

卐 यो विद्या. द्ब्रह्म प्रत्यक्षं- परूंषि यस्य सम्भारा^- ऋचो यस्याऽनूक्यम्।। 1।।

卐 सामानि यस्य लोमानि- यजु र्हृदय. मुच्यते- परिस्तरण.मि.द्धविः।। 2।।

卐 यद्वा अतिथिपति- रतिथी. न्प्रतिपश्यति- देवयजनं प्रेक्षते।। 3।।

卐 यदभिवदति दीक्षा. मुपैति- यदुदकँ याच-त्यपः प्रणयति।। 4।।

卐 या^ एव यज्ञ आपः प्रणीयन्ते- ता^ एव ताः^।। 5।।

卐 यत्तर्पण. माहरन्ति- य^ एवाग्नीषोमीयः पशु र्बध्यते- स^ एव सः।। 6।।

卐 यदावसथा. न्कल्पयन्ति- सदोहविर्धाना.न्येव तत्कल्पयन्ति।। 7।।

卐 यदुपस्तृणन्ति- बर्हि. रेव तत्।।8।।

卐 य.दुपरिशयन माहरन्ति - स्वर्ग. मेव तेन लोक. मव रुन्द्धे।। 9।।

卐 यत्कशिपूपबर्हण. माहरन्ति- परिधय^ एव ते।। 10।।

卐 यदाञ्जनाभ्यञ्जन. माहर- न्त्याज्य. मेव तत्।। 11।।

卐 यत्पुरा परिवेषा. त्खाद. माहरन्ति- पुरोडाशा.वेव तौ।। 12।।

卐 यदशनकृतं ह्वयन्ति- हविष्कृत. मेव तद्धयन्ति।। 13।।

卐 ये व्रीहयो यवा^ निरुप्यन्तेंऽशव^ एव ते।। 14।।

卐 यान्युलूखलमुसलानि- ग्रावाण^ एव ते।। 15।।

卐 शूर्पं पवित्र. न्तुषा^- ऋजीषाऽभिषवणी. रापः।। 16।।

卐 स्रुग्दर्वि. र्नैक्षण. मायवन. न्द्रोणकलशाः कुम्भ्यो वायव्यानि पात्रा.णीय.मेव कृष्णाजिनम्।। 17।। {15}

09-03-03

卐 यजमानब्राह्मणँ वा एत. दतिथिपतिः कुरुते- यदाहार्याणि प्रेक्षत- इदं भूया3 इदा3 मिति।। 18।।

卐 यदाह भूय^ उद्धरेति- प्राण. मेव तेन वर्षीयांस.ङ्कुरुते।। 19।।

卐 उप हरति- हवीं.ष्यासादयति।। 20।।

卐 तेषा. मासन्नाना- मतिथि. रात्म. न्जुहोति।। 21।।

卐 स्रुचा हस्तेन- प्राणे यूपे स्रुक्कारेण वषट्कारेण।। 22।।

卐 एते वै प्रिया.श्चाऽप्रिया.श्चर्त्विज. स्स्वर्गँ लोक.ङ्गमयन्ति यदतिथयः।। 23।।

卐 स^ य^ एवँ विद्वा.न्न द्विष.न्नश्नीया-न्न द्विषतोऽन्न. मश्नीया-न्न मीमांसितस्य न मीमांसमानस्य।। 24।।

卐 सर्वो वा एष^ जग्धपाप्मा- यस्याऽन्न. मश्नन्ति।। 25।।

卐 सर्वो वा एषोऽजग्धपाप्मा- यस्याऽन्न. न्नाश्नन्ति।। 26।।

卐 सर्वदा वा एष^ युक्तग्रावाऽऽर्द्रपवित्रो वितताध्वर^ आहृतयज्ञक्रतु-र्य^ उपहरति।। 27।।

卐 प्राजापत्यो वा एतस्य यज्ञो विततो- य^ उपहरति।। 28।।

卐 प्रजापते. र्वा एष^ विक्रमा. ननु विक्रमते- य^ उपहरति।। 29।।

卐 योऽतिथीनां स^ आहवनीयो- यो वेश्मनि स^ गारहपत्यो- यस्मि.
न्पचन्ति स^ दक्षिणाग्निः।। 30।। {16}

09-03-04

卐 इष्टञ्च वा एष^ पूर्तञ्च गृहाणा. मश्नाति- य¤ पूर्वोऽतिथे. रश्नाति।। 31।।

卐 पयश्च वा एष^ रसञ्च गृहाणा. मश्नाति- य¤ पूर्वोऽतिथे. रश्नाति।।
32।।

卐 ऊर्जाञ्च वा एष^ स्फातिञ्च गृहाणा. मश्नाति- य¤ पूर्वोऽतिथे. रश्नाति।।
33।।

卐 प्रजा.ञ्च वा एष^ पशूंश्च गृहाणा. मश्नाति- य¤ पूर्वोऽतिथे. रश्नाति।।
34।।

卐 कीर्तिञ्च वा एष^ यशश्च गृहाणा. मश्नाति- य¤ पूर्वोऽतिथे. रश्नाति।।
35।।

卐 श्रियञ्च वा एष^ सँविदञ्च गृहाणा. मश्नाति- य¤ पूर्वोऽतिथे. रश्नाति।।
36।।

卐 एष^ वा अतिथि- र्यच्छ्रोत्रिय, स्तस्मा.त्पूर्वो नाऽश्नीयात्।। 37।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 अशितावत्यतिथा.वश्नीया- द्यज्ञस्य साऽऽत्मत्वाय- यज्ञस्याऽविच्छेदाय-
तद्व्रतम्।। 38।।

卐 एतद्वा उ स्वादीयो- यदधिगव.क्षीरँ वा मांसँ वा- तदेव नाऽश्नीयात्।।
39।।-

09-03-05

卐 स^ य^ एवँ विद्वा. न्क्षीर. मुपसिच्योपहरति।

卐 यावदग्निष्टोमेनेष्ट्वा सुसमृद्धेना ऽवरुन्द्धे- ताव.देनेनाऽव रुन्द्धे।। 40।।

卐 स^ य^ एवँ विद्वा. न्त्सर्पि. रुपसिच्योपहरति।

卐 याव.दतिरात्रेणेष्ट्वा सुसमृद्धेनाऽवरुन्द्धे- ताव. देनेनाऽव रुन्द्धे।। 41।।

卐 स^ य^ एवँ विद्वा. न्मधूपसिच्योपहरति।

卐 यावत्सत्त्रसद्ये.नेष्ट्वा सुसमृद्धेनाऽवरुन्द्धे- ताव. देनेनाऽव रुन्द्धे।। 42।।

卐 स^ य^ एवँ विद्वा. न्मांस. मुपसिच्योपहरति।

卐 याव.द्वादशाहे.नेष्ट्वा सुसमृद्धेनाऽवरुन्द्धे- ताव. देनेनाऽव रुन्द्धे।। 43।।

卐 स^ य^ एवँ विद्वा. नुदक. मुपसिच्योपहरति।

卐 प्रजानां प्रजननाय गच्छति प्रतिष्ठां- प्रियः प्रजानां भवति- य^ एवँ विद्वा.
नुदक. मुपसिच्योपहरति।। 44।।-

☸ 09-03-06

卐 तस्मा उषा^ हिङ्कृणोति- सविता प्रस्तौति।

卐बृहस्पति. रूर्जयोद्गायति- त्वष्टा पुष्ट्या प्रति हरति- विश्वे देवा^ निधनम्।

निधनं भूत्या॰ प्रजाया॰ पशूनां भवति- य^ एवँ वेद।।

卐 तस्मा उद्य. न्त्सूर्यो हिङ्कृणोति- सङ्गव॰ प्र स्तौति।

卐मध्यन्दिन उद्गाय. त्यपराह्ण॰ प्रति हर- त्यस्तँय.न्निधनम्। निधनं भूत्या॰ प्रजाया॰ पशूनां भवति- य^ एवँ वेद।।

卐 तस्मा अभ्रो भव.न्हि.ङ्कृणोति- स्तनय. न्प्रस्तौति।

卐विद्योतमान॰ प्रति हरति- वर्ष. न्नुद्गाय.त्युद्गृह्ण.न्निधनम्। निधनं भूत्या॰ प्रजाया॰ पशूनां भवति- य^ एवँ वेद।।

卐 अतिथी. न्प्रति पश्यति- हिङ्कृणो.त्यभि वदति- प्रस्तौ-त्युदकँ याच.त्युद्गायति।

卐उप हरति प्रति हर-त्युच्छिष्ट.न्निधनम्। निधनं भूत्या॰ प्रजाया॰ पशूनां भवति- य^ एवँ वेद।।-

☸ 09-03-07

卐 यत्क्षत्तारं ह्वय- त्याश्रावय.त्येव तत्।। 49।।

卐 यत्प्रतिशृणोति- प्रत्याश्रावय.त्येव तत्।। 50।।

卐 यत्परिवेष्टारः पात्रहस्ताः पूर्वे चाऽपरे च प्रपद्यन्ते- चमसाध्वर्यव^ एव ते।। 51।।

卐 तेषा.न्न कश्चनाऽहोता।। 52।।

卐 यद्वा अतिथिपति. रतिथी. न्परिविष्य गृहा. नुपोदै. त्यवभृथ.मेव त.दुपावैति।। 53।।

卐 यत्सभागयति दक्षिणा. स्सभागयति- यदनुतिष्ठत^ उदवस्यत्येव तत्।। 54।।

卐 स^ उपहूतः पृथिव्यां भक्षय- त्युपहूत. स्तस्मिन् यत्पृथिव्याँ विश्वरूपम्।। 55।।

卐 स^ उपहूतोऽन्तरिक्षे भक्षय- त्युपहूत. स्तस्मिन् यदन्तरिक्षे विश्वरूपम्।। 56।।

卐 स^ उपहूतो दिवि भक्षय- त्युपहूत. स्तस्मिन् यद्दिवि विश्वरूपम्।। 57।।

卐 स^ उपहूतो देवेषु भक्षय- त्युपहूत. स्तस्मिन् यद्देवेषु विश्वरूपम्।। 58।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

卐 स॒ उप॑हूतो लो॒केषु भक्षय॒- त्युप॑हूत॒. स्तस्मि॒न्॒ यल्लो॒केषु वि॒श्वरू॑पम्।। 59।।

卐 स॒ उप॑हूत॒ उप॑हूतः।। 60।।

卐 आ॒प्नोती॒मँ लो॒क- मा॒प्नो. त्य॒मुम्।। 61।।

卐 ज्योति॑ष्मतो लो॒का. न्जय॑ति॒- य॒ ए॒वँ वेद॑।। 62।। इति तृतीयोऽनुवाकः

## नवम काण्डे चतुर्थोऽनुवाकः

09-04-01

卐 प्र॒जाप॑तिश्च परमे॒ष्ठी च॒ शृङ्गे॒~- इन्द्र॒. श्शिरो॑- अ॒ग्नि र्ल॒लाटँ॑- य॒मः कृका॑टम्।। 1।।

卐 सोमो॒ राजा॑ म॒स्तिष्को॒- द्यौ.रु॑त्तरह॒नुः- पृ॒थि॒व्य॑धरह॒नुः।। 2।।

卐 वि॒द्यु. ज्जि॒ह्वा- म॒रुतो॒ दन्ता॑- रे॒वती. ग्री॒वाः- कृत्ति॑का. स्स्क॒न्धा- घ॒र्मो वहः॑।। 3।।

卐 विश्वँ॑ वा॒यु- स्स्व॒र्गो लो॒कः कृ॑ष्ण॒द्रँ- वि॒धर॑णी नि॒वेष्यः।। 4।।

卐 श्ये॒नः क्रो॒डो॒3(ओ॒)-ऽन्तरि॑क्षं पाज॒स्य॑1(अं॒)- बृह॒स्पति॑ः क॒कु- द्बृह॒तीः कीक॑साः। 5।।

卐 देवानां पत्नीः पृष्टय^- उपसदः पर्शवः।। 6।।

卐 मित्रश्च वरुण श्चांसौ- त्वष्टा चार्यमा च दोषणी~- महादेवो बाहू~।। 7।।

卐 इन्द्राणी भस- द्वायुः पुच्छं- पवमानो बालाः।। 8।।

卐 ब्रह्म च क्षत्रञ्च श्रोणीव- बल. मूरू~।। 9।।

卐 धाता च सविता चाष्ठीवन्तौ- जङ्घा गन्धर्वा^- अप्सरसः कुष्ठिका^- अदिति. श्शफाः।। 10।।

卐 चेतो हृदयँ- यकृ. न्मेधा- व्रतं पुरीतत्।। 11।।

卐 क्षुत्कुक्षि- रिरा वनिष्ठुः- पर्वताः प्लाशयः।। 12।।

卐 क्रोधो वृक्कौ- मन्यु. राण्डौ- प्रजा शेपः।। 13।।

卐 नदी सूत्री- वर्षस्य पतय स्तना- स्स्तनयित्नु. रूधः।। 14।।

卐 विश्वव्यचा.श्च-मौषधयो लोमानि- नक्षत्राणि रूपम्।। 15।।

卐 देवजना^ गुदा^- मनुष्या^ आन्त्रा-ण्यत्रा^ उदरम्।। 16।।

卐 रक्षांसि लोहित- मितरजना^ ऊबध्यम्।। 17।।

卐 अभ्रं पीबो- मज्जा निधनम्।। 18।।

卐 अग्नि. रासीन^- उत्थितोऽश्विना।। 19।।



Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore SGS

卐 इन्द्रः प्राङ्गिष्ठ- न्दक्षिणा तिष्ठ.न्यमः।। 20।।

卐 प्रत्य.ङ्गिष्ठ न्धा-तोद.ङ्गिष्ठ.न्त्सविता।। 21।।

卐 तृणानि प्राप्त- स्सोमो राजा।। 22।।

卐 मित्र^ ईक्षमाण^- आवृत्त^ आनन्दः।। 23।।

卐 युज्यमानो वैश्वदेवो- युक्तः प्रजापति- र्विमुक्त. स्सर्वम्।। 24।।

卐 एतद्वै विश्वरूपं- सर्वरूप.ङ्गोरूपम्।। 25।।

卐 उपैनँ विश्वरूपा^- स्सर्वरूपाः पशव. स्तिष्ठन्ति- य^ एवँ वेद।। 26।।-

09-04-02

卐 शीर्षक्तिं शीर्षामय- ङ्कर्णशूलँ विलोहितम्। सर्वं शीर्षण्य.न्ते रोगं- बहि. र्निर्मन्त्रयामहे।। 1।।

卐 कर्णाभ्या.न्ते कङ्कूषेभ्यः- कर्णशूलँ विसल्पकम्। सर्वं शीर्षण्य.न्ते रोगं- बहि. र्निर्मन्त्रयामहे।। 2।।

卐 यस्य हेतोः प्रच्यवते- यक्ष्मः कर्णत^ आस्यतः। सर्वं शीर्षण्य.न्ते रोगं- बहि. र्निर्मन्त्रयामहे।। 3।।

卐 यः कृणोति प्रमोत- मन्ध. ङ्कृणोति पूरुषम्। सर्वं शीर्षण्य.न्ते रोगं- बहि. र्निर्मन्त्रयामहे।। 4।।

卐 अङ्गभेद. मङ्गज्वरँ- विश्वाङ्गँ विसल्पकम्। सर्वं शीर्षण्य.न्ते रोगं- बहि. र्निर्मन्त्रयामहे।। 5।।

卐 यस्य भीमः प्रतीकाश- उद्वेपयति पूरुषम्। तक्मानँ विश्वशारदं- बहि. र्निर्मन्त्रयामहे।। 6।।

卐 य ऊरू अनुसर्प- त्यथो~ एति गवीनिके~। यक्ष्म.न्ते अन्त.रङ्गेभ्यो- बहि. र्निर्मन्त्रयामहे।। 7।।

卐 यदि कामा. दपकामा-द्धृदया.ज्जायते परि। हृदो बलास. मङ्गेभ्यो- बहि. र्निर्मन्त्रयामहे।। 8।।

卐 हरिमाण.न्ते अङ्गेभ्यो-ऽप्वा.मन्त.रोदरात्। यक्ष्मोधा. मन्त. रात्मनो- बहि. र्निर्मन्त्रयामहे।। 9।।

卐 आसो बलासो भवतु- मूत्रं भव.त्वामयत्। यक्ष्माणां सर्वेषाँ विष- न्नि.रवोच. मह.न्त्वत्।। 10।।

卐 बहि. र्बिल.न्निर्द्रवतु- काहाबाह. न्तवोदरात्। यक्ष्माणां सर्वेषाँ विष- न्नि.रवोच. मह.न्त्वत्।। 11।।

卐 उदरा.त्ते क्लोम्नो- नाभ्या हृदया.दधि। यक्ष्माणां सर्वेषाँ विष- न्नि.रवोच. मह.न्त्वत्।। 12।।

卐 या.स्सीमानँ विरुजन्ति- मूर्धानं प्रत्यर्षणीः। अहिंसन्ती. रनामया^-
निर्द्रवन्तु बहि. र्बिलम्।। 13।।

卐 या^ हृदय मुपर्ष- न्त्यनुतन्वन्ति कीकसाः। अहिंसन्ती. रनामया^-
निर्द्रवन्तु बहि. र्बिलम्।।14।।

卐 याः पार्श्वे~ उपर्ष-न्त्यनुनिक्षन्ति पृष्टीः। अहिंसन्ती. रनामया^-
निर्द्रवन्तु बहि. र्बिलम्।। 15।।

卐 या.स्तिरश्चीः. रुपर्ष-न्त्यर्षणी. र्वक्षणासु ते। अहिंसन्ती. रनामया^-
निर्द्रवन्तु बहि. र्बिलम्।। 16।।

卐 या^ गुदा^ अनुसर्प- न्त्यान्त्राणि मोहयन्ति च। अहिंसन्ती. रनामया^-
निर्द्रवन्तु बहि. र्बिलम्।। 17।।

卐 या^ मज्ज्ञो निर्धयन्ति- परूंषि विरुजन्ति च। अहिंसन्ती. रनामया^-
निर्द्रवन्तु बहि. र्बिलम्।। 18।।

卐 ये अङ्गानि मदयन्ति- यक्ष्मासो रोपणा. स्तव। यक्ष्माणां सर्वेषाँ विष-
न्नि.रवोच. मह.न्त्वत्।।19।।

卐 विसल्पस्य विद्रधस्य- वातीकारस्य वालजेः। यक्ष्माणां सर्वेषाँ विष-
न्नि.रवोच. मह.न्त्वत्।। 20।।

卐 पादाभ्या.न्ते जानुभ्यां- श्रोणिभ्यां परि भंससः। अनूका. दर्षणी. रुष्णिहाभ्य- श्शीर्ष्णो रोग. मनीनशम्।। 21।।

卐 सन्ते शीर्ष्णः कपालानि- हृदयस्य च यो विधुः। उद्य. न्नादित्य रश्मिभि-श्शीर्ष्णो रोग मनीनशो-ऽङ्गभेद. मशीशमः।। 22।। इति चतुर्थोऽनुवाकः

## नवम काण्डे पञ्चमोऽनुवाकः

09-05-01

卐 अस्य वामस्य पलितस्य होतु- स्तस्य भ्राता मध्यमो अस्त्यश्नः। तृतीयो भ्राता घृतपृष्ठो अस्या-ऽत्राऽपश्यँ विश्पतिं सप्तपुत्रम्।। 1।।

卐 सप्त युञ्जन्ति रथ. मेकचक्र- मेको अश्वो वहति सप्तनामा। त्रिनाभि चक्र. मजर मनर्वँ- यत्रेमा विश्वा भुवनाऽधि तस्थुः।। 2।।

卐 इमं रथ मधि ये सप्त तस्थु- स्सप्तचक्रं सप्त वह.न्त्यश्वाः। सप्त स्वसारो अभि सन्नवन्त- यत्र गवा. न्निहिता सप्तनामा।। 3।।

卐 को ददर्श प्रथम.ञ्जायमान- मस्थन्वन्तँ यदनस्था बिभर्ति। भूम्या^ असु. रसृ.गात्मा क्वस्वि- त्को विद्वांस. मुप गा. त्प्रष्टु. मेतत्।। 4।।

卐 इह ब्रवीतु य^ ईमङ्ग वेदा-ऽस्य वामस्य निहितं पदँ वेः। शीर्ष्णꣳ क्षीर.
न्दुह्रते गावो अस्य- वव्रिँ वसाना^ उदकं पदाऽपुः।। 5।।

卐 पाकꣳ पृच्छामि मनसाऽविजान- न्देवाना मेना निहिता पदानि। वत्से
बष्कयेऽधि सप्त तन्तून्- वि तत्निरे कवय^ ओतवा उ।। 6।।

卐 अचिकित्वां.श्चिकितुष. श्चिदत्र- कवी. न्पृच्छामि विद्वनो न विद्वान्। वि
य.स्तस्तम्भ षडिमा रजां-स्यजस्य रूपे किमपि स्वि.देकम्।। 7।।

卐 माता पितर. मृत आ बभाज- धीत्यग्रे मनसा सं हि जग्मे। सा बीभत्सु.
र्गर्भरसा निविद्धा- नमस्वन्त^ इदुपवाक. मीयुः।। 8।।

卐 युक्ता माताऽऽसी.द्धुरि दक्षिणाया^- अतिष्ठ. द्गर्भो वृजनी.ष्वन्तः। अमीमे.
द्वत्सो अनु गा. मपश्य- द्विश्वरूप्य. न्त्रिषु योजनेषु।। 9।।

卐 तिस्रो मातृ. स्त्री.न्पितृ. न्बिभ्र- देक^ ऊर्ध्व. स्तस्थौ नेमव ग्लापयन्त।
मन्त्रयन्ते दिवो अमुष्य पृष्ठे- विश्वविदो वाच. मविश्वविन्नाम्।। 10।।

卐 पञ्चारे चक्रे परिवर्तमाने- यस्मि. न्नातस्थु. र्भुवनानि विश्वा। तस्य नाक्ष.
स्तप्यते भूरिभार- स्सना.देव न च्छिद्यते सनाभिः।। 11।।

卐 पञ्चपादं पितर. न्द्वादशाऽऽकृति- न्दिव^ आहुꣳ परे अर्धे पुरीषिणम्।
अथेमे अन्य उपरे विचक्षणे- सप्तचक्रे षडर आहु. रर्पितम्।। 12।।

卐 द्वादशार. न्नहि तज्जराय- वर्वर्ति चक्रं परि द्या.मृतस्य। आ पुत्रा^ अग्ने मिथुनासो अत्र- सप्त शतानि विंशतिश्च तस्थुः।। 13।।

卐 सनेमि चक्र. मजरँ वि वावृत- उत्तानाया. न्दश युक्ता^ वहन्ति। सूर्यस्य चक्षू रजसै.त्यावृतँ- यस्मि.न्नातस्थु. र्भुवनानि विश्वा।। 14।।

卐 स्त्रिय. स्सती. स्ता॰ उ मे पुंस^ आहु॰- पश्य. दक्षण्वा.न्न वि चेत.दन्धः। कवि.र्य॰ पुत्र. स्स^ ईमा चिकेत- यस्ता विजाना.त्स^ पितु. ष्पिताऽसत्।। 15।।

卐 साकञ्जानां सप्तथ. माहु. रेकजं- षडिद्यमा^ ऋषयो देवजा^ इति। तेषा. मिष्टानि विहितानि धामश- स्स्थात्रे रेजन्ते विकृतानि रूपशः।। 16।।

卐 अव॰ परेण पर^ एनाऽवरेण- पदा वत्सं बिभ्रती गौ. रुदस्थात्। सा कद्रीची कं स्विदर्धं पराऽगा- त्कस्वि त्सूते नहि यूथे अस्मिन्न्।। 17।।

卐 अव॰ परेण पितरँ यो अस्य वेदा-ऽव॰ परेण पर^ एनावरेण। कवीयमान॰ क^ इह प्र वोच- द्देवं मन॰ कुतो अधि प्रजातम्।। 18।।

卐 ये अर्वाञ्च. स्ता॰ उ पराच^ आहु- र्यं पराञ्च. स्ता॰ उ अर्वाच^ आहुः। इन्द्रश्च या चक्रथु. स्सोम तानि- धुरा न युक्ता रजसो वहन्ति।। 19।।

卐 द्वा सुपर्णा सयुजा सखाया- समानँ वृक्षं परिषस्वजाते~। तयो.रन्यः पिप्पलं स्वाद्व- त्त्यनश्न. न्नन्यो अभि चाकशीति।। 20।।

卐 यस्मि.न्वृक्षे मध्वद. स्सुपर्णा^- निविशन्ते सुवते चाधि विश्वे। तस्य यदाहुः पिप्पलं स्वाद्वग्रे- तन्नोन्नश.द्यः पितर.न्न वेद।। 21।।

卐 यत्रा सुपर्णा^ अमृतस्य भक्ष- मनिमेषँ विदथाऽभिस्वरन्ति। एना विश्वस्य भुवनस्य गोपा- स्स मा धीरः पाक मत्राऽऽ विवेश।। 22।।-

09-05-02

卐 यद्गायत्रे अधि गायत्र. माहित - त्त्रैष्टुभँ वा त्रैष्टुभा. न्निरतक्षत। यद्वा जग. ज्जग. त्याहितं पदँ- य इत्त.द्विदु.स्ते अमृतत्व. मानशुः।। 1।।

卐 गायत्रेण प्रति मिमीते अर्क- मर्केण साम त्रैष्टुभेन वाकम्। वाकेन वाक. न्द्विपदा चतुष्पदा-ऽक्षरेण मिमते सप्त वाणीः।। 2।।

卐 जगता सिन्धु. न्दिव्यस्कभाय- द्रथन्तरे सूर्यं पर्यपश्यत्। गायत्रस्य समिध. स्तिस्र^ आहु- स्ततो मह्ना प्र रिरिचे महित्वा।। 3।।

卐 उप ह्वये सुदुघा. न्धेनु. मेतां- सुहस्तो गोधु. गुत दोह. देनाम्। श्रेष्ठं सवं सविता साविषन्नो-ऽभीद्धो घर्म.स्तदु षु प्र वोचत्।। 4।।

卐 हिङ्कृण्वती वसुपत्नी वसूनाँ- वत्स. मिच्छन्ती मनसाऽभ्यागात्। दुहा. मश्विभ्यां पयो अघ्न्येयं- सा वर्धतां महते सौभगाय।। 5।।

卐 गौ. रमीमे. दभि वत्सं मिषन्तं- मूर्धानं हिङ्ङकृणो. न्मातवा उ। सृक्काण.ङ्घर्म. मभि वावशाना- मिमाति मायुं पयते पयोभिः।। 6।।

卐 अयं स^ शिङ्क्ते येन गौ. रभीवृता- मिमाति मायुं ध्वसना.वधि श्रिता। सा चित्तिभि. र्नि हि चकार मर्त्यान्- विद्यु. द्भवन्ती प्रति वव्रि. मौहत।। 7।।

卐 अनच्छये तुरगातु जीव- मेज.द्ध्रुवं मध्य आ पस्त्यानाम्। जीवो मृतस्य चरति स्वधाभि- रमर्त्यो मर्त्येना सयोनिः।। 8।।

卐 विधु. न्दद्राणं सलिलस्य पृष्ठे- युवानं सन्तं पलितो जगार। देवस्य पश्य काव्यं महित्वा-ऽद्या ममार स^ ह्य. स्समान।। 9।।

卐 य^ ई.ञ्चकार न सो अस्य वेद- य^ ई.न्ददर्श हिरु.गिन्नु तस्मात्। स^ मातु. र्योना परिवीतो अन्त- र्बहुप्रजा^ निर्ऋति.रा विवेश।। 10।।

卐 अपश्य.ङ्गोपा. मनिपद्यमान- मा च परा च पथिभि. श्चरन्तम्। स^ सध्रीची. स्स^ विषूची- र्वसान^ आ वरीवर्ति भुवने.ष्वन्तः।। 11।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore SGS

卐 द्यौ.र्नः पिता जनिता नाभि रत्र- बन्धुर्नो माता पृथिवी महीयम्। उत्तानयो. श्चम्वो3(ओ). र्योनि.रन्त- रत्रा पिता दुहितु.र्गर्भ. माऽधात्।। 12।।

卐 पृच्छामि त्वा पर.मन्तं पृथिव्याः- पृच्छामि वृष्णो अश्वस्य रेतः। पृच्छामि विश्वस्य भुवनस्य नाभिं- पृच्छामि वाचः परमँ व्योम।। 13।।

卐 इयँ वेदिः परो अन्तः पृथिव्या^- अयं सोमो वृष्णो अश्वस्य रेतः। अयँ यज्ञो विश्वस्य भुवनस्य नाभि- र्ब्रह्मायँ वाचः परमँ व्योम।। 14।।

卐 न वि जानामि यदि वेद.मस्मि- निण्य. स्सन्नद्धो मनसा चरामि। यदा माग. न्प्रथमजा^ ऋतस्या-ऽऽदि. द्वाचो अश्नुवे भाग. मस्याः।। 15।।

卐 अपा.ङ्प्राङेति स्वधया गृभीतो-ऽमर्त्यो मर्त्येना सयोनिः। ता शश्वन्ता विषूचीना वियन्ता- न्य1(अ)न्य. ञ्चिक्यु.र्न नि चिक्यु. रन्यम्।। 16।।

卐 सप्तार्धगर्भा^ भुवनस्य रेतो- विष्णो. स्तिष्ठन्ति प्रदिशा विधर्मणि। ते धीतिभि. र्मनसा ते विपश्चितः- परिभुवः परि भवन्ति विश्वतः।। 17।।

卐 ऋचो अक्षरे परमे व्योमन्- यस्मि. न्देवा^ अधि विश्वे निषेदुः। यस्त.न्न वेद कि मृचा करिष्यति- य इत्तद्विदु स्ते अमी~ समासते।। 18।।

卐 ऋचः पदं मात्रया कल्पयन्तो-ऽर्धर्चेन चाक्लृपु. र्विश्व. मेजत्। त्रिपा. द्ब्रह्म पुरुरूपँ वि तष्ठे- तेन जीवन्ति प्रदिश.श्चतस्रः।। 19।।

卐 सूयवसा. द्भगवती हि भूया^- अधा वयं भगवन्त. स्स्याम। अद्धि तृण. मघ्न्ये विश्वदानीं- पिब शुद्ध. मुदक. माचरन्ती।। 20।।

卐 गौ.रि.न्मिमाय सलिलानि तक्ष- त्येकपदी द्विपदी सा चतुष्पदी। अष्टापदी नवपदी बभूवुषी- सहस्राक्षरा भुवनस्य पङ्क्ति- स्तस्या^ स्समुद्रा^ अधि वि क्षरन्ति।। 21।।

卐 कृष्ण. न्नियानं हरय. स्सुपर्णा^- अपो वसाना^ दिव. मुत्पतन्ति। त आऽववृत्र. न्त्सदना. दृतस्या-ऽऽदि. द्घृतेन पृथिवीं व्यूदुः।। 22।।

卐 अपादेति प्रथमा पद्वतीना- ङ्कस्त.द्वां मित्रावरुणाऽऽचिकेत। गर्भो भारं भरत्या चि.दस्या^- ऋतं पिप.र्त्यनृत. न्निपाति।। 23।।

卐 विरा. ड्वा.ग्विरा.दृ्थिवी- विरा.डन्तरिक्षँ विरा. द्प्रजापतिः। विरा.ण्मृत्यु- स्साध्याना मधिराजो बभूव- तस्य भूतं भव्यँ वशे- स^ मे भूतं भव्यँ वशे कृणोतु।। 24।।

卐 शकमय. न्धूम. मारा. दपश्यँ- विषूवता पर^ एनाऽवरेण। उक्षाणं पृश्नि. मपचन्त वीरा- स्तानि धर्माणि प्रथमा. न्यासन्न्।। 25।।

卐 त्रयः केशिन ऋतुथा वि चक्षते- सँवत्सरे वपत एक एषाम्। विश्व. मन्यो अभिचष्टे शचीभि- र्ध्राजि. रेकस्य ददृशे न रूपम्।। 26।।

卐 चत्वारि वाक्परिमिता पदानि- तानि विदु. र्ब्राह्मणा ये मनीषिणः। गुहा त्रीणि निहिता नेङ्गयन्ति- तुरीयँ वाचो मनुष्या वदन्ति।। 27।।

卐 इन्द्रं मित्रँ वरुण. मग्नि. माहु- रथो दिव्य. स्स सुपर्णो गरुत्मान्। एकं सद्विप्रा बहुधा वद- न्त्यग्निँ यमं मातरिश्वान. माहुः।। 28।। नवमं काण्डम् समाप्तम्

## दशमं काण्डम्

### दशम काण्डे प्रथमोऽनुवाकः

10-01-01

卐 या.ङ्कल्पयन्ति वहतौ वधूमिव- विश्वरूपां हस्तकृता.श्चिकित्सवः। सा.ऽरा.दे.त्वप नुदाम एनाम्।। 1।।

卐 शीर्षण्वती नस्वती कर्णिनी- कृत्याकृता सम्भृता विश्वरूपा। सा.ऽरा.दे.त्वप नुदाम एनाम्।। 2।।

卐 शूद्रकृता राजकृता- स्त्रीकृता ब्रह्मभिः कृता। जाया पत्या नुत्तेव- कर्तारं बन्ध्वृच्छतु।। 3।।

卐 अनयाऽह. मोषध्या- सर्वाः कृत्या^ अदूदुषम्। या.क्षेत्रे चक्रु. र्या.ङ्गोषु- याँ वा ते पुरुषेषु।। 4।।

卐 अघ.मस्त्वघकृते- शपथ. श्शपथीयते। प्रत्यक्प्रति प्रहिण्मो- यथा कृत्याकृतं हनत्।। 5।।

卐 प्रतीचीन^ आङ्गिरसो-ऽध्यक्षो नः पुरोहितः। प्रतीचीः कृत्या^- आकृत्याऽमू. न्कृत्याकृतो जहि।। 6।।

卐 यस्त्वोवाच परेहीति- प्रतिकूल. मुदाय्यम्। तङ्कृत्येऽभिनिवर्तस्व- माऽस्मा.निच्छो अनागसः।। 7।।

卐 यस्ते परूंषि सन्दधौ- रथस्येवर्भु. र्धिया। तङ्गच्छ तत्र तेऽयन- मज्ञात.स्तेऽय.ञ्जनः।। 8।।

卐 ये त्वा कृत्वा लेभिरे- विद्वला^ अभिचारिणः। शम्भ्वी3(इ).ङ्कृत्यादूषणं- प्रतिवर्त्म पुनस्सर- न्तेन त्वा स्नपयामसि।। 9।।

卐 यद्दुर्भगां प्रस्नपितां- मृतवत्सा. मुपेयिम। अपैतु सर्वं मत्पाप- न्द्रविणं मोप तिष्ठतु।। 10।।

卐 यत्ते पितृभ्यो ददतो- यज्ञे वा नाम जगृहुः। सन्देश्या3(आ)त्सर्वस्मा. त्पापा- दिमा^ मुञ्चन्तु त्वौषधीः।। 11।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

卐 देवैनसा. त्पित्र्या. न्नामग्राहा-त्सन्देश्या. दभिनिष्कृतात्। मुञ्चन्तु त्वा वीरुधो वीर्येण- ब्रह्मण^ ऋग्भि॰ पयस^ ऋषीणाम्।। 12।।

卐 यथा वात.श्च्यावयति- भूम्या^ रेणु. मन्तरिक्षा. च्चाभ्रम्। एवा म.त्सर्व. न्दुर्भूतं- ब्रह्मनुत्त. मपायति।। 13।।

卐 अपक्राम नानदती- विनद्धा गर्दभीव। कर्तृ. न्नक्षस्वेतो नुत्ता- ब्रह्मणा वीर्यावता।। 14।।

卐 अयं पन्था॰ कृत्येति त्वा नयामो-ऽभिप्रहितां प्रति त्वा प्र हिण्मः। तेनाऽभि याहि भञ्ज.त्यनस्वतीव वाहिनी विश्वरूपा कुरूटिनी।। 15।।

卐 परा.क्ते ज्योति. रपथन्ते अर्वा-गन्यत्राऽस्म.दयना कृणुष्व। परेणेहि नवति न्नाव्या3(आ)अति- दुर्गा. स्स्रोत्या मा क्षणिष्ठा॰ परेहि।। 16।।

卐 वात^इव वृक्षा. न्निमृणीहि पादय- मा गा.मश्वं पुरुष. मुच्छिष^ एषाम्। कर्तृ. न्निवृ.त्येत॰ कृत्ये-ऽप्रजास्त्वाय बोधय।। 17।।

卐 यान्ते बर्हिषि यां श्मशाने- क्षेत्रे कृत्याँ वलगँ वा निचख्नुः। अग्नौ वा त्वा गार्हपत्येऽभिचेरु॰- पाकं सन्त न्धीरतरा^ अनागसम्।। 18।।

卐 उपाहृत. मनुबुद्ध. न्निखातं- वैर.न्त्सार्यन्वविदाम कर्त्रम्। तदेतु यत^ आभृत- न्तत्राश्व^इव विवर्ततां- हन्तु कृत्याकृत॰ प्रजाम्।। 19।।

卐 स्वायसा असयं. स्सन्ति नो गृहे- विद्मा ते कृत्ये यतिधा परूंषि। उत्तिष्ठैव परेहीतो-ऽज्ञाते किमिहेच्छसि।। 20।।

卐 ग्रीवा.स्ते कृत्ये पादौ- चापि कत्स्यामि निर्द्रव। इन्द्राग्नी~ अस्मा. न्रक्षतॉं- यौ प्रजानां प्रजावती~।। 21।।

卐 सोमो राजाऽधिपा मृडिता च- भूतस्य नः पतयो मृडयन्तु।। 22।।

卐 भवाशर्वा.वस्यतां- पापकृते कृत्याकृते। दुष्कृते विद्युत. न्देवहेतिम्।। 23।।

卐 यद्येयथ द्विपदी चतुष्पदी- कृत्याकृता सम्भृता विश्वरूपा। सेतो3(ओ)ऽष्टापदी भूत्वा- पुनः परेहि दुच्छुने।। 24।।

卐 अभ्य1(अ)क्ताक्ता स्वरङ्कृता- सर्वं भरन्ती दुरितं परेहि। जानीहि कृत्ये कर्तार- न्दुहितेव पितरं स्वम्।। 25।।

卐 परेहि कृत्ये मा तिष्ठो- विद्धस्येव पद.न्नय। मृ.गस्स मृगयु. स्त्व-न्न त्वा निकर्तु. मर्हति।। 26।।

卐 उत हन्ति पूर्वासिनं- प्रत्यादायाऽपर^ इष्वा। उत पूर्वस्य निघ्नतो- नि हन्त्यपरः प्रति।। 27।।

卐 एतद्धि श्रृणु मे वचो-ऽथेहि यत^ एयथ। यस्त्वा चकार तं प्रति।। 28।।

卐 अनागोहत्या वै भीमा कृत्ये- मा नो गा.मश्वं पुरुषँ वधीः। यत्रयत्राऽसि निहिता- तत स्त्वोत्थापयामसि- पर्णा. ल्लघीयसी भव।। 29।।

卐 यदि स्थ तमसाऽऽवृता- जालेनाऽभिहिता^इव। सर्वा स्सँलुप्येतः कृत्याः- पुनः कर्त्रे प्र हिण्मसि।। 30।।

卐 कृत्याकृतो वलगिनो-ऽभिनिष्कारिणः प्रजाम्। मृणीहि कृत्ये मोच्छिषो-ऽमू. न्कृत्याकृतो जहि।। 31।।

卐 यथा सूर्यो मुच्यते तमस. स्परि- रात्रि.ञ्जहा. त्युषसश्च केतून्। एवाऽहं सर्व. न्दुर्भूत.ङ्कर्त्रे-ङ्कृत्याकृता कृतं हस्तीव- रजो दुरित.ञ्जहामि।। 32।।-

10-01-02

卐 केन पार्ष्णी~ आभृते~ पूरुषस्य- केन मांसं सम्भृत.ङ्केन गुल्फौ। केनाऽङ्गुलीः पेशनीः केन खानि- केनोच्छ्लङ्खौ मध्यतः कः प्रतिष्ठाम्।। 1।।

卐 कस्मा.न्नु गुल्फा.वधरा.वकृण्व-न्नष्ठीवन्ता. वुत्तरौ पूरुषस्य। जङ्घे निरृत्य.न्न्यदधुः क्व स्वि-ज्जानुनो स्सन्धी~ क^ उ तच्चिकेत।। 2।।

卐 चतुष्टयँ युज्यते संहितान्त-ञ्जानुभ्या. मूर्ध्वं शिथिर.ङ्कबन्धम्। श्रोणी यदूरू~ क^ उ तज्जजान- याभ्या.ङ्कुसिन्ध्यं सुदृढं बभूव।। 3।।

卐 कति देवाः कतमे त आसन्य उरो ग्रीवा.श्चिक्युः पूरुषस्य। कति स्तनौ व्यदधुः कः कफोडौ- कति स्कन्धा. न्कति पृष्टी. रचिन्वन्न्।। 4।।

卐 को अस्य बाहू~ समभरद्वीर्य.ङ्करवा.दिति। अंसौ को अस्य तद्देवः- कुसिन्धे अध्या दधौ।। 5।।

卐 कस्सप्त खानि वि ततर्द शीर्षणि- कर्णा.विमौ नासिके~ चक्षणी~ मुखम्। येषां पुरुत्रा विजयस्य मह्मनि- चतुष्पादो द्विपदो यन्ति यामम्।। 6।।

卐 हन्वोर्हि जिह्वा. मदधा.त्पुरूची-मधा मही. मधि शिश्राय वाचम्। स^ आ वरीवर्ति भुवने.ष्वन्त- रपो वसानः क^ उ तच्चिकेत।। 7।।

卐 मस्तिष्क. मस्य यतमो ललाट-ङ्ककाटिकां प्रथमो यः कपालम्। चित्वा चित्यं हन्वोः पूरुषस्य- दिवं रुरोह कतम. स्स^ देवः।। 8।।

卐 प्रियाप्रियाणि बहुला- स्वप्नं संबाधतन्द्यः। आनन्दा.नुग्रो नन्दांश्च- कस्मा.द्वहति पूरुषः।। 9।।

卐 आर्ति. रवर्ति.र्निर्ऋतिः- कुतो नु पुरुषेऽमतिः। राद्धि. स्समृद्धि.रव्यृद्धि- र्मति.रुदितयः कुतः।। 10।।

卐 को अस्मि.न्नापो व्यदधा. द्विषूवृतः- पुरूवृत. स्सिन्धुसृत्याय जाताः। तीव्रा अरुणा लोहिनी. स्ताम्रधूम्रा- ऊर्ध्वा अवाचीः पुरुषे तिरश्चीः।। 11।।

卐 को अस्मि. न्रूप. मदधा-त्को मह्मानञ्च नाम च। गातु.ङ्को अस्मि. न्कः केतु-ङ्क.श्चरित्राणि पूरुषे।। 12।।

卐 को अस्मि. न्प्राण. मवय-त्को अपानँ व्यान.मु। समान. मस्मि. न्को देवो-ऽधि शिश्राय पूरुषे।। 13।।

卐 को अस्मि. न्यज्ञ. मदधा- देको देवोऽधि पूरुषे। को अस्मि. न्त्सत्य.ङ्कोऽनृत-ङ्कुतो मृत्युः कुतोऽमृतम्।। 14।।

卐 को अस्मै वासः पर्यदधा-त्को अस्याऽऽयु. रकल्पयत्। बल.ङ्को अस्मै प्राऽयच्छ-त्को अस्याकल्पय.ज्जवम्।। 15।।

卐 केनाऽऽपो अन्वतनुत- केनाऽह.रकरो.द्रुचे। उषस.ङ्केनाऽन्वैन्द्ध- केन सायम्भव. न्ददे।। 16।।

卐 को अस्मि. न्रेतो न्यदधा- त्तन्तु. रातायता.मिति। मेधा.ङ्को अस्मि. न्नध्यौह- त्को बाण.ङ्को नृतो दधौ।। 17।।

卐 केनेमां भूमि. मौर्णो-त्केन पर्यभव. द्दिवम्। केनाभि मह्वा पर्वता-न्केन कर्माणि पूरुषः।। 18।।

卐 केन पर्जन्य. मन्वेति- केन सोमँ विचक्षणम्। केन यज्ञञ्च श्रद्धाञ्च- केनाऽस्मि.न्निहितं मनः।। 19।।

卐 केन श्रोत्रिय. माप्नोति- केनेमं परमेष्ठिनम्। केनेम. मग्निं पूरुषः- केन सँवत्सरं ममे।। 20।।

卐 ब्रह्म श्रोत्रिय. माप्नोति- ब्रह्मेमं परमेष्ठिनम्। ब्रह्मेम. मग्निं पूरुषो- ब्रह्म सँवत्सरं ममे।। 21।।

卐 केन देवाः अनु क्षियति- केन दैवजनी. र्विशः। केनेद. मन्य.न्नक्षत्र- ङ्केन सत्क्षत्र. मुच्यते।। 22।।

卐 ब्रह्म देवाः अनु क्षियति- ब्रह्म दैवजनी. र्विशः। ब्रह्मेद. मन्य.न्नक्षत्रं- ब्रह्म सत्क्षत्र. मुच्यते।। 23।।

卐 केनेयं भूमि. र्विहिता- केन द्यौ.रुत्तरा हिता। केनेद. मूर्ध्व.न्तिर्य- क्चाऽन्तरिक्षँ व्यचो हितम्।। 24।।

卐 ब्रह्मणा भूमि र्विहिता- ब्रह्म द्यौ.रुत्तरा हिता। ब्रह्मेद मूर्ध्व. न्तिर्य- क्चाऽन्तरिक्षँ व्यचो हितम्।। 25।।

卐 मूर्धान. मस्य संसीव्या-ऽथर्वा हृदयञ्च यत्। मस्तिष्का. दूर्ध्वः प्रैरय-त्पवमानोऽधि शीर्षतः।। 26।।

卐 तद्वा अथर्वण. श्शिरो- देवकोश. स्समुब्जितः। तत्प्राणो अभि रक्षति-शिरो अन्न. मथो~ मनः।। 27।।

卐 ऊर्ध्वो नु सृष्टा'3'- स्तिर्य.ङ्नु सृष्टा'3' स्सर्वा^ दिशः- पुरुष^ आ बभूवाँ'3'। पुरँ यो ब्रह्मणो वेद- यस्याः पुरुष^ उच्यते।। 28।।

卐 यो वै तां ब्रह्मणो वेदा-ऽमृतेनाऽऽवृतां पुरम्। तस्मै ब्रह्म च ब्राह्मा.श्च-चक्षुः प्राणं प्रजा.न्ददुः।। 29।।

卐 न वै त.ञ्चक्षु. र्जहाति- न प्राणो जरसः पुरा। पुरँ यो ब्रह्मणो वेद-यस्याः पुरुष^ उच्यते।। 30।।

卐 अष्टाचक्रा नवद्वारा- देवानां पू.र्योध्या। तस्यां हिरण्ययः कोश- स्स्वर्गो ज्योतिषाऽऽवृतः।। 31।।

卐 तस्मि. न्हिरण्यये कोशे- त्र्यरे त्रिप्रतिष्ठिते। तस्मि.न्यद्यक्ष.मात्मन्व-त्तद्वै ब्रह्मविदो विदुः।। 32।।

卐 प्रभ्राजमानां हरिणीँ- यशसा संपरीवृताम्। पुरं हिरण्ययीं ब्रह्मा-ऽऽविवेशाऽपराजिताम्।। 33।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

## ऽ॑ऽ दशम काण्डे द्वितीयोऽनुवाकः

10-02-01

卐 अयं मे वरणो मणि- स्सपत्नक्षयणो वृषा। तेना ऽऽरभस्व त्वं शत्रू-न्प्र मृणीहि दुरस्यतः।। 1।।

卐 प्रैणा. न्छृणीहि प्र मृणा ऽऽरभस्व- मणिस्ते अस्तु पुर^एता पुरस्तात्। अवारयन्त वरणेन देवा^- अभ्याचार. मसुराणां श्वश्श्वः।। 2।।

卐 अयं मणि. र्वरणो विश्वभेषज- स्सहस्राक्षो हरितो हिरण्ययः। स^ ते शत्रू. नधरा. न्पादयाति- पूर्व.स्ता. न्दभ्नुहि ये त्वा द्विषन्ति।। 3।।

卐 अय.न्ते कृत्याँ विततां- पौरुषेया. दयं भयात्। अय.न्त्वा सर्वस्मा. त्पापा- द्वरणो वारयिष्यते।। 4।।

卐 वरणो वारयाता- अय. न्देवो वनस्पतिः। यक्ष्मो यो अस्मि. न्नाविष्ट- स्तमु देवा^ अवीवरन्न्।। 5।।

卐 स्वप्नं सुप्त्वा यदि पश्यासि पापं- मृग. स्सृतिँ यति धावा. दजुष्टाम्। परिक्षवा. च्छकुनेः पापवादा- दयं मणि. र्वरणो वारयिष्यते।। 6।।

卐 अरात्या.स्त्वा निर्ऋत्या^- अभिचारा. दथो~ भयात्। मृत्यो. रोजीयसो वधा- द्वरणो वारयिष्यते।। 7।।

卐 यन्मे माता यन्मे पिता- भ्रातरो यच्च मे स्वा- यदेन.श्चकृमा वयम्। ततो नो वारयिष्यते-ऽय. न्देवो वनस्पतिः।। 8।।

卐 वरणेन प्रव्यथिता- भ्रातृव्या मे सबन्धवः। असूर्तं रजो अप्यगु- स्ते यन्त्वधम. न्तमः।। 9।।

卐 अरिष्टोऽह. मरिष्टगु- रायुष्मा. न्त्सर्वपूरुषः। तं माऽयँ वरणो मणिः- परि पातु दिशो दिशः।। 10।।

卐 अयं मे वरण उरसि- राजा देवो वनस्पतिः। स मे शत्रून् वि बाधता- मिन्द्रो दस्यू.निवाऽसुरान्।। 11।।

卐 इमं बिभर्मि वरण- मायुष्मा.न्छतशारदः। स मे राष्ट्रञ्च क्षत्रञ्च- पशू.नोजश्च मे दधत्।। 12।।

卐 यथा वातो वनस्पती- न्वृक्षा.न्भनक्त्योजसा। एवा सपत्ना.न्मे भङ्ग्धि- पूर्वा. न्जाता॑ उताऽपरान् वरण.स्त्वाऽभि रक्षतु।। 13।।

卐 यथा वात. श्चाग्निश्च- वृक्षा.न्प्सातो वनस्पतीन्। एवा सपत्ना.न्मे प्साहि- पूर्वा. न्जाता॑ उताऽपरा-न्वरण.स्त्वाऽभि रक्षतु।। 14।।

卐 यथा वातेन प्रक्षीणा- वृक्षा. श्शेरे न्यर्पिताः। एवा सपत्नां.स्त्वं मम- प्र क्षिणीहि न्यर्पय- पूर्वा.न्जाता॑ उताऽपरा-न्वरण.स्त्वाऽभि रक्षतु।। 15।।

卐 तां.स्त्वं प्रच्छिन्द्धि वरण- पुरा दिष्टा.त्पुराऽऽयुषः। य एनं पशुषु दिप्सन्ति- ये चाऽस्य राष्ट्रदिप्सवः।। 16।।

卐 यथा सूर्यो अतिभाति- यथाऽस्मि.न्तेज^ आहितम्। एवा मे वरणो मणिः- कीर्तिं भूति.न्नि यच्छतु- तेजसा मा स.मुक्षतु- यशसा स.मनक्तु मा।। 17।।

卐 यथा यश. श्चन्द्रम-स्यादित्ये च नृचक्षसि। एवा मे वरणो मणिः- कीर्तिं भूति.न्नि यच्छतु- तेजसा मा स.मुक्षतु- यशसा स.मनक्तु मा।। 18।।

卐 यथा यशः पृथिव्याँ- यथाऽस्मि. न्जातवेदसि। एवा मे वरणो मणिः कीर्तिं भूति.न्नि यच्छतु- तेजसा मा स.मुक्षतु- यशसा स.मनक्तु मा।। 19।।

卐 यथा यशः कन्यायाँ- यथाऽस्मि'2'न्त्सम्भृते रथे। एवा मे वरणो मणिः- कीर्तिं भूति.न्नि यच्छतु- तेजसा मा स.मुक्षतु- यशसा स.मनक्तु मा।। 20।।

卐 यथा यश स्सोमपीथे- मधुपर्के यथा यशः। एवा मे वरणो मणिः- कीर्तिं भूति.न्नि यच्छतु- तेजसा मा स.मुक्षतु- यशसा स.मनक्तु मा।। 21।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 यथा यशोऽग्निहोत्रे- वषट्कारे यथा यशः। एवा मे वरणो मणिः- कीर्तिं भूति.न्नि यच्छतु- तेजसा मा स.मुक्षतु यशसा- स.मनक्तु मा।। 22।।

卐 यथा यशो यजमाने- यथाऽस्मि.न्यज्ञ आहितम्। एवा मे वरणो मणिः- कीर्तिं भूति.न्नि यच्छतु- तेजसा मा स.मुक्षतु- यशसा स.मनक्तु मा।। 23।।

卐 यथा यशः प्रजापतौ- यथाऽस्मि. न्परमेष्ठिनि। एवा मे वरणो मणिः- कीर्तिं भूति.न्नि यच्छतु- तेजसा मा स.मुक्षतु- यशसा स.मनक्तु मा।। 24।।

卐 यथा देवे.ष्वमृतँ- यथैषु सत्य. माहितम्। एवा मे वरणो मणिः- कीर्तिं भूति.न्नि यच्छतु- तेजसा मा स.मुक्षतु- यशसा स.मनक्तु मा।। 25।।-

10-02-02

卐 इन्द्रस्य प्रथमो रथो- देवाना. मपरो रथो- वरुणस्य तृतीय^ इत्। अहीना. मपमा रथ-स्स्थाणु. मार.दथाऽऽर्षत्।। 1।।

卐 दर्भ. श्शोचि. स्तरूणक- मश्वस्य वारः परुषस्य वारः। रथस्य बन्धुरम्।। 2।।

卐 अव श्वेत पदा जहि- पूर्वेण चाऽपरेण च। उदप्लुतमिव दार्वहीना- मरसँ विषँ वा.रुग्रम्।। 3।।

卐 अरङ्घुषो निम-ज्ज्योन्मज्ज्य पुन.रब्रवीत्। उदप्लुत.मिव दार्वहीना- मरसँ विषँ वा.रुग्रम्।। 4।।

卐 पैद्वो हन्ति कसर्णीलं- पैद्व. श्श्वित्र. मुतासितम्। पैद्वो रथर्व्या. श्शिर-स्सं बिभेद पृदाक्वाः।। 5।।

卐 पैद्व प्रेहि प्रथमो-ऽनु त्वा वय. मेमसि। अही.न्व्यस्यता. त्पथो- येन स्मा वय. मेमसि।। 6।।

卐 इदं पैद्वो अजाय-तेद. मस्य परायणम्। इमा. न्यर्वत꠰ पदा-ऽहिघ्न्यो वाजिनीवतः।। 7।।

卐 सँयत.न्न विष्पर-द्व्यात्त.न्न सँ यमत्। अस्मि.न्क्षेत्रे द्वावही~- स्त्री च पुमांश्च ता.वुभा.वरसा।। 8।।

卐 अरसास^ इहाहयो- ये अन्ति ये च दूरके। घनेन हन्मि वृश्चिक- महिं. न्दण्डेनाऽऽगतम्।। 9।।

卐 अघाश्वस्येदं भेषज- मुभयो. स्स्वजस्य च। इन्द्रो मेऽहिं. मघायन्त-महिं पैद्वो अरन्धयत्।। 10।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 पैद्वस्य मन्महे वयं- स्थिरस्य स्थिरधाम्नः। इमे पश्चा पृदाकवः- प्रदीध्यत^ आसते।। 11।।

卐 नष्टासवो नष्टविषा^- हता^ इन्द्रेण वज्रिणा। जघानेन्द्रो जघ्निमा वयम्।। 12।।

卐 हता. स्तिरश्चिराजयो- निपिष्टासः पृदाकवः। दर्विं.ङ्करिक्रतं श्वित्र- न्दर्भेष्वसित.ञ्जहि।। 13।।

卐 कैरातिका कुमारिका- सका खनति भेषजम्। हिरण्ययीभि. रभ्रिभि- र्गिरीणा. मुप सानुषु।। 14।।

卐 आऽय.मगन् युवा भिष-क्पृश्निहाऽपराजितः। स^ वै स्वजस्य जम्भन^- उभयो. वृंश्चिकस्य च।। 15।।

卐 इन्द्रो मेऽहिं. मरन्धय-न्मित्रश्च वरुणश्च। वातापर्जन्यो3(ओ)भा।। 16।।

卐 इन्द्रो मेऽहिं. मरन्धय-त्पृदाकुञ्च पृदाक्कम्। स्वज. न्तिरश्चिराजि.ङ्कसर्णील. न्दशोनसिम्।। 17।।

卐 इन्द्रो जघान प्रथम-ञ्जनितार. महे तव। तेषा.मु तृह्यमाणाना- ङ्कस्स्वि.त्तेषा. मस.द्रसः।। 18।।

卐 सं हि शीरूषाण्यग्रभं- पौञ्जिष्ठ^ इव कर्वरम्। सिन्धो. र्मध्यं परेत्य-

व्यनिज. महे. र्विषम्।। 19।।

卐 अहीनां सर्वैषाँ विषं- परा वहन्तु सिन्धवः। हता. स्तिरश्चिराजयो-

निपिष्टासः पृदाकवः।। 20।।

卐 ओषधीना. महँ वृण- उर्वरी.रिव साधुया। नया.म्यर्वती. रिवाहे- निरैतु

ते विषम्।। 21।।

卐 यदग्नौ सूर्ये विषं- पृथिव्या. मोषधीषु यत्। कान्दाविष.ङ्कनक्कक- न्निरैत्वैतु

ते विषम्।। 22।।

卐 ये अग्निजा^ ओषधिजा^ अहीनाँ- ये अप्सुजा^ विद्युत^ आबभूवुः।

येषा.ञ्जातानि बहुधा महान्ति- तेभ्य. स्सर्पेभ्यो नमसा विधेम।। 23।।

卐 तौदी नामासि कन्या- घृताची नाम वा असि। अधस्पदेन ते पद- माददे

विषदूषणम्।। 24।।

卐 अङ्गादङ्गा.त्प्रच्यावय- हृदयं परि वर्जय। अधा विषस्य यत्तेजो-ऽवाचीन.

न्त.देतु ते।। 25।।

卐 आरे अभू.द्विष. मरौ-द्विषे विष. मप्रागपि। अग्नि. र्विष. महे र्निरधा-

त्सोमो निरणयीत्। दंष्टार मन्वगा. द्विष- महि. रमृत।। 26।।-

## दशम काण्डे तृतीयोऽनुवाकः

10-03-01

卐 इन्द्रस्यौज. स्स्थेन्द्रस्य सह. स्स्थेन्द्रस्य बलं स्थेन्द्रस्य वीर्य1(अं)स्थेन्द्रस्य नृम्णं स्थ। जिष्णवे योगाय ब्रह्मयोगै.र्वो युनज्मि।। 1।।

卐इन्द्रस्यौज. स्स्थेन्द्रस्य सह. स्स्थेन्द्रस्य बलं स्थेन्द्रस्य वीर्य1(अं)स्थेन्द्रस्य नृम्णं स्थ। जिष्णवे योगाय क्षत्रयोगै.र्वो युनज्मि।। 2।।

卐इन्द्रस्यौज. स्स्थेन्द्रस्य सह. स्स्थेन्द्रस्य बलं स्थेन्द्रस्य वीर्य1(अं)स्थेन्द्रस्य नृम्णं स्थ। जिष्णवे योगायेन्द्रयोगै.र्वो युनज्मि।। 3।।

卐इन्द्रस्यौज. स्स्थेन्द्रस्य सह. स्स्थेन्द्रस्य बलं स्थेन्द्रस्य वीर्य1(अं)स्थेन्द्रस्य नृम्णं स्थ। जिष्णवे योगाय सोमयोगै.र्वो युनज्मि।। 4।।

卐इन्द्रस्यौज. स्स्थेन्द्रस्य सह. स्स्थेन्द्रस्य बलं स्थेन्द्रस्य वीर्य1(अं)स्थेन्द्रस्य नृम्णं स्थ। जिष्णवे योगायाऽप्सुयोगै.र्वो युनज्मि।। 5।।

卐इन्द्रस्यौज. स्स्थेन्द्रस्य सह. स्स्थेन्द्रस्य बलं स्थेन्द्रस्य वीर्य1(अं)स्थेन्द्रस्य नृम्णं स्थ। जिष्णवे योगाय विश्वानि मा भूता.न्युप तिष्ठन्तु युक्ता^ म आप.स्स्थ।। 6।।

卐 अग्ने.र्भाग.स्स्थ। अपां शुक्र. मापो देवी.र्वर्चो अस्मासु धत्त। प्रजापते.र्वो धाम्ना-ऽस्मै लोकाय सादये।। 7।।

卐 इन्द्रस्य भाग.स्स्थ। अपां शुक्र. मापो देवी. र्वर्चो अस्मासु धत्त। प्रजापते.र्वो धाम्ना-ऽस्मै लोकाय सादये।। 8।।

卐 सोमस्य भाग.स्स्थ। अपां शुक्र. मापो देवी- र्वर्चो अस्मासु धत्त। प्रजापते.र्वो धाम्ना-ऽस्मै लोकाय सादये।। 9।।

卐 वरुणस्य भाग.स्स्थ। अपां शुक्र. मापो देवी- र्वर्चो अस्मासु धत्त। प्रजापते.र्वो धाम्ना-ऽस्मै लोकाय सादये।। 10।।

卐 मित्रावरुणयो. र्भाग.स्स्थ। अपां शुक्र. मापो देवी- र्वर्चो अस्मासु धत्त। प्रजापते.र्वो धाम्ना-ऽस्मै लोकाय सादये।। 11।।

卐 यमस्य भाग.स्स्थ। अपां शुक्र. मापो देवी- र्वर्चो अस्मासु धत्त। प्रजापते.र्वो धाम्ना-ऽस्मै लोकाय सादये।। 12।।

卐 पितृणां भाग.स्स्थ। अपां शुक्र. मापो देवी- र्वर्चो अस्मासु धत्त। प्रजापते.र्वो धाम्ना-ऽस्मै लोकाय सादये।। 13।।

卐 देवस्य सवितु.र्भाग.स्स्थ। अपां शुक्र. मापो देवी- र्वर्चो अस्मासु धत्त। प्रजापते.र्वो धाम्ना-ऽस्मै लोकाय सादये।। 14।।

卐 यो व^ आपोऽपां भागो3(ओ)ऽप्स्व1(अ)न्त. र्यजुष्यो देवयजनः। इद.न्तमति सृजामि- तं माऽभ्यवनिक्षि। तेन तमभ्यतिसृजामो- यो3(ओ)ऽस्मा. न्द्वेष्टि यँ वय. न्द्विष्मः। तँ वधेय न्तं स्तृषीयाऽनेन ब्रह्मणाऽनेन कर्मणाऽनया मेन्या।। 15।।

卐 यो व^ आपोऽपा. मूर्मि. रप्स्व1(अ)न्त. र्यजुष्यो देवयजनः। इद.न्त मति सृजामि- तं माऽभ्यवनिक्षि। तेन तमभ्यति सृजामो यो3(ओ)ऽस्मा. न्द्वेष्टि यँ वय.न्द्विष्मः। तँ वधेय.न्तं स्तृषीयाऽनेन ब्रह्मणाऽनेन कर्मणाऽनया मेन्या।। 16।।

卐 यो व^ आपोऽपाँ वत्सो3(ओ)ऽप्स्व1(अ)न्त. र्यजुष्यो देवयजनः। इद.न्त मति सृजामि- तं माऽभ्यवनिक्षि। तेन तमभ्यति सृजामो- यो3(ओ)ऽस्मा. न्द्वेष्टि- यँ वय.न्द्विष्मः। तँ वधेय.न्तं स्तृषीयाऽनेन ब्रह्मणाऽनेन कर्मणाऽनया मेन्या।। 17।।

卐 यो व^ आपोऽपाँ वृषभो3(ओ) प्स्व1(अ)न्त. र्यजुष्यो देवयजनः। इद.न्त मति सृजामि- तं माऽभ्यवनिक्षि। तेन तमभ्यति सृजामो- यो3(ओ)ऽस्मा. न्द्वेष्टि- यँ वय.न्द्विष्मः। तँ वधेय.न्तं स्तृषीयाऽनेन ब्रह्मणाऽनेन कर्मणाऽनया मेन्या।। 18।।

卐 यो व^ आपोऽपां हिरण्यगर्भो3(ओ)ऽप्स्व1(अ)न्त. र्यजुष्यो देवयजनः। इद.न्त मति सृजामि- तं माऽभ्यवनिक्षि। तेन तमभ्यति सृजामो- यो3(ओ)ऽस्मा. न्द्वेष्टि- यँ वय.न्द्विष्मः। तँ वधेय.न्तं स्तृषीयाऽनेन ब्रह्मणाऽनेन कर्मणाऽनया मेन्या।। 19।।

卐 यो व^ आपोऽपा. मश्मा पृश्नि. र्दिव्यो3(ओ)ऽप्स्व1(अ)न्त. र्यजुष्यो देवयजनः। इद.न्त मति सृजामि- तं माऽभ्यवनिक्षि। तेन तमभ्यति सृजामो- यो3(ओ)ऽस्मा. न्द्वेष्टि- यँ वय.न्द्विष्मः। तँ वधेय.न्तं स्तृषीयाऽनेन ब्रह्मणाऽनेन कर्मणाऽनया मेन्या।। 20।।

卐 ये व^ आपोऽपा. मग्नयोऽप्स्व1(अ)न्त र्यजुष्या^ देवयजनाः। इद.न्ता. नति सृजामि- ता.न्माऽभ्यवनिक्षि। तै.स्त.मभ्यति सृजामो- यो3(ओ)ऽस्मा. न्द्वेष्टि- यँ वय न्द्विष्मः। तँ वधेय.न्तं स्तृषीयाऽनेन ब्रह्मणा-ऽनेन कर्मणाऽनया मेन्या।। 21।।

Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 यदर्वाचीनं त्रैहायणादनृतं किञ्चोदिम। आपो मा तस्मात्सर्वस्मा-दुरितात्पान्त्वंहसः।। 22।।

卐 समुद्रं वः प्र हिणोमि स्वां योनिमपीतन। अरिष्टाः सर्वहायसो मा च नः किञ्चनाऽममत्।। 23।।

卐 अरिप्रा आपो अप रिप्रमस्मत्। प्राऽस्मदेनो दुरितं सुप्रतीकाः प्र दुष्वप्न्यं प्र मलं वहन्तु।। 24।।-

10-03-02

卐 विष्णोः क्रमोऽसि सपत्नहा पृथिवीसंशितोऽग्नितेजाः। पृथिवीमनु वि क्रमेऽहं पृथिव्यास्तं निर्भजामो योऽ3(ओ)ऽस्मान्द्वेष्टि यं वयं द्विष्मः। स मा जीवीत्तं प्राणो जहातु।। 25।।

卐 विष्णोः क्रमोऽसि सपत्नहाऽन्तरिक्षसंशितो वायुतेजाः। अन्तरिक्षमनु वि क्रमेऽहमन्तरिक्षात्तं निर्भजामो योऽ3(ओ)ऽस्मान्द्वेष्टि यं वयं द्विष्मः। स मा जीवीत्तं प्राणो जहातु।। 26।।

卐 विष्णोः क्रमोऽसि सपत्नहा द्यौसंशितः सूर्यतेजाः। दिवमनु वि क्रमेऽहं दिवस्तं निर्भजामो योऽ3(ओ)ऽस्मान्द्वेष्टि यं वयं द्विष्मः। स मा जीवीत्तं प्राणो जहातु।। 27।।

卐 विष्णो॒ः क्रमो॑ऽसि सपत्न॒हा- दिक्सं॑शितो॒ मन॑स्तेजाः। दिशो॒ऽनु॒ विक्र॑मे॒ऽह- न्दि॒ग्भ्य. स्त.न्निर्भ॑जामो॒- यो॒3(ओ॒)ऽस्मा. न्द्वेष्टि॒- यँ व॒य. न्द्वि॒ष्मः। स^ मा जीवी॒- त्तं प्रा॒णो ज॑हातु।। 28।।

卐 विष्णो॒ः क्रमो॑ऽसि सपत्न॒हा-ऽऽशासं॑शितो॒ वात॑तेजाः। आशा॒^ अनु॒ वि क्र॑मे॒ऽह- माशाभ्य॒. स्त.न्निर्भ॑जामो॒- यो॒3(ओ॒)ऽस्मा. न्द्वेष्टि॒- यँ व॒य. न्द्वि॒ष्मः। स^ मा जीवी॒- त्तं प्रा॒णो ज॑हातु।। 29।।

卐 विष्णो॒ः क्रमो॑ऽसि सपत्नह॑- ऋक्संशित॒. स्साम॑तेजाः। ऋचो॒ऽनु॒ वि क्र॑मे॒ऽह- मृग्भ्य. स्त.न्निर्भ॑जामो॒- यो॒3(ओ॒)ऽस्मा. न्द्वेष्टि॒- यँ व॒य. न्द्वि॒ष्मः। स^ मा जीवी॒- त्तं प्रा॒णो ज॑हातु।। 30।। {15}

卐 विष्णो॒ः क्रमो॑ऽसि सपत्न॒हा- य॒ज्ञसं॑शितो॒ ब्रह्म॑तेजाः। य॒ज्ञ. मनु॒ वि क्र॑मे॒ऽहँ- य॒ज्ञा त्त.न्निर्भ॑जामो॒- यो॒3(ओ॒)ऽस्मा. न्द्वेष्टि॒- यँ व॒य. न्द्वि॒ष्मः। स^ मा जीवी॒- त्तं प्रा॒णो ज॑हातु।। 31।।

卐 विष्णो॒ः क्रमो॑ऽसि सपत्न॒-हौष॑धीसंशित॒. स्सोम॑तेजाः। ओष॑धी॒. रनु॒ वि क्र॑मे॒ऽह- मोष॑धीभ्य॒. स्त.न्निर्भ॑जामो॒- यो॒3(ओ॒)ऽस्मा. न्द्वेष्टि॒- यँ व॒य. न्द्वि॒ष्मः। स^ मा जीवी॒- त्तं प्रा॒णो ज॑हातु।। 32।।

卐 विष्णो॰ क्रमो॑ऽसि सपत्नहा-ऽप्सुसंशितो वरुणतेजाः। अपोऽनु वि

क्रमेऽह- मद्भ्य. स्त.न्निर्भजामो- यो3(ओ)ऽस्मा. न्द्वेष्टि- यँ वय. न्द्विष्मः।

स^ मा जीवी- त्तं प्राणो जहातु।। 33।।

卐 विष्णो॰ क्रमो॑ऽसि सपत्नहा- कृषिसंशितोऽन्नतेजाः। कृषि.मनु वि

क्रमेऽह-ङ्कृष्या. स्त.न्निर्भजामो- यो3(ओ)ऽस्मा. न्द्वेष्टि- यँ वय. न्द्विष्मः।

स^ मा जीवी-त्तं प्राणो जहातु।। 34।।

卐 विष्णो॰ क्रमो॑ऽसि सपत्नहा- प्राणसंशित॰ पुरुषतेजाः। प्राण.मनु वि

क्रमेऽहं- प्राणा त्त.न्निर्भजामो- यो3(ओ)ऽस्मा. न्द्वेष्टि- यँ वय. न्द्विष्मः। स^

मा जीवी- त्तं प्राणो जहातु।। 35।-

10-03-03

卐 जित. मस्माक. मुद्भिन्न- मस्माक. मभ्यष्ठाँ- विश्वा॰ पृतना^ अरातीः।

इद. मह. मामुष्यायणस्याऽमुष्या॰ पुत्रस्य- वर्च. स्तेज॰ प्राण. मायु.

र्निवेष्टया-मीद. मेन. मधराञ्चं पादयामि।। 36।।

卐 सूर्यस्याऽऽवृत. मन्वावर्ते- दक्षिणा मन्वावृतम्। सा मे द्रविणँ यच्छतु-

सा मे ब्राह्मणवर्चसम्।। 37।।

卐 दिशो ज्योतिष्मती. रभ्यावर्तो। ता^ मे द्रविणँ यच्छन्तु- ता^ मे ब्राह्मणवर्चसम्।। 38।।

卐 सप्तऋषी. नभ्यावर्तो। ते मे द्रविणँ यच्छन्तु- ते मे ब्राह्मणवर्चसम्।। 39।।

卐 ब्रह्माभ्यावर्तो। तन्मे द्रविणँ यच्छतु- तन्मे ब्राह्मणवर्चसम्।। 40।।

卐 ब्राह्मणाऽ अभ्यावर्तो। ते मे द्रविणँ यच्छन्तु- ते मे ब्राह्मणवर्चसम्।। 41।।-

10-03-04

卐 यँ वयं मृगयामहे- तँ वधै. स्तृणवामहै। व्यात्ते परमेष्ठिनो- ब्रह्मणाऽपीपदाम तम्।। 42।।

卐 वैश्वानरस्य दंष्ट्राभ्यां- हेति.स्तं समधा.दभि। इयन्तं प्सात्वाऽऽहुति-स्समि.द्देवी सहीयसी।। 43।।

卐 राज्ञो वरुणस्य- बन्धोऽसि। सो3(ओ)ऽमु. मामुष्यायण. ममुष्याः पुत्र-मन्ने प्राणे बधान।। 44।।

卐 यत्ते अन्नं भुवस्पत- आक्षियति पृथिवी. मनु। तस्य न.स्त्वं भुव.स्पते-संप्रयच्छ प्रजापते।। 45।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore • SGS

卐 अपो दिव्या^ अचायिषं- रसेन समपृक्ष्महि। पयस्वा. नग्न आऽगम- न्तं मा सं सृज वर्चसा।। 46।।

卐 सं माऽग्ने वर्चसा सृज- सं प्रजया समायुषा। विद्यु.मैं अस्य देवा^ इन्द्रो विद्या.त्सह ऋषिभिः।। 47।।

卐 यदग्ने अद्य मिथुना शपातो- यद्वाच. स्तृष्ट.ञ्जनयन्त रेभाः। मन्यो. र्मनस. श्शरव्या3(आ) जायते या- तया विध्य हृदये यातुधानान्।। 48।।

卐 परा श्रृणीहि तपसा यातुधाना- न्पराऽग्ने रक्षो हरसा श्रृणीहि। पराऽर्चिषा मूरदेवा. न्छ्रृणीहि- पराऽसुतृप. श्शोशुचत. श्श्रृणीहि।। 49।।

卐 अपा. मस्मै वज्रं प्र हरामि- चतुर्भृष्टिं शीर्षभिद्याय विद्वान्। सो अस्याऽङ्गानि प्र श्रृणातु सर्वा- तन्मे देवा^ अनु जानन्तु विश्वे।। 50।।-

10-03-05

卐 अरातीयो. र्भ्रातृव्यस्य- दुर्हार्दो द्विषत. श्शिरः। अपि वृश्चा.म्योजसा।। 1।

卐 वर्म मह्य. मयं मणिः- फाला. ज्जातः करिष्यति। पूर्णो मन्थेन माऽऽगम- द्रसेन सह वर्चसा।। 2।।

卐 यत्त्वा शिक्वः परावधी- त्तक्षा हस्तेन वास्या। आपस्त्वा तस्मा. ज्जीवलाः- पुनन्तु शुचय. श्शुचिम्।। 3।।

卐 हिरण्यस्त्र.गयं मणि- श्श्रद्धाँ यज्ञं महो दधत्। गृहे वसतु नोऽतिथिः।। 4।।

卐 तस्मै घृतं सुरां म-ध्वन्न.मन्न.ङ्क्षदामहे। स^ नः पितेव पुत्रेभ्य- श्श्रेयश्श्रेय. श्चिकित्सतु- भूयोभूय. श्श्वश्वो देवेभ्यो मणि. रेत्य।। 5।।

卐 य.मबध्ना. द्बृहस्पति- र्मणिं फालं घृतश्चुत- मुग्र.ङ्खदिर. मोजसे। तमग्निः प्रत्यमुञ्चत- सो अस्मै दुह आज्यं- भूयोभूय. श्श्वश्श्व- स्तेन त्व.न्द्विषतो जहि।।

卐 यमबध्ना. द्बृहस्पति- र्मणिं फालं घृतश्चुत- मुग्र.ङ्खदिर. मोजसे। तमिन्द्रः प्रत्यमुञ्च.तौजसे वीर्याय कम्। सो अस्मै बल. मिद्दुहे- भूयोभूय. श्श्वश्श्व- स्तेन त्व.न्द्विषतो जहि।। 7।।

卐 यमबध्ना. द्बृहस्पति- र्मणिं फालं घृतश्चुत- मुग्र.ङ्खदिर मोजसे। तं सोमः प्रत्यमुञ्चत- महे श्रोत्राय चक्षसे। सो अस्मै वर्च^ इद्दुहे- भूयोभूय श्श्वश्श्व- स्तेन त्व.न्द्विषतो जहि।। 8।।

卐 यमबध्ना. द्बृहस्पति- र्मणिं फालं घृतश्चुत- मुग्र.ङ्खदिर. मोजसे। तं सूर्य
प्रत्यमुञ्चत- तेनेमा॑ अजय. द्दिशः। सो अस्मै भूति. मिद्दुहे- भूयोभूय.
श्श्वश्श्व- स्तेन त्व.न्द्विषतो जहि।। 9।।

卐 यमबध्ना. द्बृहस्पति- र्मणिं फालं घृतश्चुत- मुग्र.ङ्खदिर मोजसे। तं बिभ्र
च्चन्द्रमा॑ मणि- मसुराणां पुरोऽजय- द्दानवानां हिरण्ययीः। सो अस्मै
श्रिय. मिद्दुहे- भूयोभूय. श्श्वश्श्व- स्तेन त्व.न्द्विषतो जहि।। 10।।

卐 यमबध्ना. द्बृहस्पति- र्वाताय मणि.माशवे। सो अस्मै वाजिन. न्दुहे-
भूयोभूय. श्श्वश्श्व- स्तेन त्व.न्द्विषतो जहि।। 11।।

卐 यमबध्ना. द्बृहस्पति- र्वाताय मणि. माशवे। तेनेमां मणिना कृषि-
मश्विना. वभि रक्षतः। स॑ भिषग्भ्यां महो दुहे- भूयोभूय. श्श्वश्श्व- स्तेन
त्व.न्द्विषतो जहि।। 12।।

卐 यमबध्ना. द्बृहस्पति- र्वाताय मणि. माशवे। तं बिभ्र. त्सविता मणिं-
तेनेद. मजय.त्स्वः। सो अस्मै सूनृता.न्दुहे- भूयोभूय. श्श्वश्श्व- स्तेन
त्व.न्द्विषतो जहि।। 13।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 यमबध्ना. द्बृहस्पति- र्वाताय मणि. माशवे। त.मापो बिभ्रती. र्मणिं- सदा धाव.न्त्यक्षिताः। स^ आभ्योऽमृत. मिद्दुहे- भूयोभूय. श्श्वश्श्व- स्तेन त्व.न्द्विषतो जहि।। 14।।

卐 यमबध्ना. द्बृहस्पति- र्वाताय मणि. माशवे। तं राजा वरुणो मणिं- प्रत्यमुञ्चत शम्भुवम्। सो अस्मै सत्य. मिद्दुहे- भूयोभूय. श्श्वश्श्व- स्तेन त्व.न्द्विषतो जहि।। 15।।

卐 यमबध्ना. द्बृहस्पति- र्वाताय मणि. माशवे। त.न्देवा^ बिभ्रतो मणिं- सर्वा. न्लोकान् युधाऽजयन्न्। स^ एभ्यो जिति. मिद्दुहे- भूयोभूय.श्श्वश्श्व- स्तेन त्व.न्द्विषतो जहि।। 16।।

卐 यमबध्ना. द्बृहस्पति- र्वाताय मणि. माशवे। तमिम. न्देवता^ मणिं- प्रत्यमुञ्चन्त शम्भुवम्। स^ आभ्यो विश्व. मिद्दुहे- भूयोभूय. श्श्वश्श्व- स्तेन त्वन्द्विषतो जहि।। 17।।

卐 ऋतव. स्त.मबध्नता-ऽऽर्तवा. स्त.मबध्नत। सँवत्सर.स्तं बद्ध्वा सर्वं- भूतँ वि रक्षति।। 18।।

卐 अन्तर्देशा^ अबध्नत- प्रदिश. स्त.मबध्नत। प्रजापतिसृष्टो मणि- र्द्विषतो मेऽधरा॒ अकः।। 19।।

卐 अथर्वाणो अबध्नता-ऽथर्वणा^ अबध्नत। तै.र्मेदिनो अङ्गिरसो- दस्यूनां बिभिदुः पुर- स्तेन त्व.न्द्विषतो जहि।। 20।।

卐 त.न्धाता प्रत्यमुञ्चत- स^ भूतँ व्यकल्पयत्। तेन त्व.न्द्विषतो जहि।। 21।।

卐 यमबध्ना. द्बृहस्पति- र्देवेभ्यो असुरक्षितिम्। स^ माऽयं मणि. राऽगम- द्रसेन सह वर्चसा।। 22।।

卐 यमबध्ना. द्बृहस्पति- र्देवेभ्यो असुरक्षितिम्। स^ माऽयं मणि. राऽगम- त्सह गोभि. रजाविभि- रन्नेन प्रजया सह।। 23।।

卐 यमबध्ना. द्बृहस्पति- र्देवेभ्यो असुरक्षितिम्। स^ माऽयं मणि. राऽगम- त्सह व्रीहियवाभ्यां- महसा भूत्या सह।। 24।।

卐 यमबध्ना. द्बृहस्पति- र्देवेभ्यो असुरक्षितिम्। स^ माऽयं मणि. राऽगम- न्मधो. र्घृतस्य धारया- कीलालेन मणि. स्सह।। 25।।

卐 यमबध्ना. द्बृहस्पति- र्देवेभ्यो असुरक्षितिम्। स^ माऽयं मणि. राऽगम- दूर्जया पयसा सह- द्रविणेन श्रिया सह।। 26।।

卐 यमबध्ना. द्बृहस्पति- र्देवेभ्यो असुरक्षितिम्। स^ माऽयं मणि. राऽगम- त्तेजसा त्विष्या सह- यशसा कीर्त्या सह।। 27।।

卐 यमबध्ना. द्बृहस्पति- र्देवेभ्यो असुरक्षितिम्। स॑ माऽयं मणि. राऽगम-त्सर्वाभि. र्भूतिभि. स्सह।। 28।।

卐 तमिम. न्देवता॑ मणिं- मह्य.न्ददतु पुष्टये। अभिभु.ङ्क्षत्रवर्धनं-सपत्नदम्भनं मणिम्।। 29।।

卐 ब्रह्मणा तेजसा सह- प्रति मुञ्चामि मे शिवम्। असपत्न. स्सपत्नहा-सपत्ना. न्मेऽधराꣳ अकः।। 30।

卐 उत्तर. न्द्विषतो मा.मयं- मणिꣳ कृणोतु देवजाः। यस्य लोका॑ इमे त्रयꣳ- पयो दुग्ध.मुपाऽऽसते। स॑ माऽय. मधि रोहतु- मणि. श्श्रैष्ठ्याय मूर्धतः।। 31।

卐 यन्देवाꣳ पितरो मनुष्या॑- उपजीवन्ति सर्वदा। स॑ माऽय. मधि रोहतु-मणि. श्श्रैष्ठ्याय मूर्धतः।। 32।।

卐 यथा बीज. मुर्वराया- ङ्कृष्टे फालेन रोहति। एवा मयि प्रजा पशवो-ऽन्नमन्नँ वि रोहतु।। 33।।

卐 यस्मै त्वा यज्ञवर्धन- मणे प्रत्यमुचं शिवम्। तन्त्वं शतदक्षिण- मणे श्रैष्ठ्याय जिन्वतात्।। 34।।

卐 एत. मिध्मं समाहित-ञ्जुषाणो अग्ने प्रति हर्य होमैः। तस्मि. न्विदेम सुमतिं स्वस्ति- प्रजा.ञ्चक्षुः पशू. न्त्समिद्धे- जातवेदसि ब्रह्मणा।। 35।।

### दशम काण्डे चतुर्थोऽनुवाकः

10-04-01

卐 कस्मि. न्नङ्गे तपो अस्याऽधि तिष्ठति- कस्मि. न्नङ्ग ऋत. मस्याऽध्याहितम्। क्व व्रत.ङ्क श्रद्धाऽस्य तिष्ठति- कस्मि. न्नङ्गे सत्य. मस्य प्रतिष्ठितम्।। 1।।

卐 कस्मा. दङ्गा. द्दीप्यते अग्नि.रस्य- कस्मा.दङ्गा. त्पवते मातरिश्वा। कस्मा. दङ्गा.द्वि मिमीतेऽधि चन्द्रमा- मह. स्स्कम्भस्य मिमानो अङ्गम्।। 2।।

卐 कस्मि. न्नङ्गे तिष्ठति भूमि. रस्य- कस्मि. न्नङ्गे तिष्ठ.त्यन्तरिक्षम्। कस्मि.न्नङ्गे तिष्ठ.त्याहिता द्यौः- कस्मि.न्नङ्गे तिष्ठ.त्युत्तर. न्दिवः।। 3।।

卐 क्व1(अ)प्रेप्स. न्दीप्यत ऊर्ध्वो अग्निः- क्व1(अ)प्रेप्स. न्पवते मातरिश्वा। यत्र प्रेप्सन्ती. रभिय.न्त्यावृत- स्स्कम्भ.न्तं ब्रूहि कतम. स्स्वि.देव सः।। 4।।

卐 क्वाऽर्धमासाः क्व यन्ति मासा- स्संवत्सरेण सह संविदानाः। यत्र य.न्त्यृतवो यत्राऽऽर्तवा- स्स्कम्भ.न्तं ब्रूहि कतम. स्स्वि.देव सः।। 5।।

卐 क1(अ)प्रेप्सन्ती युवती विरूपे~- अहोरात्रे~ द्रवत. स्सँविदाने~। यत्र प्रेप्सन्ती. रभिय.न्त्याप- स्स्कम्भ.न्तं ब्रूहि कतम. स्स्वि.देव सः।। 6।।

卐 यस्मि.न्त्स्तब्ध्वा प्रजापति- र्लोका. न्त्सर्वा॒ अधारयत्। स्कम्भ. न्तं ब्रूहि कतम. स्स्वि.देव सः।। 7।।

卐 यत्परम. मवमँ यच्च मध्यमं- प्रजापति. स्ससृजे विश्वरूपम्। कियता. स्कम्भः प्र विवेश तत्र- यन्न प्राऽविश त्किय.त्तद्बभूव।। 8।।

卐 कियता स्कम्भः प्र विवेश भूत-ङ्किय.द्भविष्य.दन्वाशयेऽस्य। एकँ यदङ्ग. मकृणो. त्सहस्रधा- कियता स्कम्भः प्र विवेश तत्र।। 9।।

卐 यत्र लोकांश्च कोशांश्चा-ऽऽपो ब्रह्म जना^ विदुः। असच्च यत्र सच्चाऽन्त- स्स्कम्भ. न्तं ब्रूहि कतम. स्स्वि.देव सः।। 10।।

卐 यत्र तपः पराक्रम्य- व्रत. न्धारय त्युत्तरम्। ऋतञ्च यत्र श्रद्धा चा-ऽऽपो ब्रह्म समाहिता- स्स्कम्भ. न्तं ब्रूहि कतम. स्स्वि.देव सः।। 11।।

卐 यस्मि. न्भूमि. रन्तरिक्ष- न्द्यौ. र्यस्मि. न्नध्याहिता। यत्राग्नि. श्चन्द्रमा. स्सूर्यो- वात. स्तिष्ठ.न्त्यार्पिता- स्स्कम्भ. न्तं ब्रूहि कतम. स्स्वि.देव सः।। 12।।

卐 यस्य त्रयस्त्रिंश. द्देवा^- अङ्गे सर्वे समाहिताः। स्कम्भ. न्तं ब्रूहि कतम. स्स्वि.देव सः।। 13।।

卐 यत्र ऋषयः प्रथमजा^- ऋच. स्साम यजु. र्मही। एकर्षि. र्यस्मि.न्नार्पित- स्स्कम्भ. न्तं ब्रूहि कतम. स्स्वि.देव सः।। 14।।

卐 यत्राऽमृतञ्च मृत्युश्च- पुरुषेऽधि समाहिते। समुद्रो यस्य नाड्य1(अः)- पुरुषेऽधि समाहिता- स्स्कम्भ. न्तं ब्रूहि कतम. स्स्वि.देव सः।। 15।।

卐 यस्य चतस्रः प्रदिशो- नाड्य1(अ)स्तिष्ठन्ति प्रथमाः। यज्ञो यत्र पराक्रान्त- स्स्कम्भ. न्तं ब्रूहि कतम. स्स्वि.देव सः।। 16।।

卐 ये पुरुषे ब्रह्म विदु- स्ते विदुः परमेष्ठिनम्। यो वेद परमेष्ठिनँ- यश्च वेद प्रजापतिम्। ज्येष्ठँ ये ब्राह्मणँ विदु-स्ते स्कम्भ. मनुसँविदुः।। 17।।

卐 यस्य शिरो वैश्वानर- श्चक्षु. रङ्गिरसोऽभवन्न्। अङ्गानि यस्य यातव- स्स्कम्भ. न्तं ब्रूहि कतम. स्स्वि.देव सः।। 18।।

卐 यस्य ब्रह्म मुख. माहु- र्जिह्वां मधुकशा. मुत। विराज. मूधो यस्याऽऽहु- स्स्कम्भ. न्तं ब्रूहि कतम. स्स्वि.देव सः।। 19।।

卐 यस्मा.दृचो अपातक्षन्- यजु र्यस्मा. दपाकषन्न्। सामानि यस्य लोमा- न्यथर्वाङ्गिरसो मुखं- स्कम्भ. न्तं ब्रूहि कतम. स्स्वि.देव सः।। 20।।

卐 असच्छाखां प्रतिष्ठन्तीं- परम.मिव जना^ विदुः। उतो सन्मन्यन्तेऽवरे-
ये ते शाखा. मुपाऽऽसते।। 21।।

卐 यत्राऽऽदित्याश्च रुद्राश्च- वसवश्च समाहिताः। भूतञ्च यत्र भव्यञ्च- सर्वे
लोकाः प्रतिष्ठिता- स्स्कम्भ. न्तं ब्रूहि कतम. स्स्वि.देव सः।। 22।।

卐 यस्य त्रयस्त्रिंश. द्देवा^- निधिं रक्षन्ति सर्वदा। निधि. न्तमद्य को वेद-
यन्देवा^ अभिरक्षथ।। 23।।

卐 यत्र देवा^ ब्रह्मविदो- ब्रह्म ज्येष्ठ. मुपाऽऽसते। यो वै तान् विद्या. त्प्रत्यक्षं-
स^ ब्रह्मा वेदिता स्यात्।। 24।।

卐 बृहन्तो नाम ते देवा^- येऽसतः परि जज्ञिरे। एक. न्तदङ्गं स्कम्भस्या-
ऽस.दाहुः परो जनाः।। 25।।

卐 यत्र स्कम्भः प्रजनय- न्पुराणँ व्यवर्तयत्। एक. न्तदङ्गं स्कम्भस्य-
पुराण. मनुसँविदुः।। 26।।

卐 यस्य त्रयस्त्रिंश.द्देवा^- अङ्गे गात्रा^ विभेजिरे। तान् वै त्रयस्त्रिंश. द्देवा.-
नेके ब्रह्मविदो विदुः।। 27।।

卐 हिरण्यगर्भं परम- मनत्युद्य.ञ्जना^ विदुः। स्कम्भ. स्तदग्रे प्राऽसिञ्च-
द्धिरण्यँ लोके अन्तरा।। 28।।

卐 स्कम्भे लोका. स्स्कम्भे तप- स्स्कम्भेऽध्यृत. माहितम्। स्कम्भं त्वा वेद प्रत्यक्ष- मिन्द्रे सर्वं समाहितम्।। 29।।

卐 इन्द्रे लोका^ इन्द्रे तप^- इन्द्रेऽध्यृत. माहितम्। इन्द्र.न्त्वा वेद प्रत्यक्षं- स्कम्भे सर्वं प्रतिष्ठितम्।। 30।।

卐 नाम नाम्ना जोहवीति- पुरा सूर्या.त्पुरोषसः। यदजः प्रथमं सम्बभूव- स^ ह तत्स्वराज्य. मियाय- यस्मा. न्नान्य. त्पर.मस्ति भूतम्।। 31।।

卐 यस्य भूमिः प्रमा-ऽन्तरिक्ष. मुतोदरम्। दिवँ य.श्चक्रे मूर्धान- न्तस्मै ज्येष्ठाय ब्रह्मणे नमः।। 32।।

卐 यस्य सूर्य. श्चक्षु- श्चन्द्रमाश्च पुनर्णवः। अग्निँ यश्चक्र आस्य1(अ)-न्तस्मै ज्येष्ठाय ब्रह्मणे नमः।। 33।।

卐 यस्य वातः प्राणापानौ- चक्षु. रङ्गिरसोऽभवन्न्। दिशो यश्चक्रे प्रज्ञानी- स्तस्मै ज्येष्ठाय ब्रह्मणे नमः।। 34।।

卐 स्कम्भो दाधार द्यावापृथिवी~ उभे~ इमे~- स्कम्भो दाधारोर्व1(अ)न्तरिक्षम्। स्कम्भो दाधार प्रदिश. ष्षडुर्वी- स्स्कम्भ^ इदँ विश्वं भुवन.मा विवेश।। 35।।

卐 य.श्श्रमा. त्तपसो जातो- लोका. न्त्सर्वा. न्त्समानशे। सोमँ यश्चक्रे केवल- न्तस्मै ज्येष्ठाय ब्रह्मणे नमः।। 36।।

卐 कथँ वातो नेलयति- कथ.न्न रमते मनः। कि.माप. स्सत्यं प्रेप्सन्ती- र्नेलयन्ति कदा चन।। 37।।

卐 मह. द्यक्षं भुवनस्य मध्ये- तपसि क्रान्तं सलिलस्य पृष्ठे। तस्मि. न्छ्रयन्ते य उ के च देवा^- वृक्षस्य स्कन्धः परित^इव शाखाः।। 38।।

卐 यस्मै हस्ताभ्यां पादाभ्याँ- वाचा श्रोत्रेण चक्षुषा। यस्मै देवा. स्सदा बलिं- प्रयच्छन्ति विमितेऽमितं- स्कम्भ.न्तं ब्रूहि कतम. स्स्वि.देव सः।। 39।।

卐 अप तस्य हत. न्तमो- व्यावृत्त. स्स^ पाप्मना। सर्वाणि तस्मि. न्ज्योतींषि- यानि त्रीणि प्रजापतौ।। 40।।

卐 यो वेतसं हिरण्यय- न्तिष्ठन्तं सलिले वेद। स^ वै गुह्यः प्रजापतिः।। 41।।

卐 तन्त्र. मेके युवती~ विरूपे~- अभ्याक्रामँ वयत.ष्षण्मयूखम्। प्रान्या तन्तूं.स्तिरते धत्ते अन्या- नाप वृञ्जाते~ न गमातो अन्तम्।। 42।।

卐 तयो. रहं परिनृत्यन्त्यो.रिव- न वि जानामि यतरा परस्तात्। पुमा. नेन. द्वय. त्युद्गृणत्ति- पुमा. नेन. द्विजभाराऽधि नाके।। 43।।

卐 इमे मयूखा^ उप तस्तभु. र्दिवं- सामानि चक्रु. स्तसराणि वातवे।। 44।।-

10-04-02

卐 यो भूतञ्च भव्यञ्च- सर्वं यश्चाऽधितिष्ठति। स्व1(अ)र्यस्य च केवल- न्तस्मै ज्येष्ठाय ब्रह्मणे नमः।। 1।।

卐 स्कम्भेनेमे~ विष्टभिते~- द्यौश्च भूमिश्च तिष्ठतः। स्कम्भ^ इदं सर्व. मात्मन्व- द्यत्प्राण. न्निमिषच्च यत्।। 2।।

卐 तिस्रो ह प्रजा^ अत्याय माय-न्न्य1(अ)न्या^ अर्क. मभितोऽविशन्त। बृहन्ह तस्थौ रजसो विमानो- हरितो हरिणी. राविवेश।। 3।।

卐 द्वादश प्रधय. श्चक्र. मेक- न्त्रीणि नभ्यानि क^ उ तच्चिकेत। तत्राऽऽहता. स्त्रीणि शतानि शङ्कव- ष्षष्टिश्च खीला^ अविचाचला^ ये।। 4।।

卐 इदं सवित. र्विजानीहि- षड्यमा^ एक एकजः। तस्मि न्हापित्व. मिच्छन्ते- य^ एषा मेक^ एकजः।। 5।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 आवि. स्सन्निहित.ङ्गुहा- जर.न्नाम मह. त्पदम्। तत्रेदं सर्व मार्पित- मेज. त्प्राण. त्प्रतिष्ठितम्।। 6।।

卐 एकचक्रँ वर्तत एकनेमि- सहस्राक्षरं प्र पुरो नि पश्चा। अर्धेन विश्वं भुवन.ञ्जजान- यदस्यार्ध.ङ्क1(अ)त.द्बभूव।। 7।।

卐 पञ्चवाही वह. त्यग्र. मेषां- प्रष्टयो युक्ता^ अनु.सँवहन्ति। अयातमस्य दद्दृशे न यातं- पर. न्नेदीयोऽवर. न्दवीयः।। 8।।

卐 तिर्यग्बिल. श्चमस^ ऊर्ध्वबुध्न- स्तस्मिन् यशो निहितँ विश्वरूपम्। तदासत ऋषय. स्सप्त साकँ- ये अस्य गोपा^ महतो बभूवुः।। 9।।

卐 या पुरस्ता. द्युज्यते या च पश्चा-द्या विश्वतो युज्यते या च सर्वतः। यया यज्ञः प्राङ्गायते- तान्त्वा पृच्छामि कतमा सर्चाम्।। 10।।

卐 यदेजति पतति यच्च तिष्ठति- प्राण.दप्राण. न्निमिषच्च यद्भुवत्। तद्दाधार पृथिवीँ विश्वरूप- न्त.त्सम्भूय भव. त्येकमेव।। 11।।

卐 अनन्तँ विततं पुरुत्राऽनन्त- मन्तव.च्चासमन्ते। ते नाकपाल. श्चरति विचिन्व-न्विद्वा. न्भूत. मुत भव्य.मस्य।। 12।।

卐 प्रजापति. श्चरति गर्भे अन्त-रदृश्यमानो बहुधा विजायते। अर्धेन विश्वं भुवन.ञ्जजान- यदस्याऽर्ध.ङ्कतम.स्स^ केतुः।। 13।।

卐 ऊर्ध्वं भरन्त. मुदक-ङ्कुम्भेनेवोदहार्यम्। पश्यन्ति सर्वे चक्षुषा- न सर्वे मनसा विदुः।। 14।।

卐 दूरे पूर्णेन वसति- दूर ऊनेन हीयते। मह.द्यक्षं भुवनस्य मध्ये- तस्मै बलिं राष्ट्रभृतो भरन्ति।। 15।।

卐 यत. स्सूर्य^ उदे-त्यस्तँ यत्र च गच्छति। तदेव मन्येऽह.ञ्ज्येष्ठ- न्तदु नात्येति किञ्चन।। 16।।

卐 ये अर्वा.ङ्मध्य उत वा पुराणँ- वेदँ विद्वांस. मभितो वदन्ति। आदित्य.मेव ते परि वदन्ति- सर्वे अग्नि. न्द्वितीय. न्त्रिवृत.ञ्च हंसम्।। 17।।

卐 सहस्राह्णयँ वियता.वस्य पक्षौ- हरे. र्हंसस्य पतत. स्स्वर्गम्। स^ देवा.न्त्सर्वा. नुरस्युपदद्य- संपश्य. न्याति भुवनानि विश्वा।। 18।।

卐 सत्येनोर्ध्व. स्तपति- ब्रह्मणाऽर्वा.ङ्विपश्यति। प्राणेन तिर्य.ङ्प्राणति- यस्मि.न्ज्येष्ठ. मधिश्रितम्।। 19।।

卐 यो वै ते विद्या. दरणी~- याभ्या. न्निर्मथ्यते वसु। स^ विद्वा.न्ज्येष्ठं मन्येत- स^ विद्या. द्ब्राह्मणं महत्।। 20।।

卐 अपा. दग्रे समभव-त्सो अग्रे स्व1(अ)राऽभरत्। चतुष्पा.द्भूत्वा भोग्य-स्सर्व. माऽदत्त भोजनम्।। 21।।

卐 भोग्यो भव- दथो~अन्न. मद.द्बहु। यो देव. मुत्तरावन्त- मुपासातै सनातनम्।। 22।

卐 सनातन. मेन. माहु-रुताऽद्य स्या.त्पुनर्णवः। अहोरात्रे~ प्र जायेते~-अन्यो अन्यस्य रूपयोः।। 23।।

卐 शतं सहस्र. मयुत. न्न्यर्बुद- मसङ्ख्येयं स्व.मस्मि. न्निविष्टम्। तदस्य घ्नन्त्यभिपश्यत^ एव- तस्मा. द्देवो रोचत एष^ एतत्।। 24।।

卐 बाला. देक. मणीयस्क- मुतैक. न्नेव दृश्यते। ततः परिष्वजीयसी-देवता सा मम प्रिया।। 25।।

卐 इय.ङ्कल्याण्य1(अ)जरा- मर्त्यस्याऽमृता गृहे। यस्मै कृता शये- स^ यश्चकार जजार सः।। 26।।

卐 त्वं स्त्री त्वं पुमा.नसि- त्वङ्कुमार^ उत वा कुमारी। त्वञ्जीर्णो दण्डेन वञ्चसि- त्व.ञ्जातो भवसि विश्वतोमुखः।। 27।।

卐 उतैषां पितोत वा पुत्र^ एषा- मुतैषा.ञ्ज्येष्ठ^ उत वा कनिष्ठः। एको ह देवो मनसि प्रविष्टः- प्रथमो जात. स्स^ उ गर्भे अन्तः।। 28।।

卐 पूर्णा. त्पूर्णं. मुदचति- पूर्णं पूर्णेन सिच्यते। उतो तदद्य विद्याम- यत.
स्त.त्परिषिच्यते।। 29।।

卐 एषा सनत्नी सन.मेव जा-तैषा पुराणी परि सर्वं बभूव। मही
देव्यु1(उ)षसो विभाती- सैकेनैकेन मिषता विचष्टे।। 30।।

卐 अवि.र्वै नाम देव-तर्तेना$ऽ$स्ते परीवृता। तस्या^ रूपेणेमे वृक्षा^- हरिता^
हरितस्रजः।। 31।।

卐 अन्ति सन्त.न्न जहा-त्यन्ति सन्त.न्न पश्यति। देवस्य पश्य काव्य-न्न
ममार न जीर्यति।। 32।

卐 अपूर्वेणेषिता वाच- स्ता^ वदन्ति यथायथम्। वदन्ती. र्यत्र गच्छन्ति-
तदाहु. र्ब्राह्मणं महत्।। 33।।

卐 यत्र देवाश्च मनुष्या-श्चारा^ नाभा.विव श्रिताः। अपा.न्त्वा पुष्पं पृच्छामि-
यत्र तन्मायया हितम्।। 34।।

卐 येभि. र्वात^ इषितः प्रवाति- ये ददन्ते पञ्च दिश. स्सध्रीचीः। य आहुति.
मत्यमन्यन्त देवा^- अपा. न्नेतारः कतमे त आसन्न्।। 35।।

卐 इमा. मेषां पृथिवीं वस्त^ एको-ऽन्तरिक्षं पर्येको बभूव। दिव. मेषा.न्ददते
यो विधर्ता- विश्वा^ आशाः प्रति रक्ष.न्त्येके।। 36।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 यो वि॒द्या. त्सूत्रँ॒ विततँ॒- यस्मि॒ न्नोताः॒ प्र॒जा॑ इ॒माः। सूत्रं॒ सूत्र॒स्य॒ यो वि॒द्या- त्स वि॒द्या.द्ब्राह्मणं म॒हत्।। 37।।

卐 वेदा॒ऽहं सूत्रँ॒ विततँ॒- यस्मि॒.न्नोताः॒ प्र॒जा॑ इ॒माः। सूत्रं॒ सूत्र॒स्या॒ऽहँ वे॒दा- ऽथो॒~ यद्ब्राह्मणं म॒हद्।। 38।।

卐 यद॒न्त॒रा द्यावापृथि॒वी~ अ॒ग्नि.रै-त्प्र॒दह. न्विश्वदा॒व्यः। यत्राऽति॒ष्ठ. न्नेकपत्नीः॒ प॒रस्ता॒- त्क्वेवाऽऽसी. न्मात॒रिश्वा त॒दानीम्।। 39।।

卐 अ॒प्स्वासी. न्मात॒रिश्वा॒ प्रविष्टः॒- प्रविष्टा दे॒वा॑ स्सलि॒ला. न्यासन्न्। बृ॒ह.न्ह तस्थौ॒ रजसो वि॒मा॒नः॒- पवमानो ह॒रि॒त॑ आ विवेश।। 40।।

卐 उत्तरेणेव गाय॒त्री-मम॒मृते॒ऽधि वि चक्रमे। साम्ना॒ ये साम सँवि॒दु-र॒ज. स्त.द्द॒दृशे॒ क्व।। 41।।

卐 नि॒वेशन. स्स॒ङ्गम॒नो॒ वसूना- न्दे॒व॑इव सवि॒ता स॒त्यधर्मा। इन्द्रो॒ न तस्थौ स॒मरे धनानाम्।। 42।।

卐 पुण्डरीक॒. न्नवद्वार- न्त्रि॒भि. गु॒णेभि॒. रावृतम्। तस्मि॒.न्यद्य॒क्ष. मात्म॒न्व- त्तद्वै ब्र॒ह्मविदो विदुः।। 43।।

卐 अकामो धीरो अमृत.स्स्वयम्भू- रसेन तृप्तो न कुतश्चनोनः। तमेव विद्वा.न्न बिभाय मृत्यो- रात्मान.न्धीर. मजरँ युवानम्।। 44।। इति चतुर्थोऽनुवाकः

## दशम काण्डे पञ्चमोऽनुवाकः

10-05-01

卐 अघायता.मपि नह्या मुखानि- सपत्नेषु वज्र. मर्पयैतम्। इन्द्रेण दत्ता प्रथमा शतौदना- भ्रातृव्यघ्नी यजमानस्य गातुः।। 1।।

卐 वेदिष्टे चर्म भवतु- बर्हि. र्लोमानि यानि ते। एषा त्वा रशनाऽग्रभी-द्ग्रावा त्वैषोऽधि नृत्यतु।। 2।।

卐 बाला.स्ते प्रोक्षणी. स्सन्तु- जिह्वा संमार्ष्ट्वघ्न्ये। शुद्धा त्वँ यज्ञिया भूत्वा-दिवं प्रेहि शतौदने।। 3।।

卐 यश्शतौदनां पचति- कामप्रेण स कल्पते। प्रीता ह्यस्यर्त्विज- स्सर्वे यन्ति यथायथम्।। 4।।

卐 स स्वर्ग.मा रोहति- यत्राद. स्त्रिदिव. न्दिवः। अपूपनाभि.ङ्कृत्वा- यो ददाति शतौदनाम्।। 5।।

卐 स^ ता.न्लोका.न्त्समाप्नोति- ये दिव्या^ ये च पार्थिवाः। हिरण्यज्योतिष.

ङ्कृत्वा- यो ददाति शतौदनाम्।। 6।।

卐 ये ते देवि शमितारः- पक्तारो ये च ते जनाः। ते त्वा सर्वे गोप्स्यन्ति-

मैभ्यो भैषी. श्शतौदने।। 7।।

卐 वसव.स्त्वा दक्षिणत^- उत्तरा. न्मरुत.स्त्वा। आदित्याः पश्चा.

द्गोप्स्यन्ति- साऽग्निष्टोम. मति द्रव।। 8।।

卐 देवाः पितरो मनुष्या- गन्धर्वाऽप्सरस.श्च ये। ते त्वा सर्वे गोप्स्यन्ति-

साऽतिरात्र. मति द्रव।। 9।।

卐 अन्तरिक्ष. न्दिवं भूमि- मादित्या. न्मरुतो दिशः। लोका.न्त्स^ सर्वा.

नाप्नोति- यो ददाति शतौदनाम्।। 10।।

卐 घृतं प्रोक्षन्ती सुभगा- देवी देवा. न्गमिष्यति। पक्तार. मघ्न्ये मा हिंसी-

र्दिवं प्रेहि शतौदने।। 11।।

卐 ये देवा दिविषदो- अन्तरिक्षसद.श्च ये- ये चेमे भूम्या.मधि। तेभ्य.

स्त्व.न्धुक्ष्व सर्वदा- क्षीरं सर्पि. रथो~ मधु।। 12।।

卐 यत्ते शिरो यत्ते मुखँ- यौ कर्णौ ये च ते हनू~। आमिक्षा. न्दुह्रता. न्दात्रे-

क्षीरं सर्पि. रथो~ मधु।। 13।।



Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 यौ त ओष्ठौ ये नासिके ये शृङ्गे ये च तेऽक्षिणी। आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु॥ 14॥

卐 यत्ते क्लोमा यद्धृदयं पुरीतत्सहकण्ठिका। आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु॥ 15॥

卐 यत्ते यकृद्ये मतस्ने यदान्त्रं याश्च ते गुदाः। आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु॥ 16॥

卐 यस्ते प्लाशिर्यो वनिष्ठुर्यौ कुक्षी यच्च चर्म ते। आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु॥ 17॥

卐 यत्ते मज्जा यदस्थि यन्मांसं यच्च लोहितम्। आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु॥ 18॥

卐 यौ ते बाहू ये दोषणी यावंसौ या च ते ककुत्। आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु॥ 19॥

卐 यास्ते ग्रीवा ये स्कन्धा याः पृष्टीर्याश्च पर्शवः। आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु॥ 20॥

卐 यौ त ऊरू अष्ठीवन्तौ ये श्रोणी या च ते भसत्। आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु॥ 21॥



Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 यत्ते पुच्छँ ये ते बाला^- यदूधो ये च ते स्तनाः। आमिक्षा. न्दुह्रता. न्दात्रे- क्षीरं सर्पि. रथो~मधु।। 22।।

卐 यास्ते जङ्घा याः कुष्ठिका^- ऋच्छरा^ ये च ते शफाः। आमिक्षा. न्दुह्रता. न्दात्रे- क्षीरं सर्पि. रथो~ मधु।। 23।।

卐 यत्ते चर्म शतौदने- यानि लोमा.न्यघ्न्ये। आमिक्षा. न्दुह्रता. न्दात्रे- क्षीरं सर्पि. रथो~ मधु।। 24।।

卐 क्रोडौ ते स्तां पुरोडाशा-वाज्येनाऽभिघारितौ। तौ पक्षौ देवि कृत्वा- सा पक्तार. न्दिवँ वह।। 25।।

卐 उलूखले मुसले यश्च चर्मणि- यो वा शूर्पे तण्डुलः कणः। यँ वा वातो मातरिश्वा पवमानो ममाथा-ऽग्नि.ष्ट.द्धोता सुहुत.ङ्कृणोतु।। 26।।

卐 अपो देवी. र्मधुमती र्घृतश्चुतो- ब्रह्मणां हस्तेषु प्रपृथ.क्सादयामि। यत्काम^ इद. मभिषिञ्चामि वोऽह- न्तन्मे सर्वं सं पद्यताँ- वयं स्याम पतयो रयीणाम्।। 27।।-

10-05-02

卐 नमस्ते जायमानायै- जाताया उत ते नमः। बालेभ्य. श्शफेभ्यो- रूपायाऽघ्न्ये ते नमः।। 1।।

卐 यो विद्या. त्सप्त प्रवतः स्सप्त विद्या. त्परावतः। शिरो यज्ञस्य यो विद्या-
त्स^ वशां प्रति गृह्णीयात्।। 2।।

卐 वेदाऽहं सप्त प्रवतः स्सप्त वेद परावतः। शिरो यज्ञस्याऽहँ वेद-
सोम.ञ्चाऽस्याँ विचक्षणम्।। 3।।

卐 यया द्यौ. र्यया पृथिवी- ययाऽऽपो गुपिता^ इमाः। वशां सहस्रधारां-
ब्रह्मणाऽच्छाऽऽवदामसि।। 4।।

卐 शत.ङ्कंसा. श्शत. न्दोग्धार- श्शत.ङ्गोप्तारो अधि पृष्ठे अस्याः। ये देवा.
स्तस्यां प्राणन्ति- ते वशाँ विदु. रेकधा।। 5।।

卐 यज्ञप.दीराक्षीरा- स्वधाप्राणा महीलुका। वशा पर्जन्यपत्नी- देवा॒
अप्येति ब्रह्मणा।। 6।।

卐 अनु त्वाऽग्निः प्राऽविश- दनु सोमो वशे त्वा। ऊध.स्ते भद्रे पर्जन्यो-
विद्युत.स्ते स्तना^ वशे।। 7।।

卐 अप.स्त्व. न्धुक्षे प्रथमा- उर्वरा अपरा वशे। तृतीयं राष्ट्र. न्धुक्षे-ऽन्न. ङ्क्षीरँ
वशे त्वम्।। 8।।

卐 यदादित्यै. र्हूयमा-नोपातिष्ठ^ ऋतावरि। इन्द्र. स्सहस्रं पात्रा- न्त्सोम.
न्त्वाऽपायय. द्वशे।। 9।।

卐 यदनूचीन्द्र. मैरा-त्त्व ऋषभोऽह्वयत्। तस्मा.त्ते वृत्रहा पयः-क्षीर.ङ्क्रुद्धोऽहर. द्वशे।। 10।।

卐 यत्ते क्रुद्धो धनपति- राक्षीर. महर द्वशे। इद. न्तदद्य नाक- स्त्रिषु पात्रेषु रक्षति।। 11।।

卐 त्रिषु पात्रेषु तं सोम- मा देव्यहर. द्वशा। अथर्वा यत्र दीक्षितो-बर्हिष्या.स्त हिरण्यये।। 12।।

卐 सं हि सोमेनाऽगत- समु सर्वेण पद्वता। वशा समुद्र. मध्यष्ठा- द्गन्धर्वैः कलिभि. स्सह।। 13।।

卐 सं हि वातेनाऽगत- समु सर्वैः पतत्रिभिः। वशा समुद्रे प्राऽनृत्य- दृच. स्सामानि बिभ्रती।। 14।।

卐 सं हि सूर्येणाऽगत- समु सर्वेण चक्षुषा। वशा समुद्र. मत्यख्य- द्भद्रा ज्योतींषि बिभ्रती।। 15।।

卐 अभीवृता हिरण्येन- यदतिष्ठ^ ऋतावरि। अश्व. स्समुद्रो भूत्वा-ऽध्यस्कन्द. द्वशे त्वा।। 16।।

卐 तद्भद्रा. स्समगच्छन्त- वशा देष्ट्र्यथो~स्वधा। अथर्वा यत्र दीक्षितो-बर्हि.ष्यास्त हिरण्यये।। 17।।

卐 वशा माता राजन्यस्य- वशा माता स्वधे तव। वशाया^ यज्ञ^ आयुध-न्तत.श्चित्त. मजायत।। 18।।

卐 ऊर्ध्वो बिन्दु. रुदचर- द्ब्रह्मणः ककुदा. दधि। तत.स्त्व.ञ्जज्ञिषे वशे- ततो होताऽजायत।। 19।।

卐 आस्न.स्ते गाथा^ अभव- न्नुष्णिहाभ्यो बलँ वशे। पाजस्या.ज्जज्ञे यज्ञ-स्स्तनेभ्यो रश्मय. स्तव।। 20।।

卐 ईर्माभ्या. मयन.ञ्जातं- सक्थिभ्या.ञ्च वशे तव। आन्त्रेभ्यो जज्ञिरे अत्रा^-उदरा.दधि वीरुधः।। 21।।

卐 यदुदरँ वरुणस्या-ऽनुप्राविशथा^ वशे। तत.स्त्वा ब्रह्मोदह्वय- त्स^ हि नेत्र. मवेत्तव।। 22।।

卐 सर्वे गर्भा. दवेपन्त- जायमाना. दसूस्वः। ससूव हि ता.माहु- र्वशेति ब्रह्मभिः क्लृप्त- स्स^ ह्यस्या^ बन्धुः।। 23।।

卐 युध^ एक. स्सं सृजति- यो अस्या^ एक इ.द्वशी। तरांसि यज्ञा^ अभव-न्तरसा.ञ्चक्षु. रभव. द्वशा।। 24।।

卐 वशा यज्ञं प्रत्यगृह्णा- द्वशा सूर्य. मधारयत्। वशाया. मन्त. रविश-दोदनो ब्रह्मणा सह।। 25।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 वशा. मेवाऽमृत.माहु- र्वशां मृत्यु. मुपाऽऽसते। वशेदं सर्व. मभव- द्देवा^ मनुष्या3(आ) असुराः- पितर^ ऋषयः।। 26।।

卐 य^ एवँ विद्या-त्स^ वशां प्रति गृह्णीयात्। तथा हि यज्ञ. स्सर्वपा- द्दुहे दात्रेऽनपस्फुरन्न्।। 27।।

卐 तिस्रो जिह्वा^ वरुणस्या-ऽन्तर्दीद्य.त्यासनि। तासाँ या मध्ये राजति- सा वशा दुष्प्रतिग्रहा।। 28।।

卐 चतुर्धा रेतो- अभव द्वशायाः। आप. स्तुरीय- ममृत. न्तुरीयँ- यज्ञ. स्तुरीयं- पशव. स्तुरीयम्।। 29।।

卐 वशा द्यौ. र्वशा पृथिवी- वशा विष्णुः प्रजापतिः। वशाया^ दुग्ध. मपिब- न्त्साध्या^ वसवश्च ये।। 30।।

卐 वशाया^ दुग्धं पीत्वा- साध्या^ वसवश्च ये। ते वै ब्रध्नस्य विष्टपि- पयो अस्या^ उपाऽऽसते।। 31।।

卐 सोम. मेना. मेके दुह्रे- घृत मेक उपाऽऽसते। य एवँ विदुषे वशा. न्ददु- स्ते गता. स्त्रिदिव. न्दिवः।। 32।।

卐 ब्राह्मणेभ्यो वशा. न्दत्त्वा- सर्वा. न्लोका. न्त्समश्नुते। ऋतं ह्यस्या^ माऽर्पित- मपि ब्रह्माऽथो~ तपः।। 33।।

卐 वशा. न्देवा उप जीवन्ति- वशां मनुष्या उत। वशेदं सर्व. मभव-
द्याव.त्सूर्यो विपश्यति।। 34।। दशमं काण्डम् समाप्तम्

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

# ॐएकादशं काण्डम्

## ॐ एकादश काण्डे प्रथमोऽनुवाकः

11-01-01

卐 अग्ने जायस्वाऽदिति. र्नाथितेयं- ब्रह्मौदनं पचति पुत्रकामा। सप्तऋषयो भूतकृत- स्ते त्वा मन्थन्तु प्रजया सहेह।। 1।।

卐 कृणुत धूमं वृषण. स्सखायो-ऽद्रोघाविता वाच. मच्छ। अय मग्निः पृतनाषाट्त्सुवीरो- येन देवा^ असहन्त दस्यून्।। 2।।

卐 अग्नेऽजनिष्ठा^ महते वीर्याय- ब्रह्मौदनाय पक्तवे जातवेदः। सप्तऋषयो भूतकृत. स्ते त्वाऽजीजन- न्नस्यै रयिं सर्ववीर. न्नियच्छ।। 3।।

卐 समिद्धो अग्ने समिधा समिध्यस्व- विद्वा. न्देवा.न्यज्ञिया॰ एह वक्षः। तेभ्यो हवि. श्श्रपय. न्जातवेद^- उत्तम. न्नाक. मधि रोहयेमम्।। 4।।

卐 त्रेधा भागो निहितो यः पुरा वो- देवानां पितृणां मर्त्यानाम्। अंशा.न्जानीध्वं वि भजामि तान् वो- यो देवानां स^ इमां पारयाति।। 5।।

卐 अग्ने सहस्वा.नभिभू. रभी.दसि- नीचो न्युब्ज द्विषत. स्सपत्नान्। इयं मात्रा मीयमाना मिता च- सजातांस्ते बलिहृतः कृणोतु।। 6।।

卐 साकं सजातैः पयसा सहै-ध्युदुब्जैनां महते वीर्याय। ऊर्ध्वो नाकस्याऽधि रोह विष्टपं- स्वर्गो लोक^ इति यँ वदन्ति।। 7।।

卐 इयं मही प्रति गृह्णातु चर्म- पृथिवी देवी सुमनस्यमाना। अथ गच्छेम सुकृतस्य लोकम्।। 8।।

卐 एतौ ग्रावाणौ सयुजा युङ्ग्धि चर्मणि- निर्भिन्ध्यंशून् यजमानाय साधु। अवघ्नती नि जहि य^ इमां पृतन्यव^- ऊर्ध्वं प्रजा. मुद्भर. न्त्युदूह।। 9।।

卐 गृहाण ग्रावाणौ सकृतौ वीर हस्त- आ ते देवा^ यज्ञिया^ यज्ञ. मगुः। त्रयो वरा यतमां.स्त्वँ वृणीषे- तास्ते समृद्धी. रिह राधयामि।। 10।।

卐 इय.न्ते धीति. रिद.मु ते जनित्र- ङ्गृह्णातु त्वा.मदिति. श्शूरपुत्रा। परा पुनीहि य इमां पृतन्यवो-ऽस्यै रयिं सर्ववीर. न्नियच्छ।। 11।।

卐 उपश्वसे द्रुवये सीदता यूयँ- वि विच्यध्वँ यज्ञियास. स्तुषैः। श्रिया समाना.नति सर्वा.न्त्स्यामा-ऽधस्पद. न्द्विषत. स्पादयामि।। 12।।

卐 परेहि नारि पुन. रेहि क्षिप्र- मपा.न्त्वा गोष्ठोऽध्यरुक्ष.द्भराय। तासा.ङ्गृह्णीता.द्यतमा यज्ञिया^- अस. न्विभाज्य धीरीतरा जहीतात्।। 13।।

卐 एमा^ अगु. र्योषित. श्शुम्भमाना^- उत्तिष्ठ नारि तवसं रभस्व। सुपत्नी पत्या प्रजया प्रजाव-त्या त्वाऽग.न्यज्ञः प्रति कुम्भ.ङ्गृभाय।। 14।।

卐 ऊर्जो भागो निहितो यः पुरा व^- ऋषिप्रशिष्टाऽप आ भरैताः। अयँ यज्ञो गातुवि.न्नाथवि-त्प्रजावि. दुग्रः पशुवि. द्वीरवि.द्वो अस्तु।। 15।।

卐 अग्ने चरु. र्यज्ञिय. स्त्वाऽध्यरुक्ष-च्छुचि. स्तपिष्ठ. स्तपसा तपैनम्। आर्षेया^ दैवा^ अभिसङ्गत्य भाग- मिम. न्तपिष्ठा^ ऋतुभि. स्तपन्तु।। 16।।

卐 शुद्धाः पूता^ योषितो यज्ञिया^- इमा^ आप. श्चरु. मव सर्पन्तु शुभ्राः। अदुः प्रजां बहुला. न्पशू.न्नः- पक्तौदनस्य सुकृता. मेतु लोकम्।। 17।।

卐 ब्रह्मणा शुद्धा^ उत पूता^ घृतेन- सोमस्यांशव. स्तण्डुला^ यज्ञिया^ इमे। अपः प्र विशत प्रति गृह्णातु व.श्चरु- रिमं पक्त्वा सुकृता. मेत लोकम्।। 18।।

卐 उरुः प्रथस्व महता महिम्ना- सहस्रपृष्ठ. स्सुकृतस्य लोके। पितामहाः पितरः प्रजोपजा-ऽहं पक्ता पञ्चदश.स्ते अस्मि।। 19।।

卐 सहस्रपृष्ठ. श्शतधारो अक्षितो- ब्रह्मौदनो देवयान. स्स्वर्गः। अमूंस्त आ दधामि प्रजया- रेषयैना. न्बलिहाराय मृडता.न्मह्य मेव।। 20।।

Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 उदेहि वेदिं प्रजया वर्धयैना-न्नुदस्व रक्षः प्रतर. न्धेह्येनाम्। श्रिया समाना. नति सर्वा. न्त्स्यामा-ऽधस्पद. न्द्विषत. स्पादयामि।। 21।।

卐 अभ्यावर्तस्व पशुभि. स्सहैनां- प्रत्यङ्ङेना. न्देवताभि. स्सहैधि। मा त्वा प्राप. च्छपथो माऽभिचार- स्स्वे क्षेत्रे अनमीवा^ वि राज।। 22।।

卐 ऋतेन तष्टा मनसा हितैषा- ब्रह्मौदनस्य विहिता वेदि. रग्रे। अंसध्रीं शुद्धा. मुप धेहि नारि- तत्रौदनं सादय दैवानाम्।। 23।।

卐 अदिते. र्हस्तां स्रुच. मेता. न्द्वितीयां- सप्तऋषयो भूतकृतो या.मकृण्वन्न्। सा गात्राणि विदु-ष्योदनस्य दर्वि. र्वेद्या. मध्येन.श्चिनोतु।। 24।।

卐 श्रृत.न्त्वा हव्य. मुप सीदन्तु दैवा^- निस्सृप्याऽग्नेः पुन. रेना. न्प्रसीद। सोमेन पूतो जठरे सीद ब्रह्मणा- मार्षेया.स्ते मा रिष. न्प्राशितारः।। 25।।

卐 सोम राज. न्त्संज्ञान मा वपैभ्य- स्सुब्राह्मणा^ यतमे त्वोपसीदान्। ऋषी. नार्षेयां.स्तपसोऽधि जाता- न्ब्रह्मौदने सुहवा जोहवीमि।। 26।।

卐 शुद्धाः पूता^ योषितो यज्ञिया^ इमा^- ब्रह्मणां हस्तेषु प्रपृथ.क्सादयामि। यत्काम^ इद मभिषिञ्चामि वोऽह- मिन्द्रो मरुत्वा. न्त्स^ ददा. दिदं मे।। 27।।

卐 इदं मे ज्योति. रमृतं हिरण्यं- पक्क.क्षेत्रा. त्कामदुघा म एषा। इद न्धन. न्निदधे ब्राह्मणेषु- कृण्वे पन्थां पितृषु य.स्स्वर्गः।। 28।।

卐 अग्नौ तुषा नावप जातवेदसि- परः कम्बूकाँ अप मृड्ढि दूरम्। एतं शुश्रुम गृहराजस्य भाग- मथो~ विद्म निर्ऋते. र्भागधेयम्।। 29।।

卐 श्राम्यतः पचतो विद्धि सुन्वतः- पन्थां स्वर्ग. मधि रोहयैनम्। येन रोहा. त्पर. मापद्य यद्वय^- उत्तम. न्नाकं परमँ व्योम।। 30।।

卐 बभ्रे. रध्वर्यो~ मुख. मेत द्वि मृ-ड्ढ्याज्याय लोक.ङ्कृणुहि प्रविद्वान्। घृतेन गात्राऽनु सर्वा वि मृड्ढि- कृण्वे पन्थां पितृषु य.स्स्वर्गः।। 31।।

卐 बभ्रे रक्ष. स्समद् मा वपैभ्यो-ऽब्राह्मणा यतमे त्वोपसीदान्। पुरीषिणः प्रथमानाः पुरस्ता- दार्षेया.स्ते मा रिष. न्प्राशितारः।। 32।।

卐 आर्षेयेषु नि दध ओदन त्वा- नानार्षेयाणा. मप्यस्त्यत्र। अग्नि.र्मे गोप्ता मरुतश्च सर्वे- विश्वे देवा^ अभि रक्षन्तु पक्कम्।। 33।।

卐 यज्ञ. न्दुहानं सद. मित्प्रपीनं- पुमांस न्धेनुं सदनं रयीणाम्। प्रजाऽमृतत्व. मुत दीर्घ. मायू- रायश्च पोषै. रुप त्वा सदेम।। 34।।

卐 वृषभोऽसि स्वर्ग^- ऋषी. नार्षेया. न्गच्छ। सुकृतां लोके सीद- तत्र नौ संस्कृतम्।। 35।।

卐 समाचिनुष्वाऽनुसंप्रया-ह्यग्ने पथः कल्पय देवयानान्। एतैः स्सुकृतै. रनु गच्छेम यज्ञ- न्नाके तिष्ठन्त. मधि सप्तरश्मौ।। 36।।

卐 येन देवा^ ज्योतिषा द्या. मुदाय- न्ब्रह्मौदनं पक्त्वा सुकृतस्य लोकम्। तेन गेष्म सुकृतस्य लोकं- स्व.रारोहन्तो अभि नाक. मुत्तमम्।। 37।।-

11-01-02

卐 भवाशर्वौ मृडतं माऽभि यातं- भूतपती~ पशुपती~ नमो वाम्। प्रतिहिता. मायतां मा वि स्राष्टं- मा नो हिंसिष्ट.न्द्विपदो मा चतुष्पदः।। 1।।

卐 शुने क्रोष्ट्रे मा शरीराणि कर्त-मलिक्लवेभ्यो गृध्रेभ्यो ये च कृष्णा^ अविष्यवः। मक्षिका.स्ते पशुपते वयांसि ते- विघसे मा विदन्त।। 2।।

卐 क्रन्दाय ते प्राणाय- याश्च ते भव रोपयः। नमस्ते रुद्र कृण्म- स्सहस्राक्षायाऽमर्त्य।। 3।।

卐 पुरस्ता.त्ते नमः कृण्म^- उत्तरा. दधरा. दुत। अभीवर्गा. द्दिव. स्प- र्यन्तरिक्षाय ते नमः।। 4।।

卐 मुखाय ते पशुपते- यानि चक्षूंषि ते भव। त्वचे रूपाय सन्दृशे- प्रतीचीनाय ते नमः।। 5।।

卐 अङ्गेभ्य.स्त उदराय- जिह्वाया आस्याय ते। दद्भ्यो गन्धाय ते नमः।। 6।।

卐 अस्त्रा नीलशिखण्डेन- सहस्राक्षेण वाजिना। रुद्रेणाऽर्धकघातिना- तेन मा समरामहि।। 7।।

卐 स^ नो भवः परि वृणक्तु विश्वत^- आप^ इवाग्निः परि वृणक्तु नो भवः। मा नोऽभि मांस्त- नमो अस्त्वस्मै।। 8।।

卐 चतु.र्नमो अष्टकृत्वो भवाय- दशकृत्वः पशुपते नमस्ते। तवेमे पञ्च पशवो विभक्ता^- गावो अश्वाः पुरुषा^ अजावयः।। 9।।

卐 तव चतस्रः प्रदिश. स्तव द्यौ - स्तव पृथिवी तवेद. मुग्रोर्व1(अ) न्तरिक्षम्। तवेदं सर्व. मात्मन्व - द्यत्प्राण. त्पृथिवी. मनु।। 10।।

卐 उरुः कोशो वसुधान. स्तवायँ- यस्मि. न्निमा विश्वा भुवना.न्यन्तः। स^ नो मृड पशुपते नमस्ते- परः क्रोष्टारो अभिभा. श्वानः- परो यन्त्वघरुदो विकेश्यः।। 11।।

卐 धनु. र्बिभर्षि हरितं हिरण्ययं- सहस्रघ्नि शतवधं शिखण्डिन्न्। रुद्रस्येषु. श्चरति देवहेति- स्तस्यै नमो यतमस्यां दिशी3(इ)तः।। 12।।

卐 यो3(ओ)ऽभियातो निलयते- त्वां रुद्र निचिकीर्षति। पश्चा. दनु प्रयुङ्क्षे तँ- विद्धस्य पदनी रिव।। 13।।

卐 भवारुद्रौ सयुजा सँविदाना-वुभा.वुग्रौ चरतो वीर्याय। ताभ्या.न्नमो यतमस्या. न्दिशी3(इ)तः।। 14।।

卐 नमस्तेऽस्त्वायते- नमो अस्तु परायते। नमस्ते रुद्र तिष्ठत- आसीनायोत ते नमः।। 15।।

卐 नम स्साय. न्नमः प्रात- र्नमो रात्र्या नमो दिवा। भवाय च शर्वाय- चोभाभ्या. मकर. न्नमः।। 16।।

卐 सहस्राक्ष. मतिपश्यं पुरस्ता- द्रुद्र. मस्यन्तं बहुधा विपश्चितम्। मोपाराम जिह्वयेयमानम्।। 17।।

卐 श्यावाश्व.ङ्कृष्ण. मसितं मृणन्तं- भीमं रथ.ङ्केशिनः पादयन्तम्। पूर्वे प्रतीमो नमो अस्त्वस्मै।। 18।।

卐 मा नोऽभिस्रा. मत्य. न्देवहेतिं- मा नः क्रुधः पशुपते नमस्ते। अन्यत्राऽस्म. द्दिव्यां शाखाँ वि धूनु।। 19।।

卐 मा नो हिंसी.रधि नो ब्रूहि- परिणो वृङ्धि मा क्रुधः। मा त्वया समरामहि।। 20।।

卐 मा नो गोषु पुरुषेषु- मा गृधो नो अजाविषु। अन्यत्रोग्र वि वर्तय-पियारूणां प्रजा.ञ्जहि।। 21।।

卐 यस्य तक्मा कासिका हेति. रेक- मश्वस्येव वृषण॰ क्रन्द^ एति। अभिपूर्व. न्निर्णयते- नमो अस्त्वस्मै।। 22।।

卐 यो3(ओ)ऽन्तरिक्षे तिष्ठति विष्टभितो-ऽयज्वन॰ प्रमृण. न्देवपीयून्। तस्मै नमो दशभि. श्शक्करीभिः।। 23।।

卐 तुभ्य. मारण्या॰ पशवो मृगा^ वने- हिता^ हंसा. स्सुपर्णा. श्शकुना^ वयांसि। तव यक्षं पशुपते अप्स्व1(अ)न्त- स्तुभ्य.क्ष्करन्ति दिव्या^ आपो वृधे।। 24।।

卐 शिंशुमारा^ अजगरा॰ पुरीकया- जषा^ मत्स्या^ रजसा येभ्यो अस्यसि। न ते दूर.न्न परिष्ठाऽस्ति ते भव- सद्य. स्सर्वा. न्परि पश्यसि भूमिं- पूर्वस्मा. द्धंस्युत्तरस्मि. न्त्समुद्रे।। 25।।

卐 मा नो रुद्र तक्मना मा विषेण- मा न.स्संस्रा दिव्येनाऽग्निना। अन्यत्राऽस्म. द्विद्युतं पातयैताम्।। 26।।

卐 भवो दिवो भव^ ईशे पृथिव्या^- भव^ आ पप्र उर्व1(अ)न्तरिक्षम्। तस्मै नमो यतमस्या. न्दिशी3(इ)तः।। 27।।

卐 भव राजन् यजमानाय मृड- पशूनां हि पशुपति. र्बभूथ। यश्श्रद्दधाति सन्ति देवा^ इति- चतुष्पदे द्विपदेऽस्य मृड।। 28।।

卐 मा नो महान्त. मुत मा नो अर्भकं- मा नो वहन्त. मुत मा नो वक्ष्यतः। मा नो हिंसीः पितरं मातरञ्च- स्वा.न्तन्वं रुद्र मा रीरिषो नः।। 29।।

卐 रुद्रस्यैलबकारेभ्यो-ऽसंसूक्तगिलेभ्यः। इदं महाऽऽस्येभ्य- श्श्वभ्यो अकर.न्नमः।। 30।।

卐 नमस्ते घोषिणीभ्यो- नमस्ते केशिनीभ्यः। नमो नमस्कृताभ्यो- नम स्संभुञ्जतीभ्यः।। नमस्ते देव सेनाभ्य- स्स्वस्ति नो अभयञ्च नः।। 31।।

इति प्रथमोऽनुवाकः

## एकादश काण्डे द्वितीयोऽनुवाकः

11-02-01

卐 तस्यौदनस्य बृहस्पति. श्शिरो- ब्रह्म मुखम्।। 1।।

卐 द्यावापृथिवी~ श्रोत्रे~- सूर्याचन्द्रमसा. वक्षिणी~- सप्तऋषयः प्राणापानाः।। 2।।

卐 चक्षु. र्मुसल-ङ्काम^ उलूखलम्।। 3।।

卐 दिति. श्शूर्प- मदिति. श्शूर्पग्राही- वातोऽपाविनक्।। 4।।

卐 अश्वाः कणा॒ - गाव. स्तण्डुला- मशका. स्तुषाः।। 5।।

卐 कब्रु फलीकरणा- श्शरोऽभ्रम्।। 6।।

卐 श्याम मयोऽस्य मांसानि- लोहित मस्य लोहितम्।। 7।।

卐 त्रपु भस्म- हरितँ वर्णः- पुष्कर. मस्य गन्धः।। 8।।

卐 खलः पात्रं- स्फ्या.वंसा-वीषे~ अनूक्ये~।। 9।।

卐 आन्त्राणि जत्रवो- गुदा॒ वरत्राः।। 10।।

卐 इय. मेव पृथिवी कुम्भी भवति- राध्यमान.स्यौदनस्य- द्यौ. रपिधानम्।। 11।।

卐 सीताः पर्शव- स्सिकता॒ ऊबध्यम्।। 12।।

卐 ऋतं हस्तावनेजन-ङ्कुल्योपसेचनम्।। 13।।

卐 ऋचा कुम्भ्यधिहिता-ऽऽर्त्विज्येन प्रेषिता।। 14।।

卐 ब्रह्मणा परिगृहीता- साम्ना पर्यूढा।। 15।।

卐 बृह. दायवनं- रथन्तर. न्दर्विः।। 16।।

卐 ऋतवः पक्तार॒- आर्तवा. स्समिन्धते।। 17।।

卐 चरुं पञ्चबिल.मुखं- घर्मो3(ओ)ऽभीन्धे।। 18।।

卐 ओदनेन यज्ञवच- स्सर्वे लोका. स्समाप्याः।। 19।।

卐 यस्मि॑. न्त्समु॒द्रो द्यौ. र्भूमि॒- स्त्रयो॑ऽवरप॒रं श्रि॒ताः।। 20।।

卐 यस्य॑ दे॒वा^ अक॑ल्प॒न्तोच्छि॑ष्टे॒ षड॑शी॒तयः॑।। 21।।

卐 तन्त्वौ॑द॒नस्य॑ पृच्छामि॒- यो अ॑स्य मह॒िमा म॒हान्।। 22।।

卐 स^ य^ ओ॑द॒नस्य॑ मह॒िमानँ॑ वि॒द्यात्।। 23।।

卐 नाल्प॒^ इति॑ ब्रूया॒- न्नानु॑पसेच॒न^- इति॒ नेदञ्च॒ किञ्चेति॑।। 24।।

卐 याव॑. द्दाताऽभि॑मन॒स्येत॒- तन्नाऽति॑ वदेत्।। 25।।

卐 ब्र॒ह्म॒वा॒दिनो॑ वद॒न्ति॒- परा॑ञ्च. मोद॒नं प्राशी3ः प्र॒त्यञ्चा3मिति॑।। 26।।

卐 त्वमो॑द॒नं प्राशी3- स्त्वा.मो॑द॒ना3 इति॑।। 27।।

卐 परा॑ञ्चं चैन॒ं प्राशी॑ः- प्रा॒णा.स्त्वा॑ हास्य॒न्ती.त्ये॑न. माह।। 28।।

卐 प्र॒त्यञ्च॑. ञ्चैन॒ं प्राऽऽशी॑- रपा॒नास्त्वा॑ हास्य॒न्ती.त्ये॑न. माह।। 29।।

卐 नैवाऽह. मो॑द॒न-न्न मा.मो॑द॒नः।। 30।।

卐 ओ॒द॒न^ ए॒वौद॒नं प्राशी॑त्।। 31।।-

11-02-02

卐 तत॑. श्चैन. म॒न्ये॑न शी॒र्ष्णा प्राऽऽशी॒- र्ये॑न चै॒तं पूर्व॒ ऋष॑यः प्राऽऽश्नन्।
ज्ये॒ष्ठ॒त.स्ते॑ प्र॒जा म॑रिष्यती.त्ये॑न. माह। तँ॑ वा अ॒ह. न्नाऽर्वाञ्च॒.न्न परा॑ञ्च॒.न्न
प्र॒त्यञ्च॑म्। बृह॒स्पति॑ना शी॒र्ष्णा। तेनै॑न॒ं प्राऽशि॒ष- न्तेनै॑न. मजीगमम्। ए॒ष^

वा ओदन- स्सर्वाङ्ग. स्सर्वपरु. स्सर्वतनूः। सर्वाङ्ग^ एव सर्वपरु. स्सर्वतनू. स्सं भवति- य^ एवँ वेद।। 32।।

卐 तत. श्चैन. मन्याभ्यां श्रोत्राभ्यां प्राऽऽशी. यभ्यिा.ञ्चैतं पूर्व ऋषयः प्राऽऽश्नन्न्। बधिरो भविष्यसी.त्येन माह। तँ वा अह.न्नाऽर्वाञ्च.न्न पराञ्च. न्न प्रत्यञ्चम्। द्यावापृथिवीभ्यां श्रोत्राभ्याम्। ताभ्या.मेनं प्राऽशिष-न्ताभ्या.मेन. मजीगमम्। एष^ वा ओदन. स्सर्वाङ्ग. स्सर्वपरु. स्सर्वतनूः। सर्वाङ्ग^ एव सर्वपरु. स्सर्वतनू. स्सं भवति- य^ एवँ वेद।। 33।।

卐 तत. श्चैन. मन्याभ्या. मक्षीभ्यां प्राऽऽशी- यभ्यिाञ्चैतं पूर्व ऋषयः प्राऽऽश्नन्न्। अन्धो भविष्यसी.त्येन. माह। तँ वा अह.न्नाऽर्वाञ्च.न्न पराञ्च.न्न प्रत्यञ्चम्। सूर्याचन्द्रमसाभ्या. मक्षीभ्याम्। ताभ्या.मेनं प्राऽशिष-न्ताभ्या.मेन. मजीगमम्। एष^ वा ओदन. स्सर्वाङ्ग. स्सर्वपरु. स्सर्वतनूः। सर्वाङ्ग^ एव सर्वपरु. स्सर्वतनू. स्सं भवति- य^ एवँ वेद।। 33।।

卐 तत. श्चैन. मन्येन मुखेन प्राऽऽशी- येन चैतं पूर्व ऋषयः प्राऽऽश्नन्न्। मुखत.स्ते प्रजा मरिष्यती.त्येन. माह। तँ वा卐 अह. न्नाऽर्वाञ्च.न्न पराञ्च. न्न प्रत्यञ्चम्। ब्रह्मणा मुखेन। तेनैनं प्राशिष न्तेनैन मजीगमम्। एष^ वा

ओदन. स्सर्वाङ्ग. स्सर्वपरु. स्सर्वतनूः। सर्वाङ्ग^ एव सर्वपरु. स्सर्वतनू. स्सं भवति- य^ एवँ वेद।। 35।।

卐 तत श्चैन मन्यया जिह्वया प्राऽऽशी- र्यया चैतं पूर्व ऋषयः प्राऽऽश्नन्न्। जिह्वा ते मरिष्यती.त्येन. माह। तँ वा अह. न्नाऽर्वाञ्च.न्न पराञ्च. न्न प्रत्यञ्चम्। अग्ने. र्जिह्वया। तयैनं प्राऽशिष- न्तयैन. मजीगमम्। एष^ वा ओदन. स्सर्वाङ्ग. स्सर्वपरु. स्सर्वतनूः। सर्वाङ्ग^ एव सर्वपरु. स्सर्वतनू. स्सं भवति- य^ एवँ वेद।।

卐 तत. श्चैन. मन्यै. र्दन्तैः प्राऽऽशी- र्यैश्चैतं पूर्व ऋषयः प्राऽऽश्नन्न्। दन्ता.स्ते शत्स्यन्ती.त्येन माह। तँ वा अह.न्नाऽर्वाञ्च.न्न पराञ्च.न्न प्रत्यञ्चम्। ऋतुभि.र्दन्तैः। तैरेनं प्राऽशिष- न्तै.रेन. मजीगमम्। एष^ वा ओदन. स्सर्वाङ्ग. स्सर्वपरु. स्सर्वतनूः। सर्वाङ्ग^ एव सर्वपरु. स्सर्वतनू. स्सं भवति- य^ एवँ वेद।। 37।।

卐 तत. श्चैन. मन्यैः प्राणापानैः प्राऽऽशी- र्यै.श्चैतं पूर्व ऋषयः प्राऽऽश्नन्न्। प्राणापाना.स्त्वा हास्यन्ती.त्येन. माह। तँ वा अह.न्नाऽर्वाञ्च.न्न पराञ्च.न्न प्रत्यञ्चम्। सप्तऋषिभिः प्राणापानैः। तैरेनं प्राऽशिष- न्तैरेन. मजीगमम्।

एष॑ वा ओ॑द॒न. स्सर्वा॑ङ्ग॒. स्सर्व॑परु॒. स्सर्व॑तनूः। सर्वा॑ङ्ग॑ ए॒व सर्व॑परु॒. स्सर्व॑तनू॒. स्सं भ॑वति॒- य॑ ए॒वँ वे॑द्।। 37।।

卐 तत॑. श्चैन. म॒न्येन॒ व्यच॑सा॒ प्रा॒ऽऽशी॒- र्यैन॑ चै॒तं पूर्व॒ ऋष॑य॒ः प्रा॒ऽऽश्नन्न्। रा॒ज॒य॒क्ष्म.स्त्वा॑ हनिष्य॒ती.त्ये॑न. माह। तँ वा अ॒ह. न्नाऽर्वाञ्च॒.न्न परा॑ञ्च॒. न्न प्र॒त्य॑ञ्चम्। अ॒न्तरि॑क्षेण॒ व्यच॑सा। तेनै॑न॒ं प्राऽशिष॒. न्तेनै॑न. मजीगमम्। ए॒ष॑ वा ओ॑द॒न. स्सर्वा॑ङ्ग॒. स्सर्व॑परु॒. स्सर्व॑तनूः। सर्वा॑ङ्ग॑ ए॒व सर्व॑परु॒. स्सर्व॑तनू॒. स्सं भ॑वति॒- य॑ ए॒वँ वे॑द्।। 39।।

卐 तत॑.श्चैन म॒न्येन॑ पृष्ठे॒न प्रा॒ऽऽशी॒- र्यैन॑ चै॒तं पूर्व॒ ऋष॑य॒ः प्रा॒ऽऽश्नन्न्। वि॒द्युत्त्वा॑ हनिष्य॒ती.त्ये॑न. माह। तँ वा अ॒ह.न्नाऽर्वाञ्च॒.न्न परा॑ञ्च॒.न्न प्र॒त्य॑ञ्चम्। दि॒वा पृ॒ष्ठेन॑। तेनै॑न॒ं प्राऽशिष॒- न्तेनै॑न. मजीगमम्। ए॒ष॑ वा ओ॑द॒न. स्सर्वा॑ङ्ग॒. स्सर्व॑परु॒. स्सर्व॑तनूः। सर्वा॑ङ्ग॑ ए॒व सर्व॑परु॒. स्सर्व॑तनू॒. स्सं भ॑वति॒- य॑ ए॒वँ वे॑द्।।

卐 तत॑. श्चैन. म॒न्येनोर॑सा॒ प्रा॒ऽऽशी॒- र्यैन॑ चै॒तं पूर्व॒ ऋष॑य॒ः प्रा॒ऽऽश्नन्न्। कृष्या न रा॑त्स्य॒सी.त्ये॑न.माह। तँ वा अ॒ह.न्नाऽर्वाञ्च॒.न्न परा॑ञ्च॒.न्न प्र॒त्य॑ञ्चम्। पृ॒थि॒व्योर॑सा। तेनै॑न॒ं प्राऽशिष॒- न्तेनै॑न. मजीगमम्। ए॒ष॑ वा ओ॑द॒न.

स्सर्वाङ्. स्सर्वपरु. स्सर्वतनूः। सर्वाङ्ग^ एव सर्वपरु. स्सर्वतनू. स्सं भवति- य^ एवँ वेद।। 41।।

卐 तत. श्चैन. मन्येनोदरेण प्राऽऽशी- र्येन चैतं पूर्व ऋषयः प्राऽऽश्नन्न्। उदरदार.स्त्वा हनिष्यती.त्येन. माह। तँ वा अह.न्नाऽर्वाञ्च.न्न पराञ्च.न्न प्रत्यञ्चम्। सत्येनोदरेण। तेनैनं प्राऽशिष- न्तेनैन. मजीगमम्। एष^ वा ओदन. स्सर्वाङ्. स्सर्वपरु. स्सर्वतनूः। सर्वाङ्ग^ एव सर्वपरु. स्सर्वतनू. स्सं भवति- य^ एवँ वेद।।

卐 तत. श्चैन. मन्येन वस्तिना प्राऽऽशी- र्येन चैतं पूर्व ऋषयः प्राऽऽश्नन्न्। अप्सु मरिष्यसी.त्येन. माह। तँ वा अह.न्नाऽर्वाञ्च.न्न पराञ्च.न्न प्रत्यञ्चम्। समुद्रेण वस्तिना। तेनैनं प्राऽशिष- न्तेनैन. मजीगमम्। एष^ वा ओदन. स्सर्वाङ्. स्सर्वपरु. स्सर्वतनूः। सर्वाङ्ग^ एव सर्वपरु. स्सर्वतनू. स्सं भवति- य^ एवँ वेद।।

卐 तत. श्चैन. मन्याभ्या. मूरुभ्यां प्राऽऽशी- र्याभ्या.श्चैतं पूर्व ऋषयः प्राऽऽश्नन्न्। ऊरू~ ते मरिष्यत^ इत्येन. माह। तँ वा अह.न्नाऽर्वाञ्च.न्न पराञ्च.न्न प्रत्यञ्चम्। मित्रावरुणयो. रूरुभ्याम्। ताभ्या.मेनं प्राऽशिष-

न्ताभ्या.मेन. मजीगमम्। एष^ वा ओदन. स्सर्वाङ्ग. स्सर्वपरु. स्सर्वतनूः। सर्वाङ्ग^ एव सर्वपरु. स्सर्वतनू. स्सं भवति- य^ एवँ वेद।।

卐 तत. श्चैन. मन्याभ्या. मष्ठीवद्भ्यां प्राऽऽशी- र्याभ्या.श्चैतं पूर्व ऋषयः प्राऽऽश्नन्न्। स्त्रामो भविष्यसी.त्येन. माह। तँ वा अह.न्नार्वाञ्च.न्न पराञ्च.न्न प्रत्यञ्चम्। त्वष्टु. रष्ठीवद्भ्याम्। ताभ्या.मेनं प्राऽशिष- न्ताभ्या.मेन. मजीगमम्। एष^ वा ओदन. स्सर्वाङ्ग. स्सर्वपरु. स्सर्वतनूः। सर्वाङ्ग^ एव सर्वपरु. स्सर्वतनू. स्सं भवति- य^ एवँ वेद।।

卐 तत. श्चैन. मन्याभ्यां पादाभ्यां प्राऽऽशी- र्याभ्या.श्चैतं पूर्व ऋषयः प्राऽऽश्नन्न्। बहुचारी भविष्यसी.त्येन. माह। तँ वा अह.न्नाऽर्वाञ्च.न्न पराञ्च.न्न प्रत्यञ्चम्। अश्विनोः पादाभ्याम्। ताभ्या.मेनं प्राऽशिष- न्ताभ्या.मेन. मजीगमम्। एष^ वा ओदन. स्सर्वाङ्ग. स्सर्वपरु. स्सर्वतनूः। सर्वाङ्ग^ एव सर्वपरु. स्सर्वतनू. स्सं भवति- य^ एवँ वेद।। 46।।

卐 तत. श्चैन.मन्याभ्यां प्रपदाभ्यां प्राऽऽशी- र्याभ्या.श्चैतं पूर्व ऋषयः प्राऽऽश्नन्न्। सर्प.स्त्वा हनिष्यती.त्येन. माह। तँ वा अह.न्नार्वाञ्च.न्न पराञ्च.न्न प्रत्यञ्चम्। सवितुः प्रपदाभ्याम्। ताभ्या.मेनं प्राऽशिष- न्ताभ्या.मेन.

मजीगमम्। एष^ वा ओदन. स्सर्वाङ्ग. स्सर्वपरु. स्सर्वतनूः। सर्वाङ्ग^ एव सर्वपरु. स्सर्वतनू. स्सं भवति- य^ एवँ वेद।। 47।।

卐 तत. श्चैन. मन्याभ्यां हस्ताभ्यां प्राऽऽशी- र्याभ्या.श्चैतं पूर्व ऋषयः प्राऽऽश्नन्। ब्राह्मणं हनिष्यसी.त्येन. माह। तँ वा अह.न्नाऽर्वाञ्च.न्न पराञ्च.न्न प्रत्यञ्चम्। ऋतस्य हस्ताभ्याम्। ताभ्या.मेनं प्राऽशिष- न्ताभ्या.मेन. मजीगमम्। एष^ वा ओदन. स्सर्वाङ्ग. स्सर्वपरु. स्सर्वतनूः। सर्वाङ्ग^ एव सर्वपरु. स्सर्वतनू. स्सं भवति- य^ एवँ वेद।। 48।।

卐 तत. श्चैन. मन्यया प्रतिष्ठया प्राऽऽशी- र्यया चैतं पूर्व ऋषयः प्राऽऽश्नन्। अप्रतिष्ठानोऽनायतनो मरिष्यसी.त्येन. माह। तँ वा अह.न्नार्वाञ्च.न्न पराञ्च.न्न प्रत्यञ्चम्। सत्ये प्रतिष्ठाय। तयैनं प्राऽशिष- न्तयैन. मजीगमम्। एष^ वा ओदन. स्सर्वाङ्ग. स्सर्वपरु. स्सर्वतनूः। सर्वाङ्ग^ एव सर्वपरु. स्सर्वतनू. स्सं भवति- य^ एवँ वेद।। 49।।

11-02-02

卐 एतद्वै ब्रध्नस्य विष्टपँ- यदोदनः।। 50।।

卐 ब्रध्नलोको भवति- ब्रध्नस्य विष्टपि श्रयते- य^ एवँ वेद।। 51।।

卐 एतस्मा.द्वा ओदना- त्त्रयस्त्रिंशतँ लोका- न्निरमिमीत प्रजापतिः।। 52।।

卐 तेषां प्रज्ञानाय यज्ञ. मसृजत।। 53।।

卐 स^ य^ एवँ विदुष^ उपद्रष्टा भवति- प्राणं रुणद्धि।। 54।।

卐 न च प्राणं रुणद्धि सर्वज्यानि.ञ्जीयते।। 55।।

卐 न च सर्वज्यानि.ञ्जीयते- पुरैन.ञ्जरसः प्राणो जहाति।। 56।।-

11-02-03

卐 प्राणाय नमो- यस्य सर्व. मिदँ वशे। यो भूत. स्सर्वस्येश्वरो- यस्मि.न्त्सर्वं प्रतिष्ठितम्।। 1।।

卐 नमस्ते प्राण क्रन्दाय- नमस्ते स्तनयित्नवे। नमस्ते प्राण विद्युते- नमस्ते प्राण वर्षते।। 2।।

卐 यत्प्राण स्स्तनयित्नुना-ऽभिक्रन्द.त्योषधीः। प्रवीयन्ते गर्भा. न्दधते-ऽथो~ बह्वी. र्वि जायन्ते।। 3।।

卐 यत्प्राण^ ऋता.वागते-ऽभिक्रन्द.त्योषधीः। सर्व.न्तदा प्रमोदते- यत्किञ्च भूम्या. मधि।। 4।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 यदा प्राणो अभ्यवर्षी- द्वर्षेण पृथिवीं महीम्। पशव.स्त.त्प्र मोदन्ते- महो वै नो भविष्यति।। 5।।

卐 अभिवृष्टा^ ओषधय॰- प्राणेन समवादिरन्न्। आयुर्वै न॰ प्रा॰तीतर- स्सर्वा^ न.स्सुरभी.रकः।। 6।।

卐 नमस्ते अस्त्वायते- नमो अस्तु परायते। नमस्ते प्राण तिष्ठत- आसीनायोत ते नमः।। 7।।

卐 नमस्ते प्राण प्राणते- नमो अस्त्वपानते। पराचीनाय ते नम॰- प्रतीचीनाय ते नम- स्सर्वस्मै त इद.न्नमः।। 8।।

卐 या ते प्राण प्रिया तनू- र्यो~ ते प्राण प्रेयसी। अथो~ यद्भेषज. न्तव- तस्य नो धेहि जीवसे।। 9।।

卐 प्राण॰ प्रजा^ अनु वस्ते- पिता पुत्र मिव प्रियम्। प्राणो ह सर्वस्येश्वरो- यच्च प्राणति यच्च न।। 10।।

卐 प्राणो मृत्यु॰ प्राण. स्तक्मा- प्राण. न्देवा^ उपाऽऽसते। प्राणो ह सत्यवादिन- मुत्तमे लोक आ दधत्।। 11।।

卐 प्राणो विरा.ड्प्राणो देष्ट्री- प्राणं सर्व उपाऽऽसते। प्राणो ह सूर्य.श्चन्द्रमा॰- प्राण. माहु॰ प्रजापतिम्।। 12।।



Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 प्राणापानौ व्रीहियवा-वनड्वा.न्प्राण^ उच्यते। यवे ह प्राण^ आहितो-
ऽपानो व्रीहि. रुच्यते।। 13।।

卐 अपानति प्राणति- पुरुषो गर्भे अन्तरा। यदा त्वं प्राण जिन्व-स्यथ स^
जायते पुनः।। 14।।

卐 प्राण. माहु. र्मातरिश्वानँ- वातो ह प्राण^ उच्यते। प्राणे ह भूतं भव्यञ्च-
प्राणे सर्वं प्रतिष्ठितम्।। 15।।

卐 आथर्वणी.राङ्गिरसी- र्दैवी. र्मनुष्यजा^ उत। ओषधयᳶ प्र जायन्ते- यदा
त्वं प्राण जिन्वसि।। 16।।

卐 यदा प्राणो अभ्यवर्षी- द्वर्षेण पृथिवीं महीम्। ओषधयᳶ प्र जायन्ते-
ऽथो~ याᳵ काश्च वीरुधः।। 17।।

卐 यस्ते प्राणेदँ वेद- यस्मिं.श्चाऽसि प्रतिष्ठितः। सर्वे तस्मै बलिं हरा-
नमुष्मिं. ल्लोक उत्तमे।। 18।।

卐 यथा प्राण बलिहृत- स्तुभ्यं सर्वाᳶ प्रजा^ इमाः। एवा तस्मै बलिं हरान्-
यस्त्वा श्रृणव.त्सुश्रवः।। 19।।

卐 अन्त. र्गर्भ. श्चरति देवता-स्वाभूतो भूत. स्स^ उ जायते पुनः। स^ भूतो
भव्यं भविष्य- त्पिता पुत्रं प्र विवेशा शचीभिः।। 20।।

卐 एकं पाद. न्नोत्खिदति- सलिला.द्धंस^ उच्चरन्न्। यदङ्ग स^ तमुत्खिदे-न्नैवाऽद्य न श्वस्स्या-न्न रात्री नाऽह. स्स्या.न्न व्युच्छे.त्कदा चन।। 21।।

卐 अष्टाचक्रँ वर्तत एकनेमि- सहस्राक्षरं प्र पुरो नि पश्चा। अर्धेन विश्वं भुवन.ञ्जजान- यदस्यार्ध.ङ्कतम. स्स^ केतुः।। 22।।

卐 यो अस्य विश्वजन्मन^- ईशे विश्वस्य चेष्टतः। अन्येषु क्षिप्रधन्वने- तस्मै प्राण नमोऽस्तु ते।। 23।।

卐 यो अस्य सर्वजन्मन^- ईशे सर्वस्य चेष्टतः। अतन्द्रो ब्रह्मणा धीरꣳ-प्राणो माऽनु तिष्ठतु।। 24।।

卐 ऊर्ध्व. स्सुप्तेषु जागार- न्ननु तिर्य.ङ्नि पद्यते। न सुप्त. मस्य सुप्ते-ष्वनु शुश्राव कश्चन।। 25।।

卐 प्राण मा म.त्पर्यावृतो- न म.दन्यो भविष्यसि। अपा.ङ्गर्भ.मिव जीवसे-प्राण बध्नामि त्वा मयि।। 26।। इति द्वितीयोनुऽवाकः।।

## एकादश काण्डे तृतीयोऽनुवाकः

11-03-01

卐 ब्रह्मचारीष्णं.श्चरति रोदसी~ उभे~- तस्मि.न्देवा. स्संमनसो भवन्ति। स^ दाधार पृथिवी. न्दिवञ्च- स^ आचार्य1(अ) न्तपसा पिपर्ति।। 1।।

卐 ब्रह्मचारिणं पितरो देवजनाः- पृथग्देवा^ अनु सँयन्ति सर्वे। गन्धर्वा^ एन. मन्वाय- न्त्रयस्त्रिंश. त्त्रिशता. ष्षट्सहस्रा- स्सर्वा.न्त्स^ देवां.स्तपसा पिपर्ति।। 2।।

卐 आचार्य^ उपनयमानो- ब्रह्मचारिण.ङ्कृणुते गर्भ.मन्तः। तं रात्री. स्तिस्र^ उदरे बिभर्ति- त.ञ्जात. न्द्रष्टु. मभिसँयन्ति देवाः।। 3।।

卐 इयं समि.त्पृथिवी द्यौ.र्द्वितीयोतान्तरिक्षं समिधा पृणाति। ब्रह्मचारी समिधा मेखलया श्रमेण- लोकां.स्तपसा पिपर्ति।। 4।।

卐 पूर्वो जातो ब्रह्मणो ब्रह्मचारी- घर्मँ वसान. स्तपसोदतिष्ठत्। तस्मा.ज्जातं ब्राह्मणं ब्रह्म ज्येष्ठ- न्देवा.श्च सर्वे अमृतेन साकम्।। 5।।

卐 ब्रह्मचार्येति समिधा समिद्धः- कार्ष्णँ वसानो दीक्षितो दीर्घश्मश्रुः। स^ सद्य^ एति पूर्वस्मा. दुत्तरं- समुद्रँ लोका. न्त्सङ्गृभ्य मुहु. राचरिक्रत्।। 6।।

卐 ब्रह्मचारी जनय. न्ब्रह्माऽपो लोकं- प्रजापतिं परमेष्ठिनँ विराजम्। गर्भो भूत्वाऽमृतस्य योना-विन्द्रो ह भूत्वाऽसुरां.स्ततर्ह।। 7।।

卐 आचार्य. स्ततक्ष नभसी~ उभे~ इमे~- उर्वी~ गम्भीरे~ पृथिवी.न्दिवञ्च। ते रक्षति तपसा ब्रह्मचारी- तस्मि.न्देवा. स्संमनसो भवन्ति।। 8।।

卐 इमां भूमिं पृथिवीं ब्रह्मचारी- भिक्षा. मा जभार प्रथमो दिवञ्च। ते कृत्वा समिधा.वुपाऽऽस्ते- तयो. रार्पिता भुवनानि विश्वा।। 9।।

卐 अर्वा. गन्यः परो अन्यो दिव. स्पृष्ठा- द्गुहा निधी~ निहितौ ब्राह्मणस्य। तौ रक्षति तपसा ब्रह्मचारी- तत्केवल.ङ्कृणुते ब्रह्म विद्वान्।। 10।।

卐 अर्वा. गन्य^ इतो अन्यः पृथिव्या^ अग्नी~ समेतो नभसी~ अन्तरेमे~। तयो. श्श्रयन्ते रश्मयोऽधि दृढा-स्ता.ना तिष्ठति तपसा ब्रह्मचारी।। 11।।

卐 अभिक्रन्द. न्स्तनय. न्नरुण- श्शितिङ्गो बृहच्छेपोऽनु भूमौ जभार। ब्रह्मचारी सिञ्चति सानौ रेतः- पृथिव्या.न्तेन जीवन्ति प्रदिश. श्चतस्रः।। 12।।

卐 अग्नौ सूर्ये चन्द्रमसि मातरिश्व- न्ब्रह्मचार्य1(अ)प्सु समिध.मा दधाति। तासा. मर्चींषि पृथगभ्रे चरन्ति- तासा. माज्यं पुरुषो वर्ष.मापः।। 13।।

卐 आचार्यो मृत्यु. र्वरुण- स्सोम^ ओषधयः पयः। जीमूता^ आस. न्त्सत्वान- स्तै.रिदं स्व1(अ)राभृतम्।। 14।।

卐 अमा घृत.ङ्कृणुते केवल माचार्यो भूत्वा वरुणो यद्य.दैच्छ. त्प्रजापतौ। तद्ब्रह्मचारी प्राऽयच्छ- त्स्वा.न्मित्रो अध्यात्मनः।। 15।।

卐 आचार्यो ब्रह्मचारी- ब्रह्मचारी प्रजापतिः। प्रजापति. र्विराजति- विरा. डिन्द्रोऽभव. द्वशी।। 16।।

卐 ब्रह्मचर्येण तपसा- राजा राष्ट्रँ वि रक्षति। आचार्यो ब्रह्मचर्येण- ब्रह्मचारिण. मिच्छते।। 17।।

卐 ब्रह्मचर्येण कन्या3(आ)- युवानँ विन्दते पतिम्। अनड्वा. न्ब्रह्मचर्येणा- ऽश्वो घास.ञ्जिगीर्षति।। 18।।

卐 ब्रह्मचर्येण तपसा- देवा^ मृत्यु मपाऽघ्नत। इन्द्रो ह ब्रह्मचर्येण- देवेभ्य. स्स्व1(अ)राऽभरत्।। 19।।

卐 ओषधयो भूतभव्य- महोरात्रे~ वनस्पतिः। सँवत्सर. स्सहर्तुभि- स्ते जाता^ ब्रह्मचारिणः।। 20।।

卐 पार्थिवा दिव्याः पशव^- आरण्या^ ग्राम्याश्च ये। अपक्षाः पक्षिणश्च ये - ते जाता^ ब्रह्मचारिणः।। 21।।

卐 पृथ.क्सर्वे प्राजापत्याः- प्राणा. नात्मसु बिभ्रति। तान्त्सर्वा. न्ब्रह्म रक्षति- ब्रह्मचारिण्याभृतम्।। 22।।

卐 देवाना. मेत. त्परिषूत- मनभ्यारूढ.ञ्चरति रोचमानम्। तस्मा.ज्जातं ब्राह्मणं ब्रह्म ज्येष्ठ- न्देवाश्च सर्वे अमृतेन साकम्।। 23।।



Sri Ganapathi Sachchidananda Avadhoota Datta Peetham • Mysore

卐 ब्रह्मचारी ब्रह्म भ्राजं.द्बिभर्ति- तस्मिं.न्देवा^ अधि विश्वे समोताः।
प्राणापानौ जनय. न्नाद्व्यानँ- वाचं मनो हृदयं ब्रह्म मेधाम्।। 24।।

卐 चक्षु. श्श्रोत्रँ यशो अस्मासु धे-ह्यन्नं रेतो लोहित. मुदरम्।। 25।।

卐 तानि कल्पं.द्ब्रह्मचारी सलिलस्य पृष्ठे- तपोऽतिष्ठ. त्तप्यमान. स्समुद्रे।
स^ स्नातो बभ्रुः पिङ्गलः- पृथिव्यां बहु रोचते।। 26।।-

11-03-02

卐 अग्निं ब्रूमो वनस्पती- नोषधी. रुत वीरुधः। इन्द्रं बृहस्पतिं सूर्य-न्ते नो मुञ्च.न्त्वंहसः।। 1।।

卐 ब्रूमो राजानँ वरुणं- मित्रँ विष्णु. मथो~ भगम्। अंशँ विवस्वन्तं ब्रूम-स्ते नो मुञ्च.न्त्वंहसः।। 2।।

卐 ब्रूमो देवं सवितार- न्धातार. मुत पूषणम्। त्वष्टार. मग्रियं ब्रूम- स्ते नो मुञ्च.न्त्वंहसः।। 3।।

卐 गन्धर्वाप्सरसो ब्रूमो- अश्विना ब्रह्मण.स्पतिम्। अर्यमा नाम यो देव- स्ते नो मुञ्च.न्त्वंहसः।। 4।।

卐 अहोरात्रे~ इदं ब्रूम- स्सूर्याचन्द्रमसा. वुभा। विश्वा. नादित्या. न्ब्रूम-स्ते~ नो मुञ्च.न्त्वंहसः।। 5।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 वातं ब्रूमः पर्जन्य- मन्तरिक्ष. मथो~ दिशः। आशाश्च सर्वा^ ब्रूम- स्ते नो मुञ्च.न्त्वंहसः।। 6।।

卐 मुञ्चन्तु मा शपथ्या-दहोरात्रे~ अथो~ उषाः। सोमो मा देवो मुञ्चतु-यमाहु. श्चन्द्रमा^ इति।। 7।।

卐 पार्थिवा^ दिव्याः पशव^ आरण्या^ उत ये मृगाः। शकुन्ता. न्पक्षिणो ब्रूम- स्ते नो मुञ्च.न्त्वंहसः।। 8।।

卐 भवाशर्वा. विदं ब्रूमो- रुद्रं पशुपतिश्च यः। इषू.र्या^ एषां संविद्म- ता^ न स्सन्तु सदा शिवाः।। 9।।

卐 दिवं ब्रूमो नक्षत्राणि- भूमिँ यक्षाणि पर्वतान्। समुद्रा^ नद्यो वेशन्ता- स्ते नो मुञ्च.न्त्वंहसः।। 10।।

卐 सप्तऋषीन् वा इदं ब्रूमो-ऽपो देवीः प्रजापतिम्। पितृन् यमश्रेष्ठा. न्ब्रूम स्ते नो मुञ्च.न्त्वंहसः।। । 11।।

卐 ये देवा दिविषदो- अन्तरिक्षसदश्च ये। पृथिव्यां शक्रा^ ये श्रिता- स्ते नो मुञ्च.न्त्वंहसः।। 12।।

卐 आदित्या^ रुद्रा^ वसवो- दिवि देवा^ अथर्वाणः। अङ्गिरसो मनीषिण-स्ते नो मुञ्च.न्त्वंहसः।। 13।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 यज्ञं ब्रूमो यजमान- मृच. स्सामानि भेषजा। यजूंषि होत्रा^ ब्रूम- स्ते नो मुञ्च.न्त्वंहसः।। 14।।

卐 पञ्च राज्यानि वीरुधां- सोमश्रेष्ठानि ब्रूमः। दर्भो भङ्गो यव. स्सह- स्ते नो मुञ्च.न्त्वंहसः।। 15।।

卐 अराया.न्ब्रूमो रक्षांसि- सर्पा. न्पुण्यजना. न्पितॄन्। मृत्यू. नेकशतं ब्रूम- स्ते नो मुञ्च.न्त्वंहसः।। 16।।

卐 ऋतू. न्ब्रूम^ ऋतुपती- नार्तवा. नुत हायनान्। समा. स्सँवत्सरा.न्मासां- स्ते नो मुञ्च.न्त्वंहसः।। 17।।

卐 एत देवा^ दक्षिणतঃ- पश्चा.त्प्राञ्च उदेत। पुरस्ता. दुत्तरा. च्छक्रा^- विश्वे देवा. स्समेत्य- ते नो मुञ्च.न्त्वंहसः।। 18।।

卐 विश्वा. न्देवा. निदं ब्रूम- स्सत्यसन्धा. नृतावृधः। विश्वाभिঃ पत्नीभि. स्सह- ते नो मुञ्च.न्त्वंहसः।। 19।।

卐 सर्वा. न्देवा. निदं ब्रूम- स्सत्यसन्धा.नृतावृधः। सर्वाभिঃ पत्नीभि. स्सह- ते नो मुञ्च.न्त्वंहसः।। 20।।

卐 भूतं ब्रूमो भूतपतिं- भूताना. मुत यो वशी। भूतानि सर्वा सङ्गत्य- ते नो मुञ्च.न्त्वंहसः।। 21।।

卐 या देवीः पञ्च प्रदिशो- ये देवा^ द्वादशर्तवः। सँवत्सरस्य ये दंष्ट्रा- स्ते न. स्सन्तु सदा शिवाः।। 22।।

卐 य.न्मातली रथक्रीत- ममृतँ वेद भेषजम्। तदिन्द्रो अप्सु प्रावेशय- त्तदापो दत्त भेषजम्।। 23।।इति तृतीयोऽनुवाकस्समाप्तः।

## एकादश काण्डे चतुर्थोऽनुवाकः

11-04-01

卐 उच्छिष्टे नाम रूप-ञ्चोच्छिष्टे लोक^ आहितः। उच्छिष्ट इन्द्र. श्चाग्निश्च- विश्व. मन्त. स्समाहितम्।। 1।।

卐 उच्छिष्टे द्यावापृथिवी~- विश्वं भूतं समाहितम्। आप.स्समुद्र^ उच्छिष्टे- चन्द्रमा^ वात^ आहितः।। 2।।

卐 सन्नुच्छिष्टे असंश्चोभौ- मृत्यु. र्वाजः प्रजापतिः। लौक्या^ उच्छिष्ट आयत्ता- व्रश्च द्रश्चाऽपि श्री.र्मयि।। 3।।

卐 दृढो दृंहस्थिरो न्यो- ब्रह्म विश्वसृजो दश। नाभि.मिव सर्वत. श्चक्र- मुच्छिष्टे देवता.श्श्रिताः।। 4।।

卐 ऋक्साम यजु रुच्छिष्ट- उद्गीथः प्रस्तुतं स्तुतम्। हिङ्कार^ उच्छिष्टे स्वर^- स्साम्नो मेडिश्च तन्मयि।। 5।।

卐 ऐन्द्राग्नं पावमानं- महानाम्नी. र्महाव्रतम्। उच्छिष्टे यज्ञस्याऽङ्गा-न्यन्त. र्गर्भ^इव मातरि।। 6।।

卐 राजसूयँ वाजपेय- मग्निष्टोम. स्तदध्वरः। अर्काश्वमेधा. वुच्छिष्टे- जीवबर्हि. र्मदिन्तमः।। 7।।

卐 अग्न्याधेय.मथो~ दीक्षा- कामप्र.श्छन्दसा सह। उत्सन्ना^ यज्ञा. स्सत्त्रा- ण्युच्छिष्टेऽधि समाहिताः।। 8।।

卐 अग्निहोत्रञ्च श्रद्धा च- वषट्कारो व्रत. न्तपः। दक्षिणेष्टं पूर्त-ञ्चोच्छिष्टेऽधि समाहिताः।। 9।।

卐 एकरात्रो द्विरात्र- स्सद्यस्क्रीः प्रक्री. रुक्थ्यः। ओत. न्निहित. मुच्छिष्टे- यज्ञस्याऽणूनि विद्यया।। 10।।

卐 चतूरात्रः पञ्चरात्र- ष्षड्रात्र. श्चोभय. स्सह। षोडशी सप्तरात्र- श्चोच्छिष्टा. ज्जज्ञिरे सर्वे- ये यज्ञा^ अमृते हिताः।। 11।।

卐 प्रतीहारो निधनँ- विश्वजिच्चाऽभिजि.च्च यः। साह्नातिरात्रा.वुच्छिष्टे- द्वादशाहोऽपि तन्मयि।। 12।।

卐 सूनृता सन्नतिः क्षेम- स्स्वधोर्जाऽमृतं सहः। उच्छिष्टे सर्वे प्रत्यञ्चः- कामाः कामेन तातृपुः।। 13।।

卐 नव भूमी. स्समुद्रा^- उच्छिष्टेऽधि श्रिता दिवः। आ सूर्यो भा.त्युच्छिष्टे-ऽहोरात्रे~ अपि तन्मयि।। 14।।

卐 उपहव्यँ विषूवन्तँ- ये च यज्ञा^ गुहा हिताः। बिभर्ति भर्ता विश्व-स्योच्छिष्टो जनितुः पिता।। 15।।

卐 पिता जनितु. रुच्छिष्टो-ऽसोः पौत्रः पितामहः। स^ क्षियति विश्वस्येशानो- वृषा भूम्या. मतिघ्न्यः।। 16।।

卐 ऋतं सत्य.न्तपो राष्ट्रं- श्रमो धर्मश्च कर्म च। भूतं भविष्य. दुच्छिष्टे- वीर्यँ लक्ष्मी. बलं बले।। 17।।

卐 समृद्धि. रोज^ आकूतिः- क्षत्रं राष्ट्रं षडुर्व्यः। सँवत्सरोऽध्युच्छिष्ट इडा प्रैषा^ ग्रहा^ हविः।। 18।।

卐 चतुर्होतार^ आप्रिय- श्चातुर्मास्यानि नीविदः। उच्छिष्टे यज्ञा^ होत्राः-पशुबन्धा. स्तदिष्टयः।। 19।।

卐 अर्धमासाश्च मासाश्चा-ऽऽर्तवा^ ऋतुभि. स्सह। उच्छिष्टे घोषिणी. राप-स्तनयित्नु.श्श्रुति.र्मही।। 20।।

卐 शर्करा. स्सिकता^ अश्मान- ओषधयो वीरुध. स्तृणा। अभ्राणि विद्युतो वर्ष- मुच्छिष्टे संश्रिता श्रिता।। 21।।

卐 राद्धिঃ प्राप्ति. स्समाप्ति- र्व्याप्ति. र्मह^ एधतुः। अत्याप्ति. रुच्छिष्टे भूति.श्चा-ऽहिता निहिता हिता।। 22।।

卐 यच्च प्राणति प्राणेन- यच्च पश्यति चक्षुषा। उच्छिष्टा. ज्जज्ञिरे सर्वे- दिवि देवा^ दिविश्रितः।। 23।।

卐 ऋच^ स्सामानि च्छन्दांसि- पुराणँ यजुषा सह। उच्छिष्टा.ज्जज्ञिरे सर्वे- दिवि देवा^ दिविश्रितः।। 24।।

卐 प्राणापानौ चक्षु. श्श्रोत्र- मक्षितिश्च क्षितिश्च या। उच्छिष्टा. ज्जज्ञिरे सर्वे- दिवि देवा^ दिविश्रितः।। 25।।

卐 आनन्दा^ मोदाঃ प्रमुदो-ऽभीमोदमुदश्च ये। उच्छिष्टा. ज्जज्ञिरे सर्वे- दिवि देवा^ दिविश्रितः।। 26।।

卐 देवाঃ पितरो मनुष्या^- गन्धर्वाप्सरसश्च ये। उच्छिष्टा. ज्जज्ञिरे सर्वे- दिवि देवा^ दिविश्रितः।। 27।।-

11-04-02

卐 यन्मन्यु. र्जाया. माऽवह- त्सङ्कल्पस्य गृहा.दधि। क आस.ञ्जन्याঃ के वराঃ- क^ उ ज्येष्ठवरोऽभवत्।। 1।।

卐 तप. श्चैवाऽऽस्ता.ङ्कर्म चा-ऽन्त.मह.त्यर्णवे। त आस.ञ्जन्या.स्ते वरा-

ब्रह्म ज्येष्ठवरोऽभवत्।। 2।।

卐 दश साक. मजायन्त- देवा^ देवेभ्य॰ पुरा। यो वै तान् विद्या. त्प्रत्यक्षं-

स^ वा अद्य मह. द्वदेत्।। 3।।

卐 प्राणापानौ चक्षु. श्श्रोत्र- मक्षितिश्च क्षितिश्च या। व्यानोदानौ वाङ्मन^-

स्ते वा आकूति. माऽवहन्न्।। 4।।

卐 अजाता^ आस न्नृतवो-ऽथो~ धाता बृहस्पतिः। इन्द्राग्नी~ अश्विना

तर्हि- क.न्ते ज्येष्ठ. मुपाऽऽसत।। 5।।

卐 तप. श्चैवाऽऽस्ता.ङ्कर्म चा-ऽन्त. मह.त्यर्णवे। तपो ह जज्ञे कर्मण- स्तत्ते

ज्येष्ठ. मुपाऽऽसत।। 6।।

卐 ये त आसी. द्भूमि॰ पूर्वा- या.मद्धातय^ इद्विदुः। यो वै ताँ विद्या.

न्नामथा- स^ मन्येत पुराणवित्।। 7।।

卐 कुत^ इन्द्र॰ कुत. स्सोम॰- कुतो अग्नि. रजायत। कुत. स्त्वष्टा समभव-

त्कुतो धाताऽजायत।। 8।।

卐 इन्द्रा. दिन्द्र. स्सोमा. त्सोमो- अग्ने. रग्नि. रजायत। त्वष्टा ह जज्ञे त्वष्टु-

र्धातु. र्धाताऽजायत।। 9।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 ये त आस.न्दश जाता^- देवा देवेभ्यः पुरा। पुत्रेभ्यो लोक. न्दत्त्वा-कस्मिं.स्ते लोक आसते।। 10।।

卐 यदा केशा. नस्थि स्नाव- मांसं मज्जान. माऽभरत्। शरीर.ङ्कृत्वा पादव-त्कँ लोक. मनु प्राविशत्।। 11।।

卐 कुतः केशा. न्कुत. स्स्नाव- कुतो अस्थी.न्याऽभरत्। अङ्गा पर्वाणि मज्जान-ङ्को मांसं कुत^ आऽभरत्।। 12।।

卐 संसिचो नाम ते देवा^- ये सम्भारा. न्त्समभरन्न्। सर्वं संसिच्य मर्त्य-न्देवाः पुरुष. माऽविशन्न्।। 13।।

卐 ऊरू~ पादा. वष्ठीवन्तौ- शिरो हस्ता.वथो~ मुखम्। पृष्टी. बर्जह्ये पार्श्वे~- कस्त. त्समदधा. दृषिः।। 14।।

卐 शिरो हस्ता. वथो~ मुख- ञ्जिह्वा.ङ्ग्रीवा.श्च कीकसाः। त्वचा प्रावृत्य सर्व.न्त-त्सन्धा समदधा. न्मही।। 15।।

卐 यत्त.च्छरीर मशय- त्सन्धया संहितं महत्। येनेद. मद्य रोचते- को अस्मि.न्वर्ण. माऽभरत्।। 16।।

卐 सर्वे देवा^ उपाशिक्ष- न्तदजाना. द्वधू. स्सती। ईशा वशस्य या जाया-साऽस्मि.न्वर्ण. माऽभरत्।। 17।।

卐 यदा त्वष्टा व्यतृण- त्पिता त्वष्टु.र्य^ उत्तरः। गृह.ङ्कृत्वा मर्त्य- न्देवाꣳ पुरुष. माऽविशन्न्।। 18।।

卐 स्वप्नो वै तन्द्री.र्निर्ऋतिःꣳ- पाप्मानो नाम देवताः। जरा खालत्यं पालित्यं- शरीर. मनु प्राऽविशन्न्।। 19।।

卐 स्तेय. न्दुष्कृतँ वृजिनं- सत्यँ यज्ञो यशो बृहत्। बलञ्च क्षत्र.मोजश्च- शरीर.मनु प्राऽविशन्न्।। 20।।

卐 भूतिश्च वा अभूतिश्च- रातयोऽरातयश्च याः। क्षुधश्च सर्वा.स्तृष्णाश्च- शरीर.मनु प्राऽविशन्न्।। 21।।

卐 निन्दाश्च वा अनिन्दाश्च- यच्च हन्तेति नेति च। शरीरं श्रद्धा दक्षिणा- ऽश्रद्धा चानु प्राऽविशन्न्।। 22।।

卐 विद्याश्च वा अविद्याश्च- यच्चान्य.दुपदेश्यम्। शरीरं ब्रह्म प्राऽविश- दृच. स्सामाऽथो~ यजुः।। 23।।

卐 आनन्दा^ मोदाꣳ प्रमुदो-ऽभीमोदमुदश्च ये। हसो नरिष्टा नृत्तानि- शरीर.मनु प्राऽविशन्न्।। 24।।

卐 आलापाश्च प्रलापाश्चाऽभीलापलपश्च ये। शरीरं सर्वे प्राऽविश- न्नायुजꣳ प्रयुजो युजः।। 25।।

卐 प्राणापानौ चक्षु. श्श्रोत्र- मक्षितिश्च क्षितिश्च या। व्यानोदानौ वाङ्मन-श्शरीरेण त ईयन्ते।। 26।।

卐 आशिषश्च प्रशिषश्च- संशिषो विशिषश्च याः। चित्तानि सर्वे सङ्कल्पा-श्शरीर.मनु प्राऽविशन्न्।। 27।।

卐 आस्तेयीश्च वास्तेयीश्च- त्वरणाꣳ कृपणाश्च याः। गुह्या. श्शुक्रा. स्स्थूला^ -अपस्ता बीभत्सा.वसादयन्न्।। 28।।

卐 अस्थि कृत्वा समिध- न्तदष्टाऽपो असादयन्न्। रेतꣳ कृत्वाऽऽज्य- न्देवाꣳ पुरुष.माऽविशन्न्।। 29।।

卐 या^ आपो याश्च देवता^- या विराड्ब्रह्मणा सह। शरीरं ब्रह्म प्राऽविश-च्छरीरेऽधि प्रजापतिः।। 30।।

卐 सूर्य.श्चक्षु.र्वातꣳ प्राणं- पुरुषस्य वि भेजिरे। अथाऽस्येतर. मात्मान-न्देवाꣳ प्राऽयच्छ.न्नग्नये।। 31।।

卐 तस्मा.द्वै विद्वा-न्पुरुषमिदं ब्रह्मेति मन्यते। सर्वा^ ह्यस्मि.न्देवता^- गावो गोष्ठ इवाऽऽसते।। 32।।

卐 प्रथमेन प्रमारेण- त्रेधा विष्व.ङ्वि गच्छति। अद^ एकेन गच्छ-त्यद^ एकेन गच्छ-तीहैकेन नि षेवते।। 33।।

卐 अप्सु स्तीमासु वृद्धासु- शरीर.मन्तरा हितम्। तस्मि.न्छवोऽध्यन्तरा-तस्मा.च्छवोऽध्युच्यते।। 34।। इति चतुर्थोनुवाकः।।

## ॐ एकादश काण्डे पञ्चमोऽनुवाकः

11-05-01

卐 ये बाहवो या^ इषवो- धन्वनाँ वीर्याणि च। असी.न्परशू. नायुध-ञ्चित्ताऽऽकूतञ्च यद्धृदि। सर्व. न्तदर्बुदे त्व-ममित्रेभ्यो दृशे- कुरूदारांश्च प्र दर्.शय।। 1।।

卐 उत्तिष्ठत सन्नह्यध्वं- मित्रा^ देवजना^ यूयम्। सन्दृष्टा^ गुप्ता^ व.स्सन्तु-या नो मित्राण्यर्बुदे।। 2।।

卐 उत्तिष्ठत.मा रभेथा-मादान.सन्दानाभ्याम्। अमित्राणां सेना^- अभि धत्त मर्बुदे।। 3।।

卐 अर्बुदि.र्नाम यो देव^- ईशानश्च न्यर्बुदिः। याभ्या.मन्तरिक्ष. मावृत-मियञ्च पृथिवी मही। ताभ्या.मिन्द्रमेदिभ्या. मह-ञ्जित.मन्वेमि सेनया।। 4।।

卐 उत्तिष्ठ त्व.न्देवजना-ऽर्बुदे सेनया सह। भञ्ज.न्नमित्राणां सेनां- भोगेभिः परि वारय।। 5।।

Sri Ganapati Sacchidananda Avadhoota Datta Peetham Mysore SGS

卐 सप्त जाता.न्न्यर्बुद- उदाराणां समीक्षयन्न्। तेभिष्ट्व.माज्ये हुते- सर्वै.रुत्तिष्ठ सेनया।

卐 प्रतिघ्नानाऽश्रुमुखी- कृधुकर्णी च क्रोशतु। विकेशी पुरुषे हते- रदिते अर्बुदे तव।

卐 सङ्कर्षन्ती करूकरं- मनसा पुत्र.मिच्छन्ती। पतिं भ्रातर.मा.त्स्वा-न्नदिते अर्बुदे तव।। 8।।

卐 अलिक्लवा^ जाष्कमदा^- गृध्रा. श्श्येनाः पतत्रिणः। ध्वाङ्क्षा. श्शकुन. स्तृप्य-न्त्वमित्रेषु समीक्षय-न्नदिते अर्बुदे तव।। 9।।

卐 अथो~ सर्वं श्वापदं- मक्षिका तृप्यतु क्रिमिः। पौरुषेयेऽधि कुणपे- रदिते अर्बुदे तव।

卐 आ गृह्णीतं सं बृहतं- प्राणापाना.न्न्यर्बुदे। निवाशा^ घोषा. स्सँ य-न्त्वमित्रेषु समीक्षय-न्नदिते अर्बुदे तव।। 11।।

卐 उद्वेपय सँ विजन्तां- भियाऽमित्रा.न्त्सं सृज। उरुग्राहै. र्बाह्वङ्कै-र्विध्याऽमित्रा.न्न्यर्बुदे।। 12।।

卐 मुह्य.न्त्वेषां बाहव-श्चित्ताकूतञ्च यद्धृदि। मैषा.मुच्छेषि किञ्चन- रदिते अर्बुदे तव।। 13।

卐 प्रतिघ्नाना. स्सन्धाव-न्तूर॰ पटूरा.वाघ्नानाः। अघारिणी.र्विकेश्यो-रुदत्य1(अ॰) पुरुषे हते- रदिते अर्बुदे तव।। 14।।

卐 श्वन्वती.रप्सरसो- रूपका उताऽर्बुदे। अन्त॰पात्रे रेरिहतीं- रिशां दुर्णिहितैषिणीम्। सर्वा.स्ता^ अर्बुदे त्व-ममित्रेभ्यो दृशे- कुरूदारांश्च प्र दर्शय।। 15।।

卐 खडूरेऽधिचङ्क्रमा-ङ्खर्विका.ङ्खर्ववासिनीम्। य उदारा^ अन्तर्हिता-गन्धर्वाप्सरसश्च ये। सर्पा^ इतरजना^ रक्षांसि।। 16।।

卐 चतुर्दंष्ट्रा. न्छ्यावदत॰- कुम्भमुष्का॰ असृङ्मुखान्। स्वभ्यसा ये चोद्भ्यसाः।। 17

卐 उद्वेपय त्व.मर्बुदे-ऽमित्राणा.ममू. स्सिचः। जयांश्च जिष्णु.श्चाऽमित्रा-न्जयता. मिन्द्रमेदिनौ।। 18।।

卐 प्रब्लीनो मृदित. श्शयां- हतो3(ओ)ऽमित्रो न्यर्बुदे। अग्निजिह्वा^ धूमशिखा^- जयन्ती.र्यन्तु सेनया।। 19।।

卐 तयाऽर्बुदे प्रणुत्ताना- मिन्द्रो हन्तु वरँवरम्। अमित्राणां शचीपति-र्माऽमीषां मोचि कश्चन।। 20।।

卐 उत्कसन्तु हृदया-न्यूर्ध्वः प्राण उदीषतु। शौष्कास्य.मनु वर्तता-
ममित्रा.न्मोत मित्रिणः।। 21।।

卐 ये च धीरा ये चाऽधीराः- पराञ्चो बधिराश्च ये। तमसा ये च तूपरा-
अथो बस्ताभिवासिनः। सर्वां.स्ताँ अर्बुदे त्व-ममित्रेभ्यो दृशे-
कुरूदारांश्च प्र दर्शय।। 22।

卐 अर्बुदिश्च त्रिषन्धि.श्चा-ऽमित्रा.न्नो वि विध्यताम्। यथैषा.मिन्द्र वृत्रह-
न्हनाम शचीपते-ऽमित्राणां सहस्रशः।। 23।।

卐 वनस्पती.न्वानस्पत्या- नोषधी.रुत वीरुधः। गन्धर्वाप्सरस. स्सर्पा-
न्देवा.न्पुण्यजना न्पितृन्। सर्वां.स्ताँ अर्बुदे त्व-ममित्रेभ्यो दृशे-
कुरूदारांश्च प्र दर्शय।। 24।।

卐 ईशाँ वो मरुतो देव- आदित्यो ब्रह्मण.स्पतिः। ईशाँ व इन्द्रश्चाऽग्निश्च-
धाता मित्रः प्रजापतिः। ईशाँ व ऋषय.श्चक्रु- रमित्रेषु समीक्षय-न्नदिते
अर्बुदे तव।। 25।।

卐 तेषां सर्वेषा. मीशाना- उत्तिष्ठत सन्नह्यध्वं- मित्रा देवजना यूयम्। इमं
सङ्ग्रामं सञ्जित्य- यथालोकँ वि तिष्ठध्वम्।। 26।।

11-05-02

卐 उत्तिष्ठत सन्नह्यध्व- मुदाराः केतुभि. स्सह। सर्पा इतरजना रक्षां-स्यमित्रा. ननु धावत।। 1।।

卐 ईशाँ वो वेद राज्य न्त्रिषन्धे- अरुणैः केतुभि स्सह। ये अन्तरिक्षे ये दिवि- पृथिव्याँ ये च मानवाः। त्रिषन्धे.स्ते चेतसि- दुर्णामान उपाऽऽसताम्।। 2।।

卐 अयोमुखा. स्सूचीमुखा- अथो~ विकङ्कतीमुखाः। क्रव्यादो वातरंहस- आ सज.न्त्वमित्रान्- वज्रेण त्रिषन्धिना।। 3।।

卐 अन्त.र्धेहि जातवेद- आदित्य कुणपं बहु। त्रिषन्धे.रियं सेना-सुहिताऽस्तु मे वशे।। 4।।

卐 उत्तिष्ठ त्व.न्देवजना-ऽर्बुदे सेनया सह। अयं बलि.र्व आहुत- स्त्रिषन्धे. राहुतिः प्रिया।। 5।।

卐 शितिपदी सन्द्यतु- शरव्ये3(ए)य.ञ्चतुष्पदी। कृत्येऽमित्रेभ्यो भव-त्रिषन्धे. स्सह सेनया।। 6।।

卐 धूमाक्षी सं पततु- कृधुकर्णी च क्रोशतु। त्रिषन्धे. स्सेनया जिते- अरुणा. स्सन्तु केतवः।। 7।।

卐 अवायन्तां पक्षिणो ये वयां-स्यन्तरिक्षे दिवि ये चरन्ति। श्वापदो मक्षिका.
स्संरभन्ता- मामादो गृध्राः कुणपे रदन्ताम्।। 8।।

卐 या.मिन्द्रेण सन्धां समधत्था^- ब्रह्मणा च बृहस्पते।
तयाऽह.मिन्द्रसन्धया- सर्वा.न्देवा. निह हुव- इतो जयत माऽमुतः।। 9।।

卐 बृहस्पति.राङ्गिरस^- ऋषयो ब्रह्मसंशिताः। असुरक्षयणँ वध- न्त्रिषन्धि.
न्दिव्याऽश्रयन्न्।। 10।।

卐 येनाऽसौ गुप्त^ आदित्य- उभा.विन्द्रश्च तिष्ठतः। त्रिषन्धि. न्देवा^
अभज-न्तौजसे च बलाय च।। 11।।

卐 सर्वा.न्लोका.न्त्समजय-न्देवा^ आहुत्याऽनया। बृहस्पति.राङ्गिरसो-
वज्रँ य.मसिञ्चता-ऽसुरक्षयणँ वधम्।। 12।।

卐 बृहस्पति. राङ्गिरसो- वज्रँ य.मसिञ्चता-ऽसुरक्षयणँ वधम्। तेनाऽह. मम्ं
सेना- न्नि लिम्पामि बृहस्पते-ऽमित्रा.न्हन्म्योजसा।। 13।।

卐 सर्वे देवा^ अत्यायन्ति- ये अश्नन्ति वषड्कृतम्। इमा.ञ्जुषध्व. माहुति-
मितो जयत माऽमुतः।। 14।।

卐 सर्वे देवा^ अत्यायन्तु- त्रिषन्धे. राहुतिः प्रिया। सन्धां महतीं रक्षत-
ययाऽग्रे असुरा^ जिताः।। 15।।

卐 वायु. रमित्राणा- मिष्वग्रा.ण्याऽञ्चतु। इन्द्र^ एषां बाहू.न्प्रति भनक्तु- मा शक.न्प्रतिधा.मिषुम्। आदित्य^ एषा. मस्त्रँ वि नाशयतु- चन्द्रमा^ युता? मगतस्य पन्थाम्।। 16।।

यदि प्रेयु. र्देवपुरा^- ब्रह्म वर्माणि चक्रिरे। तनूपानं परिपाण-ङ्कृण्वाना यदुपोचिरे- सर्व. न्तदरस.ङ्कृधि।। 17।।

卐 क्रव्या.दानुवर्तय-न्मृत्युना च पुरोहितम्। त्रिषन्धे प्रेहि सेनया- जयाऽमित्रा.न्प्र पद्यस्व।। 18।।

卐 त्रिषन्धे तमसा त्व-ममित्रा.न्परि वारय। पृषदाज्यप्रणुत्तानां- माऽमीषां मोचि कश्चन।। 19।।

卐 शितिपदी सं पत-त्वमित्राणा.ममू. स्सिचः। मुह्य.न्त्वद्यामू. स्सेना^- अमित्राणा. न्न्यर्बुदे।। 20।।

卐 मूढा^ अमित्रा.न्यर्बुदे- जह्येषां वरँवरम्। अनया जहि सेनया।। 21।।

卐 यश्च कवची यश्चाऽकवचो3(ओ)-ऽमित्रो यश्चाऽज्मनि। ज्यापाशैः कवचपाशै- रज्मनाऽभिहत. श्शयाम्।। 22।।

卐 ये वर्मिणो येऽवर्माणो- अमित्रा ये च वर्मिणः। सर्वा.स्ताँ अर्बुदे हता.- ञ्छ्वानोऽदन्तु भूम्याम्।। 23।।

卐 ये रथिनो ये अरथा- असादा^ ये च सादिनः। सर्वा.नदन्तु तान्हता- न्गृध्रा. श्श्येनाः पतत्रिणः।। 24।।

卐 सहस्रकुणपा शेता मामित्री- सेना समरे वधानाम्। विविद्धा ककजाकृता।। 25।।

卐 मर्माविधं रोरुवतं सुपर्णै रदन्तु- दुश्चितं मृदितं शयानम्। य^ इमां प्रतीची. माहुति- ममित्रो नो युयुत्सति।। 26।।

卐 या.न्देवा^ अनुतिष्ठन्ति- यस्या^ नास्ति विराधनम्। तयेन्द्रो हन्तु वृत्रहा- वज्रेण त्रिषन्धिना।। 27।। इति पञ्चमोनुवाकः।।

## द्वादशं काण्डम्

### द्वादश काण्डे प्रथमोऽनुवाकः

12-01-01

卐 सत्यं बृह.द्दृत. मुग्र.न्दीक्षा- तपो ब्रह्म यज्ञः पृथिवी. न्धारयन्ति। सा नो भूतस्य भव्यस्य प-त्न्युरुँ लोकं पृथिवी नः कृणोतु।। 1।।

卐 असंबाधं बध्यतो मानवानाँ- यस्या^ उद्वतः प्रवत. स्समं बहु। नानावीर्या^ ओषधी.र्या बिभर्ति- पृथिवी नः प्रथतां राध्यता.न्नः।। 2।।

卐 यस्यां समुद्र^ उत सिन्धु.रापो- यस्या.मन्न. क्कृष्टय. स्सम्बभूवुः। यस्या.मिद.ज्जिन्वति प्राण.देज-त्सा नो भूमि॰ पूर्वपेये दधातु।। 3।।

卐 यस्या.श्चतस्त्र॰ प्रदिश॰ पृथिव्या- यस्या मन्न.क्कृष्टय स्सम्बभूवुः। या बिभर्ति बहुधा प्राण.देज-त्सा नो भूमि.गोष्व.प्यन्ने दधातु।। 4।।

卐 यस्यां पूर्वे पूर्वजना^ विचक्रिरे- यस्या. न्देवा^ असुरा.नभ्यवर्तयन्न्। गवा.मश्वानाँ वयसश्च विष्ठा^- भगँ वर्च॰ पृथिवी नो दधातु।। 5।।

卐 विश्वंभरा वसुधानी प्रतिष्ठा- हिरण्यवक्षा^ जगतो निवेशनी। वैश्वानरं बिभ्रती भूमि.रग्नि- मिन्द्रऋषभा द्रविणे नो दधातु।। 6।।

卐 यां रक्ष.न्त्यस्वप्ना विश्वदानी- न्देवा^ भूमिं पृथिवी.मप्रमादम्। सा नो मधु प्रिय. न्दुहा-मथो~ उक्षतु वर्चसा।। 7।।

卐 याऽर्णवेऽधि सलिल.मग्र आसी-द्यां मायाभि. रन्वचर.न्मनीषिणः। यस्या हृदयं परमे व्योम- न्त्सत्येनाऽऽवृत. ममृतं पृथिव्याः। सा नो भूमि.स्त्विषिं बलं- राष्ट्रे दधा.तूत्तमे।। 8।।

卐 यस्या.माप॰ परिचरा. स्समानी-रहोरात्रे~ अप्रमाद.क्क्षरन्ति। सा नो भूमि. भूरिधारा- पयो दुहा. मथो~ उक्षतु वर्चसा।। 9।।

卐 या.मश्विना. वमिमातां- विष्णु.र्यस्याँ विचक्रमे। इन्द्रो या.ञ्चक्र आत्मने-ऽनमित्रां शचीपतिः। सा नो भूमि.र्वि सृजतां- माता पुत्राय मे पयः।। 10।।

卐 गिरय.स्ते पर्वता^ हिमवन्तो-ऽरण्यन्ते पृथिवि स्योन.मस्तु। बभ्रु.ङ्कृष्णां रोहिणीँ विश्वरूपा- न्ध्रुवां भूमिं पृथिवी. मिन्द्रगुप्ताम्। अजीतोऽहतो अक्षतो-ऽध्यष्ठां पृथिवी. महम्।। 11।।

卐 यत्ते मध्यं पृथिवि यच्च नभ्यँ- यास्त ऊर्ज.स्तन्व. स्सम्बभूवुः। तासु नो धेह्यभि नः पवस्व- माता भूमिः पुत्रो अहं पृथिव्याः। पर्जन्यः पिता स^ उ नः पिपर्तु।। 12।।

卐 यस्याँ वेदिं परिगृह्णन्ति भूम्याँ- यस्याँ यज्ञ. न्तन्वते विश्वकर्माणः। यस्यां मीयन्ते स्वरवः पृथिव्या-मूर्ध्वा. श्शुक्रा^ आहुत्याः पुरस्तात्। सा नो भूमि.र्वर्धय.द्वर्धमाना।। 13।।

卐 यो नो द्वेष.त्पृथिवि यः पृतन्या- द्योऽभिदासा. न्मनसा यो वधेन। तन्नो भूमे. रन्धय पूर्वकृत्वरि।। 14।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 त्वज्जाता.स्त्वयि चरन्ति मर्त्या-स्त्वं बिभर्षि द्विपद.स्त्व.ञ्चतुष्पदः। तवेमे पृथिवि पञ्च मानवा^- येभ्यो ज्योति.रमृतं मर्त्येभ्य^- उद्य'2'न्त्सूर्यो रश्मिभि.रातनोति।। 15।।

卐 ता नः प्रजा. स्सन्दुह्रतां समग्रा^- वाचो मधु पृथिवि धेहि मह्यम्।। 16।।

卐 विश्वस्वं मातर. मोषधीना- न्ध्रुवां भूमिं पृथिवी. न्धर्मणा धृताम्। शिवां स्योना. मनु चरेम विश्वहा।। 17।।

卐 मह.त्सधस्थं महती बभूविथ- महा.न्वेग^ एजथु.र्वेपथु.ष्टे। महां.स्त्वेन्द्रो रक्ष.त्यप्रमादम्। सा नो भूमे प्र रोचय- हिरण्यस्येव सन्दृशि- मा नो द्विक्षत कश्चन।। 18।।

卐 अग्नि.र्भूम्या मोषधी-ष्वग्नि.मापो बिभ्र.त्यग्नि.रश्मसु। अग्नि.रन्तः पुरुषेषु- गोष्वश्वे.ष्वग्नयः।। 19।।

卐 अग्नि.र्दिव^ आ तप-त्यग्ने.र्देवस्योर्व1(अ)न्तरिक्षम्। अग्निं मर्तास^ इन्धते- हव्यवाह.ङ्घृतप्रियम्।। 20।। {2}

卐 अग्निवासाः पृथिव्यसितज्ञू- स्त्विषीमन्तं संशितं मा कृणोतु।। 21।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

卐 भूम्या. न्देवेभ्यो ददति- यज्ञं हव्य. मरङ्कृतम्। भूम्यां मनुष्या^ जीवन्ति- स्वधयाऽन्नेन मर्त्याः। सा नो भूमिः प्राण. मायु.र्दधातु- जरदष्टिं मा पृथिवी कृणोतु।। 22।।

卐 यस्ते गन्धः पृथिवि सम्बभूव- यं बिभ्र.त्योषधयो यमापः। यङ्गन्धर्वा^ अप्सरसश्च भेजिरे- तेन मा सुरभि.ङ्कृणु- मा नो द्विक्षत कश्चन।। 23।।

卐 यस्ते गन्धः पुष्कर.माविवेश- यं सञ्जभ्रु. स्सूर्याया^ विवाहे। अमर्त्याः पृथिवि गन्ध. मग्रे- तेन मा सुरभि.ङ्कृणु- मा नो द्विक्षत कश्चन।। 24।।

卐 यस्ते गन्धः पुरुषेषु- स्त्रीषु पुंसु भगो रुचिः। यो अश्वेषु वीरेषु- यो मृगेषूत हस्तिषु। कन्यायाँ वर्चो यद्भूमे- तेनाऽस्मा॰ अपि सं सृज- मा नो द्विक्षत कश्चन।।

卐 शिला भूमि. रश्मा पांसु- स्सा भूमि. स्सन्धृता धृता। तस्यै हिरण्यवक्षसे- पृथिव्या अकर.न्नमः।। 26।।

卐 यस्याँ वृक्षा^ वानस्पत्या- ध्रुवा.स्तिष्ठन्ति विश्वहा। पृथिवीँ विश्वधायस- न्धृता. मच्छाऽऽ वदामसि।। 27।।

卐 उदीराणा^ उताऽऽसीना- स्तिष्ठन्तः प्रक्रामन्तः। पद्भ्या. न्दक्षिणसव्याभ्यां- मा व्यथिष्महि भूम्याम्।। 28।।

卐 विमृग्वरीं पृथिवी.मा वदामि- क्षमां भूमिं ब्रह्मणा वावृधानाम्। ऊर्जं पुष्टं बिभ्रती मन्नभाग-ङ्घृत. न्त्वाऽभि नि षीदेम भूमे।। 29।।

卐 शुद्धा न^ आप. स्तन्वे क्षरन्तु- यो न. स्सेदु. रप्रिये त.न्निदध्मः। पवित्रेण पृथिवि मोत्पुनामि।। 30।।

卐 यास्ते प्राचीः प्रदिशो या^ उदीची- र्यास्ते भूमे अधरा.द्याश्च पश्चात्। स्योना.स्ता^ मह्य.ञ्चरते भवन्तु- मा नि पप्तं भुवने शिश्रियाणः।। 31।।

卐 मा नः पश्चा.न्मा पुरस्ता-न्नुदिष्ठा^ मोत्तरा. दधरादुत। स्वस्ति भूमे नो भव- मा विद.न्परिपन्थिनो- वरीयो यावया वधम्।। 32।।

卐 यावत्तेऽभि विपश्यामि- भूमे सूर्येण मेदिना। ताव.न्मे चक्षु.र्मा मे.- ष्टोत्तरामुत्तरां समाम्।। 33।।

卐 यच्छयानः पर्यावर्ते- दक्षिणं सव्य. मभि भूमे पार्श्वम्। उत्ताना.स्त्वा प्रतीचीं- यत्पृष्टीभि. रधिशेमहे। मा हिंसी. स्तत्र नो भूमे- सर्वस्य प्रतिशीवरि।।

卐 यत्ते भूमे विखनामि- क्षिप्र. न्तदपि रोहतु। मा ते मर्म विमृग्वरि- मा ते हृदय.मर्पिपम्।। 35।।

卐 ग्रीष्म.स्ते भूमे वर्षाणि- शर.द्धेमन्त. श्शिशिरो वसन्तः। ऋतव.स्ते विहिता हायनी-रहोरात्रे~ पृथिवि नो दुहाताम्।। 36।।

卐 याऽप सर्पँ विजमाना विमृग्वरी- यस्या. मासन्नग्नयो ये अप्स्व1(अ)न्तः। परा दस्यू. न्ददती देवपीयू- निन्द्रँ वृणाना पृथिवी न वृत्रम्। शक्राय दध्रे वृषभाय वृष्णे।। 37।।

卐 यस्यां सदोहविर्धाने~- यूपो यस्या. न्निमीयते। ब्रह्माणो यस्या. मर्च- न्त्यृग्भि. स्साम्ना यजुर्विदः। युज्यन्ते यस्या.मृत्विज- स्सोम.मिन्द्राय पातवे।। 38।।

卐 यस्यां पूर्वे भूतकृत^- ऋषयो गा^ उदानृचुः। सप्त सत्रेण वेधसो- यज्ञेन तपसा सह।। 39।।

卐 सा नो भूमि.रा दिशतु- यद्धन.ङ्कामयामहे। भगो अनु प्रयुङ्क्ता- मिन्द्र^ एतु पुरोगवः।। 40।।

卐 यस्या.ङ्गायन्ति नृत्यन्ति- भूम्यां मर्त्या^ व्यैलबाः। युध्यन्ते यस्या. माक्रन्दो- यस्याँ वदति दुन्दुभिः। सा नो भूमि॰ प्रणुदतां सपत्ना- नसपत्नं मा पृथिवी कृणोतु।। 41।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 यस्या.मन्नँ व्रीहियवौ- यस्या^ इमा॰ पञ्च कृष्टयः। भूम्यै पर्जन्यपत्न्यै-
नमोऽस्तु वर्षमेदसे।। 42।।

卐 यस्या॰ पुरो देवकृताः–≈ क्षेत्रे यस्या^ विकुर्वते। प्रजापति॰ पृथिवीँ
विश्वगर्भा-माशामाशां रण्या.न्न॰ कृणोतु।। 43।।

卐 निधिं बिभ्रती बहुधा गुहा वसु- मणिं हिरण्यं पृथिवी ददातु मे। वसूनि
नो वसुदा रासमाना- देवी दधातु सुमनस्यमाना।। 44।।

卐 जनं बिभ्रती बहुधा विवाचस- न्नानाधर्माणं पृथिवी यथौकसम्। सहस्त्र.
न्धारा^ द्रविणस्य मे दुहा- न्ध्रुवेव धेनु. रनपस्फुरन्ती।। 45।।

卐 यस्ते सर्पो वृश्चिक. स्तृष्टदंश्मा- हेमन्तजब्धो भृमलो गुहा शये।
क्रिमि.र्जिन्व.त्पृथिवि यद्य.देजति- प्रावृषि त.न्न स्सर्प.न्मोप सृप-द्यच्छिव.
न्तेन नो मृड।। 46।।

卐 ये ते पन्थानो बहवो जनायना^- रथस्य वर्त्माऽनसश्च यातवे।
यै.स्सञ्चर.न्त्युभये भद्रपापा-स्तं पन्थान.ञ्जयेमा-ऽनमित्र. मतस्करँ
यच्छिव- न्तेन नो मृड।। 47।।

卐 मल्वं बिभ्रती गुरुभृ-द्भद्रपापस्य निधन. न्तितिक्षुः। वराहेण पृथिवी
सँविदाना- सूकराय वि जिहीते मृगाय।। 48।।

卐 ये त आरण्याः पशवो मृगा^ वने- हिता स्सिंहा^ व्याघ्राः पुरुषाद.श्चरन्ति। उलँ वृकं पृथिवि दुच्छुना.मित^- ऋक्षीकां रक्षो अप बाधयाऽस्मत्।। 49।।

卐 ये गन्धर्वा^ अप्सरसो- ये चारायाः किमीदिनः। पिशाचा.न्त्सर्वा रक्षांसि- ता.नस्म.द्भूमे यावय।। 50।।

卐 या.न्द्विपादः पक्षिण. स्संपतन्ति- हंसा. स्सुपर्णा. श्शकुना^ वयांसि। यस्याँ वातो मातरिश्वेयते रजांसि- कृण्वं.श्च्यावयंश्च वृक्षान्। वातस्य प्रवा. मुपवा. मनु वा.त्यर्चिः।। 51।।

卐 यस्या.ङ्कृष्ण.मरुणञ्च संहिते~- अहोरात्रे~ विहिते~ भूम्या.मधि। वर्षेण भूमिः पृथिवी वृतावृता- सा नो दधातु भद्रया प्रिये धामनिधामनि।। 52।।

卐 द्यौश्च म इदं पृथिवी- चाऽन्तरिक्षञ्च मे व्यचः। अग्नि. स्सूर्य. आपो मेधाँ- विश्वे देवाश्च सन्ददुः।। 53।।

卐 अह.मस्मि सहमान^- उत्तरो नाम भूम्याम्। अभीषा.डस्मि विश्वाषा- डाशामाशाँ विषासहिः।। 54।।

卐 अदो यद्देवि प्रथमाना पुरस्ता- द्देवै.रुक्ता व्यसर्पो महित्वम्। आ त्वा सुभूत. मविश.त्तदानी- मकल्पयथाः प्रदिश.श्चतस्रः।। 55।।

卐 ये ग्रामा^ यदरण्यँ- या.स्सभा^ अधि भूम्याम्। ये सङ्ग्रामा. स्समितय-
स्तेषु चारु वदेम ते।। 56।।

卐 अश्व^इव रजो दुधुवे वि ता.न्जनान्- य^ आक्षिय. न्पृथिवीँ या.दजायत।
मन्द्राऽग्रेत्वरी भुवनस्य गोपा^- वनस्पतीना.ङ्गृभि.रोषधीनाम्।। 57।।

卐 य.द्वदामि मधुम. त्तद्वदामि- यदीक्षे तद्वनन्ति मा। त्विषीमा.नस्मि
जूतिमा- नवाऽन्या.न्हन्मि दोधतः।। 58।।

卐 शन्तिवा सुरभि. स्स्योना- कीलालोध्नी पयस्वती। भूमि.रधि ब्रवीतु मे-
पृथिवी पयसा सह।। 59।।

卐 या.मन्वैच्छ.द्धविषा विश्वकर्मा-ऽन्त.रर्णवे रजसि प्रविष्टाम्।
भुजिष्य1(अं) पात्र. न्निहित.ङ्गुहा य-दावि.र्भोगे अभव.न्मातृमद्भ्यः।। 60।।

卐 त्वम.स्यावपनी जनाना- मदितिꣳ कामदुघा पप्रथाना। यत्त ऊन न्तत्त
आ पूरयाति- प्रजापतिꣳ प्रथमजा^ ऋतस्य।। 61।।

卐 उपस्था.स्ते अनमीवा- अयक्ष्मा अस्मभ्यं सन्तु पृथिवि प्रसूताः।
दीर्घ.न्न^ आयुꣳ प्रतिबुध्यमाना^- वय. न्तुभ्यं बलिहृत. स्स्याम।। 62।।

卐 भूमे मात.र्नि धेहि मा- भद्रया सुप्रतिष्ठितम्। सँविदाना दिवा कवे- श्रियां
मा धेहि भूत्याम्।। 63।।-

## ऽ०ऽ द्वादश काण्डे द्वितीयोऽनुवाकः

12-01-02

卐 नड.मा रोह न ते अत्र लोक^- इदं सीसं भागधेय.न्त एहि। यो गोषु यक्ष्मः पुरुषेषु यक्ष्म- स्तेन त्वं साक.मधरा.ङ्परेहि।। 1।।

卐 अघशंस.दुश्शंसाभ्या-ङ्करेणाऽनुकरेण च। यक्ष्मञ्च सर्व. न्तेनेतो- मृत्युञ्च निरजामसि।। 2।।

卐 निरितो मृत्यु. न्निर्ऋतिं- निररातिं.मजामसि। यो नो द्वेष्टि तमद्ध्यग्ने- अक्रव्या.द्यमु द्विष्म-स्तमु ते प्र सुवामसि।। 3।।

卐 यद्यग्निः क्रव्या.द्यदि वा व्याघ्र^- इम.ङ्गोष्ठं प्रविवेशाऽन्योकाः। तं माषाज्य.ङ्कृत्वा प्र हिणोमि दूरं- स^ गच्छ.त्वप्सुषदोऽप्यग्नीन्।। 4।।

(अप्सुषदोऽप्यग्नीन्)

卐 यत्त्वा क्रुद्धाः प्रचक्रु- र्मन्युना पुरुषे मृते। सुकल्प.मग्ने तत्त्वया- पुन.स्त्वोद्दीपयामसि।। 5।।

卐 पुन.स्त्वाऽऽदित्या^ रुद्रा^ वसवः- पुन.र्ब्रह्मा वसुनीति.रग्ने। पुन.स्त्वा ब्रह्मण.स्पति राऽधा-द्दीर्घायुत्वाय शतशारदाय।। 6।।

卐 यो अग्निः क्रव्या.त्प्रविवेश नो गृह- मिमं पश्य.न्नितर.ञ्जातवेदसम्। तं हरामि पितृयज्ञाय दूरं- स^ घर्म.मिन्धां परमे सधस्थे।। 7।।

卐 क्रव्याद.मग्निं प्र हिणोमि दूरँ- यमराज्ञो गच्छतु रिप्रवाहः। इहाऽय.मितरो जातवेदा^- देवो देवेभ्यो हव्यँ वहतु प्रजानन्न्।। 8।।

卐 क्रव्याद.मग्नि.मिषितो हरामि- जना.न्दृंहन्तँ वज्रेण मृत्युम्। नि तं शास्मि गार्हपत्येन विद्वा-न्पितृणाँ लोकेऽपि भागो अस्तु।। 9।।

卐 क्रव्याद.मग्निं शशमान.मुक्थ्य1(अं)- प्र हिणोमि पथिभिः पितृयाणैः। मा देवयानैः पुन.राऽगा^- अत्रैवैधि पितृषु जागृहि त्वम्।। 10।।

卐 समिन्धते सङ्कसुकं स्वस्तये- शुद्धा^ भवन्त. श्शुचयः पावकाः। जहाति रिप्र.मत्येन^ एति- समिद्धो अग्नि. स्सुपुना पुनाति।। 11।।

卐 देवो अग्नि. स्सङ्कसुको- दिव.स्पृष्ठान्याऽरुहत्। मुच्यमानो निरेणसो-ऽमो.गस्माँ अशस्त्याः।। 12।।

卐 अस्मि.न्वयं सङ्कसुके- अग्नौ रिप्राणि मृज्महे। अभूम यज्ञिया. श्शुद्धाः- प्र ण^ आयूंषि तारिषत्।। 13।।

卐 सङ्कसुको विकसुको- निर्ऋथो यश्च निस्वरः। ते ते यक्ष्मं सवेदसो-दूरा.द्दूर.मनीनशन्न्।। 14।।

卐 यो नो अश्वेषु वीरेषु- यो नो गोष्वजाविषु। क्रव्याद. न्निर्णुदामसि- यो अग्नि.र्जनयोपनः।। 15।।

卐 अन्येभ्य.स्त्वा पुरुषेभ्यो- गोभ्यो अश्वेभ्य.स्त्वा। निः क्रव्याद. न्नुदामसि- यो अग्नि.र्जीवितयोपनः।। 16।।

卐 यस्मि.न्देवा^ अमृजत- यस्मि.न्मनुष्या^ उत। तस्मि.न्घृतस्तावो मृष्ट्वा- त्व.मग्ने दिवं रुह।। 17।।

卐 समिद्धो अग्न आहुत- स^ नो माऽभ्यपक्रमीः। अत्रैव दीदिहि द्यवि- ज्योक्च सूर्य.न्दृशे।। 18।।

卐 सीसे मृड्ढ्व.न्नडे मृड्ढ्व- मग्नौ सङ्कसुके च यत्। अथो~ अव्यां रामायां- शीर्षक्ति.मुपबर्हणे।। 19।।

卐 सीसे मलं सादयित्वा- शीर्षक्ति.मुपबर्हणे। अव्या.मसिक्न्यां मृष्ट्वा- शुद्धा^ भवत यज्ञियाः।। 20।।

卐 परं मृत्यो~ अनु परेहि पन्थाँ- यस्त एष^ इतरो देवयानात्। चक्षुष्मते श्रृण्वते ते ब्रवी-मीहेमे वीरा^ बहवो भवन्तु।। 21।।

卐 इमे जीवा^ वि मृतै राऽववृत्र- न्नभू.द्भद्रा^ देवहूति.र्नो अद्य। प्राञ्चो अगाम नृतये हसाय- सुवीरासो विदथ.मा वदेम।। 22।।

卐 इम.ञ्जीवेभ्य꠰ परिधि. न्दधामि- मैषा.न्नु गा.दपरो अर्थ.मेतम्। शत.ञ्जीवन्त. श्शरद꠰ पुरूची- स्तिरो मृत्यु.न्दधतां पर्वतेन।। 23।।

卐 आ रोहताऽऽयु.र्जरसँ वृणाना^- अनुपूर्वँ यतमाना^ यति स्थ। ता.न्व. स्त्वष्टा सुजनिमा सजोषा- स्सर्व.मायु.र्नयतु जीवनाय।। 24।।

卐 यथाऽहा.न्यनुपूर्वं भवन्ति- यथर्तव^ ऋतुभि.र्यन्ति साकम्। यथा न पूर्व.मपरो जहा- त्येवा धात.रायूंषि कल्पयैषाम्।। 25।।

卐 अश्मन्वती. रीयते सं रभध्वं- वीरयध्वं प्र तरता सखायः। अत्रा जहीत ये अस. न्दुरेवा^- अनमीवा. नुत्तरेमाऽभि वाजान्।। 26।।

卐 उत्तिष्ठता प्र तरता सखायो-ऽश्मन्वती नदी स्यन्दत इयम्। अत्रा जहीत ये अस.न्नशिवा- श्शिवा.न्त्स्योना. नुत्तरेमाऽभि वाजान्।। 27।।

卐 वैश्वदेवीँ वर्चस आ रभध्वं- शुद्धा^ भवन्त. श्शुचय꠰ पावकाः। अतिक्रामन्तो दुरिता पदानि- शतं हिमा. स्सर्ववीरा^ मदेम।। 28।।

卐 उदीचीनै꠰ पथिभि. र्वायुमद्भि- रतिक्रामन्तोऽवरा.न्परेभिः। त्रिस्सप्त कृत्व^ ऋषय꠰ परेता^- मृत्युं प्रत्यौह.न्पदयोपनेन।। 29।।

卐 मृत्यो꠰ पदँ योपयन्त^ एत- द्राघीय^ आयु꠰ प्रतर. न्दधानाः। आसीना^ मृत्यु. न्नुदता सधस्थे-ऽथ जीवासो विदथ.मा वदेम।। 30।।

卐 इमा^ नारी. रविधवा. स्सुपत्नी- राञ्जनेन सर्पिषा संस्पृशन्ताम्। अनश्रवो अनमीवा. स्सुरत्ना^- आ रोहन्तु जनयो योनि.मग्रे।। 31।।

卐 व्याकरोमि हविषाऽह.मेतौ- तौ ब्रह्मणा व्यं1(अ)ह.ङ्कल्पयामि। स्वधां पितृभ्यो अजरा.ङ्कृणोमि- दीर्घेणाऽऽयुषा समिमा.न्त्सृजामि।। 32।।

卐 यो नो अग्निः पितरो हृत्स्वं1-(अ)न्त राविवेशाऽमृतो मर्त्येषु। मय्यह.न्तं परि गृह्णामि देवं- मा सो अस्मा.न्द्विक्षत मा वयं तम्।। 33।।

卐 अपावृत्य गार्हपत्या-त्क्रव्यादा प्रेत दक्षिणा। प्रियं पितृभ्य^ आत्मने- ब्रह्मभ्यः कृणुता प्रियम्।। 34।।

卐 द्विभागधन.मादाय- प्र क्षिणा.त्यवर्त्या। अग्निः पुत्रस्य ज्येष्ठस्य- यः क्रव्या.दनिराहितः।। 35।।

卐 यत्कृषते यद्वनुते- यच्च वस्नेन विन्दते। सर्वं मर्त्यस्य तन्नास्ति- क्रव्या.च्चे.दनिराहितः।। 36।।

卐 अयज्ञियो हतवर्चा^ भवति- नैनेन हवि.रत्तवे। छिनत्ति कृष्या^ गोर्धना – द्य.ङ्क्रव्या.दनुवर्तते।। 37।।

卐 मुहु.र्गृध्यैः प्र वद-त्यार्तिं मर्त्यो नीत्य। क्रव्या.द्या.नग्नि. रन्तिका- दनुविद्वा.न्वितावति।। 38।।

卐 ग्राह्या^ गृहा. स्सं सृज्यन्ते- स्त्रिया य.न्म्रियते पतिः। ब्रह्मैव विद्वा.
नेष्यो3(ओ)- यꣳ क्रव्याद. न्निरादधत्।। 39।।

卐 यद्रिप्रं शमल-ञ्चकृम यच्च दुष्कृतम्। आपो मा तस्मा.च्छुम्भ-न्त्वग्ने.
स्सङ्कसुका.च्च यत्।। 40।।

卐 ता^ अधरा दुदीची रा॰ववृत्र- न्प्रजानतीꣳ पथिभि र्देवयानैः। पर्वतस्य
वृषभस्या॰धि पृष्ठे- नवा.श्चरन्ति सरितꣳ पुराणीः।। 41।।

卐 अग्ने अक्रव्या.न्निꣳ क्रव्याद- न्नुदा ऽऽदेवयजनँ वह।। 42।।

卐 इम.ङ्क्रव्या. दाविवेशा-॰य.ङ्क्रव्याद. मन्वगात्। व्याघ्रौ कृत्वा नानान-न्तं
हरामि शिवापरम्।। 43।।

卐 अन्तर्धि. र्देवानां परिधि. र्मनुष्याणा- मग्नि.र्गार्हपत्य^ उभया. नन्तरा
श्रितः।। 44।।

卐 जीवाना. मायुꣳ प्र तिर त्व.मग्ने- पितृणाँ लोक.मपि गच्छन्तु ये मृताः।
सुगार्हपत्यो वितप. न्नराति- मुषामुषां श्रेयसी. न्धेह्यस्मै।। 45।।

卐 सर्वा.नग्ने सहमान. स्सपत्ना- नैषा.मूर्जं रयि.मस्मासु धेहि।। 46।।

卐 इम.मिन्द्रँ वह्निं पप्रिं. मन्वारभध्वं- स^ वो निर्वक्ष. द्दुरिता.दवद्यात्।
तेना॰प हत शरु. मापतन्त- न्तेन रुद्रस्य परि पाता॰स्ताम्।। 47।।

卐 अनड्वाहं प्लव. मन्वारभध्वं- स^ वो निर्वक्ष. दुरिता. दवद्यात्। आ रोहत सवितु. र्नाव.मेतां- षड्भि.रुर्वीभि. रमति. न्तरेम।। 48।।

卐 अहोरात्रे~ अन्वेषि बिभ्र-त्क्षेम्य. स्तिष्ठ.न्प्रतरण. स्सुवीरः। अनातुरा.न्त्सुमनस.स्तल्प बिभ्र- ज्ज्योगेव नः पुरुषगन्धि.रेधि।। 49।।

卐 ते देवेभ्य^ आ वृश्चन्ते- पाप.ञ्जीवन्ति सर्वदा। क्रव्या.द्या.नग्नि. रन्तिका - दश्व^ इवाऽनुवपते नडम्।। 50।।

卐 येऽश्रद्धा^ धनकाम्या- क्रव्यादा समासते। ते वा अन्येषा.ङ्कुम्भीं- पर्यादधति सर्वदा।। 51।।

卐 प्रेव पिपतिषति- मनसा मुहु.रा वर्तते पुनः। क्रव्या.द्या नग्नि.रन्तिका- दनुविद्वा.न्वितावति।। 52।।

卐 अविः कृष्णा भागधेयं पशूनां- सीस.ङ्क्रव्या. दपि चन्द्र.न्त आहुः। माषाः पिष्टा भागधेय-न्ते हव्य. मरण्यान्या गह्वरं सचस्व।। 53।।

卐 इषीका.ञ्जरती.मिष्ट्वा- तिल्पिञ्जं दण्डनं नडम्। तमिन्द्र^ इध्म.ङ्कृत्वा- यमस्याऽग्नि न्निरादधौ।। 54।।

卐 प्रत्यञ्च.मर्कं प्रत्यर्पयित्वा- प्रविद्वा.न्पन्थां वि ह्याविवेश। पराऽमीषा. मसू.न्दिदेश- दीर्घेणाऽऽयुषा समिमा.न्त्सृजामि।। 55।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

इति द्वितीयोऽनुवाकः

## द्वादश काण्डे तृतीयोऽनुवाकः

12-03-01

卐 पुमा.न्पुंसोऽधि तिष्ठ चर्मेहि- तत्र ह्वयस्व यतमा प्रिया ते। यावन्ता.वग्रे प्रथमं समेयथु- स्तद्वां वयो यमराज्ये समानम्।। 1।।

卐 ताव.द्वा.ञ्चक्षु स्तति वीर्याणि- तावत्तेज. स्ततिधा वाजिनानि। अग्नि. श्शरीरं सचते यदैधो-ऽधा पक्वा.न्मिथुना सं भवाथः।। 2।।

卐 समस्मि.न्ल्लोके समु देवयाने- सं स्मा समेतँ यमराज्येषु। पूतौ पवित्रै.रुप तद्ध्वयेथाँ- यद्यद्रेतो अधि वां सम्बभूव।। 3।।

卐 आप.स्पुत्रासो अभि सँ विशध्व - मिम.ञ्जीव.ञ्जीवधन्या. स्समेत्य। तासां भजध्व. ममृतँ य.माहु- र्यमोदनं पचति वा.ञ्जनित्री।। 4।।

卐 यँ वां पिता पचति यञ्च माता- रिप्रा.न्निर्मुक्त्यै शमलाच्च वाचः। स ओदन. श्शतधार. स्स्वर्ग- उभे व्याप नभसी महित्वा।। 5।।

卐 उभे नभसी उभयांश्च लोकान्- ये यज्वना.मभिजिता.स्स्वर्गाः। तेषा.ञ्ज्योतिष्मा. न्मधुमा.न्यो अग्रे- तस्मिन्पुत्रै.र्जरसि सं श्रयेथाम्।। 6।।

卐 प्राचींप्राचीं प्रदिश.मा रभेथा- मेतँ लोकं श्रद्दधाना. स्सचन्ते। यद्वां पक्वं परिविष्ट.मग्नौ- तस्य गुप्तये दम्पती~ सं श्रयेथाम्।। 7।।

卐 दक्षिणा. न्दिश.मभि नक्षमाणौ- पर्यावर्तेथा. मभि पात्र.मेतत्। तस्मि.न्वाँ यमः पितृभि. स्सँविदानः- पक्काय शर्म बहुल.न्नि यच्छात्।। 8।।

卐 प्रतीची दिशा.मिय.मिद्वरँ- यस्यां सोमो अधिपा मृडिता च। तस्यां श्रयेथां सुकृत. स्सचेथा- मधा पक्का.न्मिथुना सं भवाथः।। 9।।

卐 उत्तरं राष्ट्रं प्रजयोत्तराव- द्दिशा.मुदीची कृणव.न्नो अग्रम्। पाङ्क्त.ञ्छन्दः पुरुषो बभूव- विश्वै.र्विश्वाङ्गैः. स्सह सं भवेम।। 10।।

卐 ध्रुवेयँ विराण्णमो अस्त्वस्यै- शिवा पुत्रेभ्य^ उत मह्यमस्तु। सा नो देव्यदिते विश्ववार- इर्य^इव गोपा^ अभि रक्ष पक्वम्।। 11।।

卐 पितेव पुत्रा.नभि सं स्वजस्व न.-श्शिवा नो वाता^ इह वान्तु भूमौ। यमोदनं पचतो देवते ~-इह त.न्न.स्तप^ उत सत्यञ्च वेत्तु।। 12।।

卐 यद्य.त्कृष्ण. श्शकुन^ एह गत्वा-त्सर.न्विषक्तं बिल आससाद। यद्वा दास्या3 (आ)र्द्रहस्ता समङ्क्त^- उलूखलं मुसलं शुम्भताऽऽपः।। 13।।

卐 अय.ङ्ग्रावा पृथुबुध्नो वयोधाः- पूतः पवित्रै.रप हन्तु रक्षः। आ रोह चर्म महि शर्म यच्छ- मा दम्पती~ पौत्र.मघ. न्निगाताम्।। 14।।

卐 वनस्पति. स्सह देवै.र्न आग- न्त्रक्षः पिशाचा॰ अपबाधमानः। स उच्छ्रयातै प्र वदाति वाच- न्तेन लोका॰ अभि सर्वा.न्जयेम।। 15।।

卐 सप्त मेधा.न्पशवः पर्यगृह्ण-न्य एषा.ञ्ज्योतिष्मा॰ उत यश्चकर्श। त्रयस्त्रिंश.द्देवता. स्ता.न्त्सचन्ते- स न.स्स्वर्ग.मभि नेष लोकम्।। 16।।

卐 स्वर्गँ लोक.मभि नो नयासि- सञ्जायया सह पुत्रै. स्स्याम। गृह्णामि हस्त.मनु मै.त्वत्र- मा न.स्तारी. न्निर्ऋति.र्मो~ अरातिः।। 17।।

卐 ग्राहिं पाप्मान.मति ता॰ अयाम- तमो व्यस्य प्र वदासि वल्गु। वानस्पत्य उद्यतो मा जिहिंसी- र्मा तण्डुलँ वि शरी.र्देवयन्तम्।। 18।।

卐 विश्वव्यचा घृतपृष्ठो भविष्य-न्त्सयोनि.र्लोक.मुप याह्येतम्। वर्षवृद्ध.मुप यच्छ शूर्प-न्तुषं पलावा.नप तद्विनक्तु।। 19।।

卐 त्रयो लोका. स्संमिता ब्राह्मणेन- द्यौ.रेवासौ पृथिव्य1(अ)न्तरिक्षम्। अंशू.न्गृभीत्वाऽन्वारभेथा-मा प्यायन्तां पुन.रा यन्तु शूर्पम्।। 20।।

卐 पृथग्रूपाणि बहुधा पशूना- मेकरूपो भवसि सं समृद्ध्या। एता.न्त्वचँ लोहिनी.न्ता.न्नुदस्व- ग्रावा शुम्भाति मलग इव वस्त्रा।। 21।।

卐 पृथिवी.न्त्वा पृथिव्या.मा वेशयामि- तनू. स्समानी विकृता त एषा। यद्यद्युत्तँ लिखित. मर्पणेन- तेन मा सुस्रो.र्ब्रह्मणाऽपि तद्वपामि।। 22।।

卐 जनित्रीव प्रति हर्यासि सूनुं- सन्त्वा दधामि पृथिवीं पृथिव्या। उखा कुम्भी वेद्यां मा व्यथिष्ठा^- यज्ञाऽऽयुधै. राज्येनाऽतिषक्ता।। 23।।

卐 अग्निः पच.न्रक्षतु त्वा पुरस्ता- दिन्द्रो रक्षतु दक्षिणतो मरुत्वान्। वरुण.स्त्वा दृंहा.द्धरुणे प्रतीच्या^- उत्तरा.त्त्वा सोम. स्सन्ददातै।। 24।।

卐 पूताः पवित्रैः पवन्ते अभ्रा- द्दिवञ्च यन्ति पृथिवी.ञ्च लोकान्। ता^ जीवला^ जीवधन्याः प्रतिष्ठाः- पात्र आसिक्ताः पर्यग्नि.रिन्धाम्।। 25।।

卐 आ यन्ति दिवः पृथिवीं सचन्ते- भूम्या. स्सचन्ते अध्यन्तरिक्षम्। शुद्धा. स्सती.स्ता^ उ शुम्भन्त^ एव - ता^ न.स्स्वर्ग.मभि लोक. न्नयन्तु।। 26।।

卐 उतेव प्रभ्वी.रुत संमितास^- उत शुक्रा. श्शुचय.श्चाऽमृतासः। ता^ ओदनं दम्पतिभ्यां प्रशिष्टा^- आप. श्शिक्षन्तीः पचता सुनाथाः।। 27।।

卐 सङ्ख्याता. स्तोकाः पृथिवीं सचन्ते- प्राणापानै. स्संमिता^ ओषधीभिः। असङ्ख्याता^ ओप्यमाना. स्सुवर्णा.- स्सर्वँ व्यापु. श्शुचय. श्शुचित्वम्।। 28।।

卐 उद्योध.न्त्यभि वल्गन्ति तप्ता॰- फेन.मस्यन्ति बहुलांश्च बिन्दून्। योषेव दृष्ट्वा पति.मृत्विया-यैतै.स्तण्डुलै. र्भवता समापः।। 29।।

卐 उत्थापय सीदतो बुध्न एना- नद्भि.रात्मान. मभि सं स्पृशन्ताम्। अमासि पात्रै.रुदकँ यदेत- न्मिता.स्तण्डुला॰ प्रदिशो यदीमाः।। 30।।

卐 प्र यच्छ पर्शु. न्त्वरयाऽऽहरौष- महिंसन्त^ ओषधी.र्दान्तु पर्वन्न्। यासां सोम॰ परि राज्यं बभूवा-ऽमन्युता नो वीरुधो भवन्तु।। 31।।

卐 नवं बर्हि.रोदनाय स्तृणीत- प्रियं हृद.श्चक्षुषो वल्ग्वस्तु। तस्मि.न्देवा. स्सह दैवी. र्विश-न्त्विमं प्राश्न.न्त्वृतुभि.र्निषद्य।। 32।।

卐 वनस्पते स्तीर्ण.मा सीद बर्हि-रग्निष्टोमै. स्संमितो देवताभिः। त्वष्ट्रेव रूपं सुकृतं स्वधि-त्यैना^ एहा॰ परि पात्रे दद्दश्राम्।। 33।।

卐 षष्ट्यां शरत्सु निधिपा^ अभीच्छा-त्स्व॰ पक्वेनाऽभ्यश्नवातै। उपैन. ञ्जीवा.न्पितरश्च पुत्रा^- एतं स्वर्ग. ङ्गमयाऽन्त.मग्नेः।। 34।।

卐 धर्ता ध्रियस्व धरुणे पृथिव्या^- अच्युत.न्त्वा देवता.श्च्यावयन्तु। तन्त्वा दम्पती~ जीवन्तौ जीवपुत्रा-वुद्वासयात॰ पर्यग्निधानात्।। 35।।

卐 सर्वा.न्त्समागा^ अभिजित्य लोका-न्यावन्त॰ कामा.
स्समतीतृप.स्तान्। वि गाहेथा. मायवनञ्च दर्वि-रेकस्मि.न्पात्रे
अध्युद्धरैनम्।। 36।।

卐 उप स्तृणीहि प्रथय पुरस्ता-द्धृतेन पात्र.मभि घारयैतत्। वाश्रेवोस्रा
तरुणं स्तनस्यु- मिम.न्देवासो अभि.हिङ्कृणोत।। 37।।

卐 उपास्तरी.रकरो लोक.मेत- मुरु॰ प्रथता. मसम. स्स्वर्गः।
तस्मि.न्छ्रयातै महिष. स्सुपर्णो- देवा^ एन. न्देवताभ्य॰ प्र यच्छान्।।
38।।

卐 यद्य.ज्जाया पचति त्वत्पर॰पर॰- पति.र्वा जाये त्वत्तिरः। स.न्त.त्सृजेथां
सह वा.न्तदस्तु- संपादयन्तौ सह लोक.मेकम्।। 39।।

卐 यावन्तो अस्या॰ पृथिवीं सचन्ते- अस्म.त्पुत्रा॰ परि ये सम्बभूवुः।
सर्वा.स्ता९ उप पात्रे ह्वयेथा- न्नाभि.ज्ञानाना. श्शिशव. स्समायान्।।
40।।

卐 वसो.र्या^ धारा^ मधुना प्रपीना^- घृतेन मिश्रा^ अमृतस्य नाभयः।
सर्वा.स्ता^ अव रुन्धे स्वर्ग- ष्षष्ट्यां शरत्सु निधिपा^ अभीच्छात्।। 41।।

卐 निधि.न्निधिपा^ अभ्येन.मिच्छा-दनीश्वरा^ अभित. स्सन्तु ये 3 (ए)ऽन्ये। अस्माभि. र्दत्तो निहित. स्स्वर्ग- स्त्रिभिः काण्डै.स्त्री.न्त्स्वर्गा. नरुक्षत्।। 42।।

卐 अग्नी रक्ष.स्तपतु यद्वि.देव-ङ्क्रव्या.त्पिशाच^ इह मा प्र पास्त। नुदाम^ एन.मप रुध्मो अस्म-दादित्या^ एन.मङ्गिरस. स्सचन्ताम्।। 43।।

卐 आदित्येभ्यो अङ्गिरोभ्यो मध्विद-ङ्घृतेन मिश्रं प्रति वेदयामि। शुद्धहस्तौ ब्राह्मणस्याऽनिह-त्यैतं स्वर्गं सुकृता.वपीतम्।। 44।।

卐 इदं प्राप.मुत्तम.ङ्काण्डमस्य- यस्मा.ल्लोका.त्परमेष्ठी समाप। आ सिञ्च सर्पि.र्घृतव.त्सम-ङ्ग्धेष भागो अङ्गिरसो नो अत्र।। 45।।

卐 सत्याय च तपसे देवताभ्यो- निधिं शेवधिं परि दद्म^ एतम्। मा नो द्यूतेव गा.न्मा समित्यां- मा स्माऽन्यस्मा उत्सृजता पुरा मत्।। 46।।

卐 अहं पचा.म्यह. न्ददामि- ममेदु कर्म.न्करुणेऽधि जाया। कौमारो लोको अजनिष्ट पुत्रो3(ओ)-ऽन्वारभेथाँ वय^ उत्तरावत्।। 47।।

卐 न किल्बिष.मत्र नाऽऽधारो अस्ति- न य.न्मित्रै स्समममान^ एति। अनूनं पात्र.न्निहित.न्न^ एत-त्पक्तारं पक्वः पुन.रा विशाति।। 48।।

卐 प्रियं प्रियाणां.ङ्कृणवाम तम-स्ते यन्तु यतमे द्विषन्ति। धेनु.रनड्वान् वयोवय^ आय.देव- पौरुषेय.मप मृत्यु. न्नुदन्तु।। 49।।

卐 समग्नयो विदु.रन्यो अन्यँ- य^ ओषधी. स्सचते यश्च सिन्धून्। यावन्तो देवा दिव्या3 (आ)तपन्ति- हिरण्य.ञ्ज्योतिः पचतो बभूव।। 50।।

卐 एषा त्वचां पुरुषे सं बभूवा-ऽनग्ना. स्सर्वे पशवो ये अन्ये। क्षत्रेणाऽऽत्मानं परि धापयाथो-ऽमोतँ वासो मुख.मोदनस्य।। 51।।

卐 यदक्षेषु वदा यत्समित्याँ- यद्वा वदा अनृतँ वित्तकाम्या। समान. न्तन्तु.मभि सँवसानौ- तस्मि.न्त्सर्वं शमलं सादयाथः।। 52।।

卐 वर्षँ वनुष्वाऽपि गच्छ देवां-स्त्वचो धूमं पर्युत्पातयासि। विश्वव्यचा^ घृतपृष्ठो भविष्य-न्त्सयोनि.र्लोक.मुप याह्येतम्।। 53।।

卐 तन्वं स्वर्गो बहुधा वि चक्रे- यथा विद? आत्म.न्नन्यवर्णाम्। अपाजै.त्कृष्णां रुशतीं पुनानो- या लोहिनी ता.न्ते अग्नौ जुहोमि।। 54।।

卐 प्राच्यै त्वा दिशे3(ए)ऽग्नयेऽधिपतये-ऽसिताय रक्षित्र आदित्यायेषुमते। एतं परि दद्म.स्तन्नो गोपायता-ऽऽस्माक.मैतोः। दिष्ट.न्नो अत्र जरसे नि नेष- ज्जरा मृत्यवे परिणो ददा-त्वथ पक्केन सह सं भवेम।। 55।।

卐 दक्षिणायै त्वा दिश इन्द्रायाऽधिपतये- तिरश्चिराजये रक्षित्रे यमायेषुमते। एतं परि दद्म-स्तन्नो गोपायता-ऽऽस्माक.मैतोः। दिष्ट.न्नो अत्र जरसे नि नेष-ज्जरा मृत्यवे परि णो ददा-त्वथ पक्वेन सह सं भवेम।

卐 प्रतीच्यै त्वा दिशे वरुणायाऽधिपतये- पृदाकवे रक्षित्रेऽन्नायेषुमते। एतं परि दद्म-स्तन्नो गोपायता-ऽऽस्माक.मैतोः। दिष्ट.न्नो अत्र जरसे नि नेष-ज्जरा मृत्यवे परिणो ददा-त्वथ पक्वेन सह सं भवेम।

卐 उदीच्यै त्वा दिशे सोमायाऽधिपतये- स्वजाय रक्षित्रेऽशन्या इषुमत्यै। एतं परि दद्म-स्तन्नो गोपायता-ऽऽस्माक.मैतोः। दिष्टन्नो अत्र जरसे नि नेष-ज्जरा मृत्यवे परि णो ददा-त्वथ पक्वेन सह सं भवेम।।

卐 ध्रुवायै त्वा दिशे विष्णवेऽधिपतये- कल्माषग्रीवाय रक्षित्र ओषधीभ्य इषुमतीभ्यः। एतं परि दद्म-स्तन्नो गोपायता-ऽऽस्माक.मैतोः। दिष्ट.न्नो अत्र जरसे नि नेष-ज्जरा मृत्यवे परि णो ददा-त्वथ पक्वेन सह सं भवेम।।

卐 ऊर्ध्वायै त्वा दिशे बृहस्पतयेऽधिपतये- श्वित्राय रक्षित्रे वर्षायेषुमते। एतं परि दद्म-स्तन्नो गोपायता-ऽऽस्माक.मैतोः। दिष्ट.न्नो अत्र जरसे नि नेष-ज्जरा मृत्यवे परिणो ददा-त्वथ पक्वेन सह सं भवेम।। 60।।

इति तृतीयोऽनुवाकः

## ≤ द्वादश काण्डे चतुर्थोऽनुवाकः

12-04-01

卐 ददामी.त्येव ब्रूया-दनु चैना.मभुत्सत। वशां ब्रह्मभ्यो याचद्भ्य-स्तत्प्रजाव. दपत्यवत्।। 1।।

卐 प्रजया स^ वि क्रीणीते- पशुभि.श्चोप दस्यति। य^ आर्षेयेभ्यो याचद्भ्यो-देवाना.ङ्गा.न्न दित्सति।। 2।।

卐 कूटयाऽस्य सं शीर्यन्ते- श्लोणया काट.मर्दति। बण्डया दह्यन्ते गृहाः-काणया दीयते स्वम्।। 3।।

卐 विलोहितो अधिष्ठाना-च्छक्नो विन्दति गोपतिम्। तथा वशाया. स्सँविद्य-न्दुरदभ्ना ह्यु1(उ)च्यसे।। 4।।

卐 पदो.रस्या अधिष्ठाना-द्विक्लिन्दु.र्नाम विन्दति। अनामना.त्संशीर्यन्ते- या मुखेनोपजिघ्रति।। 5।।

卐 यो अस्याः कर्णा.वास्कुनो-त्या स^ देवेषु वृश्चते। लक्ष्म कुर्व इति मन्यते- कनीयः कृणुते स्वम्।। 6।।

卐 यदस्याः कस्मै चि.द्भोगाय- बाला.न्कश्चि.त्प्रकृन्तति। ततः किशोरा^ म्रियन्ते- वत्सांश्च घातुको वृकः।। 7।।

卐 यदस्या॒^ गोपतौ स॒त्या^- लोम॒ ध्वाङ्क्षो॒ अजीहिडत्। ततः कुमा॒रा^ म्रियन्ते॒- यक्ष्मो विन्द.त्यनाम॒नात्।। 8।

卐 यदस्या॒ः पल्पूलन॒ं- शकृ.द्दा॒सी स॒मस्यति। ततोऽपरूप.ञ्जायते॒- तस्मा॒.दव्येष्य॒. देनसः।। 9।।

卐 जायमाना॒ऽभि जायते- दे॒वा.न्त्सब्राह्मणा.न्व॒शा। तस्मा.द्ब्र॒ह्मभ्यो॒ देयै॒षा- तदाहु॒. स्स्वस्य॒ गोपनम्।। 10।।

卐 य^ एनाँ व॒नि.मा॒यन्ति॒- तेषा. न्दे॒वकृता व॒शा। ब्र॒ह्म॒ज्येय॒. न्तदब्रुव॒-न्य^ एना. न्निप्रिया॒यते।। 11।।

卐 य^ आर्षे॒येभ्यो॒ याचद्भ्यो- दे॒वाना॒.ङ्गा.न्न दित्सति। आ स^ दे॒वेषु वृश्चते- ब्राह्म॒णाना.ञ्च म॒न्यवे।। 12।।

卐 यो अस्य॒ स्या.द्वशाभोगो॒- अ॒न्या.मिच्छेत॒ तर्हि॒ सः। हिंस्ते॒ अदत्ता॒ पुरुषँ- याचि॒ता.ञ्च॒ न दित्सति।। 13।।

卐 यथा शेव॒धि.र्निहितो- ब्राह्म॒णाना॒. न्तथा व॒शा। ताम॒त. द॒च्छाय॒न्ति॒- यस्मि॒.न्कस्मिंश्च॒ जायते।। 14।।

卐 स्वमे॒त.द॒च्छायन्ति॒- यद्व॒शां ब्राह्म॒णा^ अ॒भि। यथैना.न॒न्यस्मि.न्जिनी॒या- दे॒वास्या^ नि॒रोधनम्।। 15।।

卐 चरे.देवाऽऽत्रैहायणा- दविज्ञातगदा सती। वशाञ्च विद्या.न्नारद ब्राह्मणा.स्तर्ह्येष्याः।। 16।।

卐 य^ एना मवशा.माह- देवाना. न्निहित.न्निधिम्। उभौ तस्मै भवाशर्वौ- परिक्र.म्येषु.मस्यतः।। 17।।

卐 यो अस्या^ ऊधो न वेदा-ऽथो~ अस्या^ स्तना.नुत। उभयेनैवाऽस्मै दुहे- दातु.ञ्चे.दशक.द्वशाम्।। 18।।

卐 दुरदभ्नैन. माशये- याचिताञ्च न दित्सति। नाऽस्मै कामा. स्समृध्यन्ते- या.मदत्त्वा चिकीर्षति।। 19।।

卐 देवा^ वशा.मयाच- न्मुख.ङ्कृत्वा ब्राह्मणम्। तेषां सर्वेषा.मदद- द्धेड. न्न्येति मानुषः।। 20।।

卐 हेडं पशूना. न्न्येति- ब्राह्मणेभ्योऽदद.द्वशाम्। देवाना. न्निहितं भागं- मर्त्य.श्चे. न्निप्रियायते।। 21।।

卐 यदन्ये शतँ याचेयु- र्ब्राह्मणा^ गोपतिँ वशाम्। अथैना. न्देवा^ अब्रुव- न्नेवं ह विदुषो वशा।। 22।।

卐 य^ एवँ विदुषेऽदत्त्वा-ऽथाऽन्येभ्यो ददद.द्वशाम्। दुर्गा तस्मा अधिष्ठाने- पृथिवी सहदेवता।। 23।।

卐 देवा वशा.मयाच-न्यस्मि.न्नग्रे अजायत। तामेताँ विद्या.न्नारद- स्सह देवै. रुदाजत।। 24।।

卐 अनपत्य.मल्पपशुँ- वशा कृणोति पूरुषम्। ब्राह्मणैश्च याचिता- मथैना. न्निप्रियायते।। 25।।

卐 अग्नीषोमाभ्या.ङ्कामाय- मित्राय वरुणाय च। तेभ्यो याचन्ति ब्राह्मणा.- स्तेष्वा वृश्चतेऽददत्।। 26।।

卐 याव.दस्या^ गोपति- र्नोपश्रृणुया.दृच. स्स्वयम्। चरे.दस्य ताव.द्गोषु- नाऽस्य श्रुत्वा गृहे वसेत्।। 27।।

卐 यो अस्या^ ऋच^ उपश्रुत्या-ऽथ गोष्वचीचरत्। आयुश्च तस्य भूतिञ्च- देवा^ वृश्चन्ति हीडिताः।। 28।।

卐 वशा चरन्ती बहुधा- देवाना. न्निहितो निधिः। आवि.ष्कृणुष्व रूपाणि- यदा स्थाम जिघांसति।। 29।।

卐 आवि.रात्मान.ङ्कृणुते- यदा स्थाम जिघांसति। अथो~ ह ब्रह्मभ्यो वशा- याञ्चाय कृणुते मनः।। 30।।

卐 मनसा सङ्कल्पयति- तद्देवा॰ अपि गच्छति। ततो ह ब्रह्माणो वशा- मुपप्रयन्ति याचितुम्।। 31।।

卐 स्वधाकारेण पितृभ्यो- यज्ञेन देवताभ्यः। दानेन राजन्यो वशाया^-
मातु.र्हेड.न्न गच्छति।। 32।।

卐 वशा माता राजन्यस्य- तथा संभूत.मग्रशः। तस्या^ आहु.रनर्पणँ-
यद्ब्रह्मभ्य॰ प्रदीयते।। 33।।

卐 यथाऽऽज्यं प्रगृहीत- मालुम्पे.त्स्रुचो अग्नये। एवा ह ब्रह्मभ्यो वशा-
मग्नय आ वृश्चतेऽददत्।। 34।।

卐 पुरोडाशवत्सा सुदुघा- लोकेऽस्मा उप तिष्ठति। साऽस्मै सर्वा.न्कामा-
न्वशा प्रददुषे दुहे।। 35।।

卐 सर्वा.न्कामान् यमराज्ये- वशा प्रददुषे दुहे। अथाऽऽहु.र्नारकँ लोक-
न्निरुन्धानस्य याचिताम्।। 36।।

卐 प्रवीयमाना चरति- क्रुद्धा गोपतये वशा। वेहतं मा मन्यमानो- मृत्यो॰
पाशेषु बध्यताम्।। 37।।

卐 यो वेहतं मन्यमानो-ऽमा च पचते वशाम्। अप्यस्य पुत्रा.न्पौत्रांश्च-
याचयते बृहस्पतिः।। 38।।

卐 मह.देषाऽव तपति- चरन्ती गोषु गौरपि। अथो~ ह गोपतये वशा-
ऽददुषे विष.न्दुहे।। 39।।

卐 प्रियं पशूनां भवति- यद्ब्रह्मभ्य꞉ प्रदीयते। अथो~ वशाया.स्तत्प्रियँ- यद्देवत्रा हवि.स्स्यात्।। 40।।

卐 या वशा^ उदकल्पय-न्देवा^ यज्ञा.दुदेत्य। तासाँ विलिप्त्यं भीमा.- मुदाकुरुत नारदः।। 41।।

卐 ता.न्देवा^ अमीमांसन्त- वशेया3 मवशेति। ता.मब्रवी.न्नारद^- एषा वशानाँ वशतमेति।। 42।।

卐 कति नु वशा नारद- यास्त्वँ वेत्थ मनुष्यजाः। तास्त्वा पृच्छामि विद्वांस- ङ्कस्या^ ना.श्नीया. दब्राह्मणः।। 43।।

卐 विलिप्त्या बृहस्पते- या च सूतवशा वशा। तस्या^ नाऽश्नीया. दब्राह्मणो- य^ आशंसेत भूत्याम्।। 44।।

卐 नम.स्ते अस्तु नारदा-ऽनुष्ठु विदुषे वशा। कतमासां भीमतमा- या.मदत्त्वा पराभवेत्।। 45।।

卐 विलिप्ती या बृहस्पते-ऽथो~ सूतवशा वशा। तस्या^ नाऽश्नीया. दब्राह्मणो- य^ आशंसेत भूत्याम्।। 46।।

卐 त्रीणि वै वशाजातानि- विलिप्ती सूतवशा वशा। ता꞉ प्र यच्छे.द्ब्रह्मभ्य- स्सोऽनाव्रस्क꞉ प्रजापतौ।। 47।।

卐 एतद्वो ब्राह्मणा^ हवि-रिति मन्वीत याचितः। वशा.श्चेदेनँ याचेयु-र्या भीमाऽददुषो गृहे।। 48।।

卐 देवा^ वशां पर्यवद-न्न नोऽदा.दिति हीडिताः। एताभि.र्ऋग्भि.र्भेद-न्तस्मा.द्वै स^ पराऽभवत्।। 49।।

卐 उतैनां भेदो नाऽददा-द्वशा.मिन्द्रेण याचितः। तस्मा.त्त. न्देवा^ आगसो-ऽवृश्च. न्नह.मुत्तरे।। 50।।

卐 ये वशाया^ अदानाय- वदन्ति परिरापिणः। इन्द्रस्य मन्यवे जाल्मा^-आ वृश्चन्ते अचित्त्या।। 51।।

卐 ये गोपतिं पराणीया-ऽथाऽऽहु.र्मा ददा इति। रुद्रस्याऽस्ता. न्ते हेतिं-परि य.न्त्यचित्त्या।। 52।।

卐 यदि हुताँ यद्यहुता- ममा च पचते वशाम्। देवा.न्त्सब्राह्मणा.नृत्वा-जिह्मो लोका.न्निर्ऋच्छति।। 53।। इति चतुर्थोऽनुवाकः

## द्वादश काण्डे पञ्चमोऽनुवाकः

12-05-01

卐 श्रमेण तपसा सृष्टा- ब्रह्मणा वित्तर्ते श्रिता।। 1।।

卐 सत्येनाऽऽवृता- श्रिया प्रावृता- यशसा परीवृता।। 2।।

卐 स्वधया परिहिता- श्रद्धया पर्यूढा- दीक्षया गुप्ता- यज्ञे प्रतिष्ठिता- लोको निधनम्।।

卐 ब्रह्म पदवायं- ब्राह्मणोऽधिपतिः।। 4।।

卐 ता.माददानस्य ब्रह्मगवी.ञ्जिनतो- ब्राह्मण.ङ्क्षत्रियस्य।। 5।।

卐 अप क्रामति सूनृता वीर्य1(अं) पुण्या लक्ष्मीः।। 6।।

12-05-02

卐 ओजश्च तेजश्च सहश्च बलञ्च- वाक्केन्द्रियञ्च श्रीश्च धर्मश्च।। 7।।

卐 ब्रह्म च क्षत्रञ्च राष्ट्रञ्च विशश्च- त्विषिश्च यशश्च वर्चश्च द्रविणञ्च।। 8।।

卐 आयुश्च रूपञ्च नाम च कीर्तिश्च- प्राणश्चाऽपानश्च चक्षुश्च श्रोत्रञ्च।। 9।।

卐 पयश्च रसश्चाऽन्नञ्चाऽन्नाद्यञ्चर्तञ्च- सत्यञ्चेष्टञ्च पूर्तञ्च प्रजा च पशवश्च।। 10।।

卐 तानि सर्वा.ण्यप क्रामन्ति- ब्रह्मगवी.माददानस्य जिनतो ब्राह्मण.ङ्क्षत्रियस्य।। 11।

12-05-03

卐 सैषा भीमा ब्रह्मगव्य1(अ)घविषा- साक्षात्कृत्या कूल्बज.मावृता।। 12।।

卐 सर्वाण्यस्या.ङ्घोराणि- सर्वे च मृत्यवः।। 13।।

卐 सर्वाण्यस्या.ङ्क्रूराणि सर्वे पुरुषवधाः।। 14।।

卐 सा ब्रह्मज्य. न्देवपीयुं ब्रह्मगव्यादीयमाना मृत्योः पड्वीश^ आ द्यति।।

15।।

卐 मेनि. श्शतवधा हि - सा ब्रह्मज्यस्य क्षितिर्हि सा।। 16।।

卐 तस्मा.द्वै ब्राह्मणाना.ङ्गौ - र्दुराधर्षा विजानता।। 17।।

卐 वज्रो धावन्ती- वैश्वानर^ उद्वीता।। 18।।

卐 हेति श्शफा.नुत्खिदन्ती- महादेवो 3(ओ)ऽपेक्षमाणा।। 19।।

卐 क्षुरपवि. रीक्षमाणा- वाश्यमानाऽभिस्फूर्जति।। 20।।

卐 मृत्युर्.हिङ्कृण्व.त्यु1(उ)ग्रो देवः पुच्छं पर्यस्यन्ती।। 21।।

卐 सर्वज्यानिः कर्णौ वरीवर्जयन्ती- राजयक्ष्मो मेहन्ती।। 22।।

卐 मेनि.र्दुह्यमाना- शीर्षक्ति.र्दुग्धा।। 23।।

卐 सेदि.रुपतिष्ठन्ती- मिथो योधः परामृष्टा।। 24।।

卐 शरव्या3(आ) मुखेऽपिनह्यमान^ ऋति.र्हन्यमाना।। 25।।

卐 अघविषा निपतन्ती- तमो निपतिता।। 26।।

卐 अनुगच्छन्ती प्राणा.नुप दासयति- ब्रह्मगवी ब्रह्मज्यस्य।। 27।।

12-05-04

卐 वैरँ विकृत्यमाना- पौत्राद्यँ विभाज्यमाना।। 28।।

卐 देवहेति.र्ह्रियमाणा- व्यृद्धि.र्हृता।। 29।।

卐 पाप्माऽधिधीयमाना- पारुष्य.मवधीयमाना।। 30।।

卐 विषं प्रयस्यन्ती- तक्मा प्रयस्ता।। 31।।

卐 अघं पच्यमाना- दुष्वप्न्यं पक्वा।। 32।।

卐 मूलबर्हणी पर्याक्रियमाणा- क्षितिः पर्याकृता।। 33।।

卐 असंज्ञा गन्धेन- शुगुद्ध्रियमाणा-ऽऽशीविष^ उद्धृता।। 34।।

卐 अभूति.रुपह्रियमाणा- पराभूति.रुपहृता।। 35।।

卐 शर्वः क्रुद्धः पिश्यमाना- शिमिदा पिशिता।। 36।।

卐 अवर्ति.रश्यमाना- निर्ऋति.रशिता।। 37।।

卐 अशिता लोका.च्छिनत्ति- ब्रह्मगवी ब्रह्मज्य. मस्मा.च्चामुष्माच्च।। 38।।

12-05-05

卐 तस्या^ आहननं.कृत्या^- मेनि. राशसनँ- वलग^ ऊबध्यम्।। 39।।

卐 अस्वगता परिह्णुता।। 40।।

卐 अग्निः क्रव्या.द्भूत्वा- ब्रह्मगवी ब्रह्मज्यं प्रविश्याऽत्ति।। 41।।

卐 सर्वा॒ऽस्याऽङ्गा॒ पर्वा॒ मूला॑नि वृश्चति।। 42।।

卐 छि॒न.त्त्य॑स्य पितृब॒न्धु- परा॑भावयति मातृब॒न्धु।। 43।।

卐 विवा॒हां॒ ज्ञाती॒.न्त्सर्वा॒.नपि॑ क्षापयति- ब्रह्मग॒वी ब्रह्म॒ज्यस्य॑ क्षत्रि॒ये॒णाऽपु॑नर्दीयमाना।। 44।।

卐 अ॒वा॒स्तु. मे॑न॒. मस्व॑ग॒. मप्र॑जस.ङ्करो.त्यपरापर॒णो भ॑वति क्षी॒यते॑।। 45।।

卐 य^ ए॒वँ वि॒दुषो॑ ब्राह्म॒णस्य॑ क्ष॒त्रियो॒ गा.मा॑द॒त्ते।। 46।।

12-05-06

卐 क्षि॒प्रँ वै तस्या॒ऽऽहन॑ने॒- गृध्रा॑ঃ कुर्वत ऐ॒लबम्।। 47।।

卐 क्षि॒प्रँ वै तस्या॒ऽऽदह॑न॒ं परि॑ नृत्यन्ति- के॒शिनी॑. राघ्ना॒नाঃ- पा॒णिनो॑रसि कुर्वा॒णाঃ- पा॒प.मै॑ल॒बम्।। 48।।

卐 क्षि॒प्रँ वै तस्य॒ वास्तु॑षु॒- वृका॑ঃ कुर्वत ऐ॒लबम्।। 49।।

卐 क्षि॒प्रँ वै तस्य॑ पृच्छन्ति॒- यत्तदासी॑3 दि॒द.न्नु ता3 दिति॑।। 50।।

卐 छि॒न्ध्या. च्छि॑न्धि॒ प्र च्छि॒.न्ध्यपि॑ क्षापय क्षा॒पय॑।। 51।।

卐 आद॒दा॑न.माङ्गिरसि- ब्रह्म॒ज्य.मुप॑ दासय।। 52।।

卐 वै॒श्व॒दे॒वी ह्यु॑1(उ)च्य॒से॑- कृ॒त्या कूल्ब॑ज॒.मावृ॑ता।। 53।।

卐 ओषन्ती समोषन्ती- ब्रह्मणो वज्रः।। 54।।

卐 क्षुरपवि.र्मृत्यु.र्भूत्वा- वि धाव त्वम्।। 55।।

卐 आ दत्से जिनताँ वर्च^- इष्टं पूर्तञ्चाऽऽशिषः।। 56।।

卐 आदाय जीत.ञ्जीताय लोके3(अ)मुष्मि.न्प्र यच्छसि।। 57।।

卐 अघ्न्ये पदवी.र्भव ब्राह्मणस्याऽभिशस्त्या।। 58।।

卐 मेनि. श्शरव्या भवा-ऽघा.दघविषा भव।। 59।।

卐 अघ्न्ये प्र शिरो जहि- ब्रह्मज्यस्य कृताऽऽगसो- देवपीयो. रराधसः।।

60।।

卐 त्वया प्रमूर्णं मृदित- मग्नि.र्दहतु दुश्चितम्।। 61।।

12-05-07

卐 वृश्च प्र वृश्च सँ वृश्च- दह प्र दह सन्दह।। 62।।

卐 ब्रह्मज्य. न्देव्यघ्न्य- आ मूला.दनुसन्दह।। 63।।

卐 यथाऽया- द्यमसादना- त्पापलोका.न्परावतः।। 64।।

卐 एवा त्व.न्देव्यघ्न्ये ब्रह्मज्यस्य कृताऽऽगसो- देवपीयो. रराधसः।। 65।।

卐 वज्रेण शतपर्वणा- तीक्ष्णेन क्षुरभृष्टिना।। 66।।

卐 प्र स्कन्धा.न्प्र शिरो जहि।। 67।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 लोमा.न्यस्य सञ्छिन्धि- त्वच.मस्य वि वेष्टय।। 68।।

卐 मांसा.न्यस्य शातय- स्नावा.न्यस्य सँवृह।। 69।।

卐 अस्थी.न्यस्य पीडय- मज्जान.मस्य निर्जहि।। 70।।

卐 सर्वा॑ऽस्याऽङ्गा- पर्वाणि वि श्रथय।। 71।।

卐 अग्नि.रेन. ङ्क्रव्या.त्पृथिव्या^ नुदता मुदोषतु- वायु. रन्तरिक्षा.न्महतो वरिम्णः।। 72।।

卐 सूर्य^ एन.न्दिवः- प्र णुदता. न्न्योषतु।। 73।। इति पञ्चमोऽनुवाकः।

## त्रयोदशं काण्डम्

### त्रयोदश काण्डे प्रथमोऽनुवाकः

13-01-01

卐 उदेहि वाजिन् यो अप्स्व1(अ)न्त-रिदं राष्ट्रं प्र विश सूनृतावत्। यो रोहितो विश्व.मिद. ञ्जजान- स^ त्वा राष्ट्राय सुभृतं बिभर्तु।। 1।।

卐 उद्वाज^ आ गन् यो अप्स्व1 (अ)न्त-र्विश^ आ रोह त्वद्योनयो याः। सोम. न्दधानोऽप^ ओषधी.र्गा- श्चतुष्पदो द्विपद^ आ वेशयेह।। 2।।

卐 यूय.मुग्रा मरुतः पृश्निमातर^- इन्द्रेण युजा प्र मृणीत शत्रून्। आ वो रोहित. श्शृणव.त्सुदानव- स्त्रिषप्तासो मरुत. स्स्वादुसंमुदः।। 3।।

卐 रुहो रुरोह रोहित आ रुरोह- गर्भो जनीना.ञ्जनुषा.मुपस्थम्। ताभि. स्संरब्ध. मन्वविन्द ‘2’- न्थषडुर्वी. र्गातुं प्रपश्य.न्निह राष्ट्र.माऽहाः।। 4।।

卐 आ ते राष्ट्र.मिह रोहितोऽहार्षी- द्व्यास्थ.न्मृधो अभय.न्ते अभूत्। तस्मै ते द्यावापृथिवी~ रेवतीभिः- काम. न्दुहाता.मिह शक्वरीभिः।। 5।।

卐 रोहितो द्यावापृथिवी~ जजान- तत्र तन्तुं परमेष्ठी ततान। तत्र शिश्रियेऽज एकपादो-ऽदृंह.द्यावापृथिवी~ बलेन।। 6।।

卐 रोहितो द्यावापृथिवी~ अदृंह- त्तेन स्व.स्तभित. न्तेन नाकः। तेनाऽन्तरिक्षँ विमिता रजांसि- तेन देवा अमृत.मन्वविन्दन्न्।। 7।।

卐 वि रोहितो अमृश.द्विश्वरूपं- समाकुर्वाणः प्ररुहो रुहश्च। दिवं रूढ्वा महता महिम्ना- सन्ते राष्ट्र.मनक्तु पयसा घृतेन।। 8।।

卐 यास्ते रुहः प्ररुहो यास्त आरुहो- याभि.रापृणासि दिव.मन्तरिक्षम्। तासां ब्रह्मणा पयसा वावृधानो- विशि राष्ट्रे जागृहि रोहितस्य।। 9।।

卐 यास्ते विश. स्तपस. स्सम्बभूवु- र्वत्स.ङ्गायत्री. मनु ता इहागुः। तास्त्वा ऽऽविशन्तु मनसा शिवेन- संमाता वत्सो अभ्येतु रोहितः।। 10।।

卐 ऊर्ध्वो रोहितो अधि नाके अस्था-द्विश्वा रूपाणि जनय.न्युवा कविः। तिग्मेनाऽग्नि.ज्योतिषा वि भाति- तृतीये चक्रे रजसि प्रियाणि।। 11।।

卐 सहस्रश्रृङ्गो वृषभो जातवेदा^- घृताऽऽहुत. स्सोमपृष्ठ स्सुवीरः। मा मा हासी.न्नाथितो नेत्त्वा जहानि- गोपोषञ्च मे वीरपोषञ्च धेहि।। 12।।

卐 रोहितो यज्ञस्य जनिता मुखञ्च- रोहिताय वाचा श्रोत्रेण मनसा जुहोमि। रोहित.न्देवा^ यन्ति सुमनस्यमाना- स्स मा रोहै. स्सामित्यै^ रोहयतु।।

卐 रोहितो यज्ञँ व्यदधा.द्विश्वकर्मणे- तस्मा.त्तेजां.स्युप मेमा.न्यागुः। वोचेय.न्ते नाभिं भुवनस्याऽधि मज्मनि।। 14।।

卐 आ त्वा रुरोह बृहत्यु3(उ)त पङ्क्ति-र ककु.ब्वर्चसा जातवेदः। आ त्वा रुरोहोष्णिहाक्षरो वषट्कार^- आ त्वा रुरोह रोहितो रेतसा सह।। 15।।

卐 अयँ वस्ते गर्भं पृथिव्या^- दिवँ वस्तेय.मन्तरिक्षम्। अयं ब्रध्नस्य विष्टपि-स्वर्लोका.न्व्यानशे।। 16।।

Sri Ganapati Sachchidananda Vagnoti Datta Peetham • Mysore •

卐 वाचस्पते पृथिवी न.स्स्योना- स्योना योनि.स्तल्पा न.स्सुशेवा। इहैव प्राण. स्सख्ये नो अस्तु- तन्त्वा परमेष्ठि.न्पर्यग्नि-रायुषा वर्चसा दधातु।। 17।

卐 वाचस्पत ऋतवः पञ्च ये नौ- वैश्वकर्मणाः परि ये सम्बभूवुः। इहैव प्राण. स्सख्ये नो अस्तु- त.न्त्वा परमेष्ठि.न्परि रोहित^- आयुषा वर्चसा दधातु।। 18।।

卐 वाचस्पते सौमनसं मनश्च- गोष्ठे नो गा^ जनय योनिषु प्रजाः। इहैव प्राण. स्सख्ये नो अस्तु- तन्त्वा परमेष्ठि. न्पर्यह. मायुषा वर्चसा दधामि।। 19।।

卐 परि त्वा धा.त्सविता देवो अग्नि- र्वर्चसा मित्रावरुणा.वभि त्वा। सर्वा^ अराती. रवक्राम.न्ने-हीदं राष्ट्र.मकर. स्सूनृतावत्।। 20।।

卐 यन्त्वा पृषती रथे- प्रष्टि.र्वहति रोहित। शुभा यासि रिण.न्नपः।। 21।।

卐 अनुव्रता रोहिणी रोहितस्य- सूरि. स्सुवर्णा बृहती सुवर्चाः। तया वाजा.न्विश्वरूपा. न्जयेम- तया विश्वाः पृतना^ अभि ष्याम।। 22।।

卐 इदं सदो रोहिणी रोहितस्या-ऽसौ पन्थाः पृषती येन याति। ता.ङ्गन्धर्वाः कश्यपा^ उन्नयन्ति- तां रक्षन्ति कवयोऽप्रमादम्।। 23।।

卐 सूर्यस्याऽश्वा^ हरयः केतुमन्त- स्सदा वह.न्त्यमृता. स्सुखं रथम्। घृतपावा रोहितो भ्राजमानो- दिव. न्देवः पृषती.मा विवेश।। 24।।

卐 यो रोहितो वृषभ.स्तिग्मशृङ्गः- पर्यग्निं परि सूर्यं बभूव। यो विष्टभ्नाति पृथिवी.न्दिवञ्च- तस्मा.द्देवा^ अधि सृष्टी. स्सृजन्ते।। 25।।

卐 रोहितो दिव माऽरुह- न्महतः पर्यर्णवात्। सर्वा^ रुरोह रोहितो रुहः।। 26।।

卐 विमिमीष्व पयस्वती. ङ्घृताची- न्देवाना. न्धेनु. रनपस्पृ.गेषा। इन्द्र.
स्सोमं पिबतु क्षेमो अ-स्त्वग्निः प्र स्तौतु वि मृधो नुदस्व।। 27।।

卐 समिद्धो अग्नि. स्समिधानो- घृतवृद्धो घृताऽऽहुतः।
अभीषा.ड्विश्वाषा.डग्नि- स्सपत्ना.न्हन्तु ये मम।। 28।।

卐 हन्त्वेना.न्प्र दह-त्वरि.र्यो नः पृतन्यति। क्रव्या.दाग्निना वयं- सपत्ना.न्प्र
दहामसि।। 29।।

卐 अवाचीना नव ज-हीन्द्र वज्रेण बाहुमान्। अधा सपत्ना. न्मामका- नग्ने.
स्तेजोभि. रादिषि।। 30।।

卐 अग्ने सपत्ना.नधरा.न्पादया़ऽस्म- द्व्यथया सजात. मुत्पिपानं बृहस्पते।
इन्द्राग्नी~ मित्रावरुणा-वधरे पद्यन्ता. मप्रतिमन्यूयमानाः।। 31।।

卐 उद्यंस्त्व. न्देव सूर्य- सपत्ना.नव मे जहि। अवैना. नश्मना जहि- ते
य.न्त्वधम. न्तमः।। 32।।

卐 वत्सो विराजो वृषभो मतीना- मारुरोह शुक्रपृष्ठोऽन्तरिक्षम्।
घृतेनाऽर्क.मभ्यर्चन्ति वत्सं- ब्रह्म सन्तं ब्रह्मणा वर्धयन्ति।। 33।।

卐 दिवञ्च रोह पृथिवीञ्च रोह- राष्ट्रञ्च रोह द्रविणञ्च रोह। प्रजाञ्च
रोहाऽमृतञ्च रोह- रोहितेन तन्व1(अं) सं स्पृशस्व।। 34।।

卐 ये देवा^ राष्ट्रभृतो- ऽभितो यन्ति सूर्यम्। तैष्टे रोहित. स्सँविदानो- राष्ट्र.
न्दधातु सुमनस्यमानः।। 35।।

卐 उत्त्वा यज्ञा ब्रह्मपूता वह-न्त्यध्वगतो हरय.स्त्वा वहन्ति। तिर.
स्समुद्र.मति रोचसेऽर्णवम्।। 36।।

卐 रोहिते~ द्यावापृथिवी~ अधि श्रिते~- वसुजिति गोजिति सन्धनाजिति।
सहस्रँ यस्य जनिमानि सप्त च- वोचेय.न्ते नाभिं भुवनस्याऽधि मज्मनि।।
37।।

卐 यशा^ यासि प्रदिशो दिशश्च- यशाः पशूना.मुत चर्षणीनाम्। यशाः
पृथिव्या^ अदित्या उपस्थे-ऽहं भूयासं सवितेव चारुः।। 38।।

卐 अमुत्र स.न्निह वे-त्थेत. स्सं.स्तानि पश्यसि। इतः पश्यन्ति रोचन-
न्दिवि सूर्यँ विपश्चितम्।। 39।।

卐 देवो देवा.न्मर्चय-स्यन्त.श्चरस्यर्णवे। समान. मग्नि.मिन्धते- तँ विदुः
कवयः परे।। 40।।

卐 अवः परेण पर^ एनाऽवरेण- पदा वत्सं बिभ्रती गौ.रुदस्थात्। सा
कद्रीची कं स्वि.दर्धं पराऽगा-त्कं स्वि.त्सूते नहि यूथे अस्मिन्न्।।

卐 एकपदी द्विपदी सा चतुष्प-द्यष्टापदी नवपदी बभूवुषी। सहस्राक्षरा भुवनस्य पङ्क्ति - स्तस्या. स्समुद्रा^ अधि वि क्षरन्ति।। 42।।

卐 आरोह. न्द्या.ममृत४- प्राव मे वचः। उत्त्वा यज्ञा^ ब्रह्मपूता^ वह-न्त्यध्वगतो हरय.स्त्वा वहन्ति।। 43।।

卐 वेद तत्ते अमर्त्य- यत्त आक्रमण न्दिवि। यत्ते सधस्थं परमे व्योमन्न्।। 44।।

卐 सूर्यो द्यां सूर्य४ पृथिवीं- सूर्य^ आपोऽति पश्यति। सूर्यो भूतस्यैक.ञ्चक्षु-रा रुरोह दिवं महीम्।। 45।।

卐 उर्वी.रास.न्परिधयो- वेदि.र्भूमि.रकल्पत। तत्रैता.वग्नी~ आधत्त-हिम.ङ्घंसञ्च रोहितः।। 46।।

卐 हिम.ङ्घंसञ्चाऽऽधाय- यूपा.न्कृत्वा पर्वतान्। वर्षाज्याऽऽवग्नी~ ईजाते~-रोहितस्य स्वर्विदः।। 47।।

卐 स्वर्विदो रोहितस्य- ब्रह्मणाऽग्नि. स्समिध्यते। तस्मा.द्धंस. स्तस्मा.द्धिम-स्तस्मा.द्यज्ञोऽजायत।। 48।।

卐 ब्रह्मणाऽग्नी~ वावृधानौ- ब्रह्मवृद्धौ ब्रह्माऽऽहुतौ। ब्रह्मेद्धा.वग्नी~ ईजाते~- रोहितस्य स्वर्विदः।। 49।।

卐 सत्ये अन्य. स्समाहितो-ऽप्स्व1(अ)न्य. स्समिध्यते। ब्रह्मेद्धा.वग्नी~ ईजाते~- रोहितस्य स्वर्विदः।। 50।।

卐 यँ वातः परिशुम्भति- यँ वेन्द्रो ब्रह्मणस्पतिः। ब्रह्मेद्धा.वग्नी~ ईजाते~- रोहितस्य स्वर्विदः।। 51।।

卐 वेदिं भूमि.ङ्कल्पयित्वा- दिव.ङ्कृत्वा दक्षिणाम्। घ्रंस न्तदग्नि.ङ्कृत्वा- चकार विश्व. मात्मन्व-द्वर्षेणाऽऽज्येन रोहितः।। 52।।

卐 वर्ष.माज्य.ङ्घ्रंसो अग्नि-र्वेदि. र्भूमि.रकल्पत। तत्रैता. न्पर्वता. नग्नि-र्गीर्भि.रूर्ध्वाँ अकल्पयत्।। 53।।

卐 गीर्भि.रूर्ध्वा.न्कल्पयित्वा- रोहितो भूमि.मब्रवीत्। त्वयीदं सर्व.ञ्जायताँ- यद्भूतँ यच्च भाव्यम्।। 54।।

卐 स^ यज्ञः प्रथमो- भूतो भव्यो अजायत। तस्मा.द्ध जज्ञ इदं सर्वं- यत्किञ्चेदँ विरोचते- रोहितेन ऋषिणाऽऽभृतम्।। 55।।

卐 यश्च गां पदा स्फुरति- प्रत्यङ्सूर्यञ्च मेहति। तस्य वृश्चामि ते मूल-न्न च्छाया.ङ्करवोऽपरम्।। 56।।

卐 यो माऽभिच्छाय. मत्येषि- मा.ञ्चाग्नि.ञ्चाऽन्तरा। तस्य वृश्चामि ते मूल-न्न च्छाया.ङ्करवोऽपरम् ।। 57।।



Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 यो अ॒द्य दे॑व सू॒र्य- त्वा॒ञ्च मा॑ऽञ्चा॑ऽन्त॒रायति। दु॒ष्वप्न्य॒. न्तस्मि॒.न्छमल-
न्दु॒रितानि च मृज्महे।। 58।।

卐 मा प्र गा॑म प॒थो व॒यं- मा य॒ज्ञा.दिन्द्र सो॒मिनः। मा॑ऽन्त. स्थु॒.र्नो
अरा॑तयः।। 59।।

卐 यो य॒ज्ञस्य प्र॒साधन॒- स्तन्तु. र्दे॒वेष्वाततः। तमाहुत. मशीमहि।। इति
प्रथमोऽनुवाकः

卐 त्रयोदश काण्डे द्वितीयोऽनुवाकः

13-02-01

卐 उद॑स्य के॒तवो॑ दि॒वि- शु॒क्रा^ भ्राज॑न्त^ ईरते। आ॒दि॒त्यस्य नृ॒चक्ष॑सो॒-
म॑हिव्रतस्य मी॒ढुषः।। 1।।

卐 दि॒शां प्र॒ज्ञानां॑ स्व॒रय॑न्त.म॒र्चिषा॑- सुप॒क्ष.मा॒शुं प॒तय॑न्त.म॒र्ण॒वे। स्तवा॑म॒
सू॒र्यं भु॒वनस्य गो॒पाँ- यो र॒श्मिभि॒.र्दिश॑^ आ॒भाति॒ सर्वाः॑।। 2।।

卐 यत्प्रा.ङ्प्रत्य.ङ्क्स्व॒धया॒ यासि॒ शीभ॒- न्नाना॑रूपे॒~ अह॑नी॒~ कर्षि॒
माय॒या॑। तदा॑दित्य॒ महि॒ तत्ते॒ महि॒ श्रवो॒- यदेको॒ विश्वं॒ परि॒ भूम॒ जाय॑से।।

卐 वि॒प॒श्चि॑त. न्त॒रणिं॒ भ्राज॑मान॒- वह॑न्ति॒ यं ह॒रित. स्स॒प्त ब॒ह्वीः।
स्रु॒ताद्य.मत्त्रि॒. र्दिव.मुन्नि॒नाय॒- तन्त्वा॑ पश्यन्ति परि॒यान्त.मा॒जिम्।। 4।।

卐 मा त्वा दभ.न्परियान्त.माजिं- स्वस्ति दुर्गा॒ अति याहि शीभम्। दिवञ्च सूर्य पृथिवीञ्च देवी- महोरात्रे~ विमिमानो यदेषि।। 5।।

卐 स्वस्ति ते सूर्य चरसे रथाय- येनोभावन्तौ परियासि सद्यः। यन्ते वहन्ति हरितो वहिष्ठा- श्शत.मश्वा यदि वा सप्त बह्वीः।। 6।।

卐 सुखं सूर्य रथ.मंशुमन्तं- स्योनं सुवह्नि.मधि तिष्ठ वाजिनम्। यन्ते वहन्ति हरितो वहिष्ठा- श्शत.मश्वा यदि वा सप्त बह्वीः।। 7।।

卐 सप्त सूर्यो हरितो यातवे रथे- हिरण्यत्वचसो बृहती.रयुक्त। अमोचि शुक्रो रजस॰ परस्ता-द्विधूय देव.स्तमो दिव.माऽरुहत्।। 8।।

卐 उत्केतुना बृहता देव^ आऽग- न्नपावृ.क्तमोऽभि ज्योति.रश्रैत्। दिव्य. स्सुपर्ण. स्स^ वीरो व्यख्य- ददिते॰ पुत्रो भुवनानि विश्वा।। 9।।

卐 उद्य.न्नरश्मी.ना तनुषे- विश्वा रूपाणि पुष्यसि। उभा समुद्रौ क्रतुना वि भासि- सर्वा न्लोका.न्परिभू. भ्राजमानः।। 10।।

卐 पूर्वापर.ञ्चरतो माययैतौ- शिशू~ क्रीडन्तौ परियातोऽर्णवम्। विश्वाऽन्यो भुवना विचष्टे- हैरण्यै.रन्यं हरितो वहन्ति।। 11।।

卐 दिवि त्वाऽत्त्रि. रधारय- त्सूर्या मासाय कर्तवे। स^ एषि सुधृत. स्तप- न्विश्वा भूताऽव चाकशत्।। 12।।

卐 उभावन्तौ समर्षसि- वत्स. स्संमातरा.विव। नन्वे3(ए)त.दितः पुरा-
ब्रह्म देवा^ अमी~ विदुः।। 13।।

卐 यत्समुद्र.मनु श्रित-न्त.त्सिषासति सूर्यः। अध्वाऽस्य विततो महा-
न्पूर्वश्चाऽपरश्च यः।। 14।।

卐 तं स.माप्नोति जूतिभि- स्ततो नाऽप चिकित्सति। तेनाऽमृतस्य भक्ष-
न्देवाना. न्नाव रुन्धते।। 15।।

卐 उदु त्य.ञ्जातवेदस- न्देवँ वहन्ति केतवः। दृशे विश्वाय सूर्यम्।। 16।।

卐 अप त्ये तायवो यथा- नक्षत्रा य.न्त्यक्तुभिः। सूराय विश्वचक्षसे।।
17।।

卐 अदृश्र.न्नस्य केतवो- वि रश्मयो जनाँ॥ अनु। भ्राजन्तो अग्नयो यथा।।
18।।

卐 तरणि.र्विश्वदर्शतो- ज्योतिष्कृ.दसि सूर्य। विश्व.मा भासि रोचन।। 19

卐 प्रत्य.ङ्देवानाँ विशः- प्रत्य.ङ्ङुदेषि मानुषीः। प्रत्य.ङ्विश्वं स्वर्दृशे।। 20।

卐 येना पावक चक्षसा- भुरण्यन्त. ञ्जनाँ॥ अनु। त्वँ वरुण पश्यसि।।
21।।

卐 वि द्या.मेषि रजस्पृ- थ्वह.र्मिमानो अक्तुभिः। पश्य.न्जन्मानि सूर्य।।

22।।

卐 सप्त त्वा हरितो रथे- वहन्ति देव सूर्य। शोचिष्केशँ विचक्षणम्।। 23।।

卐 अयुक्त सप्त शुन्ध्युव- स्सूरो रथस्य नप्त्यः। ताभि.र्याति स्वयुक्तिभिः।।

24।।

卐 रोहितो दिव माऽरुह- त्तपसा तपस्वी। स^ योनि.मैति स^ उ जायते

पुन- स्स^ देवाना. मधिपति.र्बभूव।। 25।।

卐 यो विश्वचर्षणि.रुत विश्वतोमुखो- यो विश्वतस्पाणि. रुत विश्वतस्पृथः।

सं बाहुभ्यां भरति सं पतत्रै- र्द्यावापृथिवी~ जनय.न्देव^ एकः।। 26।।

卐 एकपा.द्द्विपदो भूयो वि चक्रमे- द्विपा त्त्रिपाद.मभ्येति पश्चात्। द्विपाद्ध

षट्पदो भूयो वि चक्रमे- त एकपद. स्तन्व1 (अं) समासते।। 27।।

卐 अतन्द्रो यास्य.न्हरितो यदास्था- द्वे~ रूपे~ कृणुते रोचमानः। केतुमा.

नुद्य.न्त्सहमानो रजांसि- विश्वा^ आदित्य प्रवतो वि भासि।। 28।।

卐 बण्महा॰ असि सूर्य- ब.डादित्य महा॰ असि। महांस्ते महतो महिमा-

त्व.मादित्य महा॰ असि।। 29।।

卐 रोचसे दिवि रोचसे अन्तरिक्षे पतङ्ग- पृथिव्यां रोचसे रोचसे अप्स्व1(अ)न्तः। उभा समुद्रौ रुच्या व्यापिथ- देवो देवासि महिष. स्स्वर्जित्।। 30।।

卐 अर्वा.ङ्परस्ता. त्प्रयतो व्यध्व^- आशु.र्विपश्चि. त्पतय.न्पतङ्गः। विष्णु.र्विचित्त. श्शवसाऽधितिष्ठ-न्प्र केतुना सहते विश्व.मेजत्।। 31।।

卐 चित्र. श्चिकित्वा.न्महिष. स्सुपर्ण^- आरोचय.न्रोदसी~ अन्तरिक्षम्। अहोरात्रे~ परि सूर्यँ वसाने~- प्रास्य विश्वा तिरतो वीर्याणि।। 32।।

卐 तिग्मो विभ्राज.न्तन्व1(अं) शिशानो-ऽरङ्गमासः प्रवतो रराणः। ज्योतिष्मा.न्पक्षी महिषो वयोधा^- विश्वा आऽस्था.त्प्रदिशः कल्पमानः।। 33।।

卐 चित्र.न्देवाना. ङ्केतु.रनीक- ञ्ज्योतिष्मा. न्प्रदिश. स्सूर्य^ उद्यन्न्। दिवाकरोऽतिद्युम्नै. स्तमांसि- विश्वाऽतारी. द्दुरितानि शुक्रः।। 34।।

卐 चित्र. न्देवाना. मुदगा. दनीक- ञ्चक्षु.र्मित्रस्य वरुणस्या1ग्नेः। आऽप्रा^ द्यावापृथिवी~ अन्तरिक्षं- सूर्य^ आत्मा जगत. स्तस्थुष.श्च।। 35।।

卐 उच्चा पतन्त. मरुणं सुपर्ण- मध्ये दिव. स्तरणिं भ्राजमानम्। पश्याम त्वा सवितारँ य.माहु- रजस्र. ञ्ज्योति. र्यदविन्द.दत्त्रिः।। 36।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

卐 दिव.स्पृष्ठे धावमानं सुपर्ण- मदित्याः पुत्र. न्नाथकाम^ उपयामि भीतः।
स^ न.स्सूर्य प्र तिर दीर्घ.मायु- र्मा रिषाम सुमतौ ते स्याम।। 37।।

卐 सहस्राह्ण्यँ वियता.वस्य पक्षौ- हरे.र्हंसस्य पतत. स्स्वर्गम्। स^
देवा.न्त्सर्वा. नुरस्युपदद्य- संपश्य.न्याति भुवनानि विश्वा।। 38।।

卐 रोहितः कालो अभव- द्रोहितोऽग्रे प्रजापतिः। रोहितो यज्ञानां मुखं-
रोहित. स्स्व1(अ) राऽभरत्।। 39।।

卐 रोहितो लोको अभव- द्रोहितोऽत्यतप.द्दिवम्। रोहितो रश्मिभि. र्भूमिं-
समुद्र. मनु सञ्चरत्।। 40।।

卐 सर्वा^ दिश. स्समचर- द्रोहितोऽधिपति.र्दिवः। दिवं समुद्र. मा.द्भूमिं-
सर्वं भूतँ वि रक्षति।। 41।।

卐 आरोह.न्छुक्रो बृहती. रतन्द्रो- द्वे~ रूपे~ कृणुते रोचमानः। चित्र.
श्चिकित्वा. न्महिषो- वातमाया^ यावतो लोका. नभि य.द्विभाति।। 42।।

卐 अभ्य1(अ)न्य.देति पर्यन्य.दस्यते-ऽहोरात्राभ्यां महिषः कल्पमानः।
सूर्यँ वयं रजसि क्षियन्त- ङ्गातुविदं हवामहे नाधमानाः।। 43।।

卐 पृथिवीप्रो महिषो नाधमानस्य गातु- रदब्धचक्षुः परि विश्वं बभूव। विश्वं
संपश्य.न्त्सुविदत्रो यजत्र^- इदं शृणोतु य.दहं ब्रवीमि।। 44।। (बभूव)

卐 पर्यस्य महिमा पृथिवीं समुद्र- ञ्ज्योतिषा विभ्राज.न्परि द्या.मन्तरिक्षम्।
सर्वं संपश्य.न्त्सुविदत्रो यजत्र^- इदं शृणोतु य.दहं ब्रवीमि।।

卐 अबोध्यग्नि. स्समिधा जनानां- प्रति धेनु. मिवाऽऽयती. मुषासम्।
यह्वा^इव प्र वया- मुज्जिहाना॰ प्र भानव. स्सिस्रते नाक.मच्छ।। 46।।

## ॐ त्रयोदश काण्डे तृतीयोऽनुवाकः

13-03-01

卐 य^ इमे~ द्यावापृथिवी~ जजान- यो द्रापि.ङ्कृत्वा भुवनानि वस्ते।
यस्मि.न्क्षियन्ति प्रदिश. ष्षडुर्वी- र्या॰ पतङ्गो अनु विचाकशीति। तस्य
देवस्य क्रुद्धस्यैत.दागो- य^ एवँ विद्वांसं ब्राह्मण.ञ्जिनाति। उद्वेपय रोहित प्र
क्षिणीहि ब्रह्मज्यस्य प्रति मुञ्च पाशान्।।

卐 यस्मा.द्वाता^ ऋतुथा पवन्ते- यस्मा.त्समुद्रा^ अधि विक्षरन्ति। तस्य
देवस्य क्रुद्धस्यैत.दागो- य^ एवँ विद्वांसं ब्राह्मण.ञ्जिनाति। उद्वेपय रोहित प्र
क्षिणीहि- ब्रह्मज्यस्य प्रति मुञ्च पाशान्।।

卐 यो मारयति प्राणयति- यस्मा त्प्राणन्ति भुवनानि विश्वा। तस्य देवस्य
क्रुद्धस्यैत.दागो- य^ एवँ विद्वांसं ब्राह्मण.ञ्जिनाति। उद्वेपय रोहित प्र
क्षिणीहि- ब्रह्मज्यस्य प्रति मुञ्च पाशान्।।

Sri Ganapati Sacchidananda Avadhoota Datta Peetham • Mysore •

卐 यः प्राणेन द्यावापृथिवी तर्पय- त्यपानेन समुद्रस्य जठरँ यः पिपर्ति। तस्य देवस्य क्रुद्धस्यैत.दागो- य एवँ विद्वांसं ब्राह्मण.ञ्जिनाति। उद्वेपय रोहित प्र क्षिणीहि- ब्रह्मज्यस्य प्रति मुञ्च पाशान्।।

卐 यस्मि.न्विरा.ढ्परमेष्ठी प्रजापति- रग्नि.र्वैश्वानर. स्सह पङ्क्त्या श्रितः। यः परस्य प्राणं परमस्य तेज आददे। तस्य देवस्य क्रुद्धस्यैत.दागो- य एवँ विद्वांसं ब्राह्मण.ञ्जिनाति। उद्वेपय रोहित प्र क्षिणीहि- ब्रह्मज्यस्य प्रति मुञ्च पाशान्।।

卐 यस्मि.'2'न्थषडुर्वीः पञ्च दिशो अधिश्रिता- श्चतस्र आपो यज्ञस्य त्रयोऽक्षराः। यो अन्तरा रोदसी क्रुद्ध.श्चक्षुषैक्षत। तस्य देवस्य क्रुद्धस्यैत.दागो- य एवँ विद्वांसं ब्राह्मण.ञ्जिनाति। उद्वेपय रोहित प्र क्षिणीहि- ब्रह्मज्यस्य प्रति मुञ्च पाशान्।। 6।।

卐 यो अन्नादो अन्नपति. र्बभूव- ब्रह्मणस्पति.रुत यः। भूतो भविष्य.द्भुवनस्य य.स्पतिः। तस्य देवस्य क्रुद्धस्यैत.दागो- य एवँ विद्वांसं ब्राह्मण.ञ्जिनाति। उद्वेपय रोहित प्र क्षिणीहि- ब्रह्मज्यस्य प्रति मुञ्च पाशान्।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 अहोरात्रै.र्विमित. न्त्रिंशदङ्ग- न्त्रयोदशं मासँ यो निर्मिमीते। तस्य देवस्य क्रुद्धस्यैत.दागो- य॑ एवँ विद्वांसं ब्राह्मण.ञ्जिनाति। उद्वेपय रोहित प्र क्षिणीहि- ब्रह्मज्यस्य प्रति मुञ्च पाशान्।। 8।।

卐 कृष्ण. न्नियानं हरय. स्सुपर्णा॑- अपो वसाना॑ दिव.मुत्पतन्ति। त॑ आऽववृत्र.न्त्सदना.दृतस्य। तस्य देवस्य क्रुद्धस्यैत.दागो- य॑ एवँ विद्वांसं ब्राह्मण.ञ्जिनाति। उद्वेपय रोहित प्र क्षिणीहि- ब्रह्मज्यस्य प्रति मुञ्च पाशान्।।

卐 यत्ते चन्द्र.ङ्कश्यप रोचनाव- द्यत्संहितं पुष्कल.ञ्चित्रभानु। यस्मि.न्त्सूर्या॑ आऽर्पिता. स्सप्त साकम्। तस्य देवस्य क्रुद्धस्यैत.दागो- य॑ एवँ विद्वांसं ब्राह्मण.ञ्जिनाति। उद्वेपय रोहित प्र क्षिणीहि- ब्रह्मज्यस्य प्रति मुञ्च पाशान्।।

卐 बृह.देन मनु वस्ते पुरस्ता- द्रथन्तरं प्रति गृह्णाति पश्चात्। ज्योति.र्वसाने सद.मप्रमादम्। तस्य देवस्य क्रुद्धस्यैत.दागो- य एवँ विद्वांसं ब्राह्मण.ञ्जिनाति। उद्वेपय रोहित प्र क्षिणीहि- ब्रह्मज्यस्य प्रति मुञ्च पाशान्।। 11।।

卐 बृह. दन्यतः पक्ष^ आसी- द्रथन्तर. मन्यत. स्सबले सध्रीची। यद्रोहित. मजनयन्त देवाः। तस्य देवस्य क्रुद्धस्यैत.दागो- य^ एवँ विद्वांसं ब्राह्मण.ञ्जिनाति। उद्वेपय रोहित प्र क्षिणीहि- ब्रह्मज्यस्य प्रति मुञ्च पाशान्।। 12।।

卐 स^ वरुण. स्साय. मग्नि.र्भवति- स^ मित्रो भवति प्रात.रुद्यन्न्। स^ सविता भूत्वाऽन्तरिक्षेण याति- स^ इन्द्रो भूत्वा तपति मध्यतो दिवम्। तस्य देवस्य क्रुद्धस्यैत.दागो- य^ एवँ विद्वांसं ब्राह्मण.ञ्जिनाति। उद्वेपय रोहित प्र क्षिणीहि- ब्रह्मज्यस्य प्रति मुञ्च पाशान्।। 13।।

卐 सहस्राह्ण्यँ वियता.वस्य पक्षौ- हरेर्हंसस्य पतत. स्स्वर्गम्। स^ देवा.न्त्सर्वा नुरस्युपदद्य- संपश्य.न्याति भुवनानि विश्वा। तस्य देवस्य क्रुद्धस्यैत.दागो- य^ एवँ विद्वांसं ब्राह्मण.ञ्जिनाति। उद्वेपय रोहित प्र क्षिणीहि- ब्रह्मज्यस्य प्रति मुञ्च पाशान्।। 14।।

卐 अयं स^ देवो अप्स्व1(अ)न्त- स्सहस्रमूलः पुरुशाको अत्त्रिः। य^ इदँ विश्वं भुवन.ञ्जजान। तस्य देवस्य क्रुद्धस्यैत.दागो- य^ एवँ विद्वांसं ब्राह्मण.ञ्जिनाति। उद्वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुञ्च पाशान्।। 15।।

卐 शुक्रँ वहन्ति हरयो रघुष्यदो- देव. न्दिवि वर्चसा भ्राजमानम्। यस्योर्ध्वा दिव.न्तन्व1 (अ)स्तप- न्त्यर्वा.ङ्सुवर्णैः पटरै. र्विभाति। तस्य देवस्य क्रुद्धस्यैत.दागो- य^ एवँ विद्वांसं ब्राह्मण.ञ्जिनाति। उद्वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुञ्च पाशान्।। 16।।

卐 येनाऽऽदित्या.न्हरित. स्सँवहन्ति- येन यज्ञेन बहवो यन्ति प्रजानन्तः। यदेक.ञ्ज्योति. र्बहुधा विभाति। तस्य देवस्य क्रुद्धस्यैत.दागो- य^ एवँ विद्वांसं ब्राह्मण.ञ्जिनाति। उद्वेपय रोहित प्र क्षिणीहि- ब्रह्मज्यस्य प्रति मुञ्च पाशान्।। 17।।

卐 सप्त युञ्जन्ति रथ. मेकचक्र- मेको अश्वो वहति सप्तनामा। त्रिनाभि चक्र. मजर. मनर्वँ- यत्रेमा विश्वा भुवनाऽधितस्थुः। तस्य देवस्य क्रुद्धस्यैत.दागो- य^ एवँ विद्वांसं ब्राह्मण.ञ्जिनाति। उद्वेपय रोहित प्र क्षिणीहि- ब्रह्मज्यस्य प्रति मुञ्च पाशान्।। 18।।

卐 अष्टधा युक्तो वहति वह्नि. रुग्रः- पिता देवाना.ञ्जनिता मतीनाम्। ऋतस्य तन्तुं मनसा मिमान- स्सर्वा दिशः पवते मातरिश्वा। तस्य देवस्य क्रुद्धस्यैत.दागो- य एवँ विद्वांसं ब्राह्मण.ञ्जिनाति। उद्वेपय रोहित प्र क्षिणीहि- ब्रह्मज्यस्य प्रति मुञ्च पाशान्।। 19।।

卐 सम्यञ्च. न्तन्तुं प्रदिशोऽनु सर्वा^- अन्त.र्गायत्र्या. ममृतस्य गर्भे। तस्य देवस्य क्रुद्धस्यैत.दागो- य^ एवँ विद्वांसं ब्राह्मण.ञ्जिनाति। उद्वेपय रोहित प्र क्षिणीहि- ब्रह्मज्यस्य प्रति मुञ्च पाशान्।। 20।।

卐 निम्रुच. स्तिस्रो व्युषो ह तिस्र- स्त्रीणि रजांसि दिवो अङ्ग तिस्रः। विद्मा ते अग्ने त्रेधा जनित्र-न्त्रेधा देवाना.ञ्जनिमानि विद्म। तस्य देवस्य क्रुद्धस्यैत.दागो- य^ एवँ विद्वांसं ब्राह्मण.ञ्जिनाति। उद्वेपय रोहित प्र क्षिणीहि- ब्रह्मज्यस्य प्रति मुञ्च पाशान्।। 21।।

卐 वि य^ और्णो.त्पृथिवी.ञ्जायमान^- आ समुद्र. मदधा. दन्तरिक्षे। तस्य देवस्य क्रुद्धस्यैत.दागो- य^ एवँ विद्वांसं ब्राह्मण.ञ्जिनाति। उद्वेपय रोहित प्र क्षिणीहि- ब्रह्मज्यस्य प्रति मुञ्च पाशान्।। 22।।

卐 त्व.मग्ने क्रतुभिꣳ केतुभि.र्हितो3(ओ)-ऽर्क स्समिद्ध^ उदरोचथा^ दिवि। किमभ्यार्च. न्मरुतꣳ पृश्निमातरो- यद्रोहित. मजनयन्त देवाः। तस्य देवस्य क्रुद्धस्यैत.दागो- य^ एवँ विद्वांसं ब्राह्मण.ञ्जिनाति। उद्वेपय रोहित प्र क्षिणीहि- ब्रह्मज्यस्य प्रति मुञ्च पाशान्।। 23।।

卐 य^ आत्मदा^ बलदा^ यस्य विश्व -उपाऽऽसते प्रशिषँ यस्य देवाः। यो3(ओ)ऽस्येशे द्विपदो यश्चतुष्पदः। तस्य देवस्य क्रुद्धस्यैत.दागो- य^ एवँ

विद्वांसं ब्राह्मण.ञ्जिनाति। उद्वेपय रोहित प्र क्षिणीहि- ब्रह्मज्यस्य प्रति मुञ्च पाशान्।। 24।।

卐 एकपा.द्विपदो भूयो वि चक्रमे- द्विपा.त्त्रिपाद.मभ्येति पश्चात्। चतुष्पा.च्चक्रे द्विपदा.मभिस्वरे- संपश्य.न्पङ्क्ति. मुपतिष्ठमानः। तस्य देवस्य क्रुद्धस्यैत.दागो- य^ एवँ विद्वांसं ब्राह्मण.ञ्जिनाति। उद्वेपय रोहित प्र क्षिणीहि- ब्रह्मज्यस्य प्रति मुञ्च पाशान्।। 25।।

卐 कृष्णायाः पुत्रो अर्जुनो- रात्र्या वत्सोऽजायत। स^ ह द्या.मधि रोहति- रुहो रुरोह रोहितः।। 26।।

## त्रयोदश काण्डे चतुर्थोऽनुवाकः

13-04-01

卐 स^ एति सविता स्व-र्दिव.स्पृष्ठेऽवचाकशत्।। रश्मिभि.र्नभ^ आभृतं- महेन्द्र^ एत्यावृतः।।

卐 स^ धाता स^ विधर्ता- स^ वायु.र्नभ^ उच्छ्रितम्। रश्मिभि.र्नभ^ आभृतं- महेन्द्र^ एत्यावृतः।।

卐 सोऽर्यमा स^ वरुण- स्स^ रुद्र. स्स^ महादेवः। रश्मिभि.र्नभ^ आभृतं- महेन्द्र^ एत्यावृतः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 सो अग्नि. स्स^ उ सूर्य- स्स^ उ एव महायमः। रश्मिभि.र्नभ^ आभृतं-
महेन्द्र^ एत्यावृतः।।

卐 ताँ वत्सा^ उप तिष्ठ-न्त्येकशीर्‌षाणो युता^ दश। रश्मिभि.र्नभ^ आभृतं-
महेन्द्र^ एत्यावृतः।

卐 पश्चा.त्प्राञ्च^ आ तन्वन्ति- यदुदेति वि भासति। रश्मिभि.र्नभ^ आभृतं-
महेन्द्र^ एत्यावृतः।।

卐 तस्यैष^ मारुतो गण- स्स^ एति शिक्याकृतः।। 8।।

卐 रश्मिभि.र्नभ^ आभृतं- महेन्द्र^ एत्यावृतः।। 9।। (विभागः?)

卐 तस्येमे नव कोशा^- विष्टम्भा नवधा हिताः।। 10।।

卐 स^ प्रजाभ्यो वि पश्यति- यच्च प्राणति यच्च न।। 11।।

卐 तमिद. न्निगतं सह- स्स^ एष^ एक^ एकवृ.देक एव।। 12।।

卐 एते अस्मि.न्देवा^- एकवृतो भवन्ति।। 13।।

13-04-02

卐 कीर्तिश्च यशश्चाऽम्भश्च नभश्च ब्राह्मणवर्चस.ञ्चाऽन्न.ञ्चाऽन्नाद्यञ्च।।
14।।

卐 य^ एत. न्देव. मेकवृतँ वेद।। 15।।

卐 न द्वितीयो न तृतीयः श्चतुर्थो नाऽप्युच्यते। य॑ एत॒न्देव॒मेक॒वृतं॒ वेद॑।। 16।।

卐 न प॑ञ्चमो न षष्ठः स्स॑प्तमो नाऽप्युच्यते। य॑ एत॒न्देव॒मेक॒वृतं॒ वेद॑।। 17।।

卐 नाऽष्टमो न न॑वमो द॑शमो नाऽप्युच्यते। य॑ एत॒न्देव॒मेक॒वृतं॒ वेद॑।। 18।।

卐 स॑ सर्व॑स्मै॒ वि प॑श्यति॒ यच्च॑ प्रा॒णति॒ यच्च॒ न। य॑ एत॒न्देव॒मेक॒वृतं॒ वेद॑।। 19।।

卐 तमि॒द॒न्निग॑तं॒ सह॒ स्स॑ ए॒ष॑ एक॑ एक॒वृ॒देक॑ ए॒व। य॑ एत॒न्देव॒मेक॒वृतं॒ वेद॑।। 20।।

卐 सर्वे॑ अस्मि॒न्दे॒वा॑ एक॒वृतो॑ भवन्ति। य॑ एत॒न्देव॒मेक॒वृतं॒ वेद॑।। 21।।

13-04-03

卐 ब्रह्म॑ च॒ तप॑श्च की॒र्तिश्च॒ यश॒श्चाऽम्भ॑श्च॒ नभ॑श्च ब्राह्मणवर्च॒स॒ञ्चाऽन्न॒ञ्चा॒ऽन्नाद्य॑ञ्च। य॑ एत॒न्देव॒मेक॒वृतं॒ वेद॑।। 22।।

卐 भू॒तञ्च॒ भव्य॑ञ्च श्र॒द्धा च॒ रुचि॑श्च स्व॒र्ग॑श्च स्व॒धा च॑।

卐 य॒^ ए॒त. न्दे॒व. मे॑क॒वृतँ॒ वेद॑।।

卐 स॒^ ए॒व मृ॒त्यु. स्सो॒3(ओ॒) ऽमृ॒तं- सो॒3 (ओ॒)ऽभ्व॑1(अं॒) स^ रक्षः॑।। 25।।

卐 स^ रु॒द्रो व॑सु॒वनि॒. र्वसु॒देये॑- नमोवा॒के व॑षट्का॒रोऽनु॒ संहि॑तः।। 26।।

卐 तस्ये॒मे सर्वे॑ या॒त॒व^ उप॑ प्र॒शिष॑.मासते।। 27।।

卐 तस्या॒मू सर्वा॒ नक्ष॑त्रा॒ वशे॑ च॒न्द्रम॑सा स॒ह।। 28।।

13-04-04

卐 स^ वा अह्नो॑ऽजायत॒- तस्मा॒.दह॑. रजायत।। 29।।

卐 स^ वै रात्र्या॑^ अजायत॒- तस्मा॒.द्रात्रि॑. रजायत।। 30।।

卐 स^ वा अ॒न्तरि॑क्षा. दजायत॒- तस्मा॑.द॒न्तरि॑क्ष. मजायत।। 31।।

卐 स^ वै वा॒यो. र॑जायत॒- तस्मा॑.द्वा॒यु. र॑जायत।। 32।।

卐 स^ वै दि॒वो॑ऽजायत॒- तस्मा॒.द्द्यौरध्य॑जायत।। 33।।

卐 स^ वै दि॒ग्भ्यो॑ऽजायत॒- तस्मा॒.द्दिशो॑ऽजायन्त।। 34।।

卐 स^ वै भूमे॑. रजायत॒- तस्मा॒.द्भूमि॑. रजायत।। 35।।

卐 स^ वा अ॒ग्ने. र॑जायत॒- तस्मा॑. द॒ग्नि. र॑जायत।। 36।।

卐 स^ वा अ॒द्भ्यो॑ऽजायत॒- तस्मा॒.दापो॑ऽजायन्त।। 37।।

卐 स^ वा ऋग्भ्योऽजायत- तस्मा.दृचोऽजायन्त।। 38।।

卐 स^ वै यज्ञा. दजायत- तस्मा.द्यज्ञोऽजायत।। 39।।

卐 स^ यज्ञ. स्तस्य यज्ञ- स्स^ यज्ञस्य शिर.स्कृतम्।। 40।।

卐 स^ स्तनयति स^ वि द्योतते- स^ उ अश्मान.मस्यति।। 41।।

卐 पापाय वा भद्राय वा- पुरुषायाऽसुराय वा।। 42।।

卐 यद्वा कृणो.ष्योषधी- र्यद्वा वर्षसि भद्रया- यद्वा जन्य. मवीवृधः।। 43।।

卐 तावां.स्ते मघव. न्महिमोपो~ ते तन्व.श्शतम्।। 44।।

卐 उपो~ ते बद्धे बद्धानि- यदि वाऽसि न्यर्बुदम्।। 45।।

13-04-05

卐 भूया.निन्द्रो नमुरा-द्भूया.निन्द्राऽसि मृत्युभ्यः।। 46।।

卐 भूया.नरात्या. श्शच्याः- पति.स्त्वमिन्द्रासि- विभूः प्रभू- रिति त्वोपाऽऽस्महे वयम्।। 47।।

卐 नमस्ते अस्तु पश्यत- पश्य मा पश्यत।

卐 अन्नाद्येन यशसा तेजसा ब्राह्मणवर्चसेन।। 49।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 अम्भो अमो मह स्सह^- इति त्वोपा ऽऽस्महे वयम्। नमस्ते अस्तु पश्यत- पश्य मा पश्यत। अन्नाद्येन यशसा- तेजसा ब्राह्मणवर्चसेन।।

卐 अम्भो अरुणं रजतं रज. स्सह^- इति त्वोपा ऽऽस्महे वयम्। नमस्ते अस्तु पश्यत पश्य मा पश्यत। अन्नाद्येन यशसा- तेजसा ब्राह्मणवर्चसेन।। 51।।

13-04-06

卐 उरुः पृथु. स्सुभू. र्भुव^- इति त्वोपा ऽऽस्महे वयम्। नमस्ते अस्तु पश्यत- पश्य मा पश्यत। अन्नाद्येन यशसा- तेजसा ब्राह्मणवर्चसेन।।

卐 प्रथो वरो व्यचो लोक^- इति त्वोपा ऽऽस्महे वयम्। नमस्ते अस्तु पश्यत- पश्य मा पश्यत। अन्नाद्येन यशसा- तेजसा ब्राह्मणवर्चसेन।।

卐 भवद्वसु. रिदद्वसु. स्सँयद्वसु. रायद्वसु-रिति त्वोपा ऽऽस्महे वयम्।

卐 नमस्ते अस्तु पश्यत- पश्य मा पश्यत।

卐 अन्नाद्येन यशसा- तेजसा ब्राह्मणवर्चसेन।। 56।।

# ॐचतुर्दशं काण्डम्

## चतुर्दश काण्डे प्रथमोऽनुवाकः

14-01-01

卐 स॒त्ये.नोत्त॑भिता॒ भूमि॒- स्सूर्ये॒णोत्त॑भिता॒ द्यौः। ऋ॒तेना॑ऽऽदि॒त्या.स्ति॑ष्ठन्ति-दि॒वि सोमो॒ अधि॑ श्रि॒तः।। 1।।

卐 सोमे॑नाऽऽदि॒त्या^ ब॒लिन॒- स्सोमे॑न पृथि॒वी म॒ही। अथो॒~ नक्ष॑त्राणा.मे॒षा-मु॒पस्थे॒ सोम॒^ आहि॑तः।। 2।।

卐 सोमं॑ मन्यते प॒पिवा-न्यत्सं॑पि॒ष.न्त्योष॑धिम्। सोमँ॒ यं ब्र॒ह्माणो॑ वि॒दु-र्न तस्या॑ऽश्नाति॒ पार्थि॑वः।। 3।।

卐 यत्त्वा॑ सोम प्र॒पिब॑न्ति॒- तत॒^ आ प्या॑यसे॒ पुनः। वा॒यु. स्सोम॑स्य रक्षि॒ता-समा॑ना॒ं मास॒^ आकृ॑तिः।। 4।।

卐 आ॒च्छद्वि॑धानै.र्गुपि॒तो- बार्ह॑तै. स्सोम रक्षि॒तः। ग्राव्णा॒.मिच्छृ॒ण्व.न्ति॑ष्ठसि॒- न ते॑ अश्नाति॒ पार्थि॑वः।। 5।।

卐 चित्ति॑रा उ॒पबर्ह॑ण॒.-ञ्चक्षु॑रा अ॒भ्यञ्ज॑नम्। द्यौर्भूमि॒ः कोश॑^ आसी॒.-द्यदया॑.त्सू॒र्या पति॑म्।। 6।।

卐 रैभ्यासी.दनुदेयी- नाराशंसी न्योचनी। सूर्याया भद्र.मिद्वासो- गाथयैति परिष्कृता।। 7।।

卐 स्तोमा आस.न्प्रतिधयः- कुरीर.ञ्छन्द^ ओपशः। सूर्याया^ अश्विना वरा-ऽग्नि. रासी.त्पुरोगवः।। 8।।

卐 सोमो वधूयु. रभव-दश्विनाऽऽस्ता.मुभा वरा। सूर्यां यत्पत्ये शंसन्तीं- मनसा सविताऽददात्।। 9।।

卐 मनो अस्या अन^ आसी-द्यौ.रासी.दुत च्छदिः। शुक्रा.वनड्वाहा.वास्तां- यदया.त्सूर्या पतिम्।। 10।। {1}

Sri Ganapati Sachchidananda Avadhoota Datta Peetham · Mysore

卐 ऋक्सामाभ्या.मभिहितौ- गावौ ते सामना.वैताम्। श्रोत्रे~ ते~ चक्रे~ आस्ता- न्दिवि पन्था.श्चराचरः।। 11।।

卐 शुची~ ते चक्रे~ यात्या- व्यानो अक्ष^ आहतः। अनो मनस्मयं सूर्या- ऽऽरोह.त्प्रयती पतिम्।। 12।।

卐 सूर्याया वहतुः प्राऽगा-त्सविता य.मवाऽसृजत्। मघासु हन्यन्ते गावः- फल्गुनीषु व्युह्यते।। 13।।

卐 यदश्विना पृच्छमाना.वयात- न्त्रिचक्रेण वहतुं सूर्यायाः। क्वैक.ञ्चक्रं वा.मासी-त्क्व देष्ट्राय तस्थथुः।। 14।।

卐 यदयातं शुभस्पती~- वरेयं सूर्या.मुप। विश्वे देवा^ अनु तद्वा.मजानन्पुत्रः पितर.मवृणीत पूषा।। 15।।

卐 द्वे~ ते चक्रे~ सूर्ये- ब्रह्माण^ ऋतुथा विदुः। अथैक.ञ्चक्रँ यद्गुहा-तदद्धातय^ इद्विदुः।। 16।।

卐 अर्यमणँ यजामहे- सुबन्धुं पतिवेदनम्। उर्वारुक.मिव बन्धना-त्प्रेतो मुञ्चामि नाऽमुतः।। 17।।

卐 प्रेतो मुञ्चामि नाऽमुत- स्सुबद्धा.ममुतस्करम्। यथेय.मिन्द्र मीढ्व-स्सुपुत्रा सुभगाऽसति।। 18।।

卐 प्र त्वा मुञ्चामि वरुणस्य पाशा-द्येन त्वाऽबध्ना.त्सविता सुशेवाः। ऋतस्य योनौ सुकृतस्य लोके- स्योन.न्ते अस्तु सहसंभलायै।। 19।।

卐 भग.स्त्वेतो नयतु हस्तगृह्या-ऽश्विना त्वा प्र वहतां रथेन। गृहा.न्गच्छ गृहपत्नी- यथाऽसो वशिनी त्वँ- विदथ.मा वदासि।। 20।।

卐 इह प्रियं प्रजायै ते समृध्यता- मस्मि.न्गृहे गार्हपत्याय जागृहि। एना पत्या तन्व1 (अं) सं स्पृशस्वा-ऽथ जिर्वि.र्विदथ.मा वदासि।। 21।।

卐 इहैव स्तं मा वि यौष्टँ- विश्व.मायु.र्व्यश्नुतम्। क्रीडन्तौ पुत्रै.र्नप्तृभि-र्मोदमानौ स्वस्तकौ।। 22।।

卐 पूर्वापर.श्चरतो माययैतौ- शिशू~ क्रीडन्तौ परि यातोऽर्णवम्। विश्वाऽन्यो भुवना विचष्ट -ऋतू९ रन्यो विदध.ज्जायसे नवः।। 23।।

卐 नवोनवो भवसि जायमानो-ऽह्ना.ङ्केतु. रुषसा. मेष्यग्रम्। भाग. न्देवेभ्यो वि दधा-स्याय.न्प्र चन्द्रम.स्तिरसे दीर्घमायुः।। 24।।

卐 परा देहि शामुल्यं- ब्रह्मभ्यो वि भजा वसु। कृत्यैषा पद्वती भूत्वा- जाया विशते पतिम्।। 25।।

卐 नीललोहितं भवति- कृत्यासक्ति.र्व्यज्यते। एधन्ते अस्या ज्ञातयः- पति.र्बन्धेषु बध्यते।। 26।।

卐 अश्लीला तनू.र्भवति- रुशती पापयाऽमुया। पति.र्यद्वध्वो3(ओ) वासस-स्स्व.मङ्ग.मभ्यूर्णुते।। 27।।

卐 आशसनँ विशसन-मथो~ अधिविकर्तनम्। सूर्यायाः पश्य रूपाणि-तानि ब्रह्मोत शुम्भति।। 28।।

卐 तृष्ट.मेत.त्कटुक- मपाष्ठव.द्विषव. न्नैत.दत्तवे। सूर्यां यो ब्रह्मा वेद- स^ इ.द्वाधूय.मर्हति।। 29।।

卐 स^ इत्त.त्स्योनं हरति- ब्रह्मा वास. स्सुमङ्गलम्। प्रायश्चित्तिँ यो अध्येति-येन जाया न रिष्यति।। 30।।



Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

卐 युवं भगं सं भरतं समृद्ध - मृतँ वदन्ता.वृतोद्येषु। ब्रह्मण.स्पते पति.मस्यै रोचय- चारु संभलो वदतु वाच.मेताम्।। 31।।

卐 इहे.दसाथ न परो गमा-थेम.ङ्गाव॰ प्रजया वर्धयाथ। शुभँ यती. रुस्त्रिया. स्सोमवर्चसो- विश्वे देवा॰ क्र.न्निह वो मनांसि।। 32।।

卐 इम.ङ्गाव॰ प्रजया सँ विशाथा-ऽय. न्देवाना.न्न मिनाति भागम्। अस्मै व॰ पूषा मरुतश्च सर्वे- अस्मै वो धाता सविता सुवाति।। 33।।

卐 अनृक्षरा^ ऋजव. स्सन्तु पन्थानो- येभि. स्सखायो यन्ति नो वरेयम्। सं भगेन समर्यम्णा- सन्धाता सृजतु वर्चसा।। 34।।

卐 यच्च वर्चो अक्षेषु- सुरायाञ्च यदाहितम्। यद्गोष्वश्विना वर्च-स्तेनेमाँ वर्चसाऽवतम्।। 35।।

卐 येन महानघ्न्या जघन-मश्विना येन वा सुरा। येनाक्षा^ अभ्यषिच्यन्त- तेनेमाँ वर्चसाऽवतम्।। 36।।

卐 यो अनिध्मो दीदय.दप्स्व1(अ)न्त- यँ विप्रास^ ईडते अध्वरेषु। अपा. न्नपा.न्मधुमती. रपो दा^- याभि.रिन्द्रो वावृधे वीर्यावान्।। 37।।

卐 इद.महं रुशन्त.ङ्ग्राभ- न्तनूदूषि.मपोहामि। यो भद्रो रोचन- स्त.मुदचामि।। 38।।

卐 आऽस्यै ब्राह्मणा. स्स्नपनी.र्हर-न्त्ववीरघ्नी. रुदज.न्त्वापः। अर्यम्णो अग्निं पर्येतु पूष- न्प्रतीक्षन्ते श्वशुरो देवर.श्च।। 39।।

卐 शन्ते हिरण्यं शमु स.न्त्वाप- श्शं मेथि.र्भवतु शँ युगस्य तर्द्म। शन्त आप. श्शतपवित्रा^ भवन्तु- शमु पत्या तन्व1(अं) सं स्पृशस्व।। 40।।

卐 खे रथस्य खेऽनसः- खे युगस्य शतक्रतो। अपाला.मिन्द्र त्रि.-ष्पूत्वाऽकृणो. स्सूर्यत्वचम्।। 41।।

卐 आशासाना सौमनसं- प्रजां सौभाग्यं रयिम्। पत्यु.रनुव्रता भूत्वा-सन्नह्यस्वाऽमृताय कम्।। 42।।

卐 यथा सिन्धु.र्नदीनां- साम्राज्यं सुषुवे वृषा। एवा त्वं सम्राज्ञ्येधि-पत्यु.रस्तं परेत्य।। 43।।

卐 सम्राज्ञ्येधि श्वशुरेषु- सम्राज्ञ्युत देवृषु। ननान्दु. स्सम्राज्ञ्येधि- सम्राज्ञ्युत श्वश्र्वाः।। 44।।

卐 या^ अकृन्त.न्नवय.न्याश्च तत्निरे- या देवी.रन्ताꣳ अभितोऽददन्त। तास्त्वा जरसे सँ व्यय-न्त्वायुष्मतीदं परि धत्स्व वासः।। 45।।

卐 जीवं रुदन्ति वि नय.न्त्यध्वर- न्दीर्घा.मनु प्रसितिं. न्दीध्यु.र्नरः। वामं पितृभ्यो य इदं समीरिरे- मयः पतिभ्यो जनये परिष्वजे।। 46।।

卐 स्योन. न्ध्रुवं प्रजायै धारयामि- तेऽश्मान. न्देव्याः पृथिव्या^ उपस्थे। त.मा तिष्ठाऽनुमाद्या सुवर्चा^- दीर्घ.न्त आयु. स्सविता कृणोतु।। 47।।

卐 येनाऽग्नि.रस्या^ भूम्या^- हस्त.ञ्जग्राह दक्षिणम्। तेन गृह्णामि ते हस्तं- मा व्यथिष्ठा^ मया सह- प्रजया च धनेन च।। 48।।

卐 देव.स्ते सविता हस्त.ङ्गृह्णातु- सोमो राजा सुप्रजस.ङ्कृणोतु। अग्नि. स्सुभगा.ञ्जातवेदाः- पत्ये पत्नी.ञ्जरदष्टि.ङ्कृणोतु।। 49।।

卐 गृह्णामि ते सौभगत्वाय हस्तं- मया पत्या जरदष्टि.र्यथाऽसः। भगो अर्यमा सविता पुरन्धि-र्मह्य.न्त्वाऽदु.र्गार्हपत्याय देवाः।। 50।।

卐 भगस्ते हस्त.मग्रही-त्सविता हस्त.मग्रहीत्। पत्नी त्वमसि धर्मणा- ऽह.ङ्गृहपति.स्तव।। 51।।

卐 ममेय.मस्तु पोष्या^- मह्य. न्त्वाऽदा.द्बृहस्पतिः। मया पत्या प्रजावति- सञ्जीव शरद. श्शतम्।। 52।।

卐 त्वष्टा वासो व्यदधा.च्छुभे कं- बृहस्पतेः प्रशिषा कवीनाम्। तेनेमा. न्नारीं सविता भगश्च- सूर्या.मिव परि धत्तां प्रजया।। 53।।

卐 इन्द्राग्नी~ द्यावापृथिवी मातरिश्वा- मित्रावरुणा भगो अश्विनोभा। बृहस्पति.र्मरुतो ब्रह्म सोम^- इमा. न्नारीं प्रजया वर्धयन्तु।। 54।।

卐 बृहस्पतिः प्रथम. स्सूर्याया- श्शीर्षे केशाँ॥ अकल्पयत्। तेनेमा. मश्विना नारीं- पत्ये सं शोभयामसि।। 55।।

卐 इद.न्तद्रूपँ यदवस्त योषा- जाया.ञ्जिज्ञासे मनसा चरन्तीम्। ता.मन्वर्तिष्ये सखिभि.र्नवग्वैः- क^ इमा.न्विद्वा.न्वि चचर्त पाशान्।। 56।।

卐 अहँ वि ष्यामि मयि रूप.मस्या^- वेददि.त्पश्य.न्मनसः कुलायम्। न स्तेय.मद्मि मनसोदमुच्ये- स्वयं श्रथ्नानो वरुणस्य पाशान्।। 57।।

卐 प्र त्वा मुञ्चामि वरुणस्य पाशा-द्येन त्वाऽबध्ना.त्सविता सुशेवाः। उरुँ लोकं सुग.मत्र पन्था- ङ्कृणोमि तुभ्यं सहपत्न्यै वधु।। 58।।

卐 उद्यच्छध्व.मप रक्षो हना-थेमा. न्नारीं सुकृते दधात। धाता विपश्चि.त्पति.मस्यै विवेद- भगो राजा पुर^ एतु प्रजानन्।। 59।।

卐 भग.स्ततक्ष चतुरः पादा-न्भग.स्ततक्ष चत्वार्युष्पलानि। त्वष्टा पिपेश मध्यतोऽनु वर्ध्रा-न्त्सा नो अस्तु सुमङ्गली।। 60।।

卐 सुकिंशुकँ वहतुँ विश्वरूपं- हिरण्यवर्णं सुवृतं सुचक्रम्। आ रोह सूर्ये अमृतस्य लोकं- स्योनं पतिभ्यो वहतु.ङ्कृणु त्वम्।। 61।।

卐 अभ्रातृघ्नीं वरुणा-ऽपशुघ्नीं बृहस्पते। इन्द्रापतिघ्नीं पुत्रिणी-माऽस्मभ्यं सवित.र्वह।।

卐 मा हिंसिष्टं कुमार्य1(अं)- स्थूणे देवकृते पथि। शालाया^ देव्या^ द्वारं- स्योन.ङ्कृण्मो वधूपथम्।। 63।।

卐 ब्रह्माऽपरँ युज्यतां ब्रह्म पूर्वं- ब्रह्माऽन्ततो मध्यतो ब्रह्म सर्वतः। अनाव्याधा. न्देवपुरां प्रपद्य- शिवा स्योना पतिलोके वि राज।। 64।।

## चतुर्दश काण्डे द्वितीयोऽनुवाकः

14-02-01

卐 तुभ्य.मग्रे पर्यवह.'2'-न्त्सूर्यां वहतुना सह। स^ नः पतिभ्यो जाया.न्दा^- अग्ने प्रजया सह।। 1।।

卐 पुनः पत्नी.मग्नि.रदा- दायुषा सह वर्चसा। दीर्घाऽऽयु.रस्या^ यः पति- र्जीवाति शरद. श्शतम्।। 2।।

卐 सोमस्य जाया प्रथम-ङ्गन्धर्व.स्तेऽपरः पतिः। तृतीयो अग्निष्टे पति- स्तुरीय.स्ते मनुष्यजाः।। 3।।

卐 सोमोऽदद. द्गन्धर्वाय- गन्धर्वोऽदद. दग्नये। रयिञ्च पुत्रां.श्चाऽदा- दग्नि. र्मह्य. मथो~ इमाम्।। 4।।

卐 आ वां मग.‘2‘न्त्सुमतिं. वाजिनीवसू- न्यश्विना हृत्सु कामा^ अरंसत।
अभूत.ङ्गोपा मिथुना शुभस्पती~- प्रिया^ अर्यम्णो दुर्या॰ अशीमहि।। 5।।
卐 सा मन्दसाना मनसा शिवेन- रयिं. न्धेहि सर्ववीरँ वचस्यम्। सुग. न्तीर्थं
सुप्रपाणं शुभस्पती~- स्थाणुं पथिष्ठा.मप दुर्मतिं हतम्।। 6।।
卐 या^ ओषधयो या नद्यो3(ओ)- यानि क्षेत्राणि या वना। ता.स्त्वा वधु
प्रजावतीं- पत्ये रक्षन्तु रक्षसः।। 7।।
卐 एमं पन्था. मरुक्षाम- सुगं स्वस्तिवाहनम्। यस्मि.न्वीरो न रिष्य-
त्यन्येषाँ विन्दते वसु।। 8।।
卐 इदं सु मे नर. श्शृणुत- ययाऽऽशिषा दम्पती~ वाम.मश्नुतः। ये गन्धर्वा^
अप्सरसंश्च देवी-रेषु वानस्पत्येषु येऽधि तस्थुः। स्योना.स्ते अस्यै वध्वै
भवन्तु- मा हिंसिषु. र्वहतु. मुह्यमानम्।। 9।।
卐 ये वध्व. श्चन्द्रँ वहतुँ- यक्ष्मा^ यन्ति जना॰ अनु। पुन.स्तान् यज्ञिया^
देवा^- नयन्तु यत^ आगताः।। 10।।
卐 मा विद. न्परिपन्थिनो- य आसीदन्ति दम्पती। सुगेन दुर्ग.मतीता-मप
द्रा.न्त्वरातयः।। 11।।

卐 सङ्काशयामि वहतुं ब्रह्मणा- गृहै. रघोरेण चक्षुषा मित्रियेण। पर्याणद्धँ विश्वरूपँ यदस्ति- स्योनं पतिभ्य. स्सविता तत्कृणोतु।। 12।।

卐 शिवा नारीय मस्त. माग. न्निम- न्धाता लोक. मस्यै दिदेश। ता.मर्यमा भगो अश्विनोभा- प्रजापतिः प्रजया वर्धयन्तु।। 13।।

卐 आत्मन्व.त्युर्वरा नारीय. माग-न्तस्या.न्नरो वपत बीज.मस्याम्। सा वः प्रजा.ञ्जनय. द्वक्षणाभ्यो- बिभ्रती दुग्ध.मृषभस्य रेतः।। 14।।

卐 प्रति तिष्ठ विरा.डसि- विष्णु.रिवेह सरस्वति। सिनीवालि प्र जायतां- भगस्य सुमता.वसत्।। 15।।

卐 उद्व^ ऊर्मि. श्शम्या ह-न्त्वापो योक्राणि मुञ्चत। ?मादुष्कृतौ व्येनसा.- वघ्न्या.वशुन. मारताम्।। 16।।

卐 अघोरचक्षु.रपतिघ्नी स्योना- शग्मा सुशेवा सुयमा गृहेभ्यः। वीरसू.र्देवृकामा स.-न्त्वयैधिषीमहि सुमनस्यमाना।। 17।।

卐 अदेवृ.घ्न्यपतिघ्नीहैधि- शिवा पशुभ्य. स्सुयमा सुवर्चाः। प्रजावती वीरसू.र्देवृकामा- स्योनेम.मग्नि.ङ्गार्हपत्यं सपर्य।। 18।।

卐 उत्तिष्ठेतः किमिच्छ.न्तीद. मागा^- अह.न्त्वेडे अभिभू. स्स्वा.द्गृहात्। शून्यैषी निर्ऋते या जग-न्थोत्तिष्ठाऽराते प्र पत मेह रंस्थाः।। 19।।

卐 यदा गार्हपत्य.मसपर्यै-त्पूर्व.मग्निँ वधू.रियम्। अधा सरस्वत्यै नारि-पितृभ्यश्च नमस्कुरु।। 20।।

卐 शर्म वर्मैत.दा हरा-ऽस्यै नार्या उपस्तिरे। सिनीवालि प्र जायतां- भगस्य सुमता.वसत्।। 21।।

卐 यं बल्बज.न्न्यस्यथ- चर्म चोपस्तृणीथन। तदा रोहतु सुप्रजा- या कन्या विन्दते पतिम्।। 22।।

卐 उप स्तृणीहि बल्बज-मधि चर्मणि रोहिते। तत्रोपविश्य सुप्रजा-इम.मग्निं सपर्यतु।। 23।।

卐 आ रोह चर्मोप सीदाऽग्नि.मेष- देवो हन्ति रक्षांसि सर्वा। इह प्रजा.ञ्जनय पत्ये अस्मै- सुज्यैष्ठ्यो भव.त्पुत्रस्त एषः।। 24।।

卐 वि तिष्ठन्तां मातु.रस्या उपस्था-न्नानारूपाः पशवो जायमानाः। सुमङ्गल्युप सीदेम.मग्निं- संपत्नी प्रति भूषेह देवान्।। 25।।

卐 सुमङ्गली प्रतरणी गृहाणां- सुशेवा पत्ये श्वशुराय शम्भूः। स्योना श्वश्र्वै प्र गृहा.न्विशेमान्।। 26।।

卐 स्योना भव श्वशुरेभ्य- स्स्योना पत्ये गृहेभ्यः। स्योनाऽस्यै सर्वस्यै विशे-स्योना पुष्टायैषां भव।। 27।।

卐 सुमङ्गली.रियँ वधू-रिमां समेत पश्यत। सौभाग्य.मस्यै दत्त्वा-दौर्भाग्यै.र्विपरेतन।।

卐 या दुर्हार्दो युवतयो- याश्चेह जरती.रपि। वर्चोऽन्व1(अ)स्यै सं दत्ता-ऽथाऽस्तँ विपरेतन।। 29।।

卐 रुक्मप्रस्तरणँ वह्यँ- विश्वा रूपाणि बिभ्रतम्। आऽरोह.त्सूर्या सावित्री-बृहते सौभगाय कम्।। 30।। (रुक्मप्रस्तरणम्)

卐 आ रोह तल्पं सुमनस्यमा-नेह प्रजा.ञ्जनय पत्ये अस्मै। इन्द्राणीव सुबुधा बुध्यमाना- ज्योति.रग्रा उषसः प्रति जागरासि।। 31।।

卐 देवा^ अग्रे न्यपद्यन्त पत्नी- स्समस्पृशन्त तन्व.स्तनूभिः। सूर्येव नारि विश्वरूपा महित्वा- प्रजावती पत्या सं भवेह।। 32।।

卐 उत्तिष्ठेतो विश्वावसो~- नमसेडामहे त्वा। जामि.मिच्छ पितृषद- न्न्यक्तां स^ ते भागो जनुषा तस्य विद्धि।। 33।।

卐 अप्सरस. स्सधमादं मदन्ति- हविर्धान.मन्तरा सूर्यञ्च। तास्ते जनित्र.मभि ताः परेहि- नमस्ते गन्धर्वर्तुना कृणोमि।। 34।।

卐 नमो गन्धर्वस्य नमसे- नमो भामाय चक्षुषे च कृण्मः। विश्वावसो~ ब्रह्मणा ते नमो-ऽभि जाया^ अप्सरसः परेहि।। 35।।

卐 राया वयं सुमनस. स्स्या-मोदितो गन्धर्व.मावीवृताम। अग.'2'न्त्स^
देवः परमं सधस्थ- मगन्म यत्र प्रतिरन्त^ आयुः।। 36।।

卐 सं पितरा.वृत्विये सृजेथां- माता पिता च रेतसो भवाथः। मर्य^इव
योषा.मधिरोहयैनां- प्रजा.ङ्कृण्वाथा.मिह पुष्यतं रयिम्।। 37।।

卐 तां पूष.न्छिवतमा. मेरयस्व- यस्यां बीजं मनुष्या3(आ) वपन्ति। या न
ऊरू~ उशती विश्रयाति- यस्या.मुशन्तः प्रहरेम शेपः।। 38।।

卐 आ रोहोरु.मुप धत्स्व- हस्तं परिष्वजस्व- जायां सुमनस्यमानः।
प्रजा.ङ्कृण्वाथा.मिह मोदमानौ- दीर्घँ वा.मायु. स्सविता कृणोतु।। 39।।

卐 आ वां प्रजा.ञ्जनयतु प्रजापति-रहोरात्राभ्यां समन.त्त्वर्यमा। अदुर्मङ्गली
पतिलोक.मा विशेमं- शन्नो भव द्विपदे शञ्चतुष्पदे।। 40।।

卐 देवै.र्दत्तं मनुना साक.मेत-द्वाधूयँ वासो वध्वश्च वस्त्रम्। यो ब्रह्मणे
चिकितुषे ददाति- स^ इ.द्रक्षांसि तल्पानि हन्ति।। 41।।

卐 यं मे दत्तो ब्रह्मभागँ वधूयो-र्वाधूयँ वासो वध्वश्च वस्त्रम्। युवं
ब्रह्मणेऽनुमन्यमानौ- बृहस्पते साक.मिन्द्रश्च दत्तम्।। 42।।

卐 स्योना.द्योने.रधि बध्यमानौ- हसामुदौ महसा मोदमानौ। सुगू~ सुपुत्रौ
सुगृहौ तराथो- जीवा.वुषसो विभातीः।। 43।।

卐 नवँ वसान. स्सुरभि. स्सुवासा- उदागा.ञ्जीव उषसो विभातीः। आण्डा.त्पतत्रीवा मुक्षि- विश्वस्मा.देनसस्परि।। 44।।

卐 शुम्भनी~ द्यावापृथिवी~- अन्तिसुम्ने~ महिव्रते~। आप.स्सप्त सुस्रुवु.र्देवी- स्ता^ नो मुञ्च.न्त्वंहसः।। 45।।

卐 सूर्यायै देवेभ्यो- मित्राय वरुणाय च। ये भूतस्य प्रचेतस-स्तेभ्य^ इद.मकर. न्नमः।।

卐 य^ ऋते चिदभिश्रिषः- पुरा जत्रुभ्य आतृदः। सन्धाता सन्धिं मघवा पुरूवसु- र्निष्कर्ता विह्रुतं पुनः।। 47।।

卐 अपाऽस्म.त्तम^ उच्छतु- नीलं पिशङ्ग.मुत लोहितँ यत्। निर्दहनी या पृषात-क्य1(अ)स्मि.न्तां स्थाणा.वध्या सजामि।। 48।।

卐 यावतीः कृत्या^ उपवासने- यावन्तो राज्ञो वरुणस्य पाशाः। व्यृद्धयो या असमृद्धयो या^- अस्मि.न्ता^ स्थाणा.वधि सादयामि।। 49।।

卐 या मे प्रियतमा तनू- स्सा मे बिभाय वाससः। तस्याऽग्रे त्वँ वनस्पते- नीवि.ङ्कृणुष्व मा वयं रिषाम।। 50।।

卐 ये अन्ता^ यावती. स्सिचो- य ओतवो ये च तन्तवः। वासो यत्पत्नीभि.रुत-न्तन्न. स्स्योन.मुप स्पृशात्।। 51।।

卐 उशतीः कन्यला इमाः- पितृलोका.त्पतिँ यतीः। अव दीक्षा.मसृक्षत स्वाहा।।

卐 बृहस्पतिनाऽवसृष्टाँ- विश्वे देवा अधारयन्न्। वर्चो गोषु प्रविष्टँ य-त्तेनेमां सं सृजामसि।। 53।।

卐 बृहस्पतिनाऽवसृष्टाँ- विश्वे देवा अधारयन्न्। तेजो गोषु प्रविष्टँ य-त्तेनेमां सं सृजामसि ।। 54।।

卐 बृहस्पतिनाऽवसृष्टाँ- विश्वे देवा अधारयन्न्। भगो गोषु प्रविष्टो य-स्तेनेमां सं सृजामसि ।। 55।।

卐 बृहस्पतिनाऽवसृष्टाँ- विश्वे देवा अधारयन्न्। यशो गोषु प्रविष्टँ य-त्तेनेमां सं सृजामसि ।। 56।।

卐 बृहस्पतिनाऽवसृष्टाँ- विश्वे देवा अधारयन्न्। पयो गोषु प्रविष्टँ य-त्तेनेमां सं सृजामसि ।। 57।।

卐 बृहस्पतिनाऽवसृष्टाँ- विश्वे देवा अधारयन्न्। रसो गोषु प्रविष्टो य-स्तेनेमां सं सृजामसि ।। 58।।

卐 यदीमे केशिनो जना- गृहे ते समनर्तिषू -रोदेन कृण्वन्तोऽघम्। अग्निष्ट्वा तस्मा.देनस- स्सविता च प्र मुञ्चताम्।। 59।।

卐 यदीय.न्दुहिता तव- विकेश्यरुद.द्गृहे- रोदेन कृण्वत्य1(अ)घम्। अग्निष्ट्वा तस्मा.देनस- स्सविता च प्र मुञ्चताम्।। 60।।

卐 यज्जामयो यद्युवतयो- गृहे ते समनर्तिषू -रोदेन कृण्वती.रघम्। अग्निष्ट्वा तस्मा.देनस- स्सविता च प्र मुञ्चताम्।। 61।।

卐 यत्ते प्रजायां पशुषु- यद्वा गृहेषु निष्ठित- मघकृद्भि.रघ.ङ्कृतम्। अग्निष्ट्वा तस्मा.देनस- स्सविता च प्र मुञ्चताम् ।। 62।।

卐 इय. न्नार्युप ब्रूते- पूल्या.न्यावपन्तिका। दीर्घायु.रस्तु मे पति-र्जीवाति शरद. श्शतम्।। 63।।

卐 इहेमा.विन्द्र सन्नुद- चक्रवाकेव दम्पती~। प्रजयैनौ स्वस्तकौ- विश्व.मायु.र्व्यश्नुताम्।।

卐 यदासन्द्या.मुपधाने- यद्वोपवासने कृतम्। विवाहे कृत्याँ या.ञ्चक्रु- रास्नाने ता.न्निदध्मसि।। 65।।

卐 यद्दुष्कृतँ यच्छमलँ- विवाहे वहतौ च यत्। तत्संभलस्य कम्बले- मृज्महे दुरितँ वयम्।। 66।।

卐 संभले मलं सादयित्वा- कम्बले दुरितँ वयम्। अभूम यज्ञिया. श्शुद्धा॰- प्र ण^ आयूंषि तारिषत्।। 67।।

卐 कृत्रिमः कण्टक-श्शतदन् य^ एषः। अपाऽस्याः केश्यं मल-मप शीर्षण्यँ लिखात्।। 68।।

卐 अङ्गादङ्गा.द्वय. मस्या^- अप यक्ष्म. न्निदध्मसि। त.न्मा प्राप.त्पृथिवीं मोत देवा-न्दिवं मा प्राप.दुर्व1(अ)न्तरिक्षम्। अपो मा प्राप.न्मल मेत.दग्ने-यमं मा प्राप.त्पितृंश्च सर्वान्।। 69।।

卐 सन्त्वा नह्यामि पयसा पृथिव्या- स्सन्त्वा नह्यामि पयसौषधीनाम्। सन्त्वा नह्यामि प्रजया धनेन- सा सन्नद्धा सनुहि वाज.मेमम्।। 70।।

卐 अमोऽह.मस्मि सा त्वं, सामाह.मस्म्यृक्त्व,न्द्यौ.रहं पृथिवी त्वम्। ता.विह सं भवाव- प्रजा.मा जनयावहै।। 71।।

卐 जनियन्ति ना.वग्रवः- पुत्रियन्ति सुदानवः। अरिष्टासू~ सचेवहि- बृहते वाजसातये।। 72।।

卐 ये पितरो वधूदर्शा^- इमँ वहतु.माऽगमन्न्। ते अस्यै वध्वै3(ऐ) संपत्न्यै-प्रजाव.च्छर्म यच्छन्तु।। 73।।

卐 येदं पूर्वाऽग.न्नशनायमाना- प्रजा.मस्यै द्रविण.ञ्चेह दत्त्वा। ताँ वह.न्त्वगतस्याऽनु पन्थाँ- विरा.डियं सुप्रजा^ अत्यजैषीत्।। 74।।

卐 प्र बुध्यस्व सुबुधा बुध्यमाना- दीर्घायुत्वाय शतशारदाय। गृहा.न्गच्छ गृहपत्नी- यथाऽ सो दीर्घ.न्त आयु. स्सविता कृणोतु।। 75।।

## ॐपञ्चदशं काण्डम्

### पञ्चदश काण्डे प्रथमोऽनुवाकः

15-01-01

卐 व्रात्य^ आसी.दीयमान^ एव- स^ प्रजापतिं समैरयत्।। 1।।

卐 स^ प्रजापति. स्सुवर्ण. मात्म.न्नपश्य-त्तत्प्राऽजनयत्।। 2।।

卐 तदेक. मभव-त्तल्ललाम. मभव-त्तन्मह. दभव-त्तज्ज्येष्ठ. मभव-त्तद्ब्रह्माऽभव-त्तत्तपोऽभव- त्तत्सत्य. मभव-त्तेन प्राऽजायत।। 3।।

卐 सोऽवर्धत- स^ महा. नभव-त्स^ महादेवोऽभवत्।। 4।।

卐 स^ देवाना.मीशां पर्यै-त्स^ ईशानोऽभवत्।। 5।।

卐 स^ एकव्रात्योऽभव-त्स^ धनु. राऽदत्त- त.देवेन्द्रधनुः।। 6।।

卐 नील.मस्योदरं- लोहितं पृष्ठम्।। 7।।

卐 नीलेनैवाऽप्रियं भ्रातृव्यं प्रोर्णोति- लोहितेन द्विषन्तँ विध्यतीति-ब्रह्मवादिनो वदन्ति।। 8।।

15-01-02

卐 स^ उदतिष्ठ-त्स^ प्राची. न्दिश.मनु व्यचलत्।

卐 तं बृहच्च रथन्तर.ञ्चाऽऽदित्याश्च विश्वे च देवा^ अनु व्यचलन्न्।

卐 बृहते च वै स^ रथन्तराय चाऽऽदित्येभ्यश्च विश्वेभ्यश्च देवेभ्य^ आ वृश्चते य^ एवँ विद्वांसँ व्रात्य.मुपवदति।

卐बृहतश्च वै स^ रथन्तरस्य चाऽऽदित्याना.ञ्च- विश्वेषाञ्च देवानां प्रिय.न्धाम भवति- य^ एवँ वेद।।

卐 तस्य प्राच्या. न्दिशि श्रद्धा पुंश्चली मित्रो मागधो विज्ञानँ वासोऽह.रुष्णीषं रात्री केशा^ हरितौ प्रवर्तौ कल्मलि.र्मणिः।

卐भूतञ्च भविष्यच्च परिष्कन्दौ मनो विपथम्।

卐मातरिश्वा च पवमानश्च विपथवाहौ वात. स्सारथी रेष्मा प्रतोदꣳ कीर्तिश्च यशश्च पुरस्सरौ।

卐 ऐन.ङ्कीर्ति.र्गच्छ-त्या यशो गच्छति- य^ एवँ वेद।। 1।।

卐 स^ उदतिष्ठ.त्स^ दक्षिणा. न्दिश.मनु व्यचलत्।

卐तँ यज्ञायज्ञियञ्च वामदेव्यञ्च यज्ञश्च यजमानश्च पशव.श्चानु व्यचलन्न्।।

卐 यज्ञायज्ञियाय च वै स^ वामदेव्याय च यज्ञाय च यजमानाय च पशुभ्य.श्चाऽऽवृश्चते- य^ एवँ विद्वांसँ व्रात्य.मुपवदति।

卐यज्ञायज्ञियस्य च वै स^ वामदेव्यस्य च यज्ञस्य च यजमानस्य च पशूनाञ्च प्रिय.न्धाम भवति- य^ एवँ वेद।

卐 तस्य दक्षिणाया.न्दिश्यु(1)उषाꣳ पुंश्चली मन्त्रो मागधो विज्ञानँ वासोऽह.रुष्णीषं रात्री केशा हरितौ प्रवर्तौ कल्मलि.र्मणिः।

卐अमावास्या च पौर्णमासी च परिष्कन्दौ मनो विपथम्।

卐मातरिश्वा च पवमानश्च विपथवाहौ वात स्सारथी रेष्मा प्रतोदꣳ कीर्तिश्च यशश्च पुरस्सरौ।

卐ऐन ङ्कीर्ति.र्गच्छ-त्या यशो गच्छति य^ एवँ वेद।। 2।।

卐 स^ उदतिष्ठ-त्स^ प्रतीची. न्दिश.मनु व्यचलत्।

卐तं वैरूपञ्च वैराजञ्चाऽऽपश्च वरुणश्च राजाऽनु व्यचलन्न्।।

卐वैरूपाय च वै स^ वैराजाय चाऽद्भ्यश्च वरुणाय च राज्ञ आ वृश्चते- य^ एवँ विद्वांसँ व्रात्य.मुपवदति।

卐वैरूपस्य च वै स^ वैराजस्य चाऽपाञ्च वरुणस्य च राज्ञꣳ प्रिय.न्धाम भवति- य^ एवँ वेद।

卐 तस्य प्रतीच्या. न्दिशी3(ई)रा पुंश्चली हसो मागधो विज्ञानँ वासोऽह.रुष्णीषं रात्री केशा हरितौ प्रवर्तौ कल्मलि.र्मणिः।

卐अहश्च रात्री च परिष्कन्दौ मनो विपथम्।

卐मातरिश्वा च पवमानश्च विपथवाहौ वात. स्सारथी रेष्मा प्रतोद꞉ कीर्तिश्च यशश्च पुरस्सरौ।

卐ऐन. ङ्कीर्ति.गच्छ-त्या यशो गच्छति य^ एवँ वेद।। 3।।

卐 स^ उदतिष्ठ-त्स^ उदीची. न्दिश.मनु व्यचलत्।

卐तं श्यैतञ्च नौधसञ्च सप्तर्षयश्च सोमश्च राजाऽनु व्यचलन्न्।

卐श्यैताय च वै स^ नौधसाय च सप्तर्षिभ्यश्च सोमाय च राज्ञ आ वृश्चते- य^ एवँ विद्वांसँ व्रात्य.मुपपवदति।

卐श्यैतस्य च वै स^ नौधसस्य च सप्तर्षीणाञ्च सोमस्य च राज्ञ꞉ प्रिय. न्धाम भवति- य^ एवँ वेद।

卐 तस्योदीच्या.न्दिशि विद्युत्पुंश्चली स्तनयित्नु.मागधो विज्ञानँ वासोऽह.रुष्णीषं रात्री केशा हरितौ प्रवर्तौ कल्मलि.र्मणिः।

卐श्रुतञ्च विश्रुतञ्च परिष्कन्दौ मनो विपथम्।

卐मातरिश्वा च पवमानश्च विपथवाहौ वात. स्सारथी रेष्मा प्रतोद꞉ कीर्तिश्च यशश्च पुरस्सरौ।

卐ऐन. ङ्कीर्ति.गच्छ-त्या यशो गच्छति- य एवँ वेद।। 4।।-

15-01-02

卐 स॑ सँ॒वत्स॒र. मू॒र्ध्वो॑ऽतिष्ठ॒- त्तन्दे॒वा॑ अ॑ब्रुव॒-न्व्रात्य॒ कि.न्नु ति॑ष्ठ॒सीति॑।।
1।।

卐 सो॑ऽब्रवी.दा॒सन्दीं मे॒ सं॑भ॒र.न्त्विति॑।। 2।।

卐 तस्मै॒ व्रात्या॑याऽऽस॒न्दीं स॑मभरन्न्।। 3।।

卐 तस्या॑ ग्री॒ष्मश्च॑ वस॒न्तश्च॒ द्वौ पादा॒.वास्तां॑- श॒रच्च॑ व॒र्॒षाश्च॒ द्वौ।। 4।।

卐 बृ॒हच्च॑ रथ॒न्तर. ञ्चा॑नू॒च्ये॒3(ए॒) आस्ताँ॑- यज्ञाय॒ज्ञियं॑ञ्च वामदे॒व्यंञ्च॑ ति॒रश्च्ये॑~।। 5।।

卐 ऋ॒च॒ः प्रा॒ञ्च.स्तन्त॑वो॒- यजूं॑षि ति॒र्यञ्च॑ः।। 6।।

卐 वे॑द॒ आ॒स्त॑र॒णं- ब्रह्मो॑प॒बर्ह॑णम्।। 7।।

卐 सामा॑ऽऽसा॒द॑- उ॑द्गी॒थो॑ऽप॒श्रयः।। 8।।

卐 ता.मा॑स॒न्दीँ व्रात्य॒ आ॑ऽरोहत्।। 9।।

卐 तस्य॑ देवज॒नाः प॑रिष्क॒न्दा॑ आस॑-न्त्सङ्क॒ल्पाः प्र॑हा॒य्या॒3 (आ॒) विश्वा॑नि भू॒ता.न्यु॑प॒सद॑ः।। 10।।

卐 विश्वा॑.न्ये॒वास्य॑ भू॒ता.न्यु॑प॒सदो॑ भवन्ति॒- य॑ ए॒वँ वेद॑।। 11।।-

15-01-03

卐 तस्मै प्राच्या॑ दिशः।

卐वासन्तौ मासौ गोप्तारा.वकुर्व-न्बृहच्च रथन्तर.ञ्चाऽनुष्ठातारौ।

卐वासन्ता.वेनं मासौ प्राच्या दिशो गोपायतो- बृहच्च रथन्तर.ञ्चाऽनु

तिष्ठतो- य॑ एवँ वेद।। 1।।

卐 तस्मै दक्षिणाया॑ दिशः।

卐 ग्रैष्मौ मासौ गोप्तारा.वकुर्व-न्यज्ञायज्ञियञ्च वामदेव्य.ञ्चाऽनुष्ठातारौ।

卐 ग्रैष्मा.वेनं मासौ दक्षिणाया॑ दिशो गोपायतो- यज्ञायज्ञियञ्च

वामदेव्य.ञ्चाऽनुतिष्ठतो- य॑ एवँ वेद।। 2।।

卐 तस्मै प्रतीच्या॑ दिशः।

卐वार्षिकौ मासौ गोप्तारा.वकुर्व-न्वैरूपञ्च वैराज.ञ्चाऽनुष्ठातारौ।

卐वार्षिका.वेनं मासौ प्रतीच्या॑ दिशो गोपायतो- वैरूपञ्च वैराज.ञ्चाऽनु

तिष्ठतो- य॑ एवँ वेद।। 3।।

卐 तस्मा उदीच्या॑ दिशः।

卐शारदौ मासौ गोप्तारा.वकुर्व-न्छ्यैतञ्च नौधस.ञ्चाऽनुष्ठातारौ।

卐शारदा.वेनं मासा.वुदीच्या॑ दिशो गोपायत. श्श्यैतञ्च नौधस.ञ्चाऽनु

तिष्ठतो- य॑ एवँ वेद।। 4।।

卐 तस्मै ध्रुवाया^ दिशः।

卐हैमनौ मासौ गोप्तारा.वकुर्व-न्भूमिं.श्चा ऽग्निं.श्चा ऽनुष्ठातारौ।

卐हैमना.वेनं मासौ ध्रुवाया^ दिशो गोपायतो- भूमिश्चा ऽग्निश्चा ऽनु तिष्ठतो य^ एवँ वेद।

卐 तस्मा ऊर्ध्वाया^ दिशः।

卐शैशिरौ मासौ गोप्तारा.वकुर्व-न्दिवं.श्चा ऽऽदित्यं.श्चा ऽनुष्ठातारौ।

卐शैशिरा.वेनं मासा.वूर्ध्वाया^ दिशो गोपायतो- द्यौ.श्चा ऽऽदित्य.श्चा ऽनु तिष्ठतो- य^ एवँ वेद।। 6।।-

15-01-04

卐 तस्मै प्राच्या^ दिशो अन्तर्देशा.द्भव.मिष्वास. मनुष्ठातार.मकुर्वन्न्।

卐भव^ एन.मिष्वासः प्राच्या^ दिशो अन्तर्देशा- दनुष्ठाता ऽनु तिष्ठति।

卐नैनं शर्वो न भवो नेशानो नास्य पशू.न्न समानान् हिनस्ति- य^ एवँ वेद।। 1।।

卐 तस्मै दक्षिणाया^ दिशो अन्तर्देशा.च्छर्व.मिष्वास. मनुष्ठातार.मकुर्वन्न्।

卐शर्व^ एन. मिष्वासो दक्षिणाया^ दिशो अन्तर्देशा. दनुष्ठाता ऽनु तिष्ठति।

卐नैनं शर्वो न भवो नेशानो नास्य पशू.न्न समानान् हिनस्ति- य^ एवँ वेद।।

卐 तस्मै प्रतीच्या^ दिशो अन्तर्देशा.त्पशुपति. मिष्वास. मनुष्ठातार.मकुर्वन्न्।

卐पशुपति.रेन.मिष्वासः प्रतीच्या^ दिशो अन्तर्देशा.दनुष्ठाताऽनु तिष्ठति।

卐नैनं शर्वो न भवो नेशानो नास्य पशू.न्न समानान् हिनस्ति- य^ एवँ वेद।।

卐 तस्मा उदीच्या दिशो अन्तर्देशा.दुग्र. न्देव. मिष्वास. मनुष्ठातार. मकुर्वन्न्।

卐उग्र^ एन. न्देव^ इष्वास^ उदीच्या^ दिशो अन्तर्देशा. दनुष्ठाताऽनु तिष्ठति।

卐नैनं शर्वो न भवो नेशानो नास्य पशू.न्न समानान् हिनस्ति य^ एवँ वेद।। 4।।

卐 तस्मै ध्रुवाया^ दिशो अन्तर्देशा. द्रुद्र.मिष्वास. मनुष्ठातार.मकुर्वन्न्।

卐रुद्र^ एन. मिष्वासो ध्रुवाया^ दिशो अन्तर्देशा. दनुष्ठाताऽनु तिष्ठति।

卐नैनं शर्वो न भवो नेशानो नास्य पशू.न्न समानान् हिनस्ति- य^ एवँ वेद।। 5।।

卐 तस्मा ऊर्ध्वाया^ दिशो अन्तर्देशा.न्महादेव. मिष्वास. मनुष्ठातार. मकुर्वन्न्।

卐महादेव^ एन. मिष्वास^ ऊर्ध्वाया^ दिशो अन्तर्देशा. दनुष्ठाताऽनु तिष्ठति।

卐नैनं शर्वो न भवो नेशानो नास्य पशू.न्न समानान् हिनस्ति- य^ एवँ वेद।। 6।।

卐 तस्मै सर्वेभ्यो अन्तर्देशेभ्य^ ईशान. मिष्वास. मनुष्ठातार. मकुर्वन्न्।

卐ईशान^ एन. मिष्वास. स्सर्वेभ्यो अन्तर्देशेभ्योऽनुष्ठाताऽनु तिष्ठति।

卐नैनं शर्वो न भवो नेशानो नास्य पशू.न्न समानान् हिनस्ति- य^ एवँ वेद।। 7।।-

15-01-05

卐 स^ ध्रुवा. न्दिश.मनु व्यचलत्।

卐तं भूमिश्चाऽग्नि.श्चौषधयश्च वनस्पतयश्च वानस्पत्याश्च वीरुध.श्चानु व्यचलन्न्।।

卐भूमेश्च वै सो3(ओ)ऽग्ने.श्चौषधीनाञ्च वनस्पतीनाञ्च वानस्पत्यानाञ्च वीरुधाञ्च प्रिय.न्धाम भवति- य^ एवँ वेद।। 1।।

卐 स^ ऊर्ध्वा. न्दिश.मनु व्यचलत्।

卐त.मृतञ्च सत्यञ्च सूर्यश्च चन्द्रश्च नक्षत्राणि चानु व्यचलन्न्।।

卐ऋतस्य च वै स^ सत्यस्य च सूर्यस्य च चन्द्रस्य च नक्षत्राणाञ्च प्रिय.न्धाम भवति- य^ एवँ वेद।। 2।।

卐 स^ उत्तमा. न्दिश.मनु व्यचलत्।

卐तमृचश्च सामानि च यजूंषि च ब्रह्म चानु व्यचलन्न्।।

卐ऋचाञ्च वै स^ साम्नाञ्च यजुषाञ्च ब्रह्मणश्च प्रिय. न्धाम भवति- य^ एवँ वेद।। 3।।

卐 स^ बृहती. न्दिश.मनु व्यचलत्। तमितिहासश्च पुराणञ्च गाथाश्च नाराशंसी.श्चाऽनु व्यचलन्न्।।

卐इतिहासस्य च वै स^ पुराणस्य च गाथानाञ्च नाराशंसीनाञ्च प्रिय न्धाम भवति- य^ एवँ वेद।। 4।।

卐 स^ परमा. न्दिश.मनु व्यचलत्। तमाहवनीयश्च गार्हपत्यश्च दक्षिणाग्निश्च यज्ञश्च यजमानश्च पशव.श्चानु व्यचलन्न्।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐आहवनीयस्य च वै स^ गार्हपत्यस्य च दक्षिणाग्नेश्च यज्ञस्य च यजमानस्य च पशूनाञ्च प्रिय.न्धाम भवति- य^ एवँ वेद।।

卐 सोऽनादिष्टा. न्दिश.मनु व्यचलत्।

卐तमृतव.श्चाऽऽर्तवाश्च लोकाश्च लौक्याश्च मासा.श्चाऽर्धमासा.श्चाऽहोरात्रे~ चानु व्यचलन्न्।

卐ऋतूनाञ्च वै स^ आर्तवाना.ञ्च लोकाना.ञ्च लौक्यानाञ्च मासाना.ञ्चाऽर्धमासाना.ञ्चाऽहोरात्रयोश्च प्रिय. न्धाम भवति- य^ एवँ वेद।। 6।।

卐 सोऽनावृत्ता. न्दिश.मनु व्यचल- त्ततो नाऽऽवर्त्स्यं.न्नमन्यत।

卐तन्दिति. श्चाऽदितिश्चेडा चेन्द्राणी चाऽनु व्यचलन्न्।।

卐दितेश्च वै सोऽदिते. श्चेडाया. श्चेन्द्राण्याश्च प्रिय.न्धाम भवति- य^ एवँ वेद।। 7।।

卐 स^ दिशोऽनु व्यचल-त्तँ विरा.डनु व्यचल-त्सर्वे च देवा स्सर्वाश्च देवताः।

卐विराजश्च वै स^ सर्वेषाञ्च देवानां सर्वासाञ्च देवतानां प्रिय. न्धाम भवति- य^ एवँ वेद।। 8।।

卐 स^ सर्वा.नन्तर्देशा. ननु व्यचलत्।

卐तं प्रजापतिश्च परमेष्ठी च पिता च पितामह.श्चानु व्यचलन्न्।।
卐प्रजापतेश्च वै स^ परमेष्ठिनश्च पितुश्च पितामहस्य च प्रिय. न्धाम भवति- य^ एवँ वेद।। 9।।-

15-01-06

卐 स^ महिमा सद्रु.भूत्वाऽन्तं पृथिव्या^ अगच्छ-त्स^ समुद्रोऽभवत्।। 1।।

卐 तं प्रजापतिश्च परमेष्ठी च पिता च पितामहश्चाऽऽपश्च श्रद्धा च वर्षं भूत्वाऽनुव्य्वर्तयन्त।। 2।।

卐 ऐन.मापो गच्छ-न्त्यैनं श्रद्धा गच्छ-त्यैनँ वर्ष.ङ्गच्छति- य^ एवँ वेद।। 3।।

卐 तं श्रद्धा च यज्ञश्च लोक.श्चाऽन्न.ञ्चाऽन्नाद्यञ्च भूत्वाऽभिपर्यावर्तन्त।। 4।।

卐 ऐनं श्रद्धा गच्छ-त्यैनँ यज्ञो गच्छ-त्यैनँ लोको गच्छ-त्यैन.मन्न.ङ्गच्छ-त्यैन.मन्नाद्य.ङ्गच्छति- य^ एवँ वेद।। 5।।

## पञ्चदश काण्डे द्वितीयोऽनुवाकः

15-02-01

卐 सोऽरज्यत- ततो राजन्योऽजायत।। 1।।

卐 स^ विश. स्सबन्धू- नन्न.मन्नाद्य.मभ्युदतिष्ठत्।। 2।।

卐 विशा.ञ्च वै स^ सबन्धूना. ञ्चाऽन्नस्य चाऽन्नाद्यस्य च प्रिय. न्धाम भवति- य^ एवँ वेद।।

15-02-02

卐 स^ विशोऽनु व्यचलत्।। 1।।

卐 तं सभा च समितिश्च सेना च सुरा चानु व्यचलन्न्।।। 2।।

卐 सभायाश्च वै स^ समितेश्च सेनायाश्च सुरायाश्च प्रिय. न्धाम भवति- य^ एवँ वेद।।-

15-02-03

卐 तद्यस्यैवँ विद्वा.न्व्रात्यो राज्ञोऽतिथि.गृहा.नागच्छेत्।। 1।।

卐 श्रेयांस.मेन. मात्मनो मानये- त्तथा क्षत्राय नाऽऽवृश्चते- तथा राष्ट्राय नाऽऽवृश्चते।।

卐 अतो वै ब्रह्म च क्षत्र.ञ्चोदतिष्ठता- न्ते~ अब्रूता.ङ्कं प्र विशावेति।। 3।।

卐 अतो वै बृहस्पति.मेव ब्रह्म प्रविश-त्विन्द्र. ङ्क्षत्र- न्तथा वा इति।। 4।।

卐 अतो वै बृहस्पति.मेव ब्रह्म प्राऽविश-दिन्द्र. ङ्क्षत्रम्।। 5।।

卐 इयं वा उ पृथिवी बृहस्पति-र्द्यौ.रेवेन्द्रः।। 6।।

卐 अयँ वा उ अग्नि.र्ब्रह्मा-ऽसा.वादित्यः~ क्षत्रम्।। 7।।

卐 ऐनं ब्रह्म गच्छति- ब्रह्मवर्चसी भवति।। 8।।

卐 यः पृथिवीं बृहस्पति.मग्निं ब्रह्म वेद।। 9।।

卐 ऐनं.मिन्द्रिय. ङ्गच्छ.तीन्द्रियवा.न्भवति।। 10।।

卐 य^ आदित्य.ङ्क्षत्र. न्दिव.मिन्द्रँ वेद।। 11।।-

15-02-04

卐 तद्यस्यैवँ विद्वा.न्व्रात्योऽतिथि.र्गृहा.नागच्छेत्।। 1।।

卐 स्वयमेन.मभ्युदेत्य ब्रूया,द्व्रात्य क्वाऽवात्सी,र्व्रात्योदकँ, व्रात्य तर्पयन्तु, व्रात्य यथा ते प्रिय. न्तथाऽस्तु, व्रात्य यथा ते वश.स्तथाऽस्तु, व्रात्य यथा ते निकाम.स्तथाऽस्त्विति।। 2।।

卐 यदेन.माह- व्रात्य क्वाऽवात्सी.रिति- पथ^ एव तेन देवयाना.नव रुन्धे।। 3।।

卐 यदेन.माह- व्रात्योदक.मि-त्यप^ एव तेनाव रुन्धे।। 4।।

卐 यदेन.माह- व्रात्य तर्पय.न्त्विति- प्राण.मेव तेन वर्षीयांस.ङ्कुरुते।। 5।।

卐 यदेन.माह- व्रात्य यथा ते प्रिय. न्तथाऽस्त्विति- प्रिय.मेव तेनाव रुन्धे।

卐ऐनं प्रिय.ङ्गच्छति- प्रियः प्रियस्य भवति- य^ एवँ वेद।। 6।।

卐 यदेन.माह- व्रात्य यथा ते वश.स्तथाऽस्त्विति- वश.मेव तेनाव रुन्धे।

卐 ऐनँ वशो गच्छति- वशी वशिनां भवति- य^ एवँ वेद।। 7।।

卐 यदेन.माह- व्रात्य यथा ते निकाम.स्तथाऽस्त्विति- निकाम.मेव तेनाव रुन्धे।

卐ऐनं. न्निकामो गच्छति- निकामे निकामस्य भवति- य^ एवँ वेद।। 8।।

15-02-05

卐 तद्यस्यैवँ विद्वा.न्व्रात्य^ उद्धृतेष्वग्नि.ष्वधिश्रितेऽग्निहोत्रेऽतिथि.र्गृहा. नागच्छेत्।

卐स्वय.मेन. मभ्युदेत्य ब्रूया-द्व्रात्याऽति सृज- होष्यामीति।। 1।।

卐 स^ चाऽतिसृजे- ज्जुहुया,न्न चाऽतिसृजे.न्न जुहुयात्।

卐 स^ य^ एवँ विदुषा व्रात्येनाऽतिसृष्टो जुहोति।

卐प्र पितृयाणं पन्था.ञ्जानाति- प्र देवयानम्।

卐न देवेष्वा वृश्चते- हुतमस्य भवति।

卐पर्यस्याऽस्मि.न्लोक आयतनं शिष्यते- य^ एवँ विदुषा व्रात्येनाऽतिसृष्टो जुहोति।। 2।।

卐 अथ य^ एवँ विदुषा व्रात्येनाऽनतिसृष्टो जुहोति।

卐न पितृयाणं पन्थां जानाति- न देवयानम्।

卐आ देवेषु वृश्चते- अहुत.मस्य भवति।

卐नाऽस्याऽस्मि.न्लोक आयतनं शिष्यते- य^ एवँ विदुषा व्रात्येना ऽनतिसृष्टो जुहोति।। 3।।

15-02-06

卐 तद्यस्यैवँ विद्वा.न्व्रात्य^ एकां रात्रि.मतिथि.गृहे वसति।

卐ये पृथिव्यां पुण्या^ लोका- स्ता.नेव तेनाव रुन्धे।। 1।।

卐 तद्यस्यैवँ विद्वा.न्व्रात्यो द्वितीयां रात्रि.मतिथि.गृहे वसति।

卐 ये3(ए)ऽन्तरिक्षे पुण्या^ लोका- स्ता.नेव तेनाव रुन्धे।। 2।।

卐 तद्यस्यैवँ विद्वा.न्व्रात्य. स्तृतीयां रात्रि.मतिथि.गृहे वसति।

卐ये दिवि पुण्या^ लोका- स्ता.नेव तेनाव रुन्धे।। 3।।

卐 तद्यस्यैवँ विद्वा.न्व्रात्य.श्चतुर्थीं रात्रि.मतिथि.गृहे वसति।

卐ये पुण्यानां पुण्या^ लोका- स्ता.नेव तेनाव रुन्धे।। 4।।

卐 तद्यस्यैवँ विद्वा.न्व्रात्योऽपरिमिता^ रात्री.रतिथि.गृहे वसति।

卐य एवाऽपरिमिता॰ पुण्या^ लोका- स्ता.नेव तेनाव रुन्धे।। 5।।

卐 अथ यस्याऽव्रात्यो व्रात्यब्रुवो नामबिभ्र.त्यतिथि.र्गृहा.नागच्छेत्।। 6।।

卐 कर्षे.देन- न्न चैन.ङ्कर्षेत्।। 7।।

卐 अस्यै देवताया उदकँ याचामीमा.न्देवताँ वासय इमा.मिमा. न्देवतां परि वेवेष्मी.त्येनं परि वेविष्यात्।। 8।।

卐 तस्या.मेवाऽस्य तद्देवतायां हुतं भवति- य एवँ वेद।। 9।।-

15-02-07

卐 स^ यत्प्राची न्दिश.मनु व्यचल-न्मारुतं शर्धो भूत्वाऽनु व्यचल-न्मनोऽन्नाद. ङ्कृत्वा।

卐मनसाऽन्नादेनाऽन्न.मत्ति- य^ एवँ वेद।। 1।।

卐 स^ यद्दक्षिणा. न्दिश.मनु व्यचल-दिन्द्रो भूत्वाऽनु व्यचल-द्बल. मन्नाद.ङ्कृत्वा।

卐बलेनाऽन्नादेनाऽन्न.मत्ति- य^ एवँ वेद।। 2।।

卐 स^ यत्प्रतीची. न्दिश.मनु व्यचल-द्वरुणो राजा भूत्वाऽनु व्यचल-दपोऽन्नादीः कृत्वा।

卐अद्भि.रन्नादीभि. रन्न.मत्ति- य^ एवँ वेद।। 3।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 स^ यदुदीची. न्दिश.मनु व्यचल-त्सोमो राजा भूत्वाऽनु व्यचल-त्सप्तर्षिभि.र्हुत आहुति. मन्नादी. ङ्कृत्वा।

卐आहुत्याऽन्नाद्याऽन्न.मत्ति- य^ एवँ वेद।। 4।।

卐 स^ यद्ध्रुवा. न्दिश.मनु व्यचल-द्विष्णुर्भूत्वाऽनु व्यचल-द्विराज. मन्नादी.ङ्कृत्वा।

卐विराजाऽन्नाद्याऽन्न.मत्ति- य^ एवँ वेद।। 5।।

卐 स^ यत्पशू.ननु व्यचल-द्रुद्रो भूत्वाऽनु व्यचल- दोषधी.रन्नादीः कृत्वा।

卐ओषधीभि. रन्नादीभि.रन्न.मत्ति- य^ एवँ वेद।। 6।।

卐 स^ यत्पितृ.ननु व्यचल- द्यमो राजा भूत्वाऽनु व्यचल-त्स्वधाकार. मन्नाद.ङ्कृत्वा। स्वधाकारेणाऽन्नादेनाऽन्न.मत्ति- य^ एवँ वेद।। 7।।

卐 स^ यन्मनुष्या3(आ).ननु व्यचल- दग्नि.भूत्वाऽनु व्यचल-त्स्वाहाकार. मन्नाद. ङ्कृत्वा।

卐स्वाहाकारेणाऽन्नादेनाऽन्न.मत्ति- य^ एवँ वेद।। 8।।

卐 स^ यदूर्ध्वा. न्दिश.मनु व्यचल-द्बृहस्पति.र्भूत्वाऽनु व्यचल- द्वषट्कार. मन्नाद. ङ्कृत्वा। वषट्कारेणाऽन्नादेनाऽन्न.मत्ति- य^ एवँ वेद।। 9।।

卐 स^ यद्देवा.ननु व्यचल-दीशानो भूत्वाऽनु व्यचल-न्मन्यु. मन्नाद.ङ्कृत्वा। मन्युनाऽन्नादेनाऽन्न.मत्ति- य^ एवँ वेद।। 10।।

卐 स^ यत्प्रजा^ अनु व्यचल-त्प्रजापति.र्भूत्वाऽनु व्यचल-त्प्राण. मन्नाद.ङ्कृत्वा। प्राणेनाऽन्नादेनाऽन्न.मत्ति- य^ एवँ वेद।। 11।।

卐 स^ यत्सर्वा.नन्तर्देशा.ननु व्यचल-त्परमेष्ठी भूत्वाऽनु व्यचल-द्ब्रह्माऽन्नाद.ङ्कृत्वा। ब्रह्मणाऽन्नादेनाऽन्न.मत्ति- य^ एवँ वेद।। 12।।-

15-02-08

卐 तस्य व्रात्यस्य।

卐सप्त प्राणा. स्सप्ताऽपाना. स्सप्त व्यानाः।। 1।।

卐 तस्य व्रात्यस्य। योऽस्य प्रथम॰ प्राण^- ऊर्ध्वो नामाऽयं सो अग्निः।। 2।।

卐 तस्य व्रात्यस्य। योऽस्य द्वितीय॰ प्राण॰- प्रौढो नामाऽसौ स^ आदित्यः।। 3।।

卐 तस्य व्रात्यस्य। योऽस्य तृतीय॰ प्राणो3(ओ)-ऽभ्यूढो नामाऽसौ स^ चन्द्रमाः।।

卐 तस्य व्रात्यस्य। योऽस्य चतुर्थः प्राणो- विभू.र्नामाऽयं स^ पवमानः।। 5।।

卐 तस्य व्रात्यस्य। योऽस्य पञ्चमः प्राणो- योनि.र्नाम ता^ इमा^ आपः।। 6।।

卐 तस्य व्रात्यस्य। योऽस्य षष्ठः प्राणः- प्रियो नाम त इमे पशवः।। 7।।

卐 तस्य व्रात्यस्य। योऽस्य सप्तमः प्राणोऽपरिमितो नाम ता^ इमाः प्रजाः।। 8।।

15-02-08

卐 तस्य व्रात्यस्य। योऽस्य प्रथमोऽपान- स्सा पौर्णमासी।। 1।।

卐 तस्य व्रात्यस्य। योऽस्य द्वितीयोऽपान- स्साऽष्टका।। 2।।

卐 तस्य व्रात्यस्य। योऽस्य तृतीयोऽपान- स्साऽमावास्या।। 3।।

卐 तस्य व्रात्यस्य। योऽस्य चतुर्थोऽपान- स्सा श्रद्धा।। 4।।

卐 तस्य व्रात्यस्य। योऽस्य पञ्चमोऽपान- स्सा दीक्षा।। 5।।

卐 तस्य व्रात्यस्य। योऽस्य षष्ठोऽपान- स्स^ यज्ञः।। 6।।

卐 तस्य व्रात्यस्य। योऽस्य सप्तमोऽपान-स्ता^ इमा^ दक्षिणाः।। 7।।-

15-02-09

卐 तस्य व्रात्यस्य। योऽस्य प्रथमो व्यान- स्सेयं भूमिः।। 1।।

卐 तस्य व्रात्यस्य। योऽस्य द्वितीयो व्यान-स्तदन्तरिक्षम्।। 2।।

卐 तस्य व्रात्यस्य। योऽस्य तृतीयो व्यान- स्सा द्यौः।। 3।।

卐 तस्य व्रात्यस्य। योऽस्य चतुर्थो व्यान- स्तानि नक्षत्राणि।। 4।।

卐 तस्य व्रात्यस्य। योऽस्य पञ्चमो व्यान- स्त ऋतवः।। 5।।

卐 तस्य व्रात्यस्य। योऽस्य षष्ठो व्यान-स्त आर्तवाः।। 6।।

卐 तस्य व्रात्यस्य। योऽस्य सप्तमो व्यान- स्स^ सँवत्सरः।। 7।।

卐 तस्य व्रात्यस्य। समान.मर्थं परि यन्ति देवा- स्सँवत्सरँ वा एत.दृतवोऽनु परियन्ति- व्रात्यञ्च।। 8।।

卐 तस्य व्रात्यस्य। यदादित्य. मभिसँ.विश-न्त्यमावास्या.ञ्चैव तत्पौर्णमासीञ्च।। 9।।

卐 तस्य व्रात्यस्य। एक. न्तदेषा.ममृतत्व- मित्याहुति.रेव।। 10।।-

15-02-10

卐 तस्य व्रात्यस्य। यदस्य दक्षिण.मक्ष्यसौ स^ आदित्यो- यदस्य सव्य.मक्ष्यसौ स^ चन्द्रमाः।। 1।।

卐 योऽस्य दक्षिणः कर्णोऽयं सो अग्नि, योऽस्य सव्यः कर्णोऽयं स पवमानः।। 2।।

卐 अहोरात्रे नासिके, दितिश्चाऽदितिश्च शीर्षकपाले, सँवत्सर. शिरः।। 3।।

卐 अह्ना प्रत्य.ङ्वात्यो- रात्र्या प्रा,ङ्नमो व्रात्याय।। 4।।

## षोडशं काण्डम्

### षोडश काण्डे प्रथमोऽनुवाकः

16-01-01

卐 अतिसृष्टो अपाँ वृषभो-ऽतिसृष्टा अग्नयो दिव्याः।

卐 रुज.न्परिरुज.न्मृण.न्प्रमृणन्न्।। 2।।

卐 म्रोको मनोहा खनो निर्दाह आत्मदूषि.स्तनूदूषिः।। 3।।

卐 इद. न्तमति सृजामि- तं माऽभ्यवनिक्षि।। 4।।

卐 तेन त.मभ्यतिसृजामो- यो3(ओ)ऽस्मा.न्द्वेष्टि- यँ वय.न्द्विष्मः।। 5।।

卐 अपा.मग्र.मसि- समुद्रँ वोऽभ्यवसृजामि।। 6।।

卐 यो3(ओ)ऽप्स्व1(अ)ग्नि-रति तं सृजामि- म्रोकं खनि. न्तनूदूषिम्।। 7।।

卐 यो व॑ आपो॒ऽग्नि.रा॑वि॒वे॒श- स॑ ए॒ष॑ यद्वो॑ घो॒र- न्त.दे॒तत् ।। 8।।

卐 इन्द्र॑स्य व॑ इन्द्रि॒येणा॒ऽभिषि॑ञ्चेत् ।। 9।।

卐 अ॒रि॒प्रा॑ आपो॒- अप॑ रि॒प्र.म॒स्मत् ।। 10।।

卐 प्राऽस्म.दे॒नो॑ वहन्तु॒- प्र दु॒ष्वप्न्यँ॑ वहन्तु।। 11।।

卐 शि॒वेन॑ मा॒ चक्षु॑षा पश्यताऽऽप- श्शि॒वया॑ त॒न्वोप॑ स्पृशत॒ त्वचं॑ मे।।

12।।

卐 शि॒वा.न॒ग्नी.न॑प्सु॒षदो॑ हवामहे॒- मयि॑ क्ष॒त्रँ व॒र्च॑ आ ध॑त्त देवीः।। 13।।-

16-01-02

卐 निर्दु॑रर्म॒ण्य॑ ऊ॒र्जा मधु॑मती॒ वाक् ।।।

卐 मधु॑मती.स्स्थ॒- मधु॑मती॒ँ वाचं.मुदेयम्।। 2।।

卐 उप॑हूतो मे गो॒पा॑ उप॑हूतो गोपी॒थः।। 3।।

卐 सु॒श्रु॒तौ॑ कर्णौ॑- भ॒द्र॒श्रु॒तौ॑ कर्णौ॑- भ॒द्रं श्लोकं॑ श्रूयासम्।। 4।।

卐 सु॑श्रुतिश्च॒ मोप॑श्रुतिश्च॒ मा हा॑सिष्टां॒- सौप॑र्ण॒.ञ्चक्षु॒.रज॑स्र॒. ञ्ज्योतिः।। 5।।

卐 ऋषी॑णां प्रस्त॒रो॑ऽसि॒- नमो॒ऽस्तु दैवा॑य प्रस्त॒राय॑।। 6।।-

16-01-03

卐 मू॒र्धाऽहं र॑यी॒णां- मू॒र्धा स॑मा॒नानां॑ भूयासम्।। 1।।

卐 रुजश्च मा वेनश्च मा हासिष्टां- मूर्धा च मा विधर्मा च मा हासिष्टाम्।।
2।।

卐 उर्वश्च मा चमसश्च मा हासिष्टा- न्धर्ता च मा धरुणश्च मा हासिष्टाम्।।
3।।

卐 विमोकश्च माऽऽर्द्रपविश्च मा हासिष्टा- मार्द्रदानुश्च मा मातरिश्वा च मा हासिष्टाम्।। 4।।

卐 बृहस्पति.र्म आत्मा- नृमणा^ नाम हृद्यः।। 5।।

卐 असन्तापं मे हृदय- मुर्वी गव्यूति- स्समुद्रो अस्मि विधर्मणा।। 6।।-

16-01-04

卐 नाभि.रहं रयीणां- नाभि. स्समानानां भूयासम्।। 1।।

卐 स्वासदसि सूषा^ अमृतो मर्त्येष्वा।। 2।।

卐 मा मां प्राणो हासी-न्मो~ अपानोऽवहाय परा गात्।। 3।।

卐 सूर्यो माऽह्नः पा-त्वग्निः पृथिव्या^- वायु.रन्तरिक्षा- द्यमो मनुष्येभ्य- स्सरस्वती पार्थिवेभ्यः।। 4।।

卐 प्राणापानौ मा मा हासिष्टं- मा जने प्र मेषि।। 5।।

卐 स्वस्त्य1(अ)द्योषसो दोषसश्च- सर्व^ आप. स्सर्वगणो अशीय।। 6।।

卐 शक्वरी.स्स्थ पशवो मोप स्थेषु- र्मित्रावरुणौ मे प्राणापाना.वग्नि.र्मे दक्ष.न्दधातु।।

## ☙ षोडश काण्डे द्वितीयोऽनुवाकः

16-02-01

卐 विद्म ते स्वप्न जनित्र.ङ्ग्राह्याः पुत्रोऽसि यमस्य करणः।

卐अन्तकोऽसि मृत्यु.रसि।

卐तन्त्वा स्वप्न तथा सँ विद्म- स^ न.स्स्वप्न दुष्ष्वप्न्या.त्पाहि।। 3।।

卐 विद्म ते स्वप्न जनित्र. न्निर्ऋत्याः पुत्रोऽसि यमस्य करणः। अन्तकोऽसि मृत्यु.रसि। तन्त्वा स्वप्न तथा सँ विद्म स^ न.स्स्वप्न दुष्ष्वप्न्या.त्पाहि।। 4।।

卐 विद्म ते स्वप्न जनित्र. मभूत्याः पुत्रोऽसि यमस्य करणः। अन्तकोऽसि मृत्यु.रसि। तन्त्वा स्वप्न तथा सँ विद्म स^ न.स्स्वप्न दुष्ष्वप्न्या.त्पाहि।। 5।।

卐 विद्म ते स्वप्न जनित्र. न्निर्भूत्याः पुत्रोऽसि यमस्य करणः। अन्तकोऽसि मृत्यु.रसि। तन्त्वा स्वप्न तथा सँ विद्म स^ न.स्स्वप्न दुष्ष्वप्न्या.त्पाहि।। 6।।

卐 विद्म ते स्वप्न जनित्रं पराभूत्याः पुत्रोऽसि यमस्य करणः। अन्तकोऽसि मृत्यु.रसि। तन्त्वा स्वप्न तथा सँ विद्म स^ न.स्स्वप्न दुष्ष्वप्न्या.त्पाहि।। 7।।

卐 विद्म ते स्वप्न जनित्र. न्देवजामीनां पुत्रोऽसि यमस्य करणः।। 8।।

卐 अन्तकोऽसि मृत्यु.रसि। 9।।

卐तन्त्वा स्वप्न तथा सँ विद्म- स^ न.स्स्वप्न दुष्ष्वप्न्या.त्पाहि।। 3।।-

16-02-02

卐 अजैष्माऽद्याऽसनामाऽद्याऽभूमाऽनागसो वयम्।। 1।।

卐 उषो यस्मा.द्दुष्ष्वप्न्या-दभैष्माऽप तदुच्छतु।। 2।।

卐 द्विषते तत्परा वह- शपते तत्परा वह।। 3।।

卐 य.न्द्विष्मो यश्च नो द्वेष्टि- तस्मा एन.द्गमयामः।। 4।।

卐 उषा^ देवी वाचा सँविदाना- वाग्देव्यु1(उ)षसा सँविदाना।। 5।।

卐 उष.स्पति. र्वाचस्पतिना सँविदानो- वाचस्पति. रुष.स्पतिना सँविदानः।। 6।।

卐 ते3(ए)ऽमुष्मै परा वह-न्त्वराया. न्दुर्णाम्न. स्सदान्वाः।। 7।।

卐 कुम्भीका दूषीकाः पीयकान् ।।।

卐 जाग्रद्दुष्ष्वप्न्यं स्वप्नेदुष्ष्वप्न्यम्।। 9।।

卐 अनागमिष्यतो वरा.नवित्ते. स्सङ्कल्पा.नमुच्या^ द्रुहः पाशान् ।।

卐 त.दमुष्मा अग्ने देवाः परा वहन्तु- वध्रि. र्यथाऽस.द्विथुरो न साधुः।। 11।।-

16-02-03

卐 तेनै॒नँ विध्या॒-म्यभूत्यैनँ विध्या॒मि- निर्भूत्यैनँ विध्या॒मि- पराभूत्यैनँ विध्या॒मि- ग्राह्यैनँ विध्या॒मि- तमसैनँ विध्यामि।। 1।।

卐 दे॒वाना.मेन.घ्नो॒रैः- क्रू॒रैः प्रै॒षै.र॒भि॒प्रेष्यामि।। 2।।

卐 वै॒श्वा॒न॒र.स्यै॒न. न्दंष्ट्र॒यो॒.रपि दधामि।। 3।।

卐 ए॒वाऽने॒वाऽव॒ सा गरत् ।।।

卐 यो॒3(ओ॒)ऽस्मा.न्द्वेष्टि॒- त.मा॒त्मा द्वेष्टु- यँ व॒य.न्द्वि॒ष्म- स्स^ आ॒त्मान.न्द्वेष्टु।। 5।।

卐 नि॒र्द्विषन्त. न्दि॒वो- निः पृ॒थि॒व्या^- नि॒रन्तरिक्षा.द्भजाम।। 6।।

卐 सुयामं.श्चाक्षुष।। 7।।

卐 इ॒द.म॒ह.मामुष्याय॒ण॒3(ए॒)ऽमुष्याः पु॒त्रे दु॒ष्ष्वप्न्यं मृजे।। 8।।

卐 य॒द॒दो~अदो अ॒भ्यगच्छँ॒- यद्दो॒षा यत्पूर्वा॒ रात्रिम्।। 9।।

卐 यज्जाग्र॒.द्यत्सु॒प्तो- यद्दिवा॒ यन्नक्तम्।। 10।।

卐 यदहरह. रभि॒गच्छामि॒- तस्मा.दे॒न.मव दये।। 11।।

卐 तज्ज॒हि॒ तेन मन्दस्व॒- तस्य॒ पृष्टी.रपि श्रृणीहि।। 12।।

卐 स^ मा जीवी॒-त्तं प्रा॒णो जहातु।। 13।।-

16-02-04

卐 जित.मस्माक- मुद्भिन्न. मस्माक-मृत. मस्माक-न्तेजो.ऽस्माकं-ब्रह्माऽस्माकं- स्व.रस्माकँ- यज्ञो3(ओ)ऽस्माकं- पशवोऽस्माकं- प्रजा^ अस्माकँ- वीरा^ अस्माकम्।

卐 तस्मा.दमु. न्निर्भजामो-ऽमु.मामुष्यायण. ममुष्या॰ पुत्र.मसौ यः।

卐स^ ग्राह्या॰ पाशा.न्मा मोचि।

卐तस्येदँ वर्च. स्तेज॰ प्राण. मायु.र्निवेष्टया-मीद. मेन. मधराञ्चं पादयामि।। 1।।

卐 जित.मस्माक- मुद्भिन्न. मस्माक-मृत. मस्माक-न्तेजो.ऽस्माकं-ब्रह्माऽस्माकं- स्व.रस्माकँ- यज्ञो3(ओ)ऽस्माकं- पशवोऽस्माकं- प्रजा^ अस्माकँ- वीरा^ अस्माकम्। तस्मा.दमु. न्निर्भजामो-ऽमु.मामुष्यायण. ममुष्या॰ पुत्र.मसौ यः। स^ निर्ऋत्या॰ पाशा.न्मा मोचि। तस्येदँ वर्च. स्तेज॰ प्राण. मायु.र्निवेष्टया-मीद. मेन. मधराञ्चं पादयामि।। 2।।

卐 जित.मस्माक- मुद्भिन्न. मस्माक-मृत. मस्माक-न्तेजो.ऽस्माकं-ब्रह्माऽस्माकं- स्व.रस्माकँ- यज्ञो3(ओ)ऽस्माकं- पशवोऽस्माकं- प्रजा^ अस्माकँ- वीरा^ अस्माकम्। तस्मा.दमु. न्निर्भजामो-ऽमु.मामुष्यायण.

ममुष्याः॰ पुत्र.मसौ यः। सोऽभूत्याः॰ पाशा.न्मा मोचि। तस्येदँ वर्च.
स्तेजः॰ प्राण. मायु.र्निवेष्टया-मीद. मेन. मधराञ्चं पादयामि।। 3।।

卐 जित.मस्माक- मुद्भिन्न. मस्माक-मृत. मस्माक-न्तेजो.ऽस्माकं-
ब्रह्माऽस्माकं- स्व.रस्माकँ- यज्ञो3(ओ)ऽस्माकं- पशवोऽस्माकं- प्रजा^
अस्माकँ- वीरा^ अस्माकम्। तस्मा.दमु. न्निर्भजामो-ऽमु.मामुष्यायण.
ममुष्याः॰ पुत्र.मसौ यः। सो निर्भूत्याः॰ पाशा.न्मा मोचि। तस्येदँ वर्च.
स्तेजः॰ प्राण. मायु.र्निवेष्टया-मीद. मेन. मधराञ्चं पादयामि।। 4।।

卐 जित.मस्माक- मुद्भिन्न. मस्माक-मृत. मस्माक-न्तेजो.ऽस्माकं-
ब्रह्माऽस्माकं- स्व.रस्माकँ- यज्ञो3(ओ)ऽस्माकं- पशवोऽस्माकं- प्रजा^
अस्माकँ- वीरा^ अस्माकम्। तस्मा.दमु. न्निर्भजामो-ऽमु.मामुष्यायण.
ममुष्याः॰ पुत्र.मसौ यः। स^ पराभूत्याः॰ पाशा.न्मा मोचि। तस्येदँ वर्च.
स्तेजः॰ प्राण. मायु.र्निवेष्टया-मीद. मेन. मधराञ्चं पादयामि।। 5।।

卐 जित.मस्माक- मुद्भिन्न. मस्माक-मृत. मस्माक-न्तेजो.ऽस्माकं-
ब्रह्माऽस्माकं- स्व.रस्माकँ- यज्ञो3(ओ)ऽस्माकं- पशवोऽस्माकं- प्रजा^
अस्माकँ- वीरा^ अस्माकम्। तस्मा.दमु. न्निर्भजामो-ऽमु.मामुष्यायण.

ममुष्याः पुत्र.मसौ यः। स देवजामीनां पाशा.न्मा मोचि। तस्येदँ वर्च.
स्तेजः प्राण. मायु.र्निवेष्टया-मीद. मेन. मधराञ्चं पादयामि।। 6।।

卐 जित.मस्माक- मुद्भिन्न. मस्माक-मृत. मस्माक-न्तेजो.ऽस्माकं-
ब्रह्माऽस्माकं- स्व.रस्माकँ- यज्ञो3(ओ)ऽस्माकं- पशवोऽस्माकं- प्रजा
अस्माकँ- वीरा अस्माकम्। तस्मा.दमु. न्निर्भजामो-ऽमु.मामुष्यायण.
ममुष्याः पुत्र.मसौ यः। स प्रजापतेः पाशा.न्मा मोचि। तस्येदँ वर्च.
स्तेजः प्राण. मायु.र्निवेष्टया-मीद. मेन. मधराञ्चं पादयामि।। 7।।

卐 जित.मस्माक- मुद्भिन्न. मस्माक-मृत. मस्माक-न्तेजो.ऽस्माकं-
ब्रह्माऽस्माकं- स्व.रस्माकँ- यज्ञो3(ओ)ऽस्माकं- पशवोऽस्माकं- प्रजा
अस्माकँ- वीरा अस्माकम्। तस्मा.दमु. न्निर्भजामो-ऽमु.मामुष्यायण.
ममुष्याः पुत्र.मसौ यः। स ऋषीणां पाशा.न्मा मोचि। तस्येदँ वर्च.
स्तेजः प्राण. मायु.र्निवेष्टया-मीद. मेन. मधराञ्चं पादयामि।। 9।।

卐 जित.मस्माक- मुद्भिन्न. मस्माक-मृत. मस्माक-न्तेजो.ऽस्माकं-
ब्रह्माऽस्माकं- स्व.रस्माकँ- यज्ञो3(ओ)ऽस्माकं- पशवोऽस्माकं- प्रजा
अस्माकँ- वीरा अस्माकम्। तस्मा.दमु. न्निर्भजामो-ऽमु.मामुष्यायण.

Sri Ganapathi Sachchidananda Datta Peetham Mysore

ममुष्याः पुत्र.मसौ यः। स^ आर्षेयाणां पाशा.न्मा मोचि। तस्येदँ वर्च.

स्तेजः प्राण. मायु.र्निर्वेष्टया-मीद. मेन. मधराञ्चं पादयामि।। 10।।

卐 जित.मस्माक- मुद्भिन्न. मस्माक-मृत. मस्माक-न्तेजो.ऽस्माकं-

ब्रह्माऽस्माकं- स्व.रस्माकँ- यज्ञो3(ओ)ऽस्माकं- पशवोऽस्माकं- प्रजा^

अस्माकँ- वीरा^ अस्माकम्। तस्मा.दमु. न्निर्भजामो-ऽमु.मामुष्यायण.

ममुष्याः पुत्र.मसौ यः। सोऽङ्गिरसां पाशा.न्मा मोचि। तस्येदँ वर्च. स्तेजः

प्राण. मायु.र्निर्वेष्टया-मीद. मेन. मधराञ्चं पादयामि।। 11।।

卐 जित.मस्माक- मुद्भिन्न. मस्माक-मृत. मस्माक-न्तेजो.ऽस्माकं-

ब्रह्माऽस्माकं- स्व.रस्माकँ- यज्ञो3(ओ)ऽस्माकं- पशवोऽस्माकं- प्रजा^

अस्माकँ- वीरा^ अस्माकम्। तस्मा.दमु. न्निर्भजामो-ऽमु.मामुष्यायण.

ममुष्याः पुत्र.मसौ यः। स^ आङ्गिरसानां पाशा.न्मा मोचि। तस्येदँ वर्च.

स्तेजः प्राण. मायु.र्निर्वेष्टया-मीद. मेन. मधराञ्चं पादयामि।। 12।।

卐 जित.मस्माक- मुद्भिन्न. मस्माक-मृत. मस्माक-न्तेजो.ऽस्माकं-

ब्रह्माऽस्माकं- स्व.रस्माकँ- यज्ञो3(ओ)ऽस्माकं- पशवोऽस्माकं- प्रजा^

अस्माकँ- वीरा^ अस्माकम्। तस्मा.दमु. न्निर्भजामो-ऽमु.मामुष्यायण.

ममुष्याः पुत्र.मसौ यः। सोऽथर्वणां पाशा.न्मा मोचि। तस्येदँ वर्च. स्तेजः प्राण. मायु.र्निवेष्टया-मीद. मेन. मधराञ्चं पादयामि।। 13।।

卐 जित.मस्माक- मुद्भिन्न. मस्माक-मृत. मस्माक-न्तेजो.ऽस्माकं-ब्रह्माऽस्माकं- स्व.रस्माकँ- यज्ञो3(ओ)ऽस्माकं- पशवोऽस्माकं- प्रजा^ अस्माकँ- वीरा^ अस्माकम्। तस्मा.दमु. न्निर्भजामो-ऽमु.मामुष्यायण. ममुष्याः पुत्र.मसौ यः। स^ आथर्वणानां पाशा.न्मा मोचि। तस्येदँ वर्च. स्तेजः प्राण. मायु.र्निवेष्टया-मीद. मेन. मधराञ्चं पादयामि।। 14।।

卐 जितमस्माक मुद्भिन्न मस्माकमृत मस्माक न्तेजोऽस्माकं ब्रह्मास्माकं स्वरस्माकँ यज्ञो3(ओ)ऽस्माकं पशवोऽस्माकं प्रजा अस्माकँ वीरा अस्माकम्। तस्मादमु न्निर्भजामोऽमु मामुष्यायण ममुष्याः पुत्रमसौ यः। स^ वनस्पतीनां पाशा.न्मा मोचि। तस्येदँ वर्च. स्तेजः प्राण. मायु.र्निवेष्टया-मीद. मेन. मधराञ्चं पादयामि।। 15।।

卐 जित.मस्माक- मुद्भिन्न. मस्माक-मृत. मस्माक-न्तेजो.ऽस्माकं-ब्रह्माऽस्माकं- स्व.रस्माकँ- यज्ञो3(ओ)ऽस्माकं- पशवोऽस्माकं- प्रजा^ अस्माकँ- वीरा^ अस्माकम्। तस्मा.दमु. न्निर्भजामो-ऽमु.मामुष्यायण.

ममुष्याः पुत्र.मसौ यः। स^ वानस्पत्यानां पाशा.न्मा मोचि। तस्येदँ वर्च.
स्तेजः प्राण. मायु.र्निवेष्टया-मीद. मेन. मधराञ्चं पादयामि।। 16।।

卐 जित.मस्माक- मुद्भिन्न. मस्माक-मृत. मस्माक-न्तेजो.ऽस्माकं-
ब्रह्माऽस्माकं- स्व.रस्माकँ- यज्ञो3(ओ)ऽस्माकं- पशवोऽस्माकं- प्रजा^
अस्माकँ- वीरा^ अस्माकम्। तस्मा.दमु. न्निर्भजामो-ऽमु.मामुष्यायण.
ममुष्याः पुत्र.मसौ यः। स^ ऋतूनां पाशा.न्मा मोचि। तस्येदँ वर्च. स्तेजः
प्राण. मायु.र्निवेष्टया-मीद. मेन. मधराञ्चं पादयामि।। 17।।

卐 जित.मस्माक- मुद्भिन्न. मस्माक-मृत. मस्माक-न्तेजो.ऽस्माकं-
ब्रह्माऽस्माकं- स्व.रस्माकँ- यज्ञो3(ओ)ऽस्माकं- पशवोऽस्माकं- प्रजा^
अस्माकँ- वीरा^ अस्माकम्। तस्मा.दमु. न्निर्भजामो-ऽमु.मामुष्यायण.
ममुष्याः पुत्र.मसौ यः। स^ आर्तवानां पाशा.न्मा मोचि। तस्येदँ वर्च.
स्तेजः प्राण. मायु.र्निवेष्टया-मीद. मेन. मधराञ्चं पादयामि।। 18।।

卐 जित.मस्माक- मुद्भिन्न. मस्माक-मृत. मस्माक-न्तेजो.ऽस्माकं-
ब्रह्माऽस्माकं- स्व.रस्माकँ- यज्ञो3(ओ)ऽस्माकं- पशवोऽस्माकं- प्रजा^
अस्माकँ- वीरा^ अस्माकम्। तस्मा.दमु. न्निर्भजामो-ऽमु.मामुष्यायण.

ममुष्या॰ पुत्र.मसौ यः। स^ मासानां पाशा.न्मा मोचि। तस्येदँ वर्च.
स्तेज॰ प्राण. मायु.र्निवेष्टया-मीद. मेन. मधराञ्चं पादयामि।। 19।।

卐 जित.मस्माक- मुद्भिन्न. मस्माक-मृत. मस्माक-न्तेजो.ऽस्माकं-
ब्रह्माऽस्माकं- स्व.रस्माकँ- यज्ञो3(ओ)ऽस्माकं- पशवोऽस्माकं- प्रजा^
अस्माकँ- वीरा^ अस्माकम्। तस्मा.दमु. न्निर्भजामो-ऽमु.मामुष्यायण.
ममुष्या॰ पुत्र.मसौ यः। सोऽर्धमासानां पाशा.न्मा मोचि। तस्येदँ वर्च.
स्तेज॰ प्राण. मायु.र्निवेष्टया-मीद. मेन. मधराञ्चं पादयामि।। 20।।

卐 जित.मस्माक- मुद्भिन्न. मस्माक-मृत. मस्माक-न्तेजो.ऽस्माकं-
ब्रह्माऽस्माकं- स्व.रस्माकँ- यज्ञो3(ओ)ऽस्माकं- पशवोऽस्माकं- प्रजा^
अस्माकँ- वीरा^ अस्माकम्। तस्मा.दमु. न्निर्भजामो-ऽमु.मामुष्यायण.
ममुष्या॰ पुत्र.मसौ यः। सोऽहोरात्रयो॰ पाशा.न्मा मोचि। तस्येदँ वर्च.
स्तेज॰ प्राण. मायु.र्निवेष्टया-मीद. मेन. मधराञ्चं पादयामि।। 21।।

卐 जित.मस्माक- मुद्भिन्न. मस्माक-मृत. मस्माक-न्तेजो.ऽस्माकं-
ब्रह्माऽस्माकं- स्व.रस्माकँ- यज्ञो3(ओ)ऽस्माकं- पशवोऽस्माकं- प्रजा^
अस्माकँ- वीरा^ अस्माकम्। तस्मा.दमु. न्निर्भजामो-ऽमु.मामुष्यायण.

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham Mysore

ममुष्याः॒ पुत्र.मसौ यः। सोऽह्नो.स्सँयतोः॒ पाशा.न्मा मोचि। तस्येदँ वर्च.
स्तेजः॒ प्राण. मायु.र्निवेष्टया-मीद. मेन. मधराञ्चं पादयामि।। 22।।

卐 जित.मस्माक- मुद्भिन्न. मस्माक-मृत. मस्माक-न्तेजो.ऽस्माकं-
ब्रह्माऽस्माकं- स्व.रस्माकँ- यज्ञो3(ओ)ऽस्माकं- पशवोऽस्माकं- प्रजा^
अस्माकँ- वीरा^ अस्माकम्। तस्मा.दमु. न्निर्भजामो-ऽमु.मामुष्यायण.
ममुष्याः॒ पुत्र.मसौ यः। स^ द्यावापृथिव्योः॒ पाशा.न्मा मोचि। तस्येदँ वर्च.
स्तेजः॒ प्राण. मायु.र्निवेष्टया-मीद. मेन. मधराञ्चं पादयामि।। 23।।

卐 जित.मस्माक- मुद्भिन्न. मस्माक-मृत. मस्माक-न्तेजो.ऽस्माकं-
ब्रह्माऽस्माकं- स्व.रस्माकँ- यज्ञो3(ओ)ऽस्माकं- पशवोऽस्माकं- प्रजा^
अस्माकँ- वीरा^ अस्माकम्। तस्मा.दमु. न्निर्भजामो-ऽमु.मामुष्यायण.
ममुष्याः॒ पुत्र.मसौ यः। स^ इन्द्राग्न्योः॒ पाशा.न्मा मोचि। तस्येदँ वर्च.
स्तेजः॒ प्राण. मायु.र्निवेष्टया-मीद. मेन. मधराञ्चं पादयामि।। 24।।

卐 जित.मस्माक- मुद्भिन्न. मस्माक-मृत. मस्माक-न्तेजो.ऽस्माकं-
ब्रह्माऽस्माकं- स्व.रस्माकँ- यज्ञो3(ओ)ऽस्माकं- पशवोऽस्माकं- प्रजा^
अस्माकँ- वीरा^ अस्माकम्। तस्मा.दमु. न्निर्भजामो-ऽमु.मामुष्यायण.

ममुष्या॑ः पुत्र.मसौ यः। स^ मित्रावरुणयो॑ः पाशा.न्मा मो॑चि। तस्येदँ वर्च.

स्तेज॑ः प्राण. मायु.र्निवे॑ष्टया-मीद. मे॑न. मधराञ्चं पादयामि।। 25।।

卐 जित.मस्माक- मुद्भिन्न. मस्माक-मृत. मस्माक-न्तेजो.ऽस्माकं-

ब्रह्माऽस्माकं- स्व.रस्माकँ- यज्ञो3(ओ)ऽस्माकं- पशवोऽस्माकं- प्रजा^

अस्माकँ- वीरा^ अस्माकम्। तस्मा.दमु. न्निर्भजामो-ऽमु.मामुष्यायण.

ममुष्या॑ः पुत्र.मसौ यः। स^ राज्ञो वरुणस्य पाशा.न्मा मो॑चि। तस्येदँ वर्च.

स्तेज॑ः प्राण. मायु.र्निवे॑ष्टया-मीद. मे॑न. मधराञ्चं पादयामि।। 26।।

卐 जित.मस्माक- मुद्भिन्न. मस्माक-मृत. मस्माक-न्तेजो.ऽस्माकं-

ब्रह्माऽस्माकं- स्व.रस्माकँ- यज्ञो3(ओ)ऽस्माकं- पशवोऽस्माकं- प्रजा^

अस्माकँ- वीरा^ अस्माकम्।

卐तस्मा.दमु. न्निर्भजामो-ऽमु.मामुष्यायण. ममुष्या॑ः पुत्र.मसौ यः।

卐 स^ मृत्यो॑ः पड्वीशा.त्पाशा.न्मा मो॑चि।

卐तस्येदँ वर्च. स्तेज॑ः प्राण. मायु.र्निवे॑ष्टया-मीद. मे॑न. मधराञ्चं

पादयामि।। 27।।-

16-02-05

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 जित.मस्माक- मुद्भिन्न. मस्माक- मभ्यष्ठाँ विश्वाः पृतना^ अरातीः।।
1।।

卐 तदग्नि.राह- तदु सोम^ आह- पूषा मा धा.त्सुकृतस्य लोके।। 2।।

卐 अगन्म स्व1(अ) स्व.रगन्म- सं सूर्यस्य ज्योतिषाऽगन्म।। 3।।

卐 वस्योभूयाय वसुमा.न्यज्ञो वसु वंसिषीय- वसुमा.न्भूयासँ वसु- मयि धेहि।। 4।।

## ॐसप्तदशं काण्डम्

### सप्तदश काण्डे प्रथमोऽनुवाकः

17-01-01

卐 विषासहिं सहमानं सासहानं सहीयांसम्। सहमानं सहोजितं स्वर्जित.ङ्गोजितं सन्धनाजितम्। ईड्य.न्नाम ह्व इन्द्र- मायुष्मा. न्भूयासम्।।
1।।

卐 विषासहिं सहमानं सासहानं सहीयांसम्। सहमानं सहोजितं स्वर्जित.ङ्गोजितं सन्धनाजितम्। ईड्य.न्नाम ह्व इन्द्रं- प्रियो देवानां भूयासम्।। 2।।

卐 विषासहिं सहमानं सासहानं सहीयांसम्। सहमानं सहोजितं स्वर्जित.ङ्गोजितं सन्धनाजितम्। ईड्य.न्नाम ह्व इन्द्रं- प्रियः प्रजानां भूयासम्।। 3।।

卐 विषासहिं सहमानं सासहानं सहीयांसम्। सहमानं सहोजितं स्वर्जित.ङ्गोजितं सन्धनाजितम्। ईड्य.न्नाम ह्व इन्द्रं- प्रियः पशूनां भूयासम्।। 4।।

卐 विषासहिं सहमानं सासहानं सहीयांसम्। सहमानं सहोजितं स्वर्जित.ङ्गोजितं सन्धनाजितम्। ईड्य.न्नाम ह्व इन्द्रं- प्रिय. स्समानानां भूयासम्।। 5।।

卐 उदिह्युदिहि सूर्य- वर्चसा माऽभ्युदिहि। द्विषंश्च मह्यं रध्यतु- मा चाऽह. न्द्विषते रध-न्तवे.द्विष्णो~ बहुधा वीर्याणि। त्वन्नः पृणीहि पशुभि. र्विश्वरूपै- स्सुधायां मा धेहि परमे व्योमन्न्।। 6।।

卐 उदिह्युदिहि सूर्य वर्चसा माऽभ्युदिहि। यांश्च पश्यामि यांश्च न- तेषु मा सुमति.ङ्कृधि- तवे.द्विष्णो~ बहुधा वीर्याणि। त्वन्नः पृणीहि पशुभि. र्विश्वरूपै- स्सुधायां मा धेहि परमे व्योमन्न्।। 7।।

卐 मा त्वा दभ.न्त्सलिले अप्स्व1(अ)न्त-र्ये पाशिन^ उपतिष्ठ.न्त्यत्र। हित्वाऽशस्ति.न्दिव. मारुक्ष^ एतां- स^ नो मृड सुमतौ ते स्याम-तवे.द्विष्णो~ बहुधा वीर्याणि। त्वन्नः पृणीहि पशुभि. र्विश्वरूपै- स्सुधायां मा धेहि परमे व्योमन्न्।। 8।।

卐 त्वन्न^ इन्द्र महते सौभगाया-ऽदब्धेभिः परि पाह्यक्तुभि- स्तवे.द्विष्णो~ बहुधा वीर्याणि। त्वन्नः पृणीहि पशुभि. र्विश्वरूपै- स्सुधायां मा धेहि परमे व्योमन्न्।। 9।।

卐 त्वन्न^ इन्द्रोतिभि- श्शिवाभि. श्शन्तमो भव। आरोहं.स्त्रिदिव. न्दिवो गृणान. स्सोमपीतये- प्रियधामा स्वस्तये- तवे.द्विष्णो~ बहुधा वीर्याणि। त्वन्नः पृणीहि पशुभि. र्विश्वरूपै- स्सुधायां मा धेहि परमे व्योमन्न्।। 10।।

卐 त्वमिन्द्रासि विश्वजि-त्सर्ववि.त्पुरुहूत. स्त्वमिन्द्र। त्वमिन्द्रेमं सुहवं स्तोम. मेरयस्व- स^ नो मृड सुमतौ ते स्याम- तवे.द्विष्णो~ बहुधा वीर्याणि। त्वन्नः पृणीहि पशुभि.र्विश्वरूपै- स्सुधायां मा धेहि परमे व्योमन्न्।। 11।।

卐 अदब्धो दिवि पृथिव्या. मुतासि- न त आपु.र्महिमान. मन्तरिक्षे। अदब्धेन ब्रह्मणा वावृधान- स्स^ त्वन्न^ इन्द्र दिविष-न्छर्म यच्छ-

तवे.द्विष्णो~ बहुधा वीर्याणि। त्वन्नः पृणीहि पशुभि.र्विश्वरूपै- स्सुधायां मा धेहि परमे व्योमन्न्।। 12।।

卐 या त इन्द्र तनू. रप्सु- या पृथिव्यां याऽन्त.रग्नौ- या त इन्द्र पवमाने स्वर्विदि। ययेन्द्र तन्वा3(आ)ऽन्तरिक्षँ व्यापिथ- तया न^ इन्द्र तन्वा3(आ) शर्म यच्छ- तवे.द्विष्णो~ बहुधा वीर्याणि। त्वन्नः पृणीहि पशुभि.र्विश्वरूपै- स्सुधायां मा धेहि परमे व्योमन्न्। 3।।

卐 त्वा.मिन्द्र ब्रह्मणा वर्धयन्त-स्सत्त्र. न्निषेदुर् ऋषयो नाधमाना-स्तवे.द्विष्णो~ बहुधा वीर्याणि। त्वन्नः पृणीहि पशुभि.र्विश्वरूपै- स्सुधायां मा धेहि परमे व्योमन्न्।। 14।।

卐 त्वन्तृत.न्त्वं पर्येष्युत्सं- सहस्रधारँ विदथं स्वर्विद- न्तवे.द्विष्णो~ बहुधा वीर्याणि। त्वन्नः पृणीहि पशुभि.र्विश्वरूपै- स्सुधायां मा धेहि परमे व्योमन्न्।। 15।।

卐 त्वं रक्षसे प्रदिश. श्चतस्र-स्त्वं शोचिषा नभसी~ विभासि। त्वमिमा विश्वा भुवनाऽनु तिष्ठस- ऋतस्य पन्था.मन्वेषि विद्वां-स्तवे.द्विष्णो~ बहुधा वीर्याणि। त्वन्नः पृणीहि पशुभि.र्विश्वरूपै- स्सुधायां मा धेहि परमे व्योमन्न्।। 16।।

Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 पञ्चभिः परा.ङ्प.स्येकयाऽर्वा-ङशस्ति.मेषि सुदिने बाधमान-स्तवे.द्विष्णो~ बहुधा वीर्याणि। त्वन्नः पृणीहि पशुभि.र्विश्वरूपै-स्सुधायां मा धेहि परमे व्योमन्न्।। 17।।

卐 त्वमिन्द्र.स्त्वं महेन्द्र-स्त्वं लोक.स्त्वं प्रजापतिः। तुभ्यँ यज्ञो वि तायते-तुभ्य.ञ्जुह्वति जुह्वत- स्तवे.द्विष्णो~ बहुधा वीर्याणि। त्वन्नः पृणीहि पशुभि.र्विश्वरूपै- स्सुधायां मा धेहि परमे व्योमन्न्।। 18।।

卐 असति स.त्प्रतिष्ठितं- सति भूतं प्रतिष्ठितम्। भूतं ह भव्य आहितं- भव्यं भूते प्रतिष्ठित-न्तवे.द्विष्णो~ बहुधा वीर्याणि। त्वन्नः पृणीहि पशुभि.र्विश्वरूपै- स्सुधायां मा धेहि परमे व्योमन्न्।। 19।।

卐 शुक्रोऽसि भ्राजोऽसि। स^ यथा त्वं भ्राजता भ्राजोऽ-स्येवाऽहं भ्राजता भ्राज्यासम्।। 20।।

卐 रुचि.रसि रोचोऽसि। स^ यथा त्वं रुच्या रोचो-ऽस्येवाऽहं पशुभिश्च ब्राह्मणवर्चसेन च रुचिषीय।। 21।।

卐 उद्यते नम^ उदायते नम^ उदिताय नमः। विराजे नम. स्स्वराजे नम. स्सम्राजे नमः।। 22।।

卐 अस्तँयते नमोऽस्त.मेष्यते नमोऽस्त.मिताय नमः। विराजे नम. स्स्वराजे नम. स्सम्राजे नमः।। 23।।

卐 उदगा. दय. मादित्यो- विश्वेन तपसा सह। सपत्ना. न्मह्यं रन्धय-न्मा चाऽह. न्द्विषते रध-न्तवे.द्विष्णो~ बहुधा वीर्याणि। त्वन्नः पृणीहि पशुभि. र्विश्वरूपै- स्सुधायां मा धेहि परमे व्योमन्न्।। 24।।

卐 आदित्य नाव. माऽरुक्ष- श्शतारित्रां स्वस्तये। अह मांऽत्यपीपरो- रात्रिं सत्राऽति पारय।। 25।।

卐 सूर्य नाव. माऽरुक्ष- श्शतारित्रां स्वस्तये। रात्रिं माऽत्यपीपरो-ऽह. स्सत्राऽति पारय।। 26।।

卐 प्रजापते. रावृतो- ब्रह्मणा वर्मणाऽह-ङ्कश्यपस्य ज्योतिषा वर्चसा च। जरदष्टिः कृतवीर्यो विहाया- स्सहस्राऽऽयु. स्सुकृत. श्चरेयम्।। 27।।

卐 परीवृतो ब्रह्मणा वर्मणाऽह-ङ्कश्यपस्य ज्योतिषा वर्चसा च। मा मा प्राप.न्निषवो दैव्या^ या- मा मानुषी. रवसृष्टा^ वधाय।। 28।।

卐 ऋतेन गुप्त^ ऋतुभिश्च सर्वै- र्भूतेन गुप्तो भव्येन चाऽहम्। मा मा प्राप. त्पाप्मा मोत मृत्यु- रन्त. र्दधेऽहं सलिलेन वाचः।। 29।।

卐 अ॒ग्नि.र्मा॑ गो॒प्ता परि॑ पातु वि॒श्वत॑ऽ- उ॒द्य.न्त्सूर्यो॑ नुदतां मृत्युपा॒शान्। व्यु॒च्छन्ती॑. रु॒षस॒ः पर्व॑ता ध्रु॒वा- स्स॒हस्रं॑ प्रा॒णाऽ मय्या य॑तन्ताम्।। 30।।-

## ॐअष्टादशं काण्डम्

### ॐ अष्टादश काण्डे प्रथमोऽनुवाकः

18-01-01

卐 ओ चि॒.त्सखा॑यं स॒ख्या व॑वृत्या-न्ति॒रः पु॒रू चि॒.दर्ण॒व.ञ्ज॑ग॒न्वान्। पि॒तु. र्नपा॑त.मा द॑धीत वे॒धाऽ- अधि॒ क्षमि॑ प्रत॒र. न्दीध्या॑नः।। 1।।

卐 न ते॒ सखा॑ स॒ख्यँ व॑ष्ट्येत-त्सल॑क्ष्मा यद्विषु॑रू॒पा भवा॑ति। म॒ह.स्पु॒त्रासो॒ अ॑सुरस्य वी॒राऽ- दि॒वो ध॒र्ता॑रऽ उर्वि॑या परि॑ ख्यन्न्।। 2।।

卐 उ॒शन्ति॑ घा॒ ते अ॒मृता॑सऽ ए॒त-देक॑स्य चि॒.त्त्यजसं॒ मर्त्य॑स्य। नि ते॒ मनो॒ म॑नसि धाय्य॒स्मे~- जन्यु॒ः पति॑. स्त॒न्व1(अ॒)मा वि॑विश्याः।। 3।।

卐 न य.त्पु॒रा च॑कृ॒मा क॑द्ध नू॒न-मृ॒तँ व॑द॒न्तो॒ अ॑नृतं रपेम। ग॒न्ध॒र्वो अ॒प्स्वप्या॑ च॒ यो॒षा- सा नौ॒ नाभि॒ः प॒रम.ञ्जा॒मि तन्नौ॑।। 4।।

卐 गर्भे॒ नु नौ॑ ज॒निता दम्प॑ती~ क-र्दे॒वस्त्वष्टा॑ सवि॒ता वि॒श्वरू॑पः। नकि॑.रस्य॒ प्र मि॑नन्ति व्र॒ता॒नि- वेद॑ ना॒वस्य पृ॑थि॒वी उ॒त द्यौः।। 5।।

卐 को अद्य युङ्क्ते धुरि गा^ ऋतस्य- शिमीवतो भामिनो दुर्हृणायून्।
आसन्निषू.न्हृत्स्वसो मयोभू-न्य^ एषां भृत्या.मृणध.त्स^ जीवात्।। 6।।
卐 को अस्य वेद प्रथमस्याऽह्नः- क^ ई.न्ददर्श क^ इह प्र वोचत्।
बृह.न्मित्रस्य वरुणस्य धाम- कदु ब्रव^ आहनो वीच्या नृन्।। 7।।
卐 यमस्य मा यम्य1(अ)ङ्काम^ आग-न्त्समाने योनौ सहशेय्याय। जायेव
पत्ये तन्वं रिरिच्याँ- वि चि.द्वृहेव रथ्येव चक्रा।। 8।।
卐 न तिष्ठन्ति न नि मिष.न्त्येते- देवानां स्पश^ इह ये चरन्ति। अन्येन
मदाहनो याहि तूय- न्तेन वि वृह रथ्येव चक्रा।। 9।।
卐 रात्रीभि.रस्मा अहभि. र्दशस्ये-त्सूर्यस्य चक्षु.र्मुहु.रुन्मिमीयात्। दिवा
पृथिव्या मिथुना सबन्धू~- यमी. र्यमस्य विवृहा.दजामि।। 10।।
卐आ घा ता गच्छा.नुत्तरा युगानि- यत्र जामयः कृणव. न्नजामि। उप
बर्बृहि वृषभाय बाहु- मन्य.मिच्छस्व सुभगे पतिं मत्।। 11।।
卐 किं भ्राताऽस. द्यदनाथं भवाति- किमु स्वसा य.न्निर्ऋति. र्निगच्छात्।
काममूता बह्वे3(ए)त.द्रपामि- तन्वा मे तन्व1(अं) सं पिपृग्धि।। 12।।
卐 न ते नाथँ यम्यत्राऽह.मस्मि- न ते तनू. न्तन्वा3(आ) सं पपृच्याम्।
अन्येन म.त्प्रमुदः कल्पयस्व- न ते भ्राता सुभगे वष्ट्येतत्।। 13।।

卐 न वा उ ते तनू. न्तन्वा3(आ) सं पपृच्च्यां- पाप. माहु.र्य. स्स्वसार.
न्निगच्छात्। असँय.देत.न्मनसो हृदो मे- भ्राता स्वसु. श्शयने यच्छयीय।।
14।।

卐 बतो बतासि यम नैव ते मनो- हृदय.ञ्चाविदाम। अन्या किल त्वां कक्ष्येव
युक्तं- परिष्वजातै लिबुजेव वृक्षम्।। 15।।

卐 अन्य.मू षु यम्यन्य^ उ त्वां- परिष्वजातै लिबुजेव वृक्षम्। तस्य वा त्वं
मन^ इच्छा स^ वा तवा-ऽधा कृणुष्व सँविदं सुभद्राम्।। 16।।

卐 त्रीणि च्छन्दांसि कवयो वि येतिरे- पुरुरूप. न्दर्शतँ विश्वचक्षणम्।
आपो वाता^ ओषधय. स्ता-न्येकस्मि.न्भुवन आऽर्पितानि।। 17।।

卐 वृषा वृष्णे दुदुहे दोहसा दिवः- पयांसि यह्वो अदिते. रदाभ्यः। विश्वं स^
वेद वरुणो यथा धिया- स^ यज्ञियो यजति यज्ञियाॅ ऋतून्।। 18।।

卐 रपद्गन्धर्वी. रप्या च योषणा- नदस्य नादे परि पातु नो मनः। इष्टस्य
मध्ये अदिति.र्नि धातु नो- भ्राता नो ज्येष्ठः प्रथमो वि वोचति।। 19।।

卐 सो चि.न्नु भद्रा क्षुमती यशस्व-त्युषा^ उवास मनवे स्वर्वती। यदी.
मुशन्त. मुशता. मनु क्रतु- मग्निं होतारँ विदथाय जीजनन्।। 20।।

卐 अध त्य.न्द्रप्सँ विभ्वँ विचक्षणँ- विराभर. दिषिर. श्श्येनो अध्वरे। यदी विशो वृणते दस्म.मार्या^- अग्निं होतार. मध धी.रजायत।। 21।।

卐 सदाऽसि रण्वो यवसेव पुष्यते- होत्राभि.रग्ने मनुष. स्स्वध्वरः। विप्रस्य वा यच्छशमान^ उक्थ्यो3(ओ)- वाजं ससवा॰ उपयासि भूरिभिः।। 22।।

卐 उदीरय पितरा जार^ आ भग- मियक्षति हर्यतो हृत्त^ इष्यति। विवक्ति वह्नि. स्स्वपस्यते मख- स्तविष्यते असुरो वेपते मती।। 23।।

卐 यस्ते अग्ने सुमतिं मर्तो अख्य-त्सहस. स्सूनो अति स^ प्र शृण्वे। इष. न्दधानो वहमानो अश्वै- रा स^ द्युमा॰ अमवा. न्भूषति द्यून्।। 24।।

卐 श्रुधी नो अग्ने सदने सधस्थे- युक्ष्वा रथ. ममृतस्य द्रवित्नुम्। आ नो वह रोदसी~ देवपुत्रे~- माकि. र्देवाना. मप भू.रिह स्याः।। 25।।

卐 यदग्न एषा समिति. र्भवाति- देवी देवेषु यजता यजत्र। रत्ना च यद्विभजासि स्वधावो- भाग.न्नो अत्र वसुमन्तँ वीतात्।। 26।।

卐 अन्वग्नि. रुषसा. मग्र. मख्य- दन्वहानि प्रथमो जातवेदाः। अनु सूर्य^ उषसो अनु रश्मी- ननु द्यावापृथिवी~ आ विवेश।। 27।।

卐 प्रत्यग्नि. रुषसा. मग्र. मख्य-त्र्रत्यहानि प्रथमो जातवेदाः। प्रति सूर्यस्य पुरुधा च रश्मी-न्प्रति द्यावापृथिवी~ आ ततान।। 28।।

卐 द्यावा ह क्षामा प्रथमे ऋतेना-ऽभिश्रावे भवत. स्सत्यवाचा। देवो यन्मर्ता. न्यजथाय कृण्व'2'-न्त्सीद.द्धोता प्रत्य'2'ङ्क्स्व.मसुँ यन्न्।। 29।।

卐 देवो देवा. न्परिभूर् ऋतेन- वहा नो हव्यं प्रथम. श्चिकित्वान्। धूमकेतु. स्समिधा भाॠजीको- मन्द्रो होता नित्यो वाचा यजीयान्।। 30।।

卐 अर्चामि वाँ वर्धायाऽऽपो घृतस्नू~- द्यावाभूमी~ शृणुतं रोदसी~ मे। अहा यद्देवा^ असुनीति माय- न्मध्वा नो अत्र पितरा शिशीताम्।। 31।।

卐 स्वावृ.ग्देवस्याऽमृतँ यदी गो-रतो जातासो धारयन्त^ उर्वी। विश्वे देवा^ अनु तत्ते यजु.र्गु- र्दुहे यदेनी दिव्यं घृतँ वाः।। 32।।

卐 किं स्वि.न्नो राजा जगृहे कदस्या-ऽति व्रत.श्चकृमा को वि वेद। मित्र.श्चिद्धि ष्मा जुहुराणो देवा-न्छ्लोको न याता. मपि वाजो अस्ति।। 33।।

卐 दुर्मन्त्वत्राऽमृतस्य नाम- सलक्ष्मा यद्विषुरूपा भवाति। यमस्य यो मनवते सुम-न्त्वग्ने तमृष्व पा.ह्यप्रयुच्छन्न्।। 34।।

卐 यस्मि.न्देवा^ विदथे मादयन्ते- विवस्वत. स्सदने धारयन्ते। सूर्ये ज्योति. रदधु. र्मास्य1(अ)क्तू-न्परि द्योतनि.ञ्चरतो अजस्रा।। 35।।

卐 यस्मि.न्देवा^ मन्मनि सञ्चर-न्त्यपीच्ये3(ए) न वय.मस्य विद्म। मित्रो नो अत्राऽदिति. रनागा-न्त्सविता देवो वरुणाय वोचत्।। 36।।

卐 सखाय^ आशिषामहे- ब्रह्मेन्द्राय वज्रिणे। स्तुष ऊ षु नृतमाय धृष्णवे।। 37।।

卐 शवसा ह्यसि श्रुतो- वृत्रहत्येन वृत्रहा। मघै. र्मघोनो- अति शूर दाशसि।। 38।।

卐 स्तेगो न क्षा.मत्येषि पृथिवीं- मही नो वाता^ इह वान्तु भूमौ। मित्रो नो अत्र वरुणो युज्यमानो- अग्नि.र्वने न व्यसृष्ट शोकम्।। 39।।

卐 स्तुहि श्रुतं गर्तसद.ञ्जनानां- राजानं भीम. मुपहत्नु. मुग्रम्। मृडा जरित्रे रुद्र स्तवानो- अन्य.मस्म.त्ते नि वपन्तु सेन्यम्।। 40।।

卐 सरस्वती. न्देवयन्तो हवन्ते- सरस्वती मध्वरे तायमाने। सरस्वतीं सुकृतो हवन्ते- सरस्वती दाशुषे वार्य.न्दात्।। 41।।

卐 सरस्वतीं पितरो हवन्ते- दक्षिणा यज्ञ. मभिनक्षमाणाः। आसद्याऽस्मि.न्बर्हिषि मादयध्व- मनमीवा^ इष^ आ धेह्यस्मे।। 42।।

卐 सरस्वति या सरथँ यया.थोक्थै- स्स्वधाभि.र्दैवि पितृभि.र्मदन्ती।
सहस्त्रार्घ. मिडो अत्र भागं- राय.स्पोषँ यजमानाय धेहि।। 43।।
卐 उदीरता. मवर उत्परास^- उन्मध्यमाꣳ पितर. स्सोम्यासः। असुँ य
ईयु. रवृका^ ऋतज्ञा-स्ते नोऽवन्तु पितरो हवेषु।। 44।।
卐 आऽहं पितृ.न्त्सुविदत्राꣳ अवित्सि- नपातञ्च विक्रमणञ्च विष्णोः।
बर्हिषदो ये स्वधया सुतस्य- भजन्त पित्व.स्त इहाऽऽगमिष्ठाः।। 45।।
卐 इदं पितृभ्यो नमो अस्त्वद्य- ये पूर्वासो ये अपरास^ ईयुः। ये पार्थिवे
रजस्या निषत्ता^- ये वा नूनं सुवृजनासु दिक्षु।। 46।।
卐 मातली कव्यै. र्यमो अङ्गिरोभि- र्बृहस्पतिर् ऋक्वभि. र्वावृधानः। यांश्च
देवा^ वावृधु.र्यें च देवां-स्ते नोऽवन्तु पितरो हवेषु।। 47।।
卐 स्वादु.ष्किलायं मधुमाꣳ उताऽय-न्तीव्रꣳ किलाऽयं रसवाꣳ उताऽयम्।
उतो न्व1(अ)स्य पपिवांस. मिन्द्र-न्न कश्चन सहत आहवेषु।। 48।।
卐 परेयिवांसं प्रवतो मही.रिति- बहुभ्यꣳ पन्था. मनुपस्पशानम्। वैवस्वतं
सङ्गमन.ञ्जनानाँ- यमं राजानं हविषा सपर्यत।। 49।।
卐 यमो नो गातुं प्रथमो विवेद- नैषा गव्यूति. रपभर्तवा उ। यत्रा नꣳ पूर्वे
पितरꣳ परेता -एना^ जज्ञानाꣳ पथ्या3 (आ) अनु स्वाः।। 50।।

卐 बर्हिषदः पितर ऊत्य1(अ)र्वा- गिमा वो हव्या चकृमा जुषध्वम्। त आ गताऽवसा शन्तमेना-ऽधा नः शयो. ररपो दधात।। 51।।

卐 आच्या जानु दक्षिणतो निष-द्येद.न्नो हवि. रभि गृणन्तु विश्वे। मा हिंसिष्ट पितरः केन चि.न्नो- यद्व आगः पुरुषता कराम।। 52।।

卐 त्वष्टा दुहित्रे वहतु.ङ्कृणोति- तेनेदं विश्वं भुवनं समेति। यमस्य माता पर्युह्यमाना- महो जाया विवस्वतो ननाश।। 53।।

卐 प्रेहि प्रेहि पथिभिः पूर्याणै- र्येना ते पूर्वे पितरः परेताः। उभा राजानौ स्वधया मदन्तौ- यमं पश्यासि वरुणञ्च देवम्।। 54।।

卐 अपेत वीत वि च सर्पताऽतो-ऽस्मा एतं पितरो लोक.मक्रन्न्। अहोभि. रद्भि. रक्तुभि. र्व्यक्तं- यमो ददा.त्यवसान.मस्मै।। 55।।

卐 उशन्त.स्त्वेधीम-ह्युशन्त. स्समिधीमहि। उश.न्नुशत आ वह- पितॄन् हविषे अत्तवे।। 56।।

卐 द्युमन्त.स्त्वेधीमहि- द्युमन्त. स्समिधीमहि। द्युमा. न्द्युमत आ वह- पितॄन् हविषे अत्तवे।। 57।।

卐 अङ्गिरसो नः पितरो नवग्वा- अथर्वाणो भृगव. स्सोम्यासः। तेषाँ वयं सुमतौ यज्ञियाना- मपि भद्रे सौमनसे स्याम।। 58।।

卐 अङ्गिरोभि. र्यज्ञियै. रागहीह- यम वैरूपै. रिह मादयस्व। विवस्वन्तं हुवे

यः पिता ते-ऽस्मि.न्बर्हि.ष्या निषद्य।। 59।।

卐 इमँ यम प्रस्तर. मा हि रोहा-ऽङ्गिरोभिः पितृभि. स्सँविदानः। आ त्वा

मन्त्राः कविशस्ता^ वह-न्त्वेना राज.न्हविषो मादयस्व।। 60।।

卐 इत^ एत^ उदारुह- न्दिव.स्पृष्ठा न्यारुहन्न्। प्र भूर्जयो यथा पथा-

द्या.मङ्गिरसो ययुः।। 61।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

## ॐ अष्टादश काण्डे द्वितीयोऽनुवाकः

18-02-01

卐 यमाय सोमः पवते- यमाय क्रियते हविः। यमं ह यज्ञो गच्छ-त्यग्निदूतो अरङ्कृतः।। 1।।

卐 यमाय मधुमत्तमं- जुहोता प्र च तिष्ठत। इद.न्नम ऋषिभ्यः पूर्वजेभ्यः- पूर्वेभ्यः पथिकृद्भ्यः।। 2।।

卐 यमाय घृतव.त्पयो- राज्ञे हवि.र्जुहोतन। स नो जीवे.ष्वा यमे- दीर्घ.मायुः प्र जीवसे।। 3।।

卐 मैन.मग्ने वि दहो माऽभि शूशुचो- माऽस्य त्वच.ञ्चिक्षिपो मा शरीरम्। शृतँ यदा करसि जातवेदो-ऽथे.मेनं प्र हिणुता.त्पितृॅ रुप।। 4।।

卐 यदा शृत.ङ्कृणवो जातवे.दो-ऽथेम.मेनं परि दत्ता.त्पितृभ्यः। यदो गच्छा.त्यसुनीति. मेता- मथ देवानाँ वशनी.र्भवाति।। 5।।

卐 त्रिकद्रुकेभिः पवते- षडुर्वी रेक.मिद्बृहत्। त्रिष्टु.ब्गायत्री छन्दांसि- सर्वा ता यम आऽर्पिता।। 6।।

卐 सूर्य.ञ्चक्षुषा गच्छ वात.मात्मना- दिवञ्च गच्छ पृथिवी.ञ्च धर्मभिः। अपो वा गच्छ यदि तत्र ते हित- मोषधीषु प्रति तिष्ठा शरीरैः।। 7।।

卐 अजो भाग. स्तपस.स्त न्तपस्व- तन्ते शोचि. स्तपतु तन्ते अर्चिः।
यास्ते शिवा. स्तन्वो जातवेद- स्ताभि.र्वहैनं सुकृता.मु लोकम्।। 8।।

卐 यास्ते शोचयो रंहयो जातवेदो- याभि रापृणासि दिव. मन्तरिक्षम्। अजँ
यन्त. मनु ता.स्समृण्वता-मथेतराभि. श्शिवतमाभि. श्शृत.ङ्कृधि।। 9।।

卐 अव सृज पुन.रग्ने पितृभ्यो- यस्त आहुत. श्चरति स्वधावान्। आयु.
र्वसान^ उप यातु शेष- स्सङ्गच्छता. न्तन्वा सुवर्चाः।। 10।।

卐 अति द्रव श्वानौ सारमेयौ- चतुरक्षौ शबलौ साधुना पथा। अधा
पितृ.न्त्सुविदत्रा॒ अपीहि- यमेन ये सधमादं मदन्ति।। 11।।

卐 यौ ते श्वानौ यमरक्षितारौ- चतुरक्षौ पथिषदी~ नृचक्षसा। ताभ्यां
राज.न्परि धेह्येनं- स्वस्त्यस्मा अनमीवञ्च धेहि।। 12।।

卐 उरूणसा. वसुतृपा. वुदुम्बलौ- यमस्य दूतौ चरतो जना॒ अनु।
ता.वस्मभ्य. न्दृशये सूर्याय- पुन.र्दाता. मसुम.द्येह भद्रम्।। 13।।

卐 सोम^ एकेभ्यः पवते- घृत. मेक उपाऽऽसते। येभ्यो मधु प्रधावति-
तांश्चि.देवाऽपि गच्छतात्।। 14।।

卐 ये चि.त्पूर्व ऋतसाता^- ऋतजाता^ ऋतावृधः। ऋषी. न्तपस्वतो यम-
तपोजा॒ अपि गच्छतात्।।

卐 तपसा ये अनाधृष्या- स्तपसा ये स्व.र्ययुः। तपो ये चक्रिरे मह-

स्तां.श्चि.देवाऽपि गच्छतात्।। 16।।

卐 ये युध्यन्ते प्रधनेषु- शूरासो ये तनूत्यजः। ये वा सहस्रदक्षिणा-

स्तां.श्चि.देवाऽपि गच्छतात्।। 17।।

卐 सहस्रणीथाꣳ कवयो- ये गोपायन्ति सूर्यम्। ऋषी. न्तपस्वतो यम-

तपोजाꣳ अपि गच्छतात्।। 18।।

卐 स्योनाऽस्मै भव पृथि-व्यनृक्षरा निवेशनी। यच्छाऽस्मै शर्म सप्रथाः।।

卐 असम्बाधे पृथिव्या^- उरौ लोके नि धीयस्व। स्वधा या.श्चकृषे जीव-

न्ता.स्ते सन्तु मधुश्चुतः।। 20।।

卐 ह्वयामि ते मनसा मन^ इहेमा-न्गृहाꣳ उप जुजुषाण^ एहि। सङ्गच्छस्व

पितृभि. स्सँ यमेन- स्योना.स्त्वा वाता^ उप वान्तु शग्माः।। 21।।

卐 उत्त्वा वहन्तु मरुत- उदवाहा^ उदप्रुतः। अजेन कृण्वन्त. श्शीतँ-

वर्षेणोक्षन्तु बालिति।। 22।।

卐 उदह्व. मायु. रायुषे- क्रत्वे दक्षाय जीवसे। स्वा.न्गच्छतु ते मनो- अधा

पितृꣳ रुप द्रव।। 23।।

卐 मा ते मनो माऽसो-र्माऽङ्गानां मा रसस्य ते। मा ते हास्त तन्व1(अ॒)-किञ्चनेह।। 24।।

卐 मा त्वा वृक्ष. स्सम्बाधिष्ट- मा देवी पृथिवी मही। लोकं पितृषु वि.-त्त्वैधस्व यमराजसु।। 25।।

卐 यत्ते अङ्ग. मतिहितं पराचै- रपान॒ प्राणो य॑ उ वा ते परेतः। तत्ते सङ्गत्य पितर. स्सनीडा॑- घासा.द्धासं पुन.रा वेशयन्तु।। 26।।

卐 अपेम.ञ्जीवा॑ अरुध.न्गृहेभ्य- स्त.न्निर्वहत परि ग्रामा.दितः। मृत्यु. र्यमस्याऽऽसी.द्दूत॒ प्रचेता॑- असू.न्पितृभ्यो गमयाञ्चकार।। 27।।

卐 ये दस्यव॒ पितृषु प्रविष्टा॑- ज्ञातिमुखा॑ अहुताद. श्चरन्ति। परापुरो निपुरो ये भर-न्त्यग्नि.ष्टानस्मा.त्प्र धमाति यज्ञात्।।

卐 सँ विश.न्त्विह पितर. स्स्वान- स्स्योन.ङ्कृण्वन्त॒ प्रतिरन्त॑ आयुः। तेभ्य.श्शकेम हविषा नक्षमाणा॑- ज्यो.ग्जीवन्त. श्शरद॒ पुरूचीः।। 29।।

卐 या.न्तें धेनु. न्निपृणामि- यमु ते क्षीर ओदनम्। तेना जनस्याऽसो- भर्ता योऽत्राऽस.दजीवनः।। 30।।

卐 अश्वावतीं प्रतर या सुशेवा-ऽर्क्षाकँ वा प्रतर.न्नवीयः। यस्त्वा जघान वध्य. स्सो अस्तु- मा सो अन्य.द्विदत भागधेयम्।। 31।।

卐 यम॰ परोऽवरो विवस्वा. न्तत॰- पर.न्नाति पश्यामि किञ्चन। यमे अध्वरो अधि मे निविष्टो- भुवो विवस्वा. नन्वाततान।। 32।।

卐 अपागूह. न्नमृतां मर्त्येभ्य॰- कृत्वा सवर्णा. मदधु. र्विवस्वते। उताऽश्विना.वभर. द्यत्त.दासी- दजहादु द्वा मिथुना सरण्यूः।। 33।।

卐 ये निखाता^ ये परोप्ता- ये दग्धा^ ये चोद्धिताः। सर्वा.स्ता.नग्न आ वह- पितॄन् हविषे अत्तवे।। 34।।

卐 ये अग्निदग्धा^ ये अनग्निदग्धा^- मध्ये दिव. स्स्वधया मादयन्ते। त्व.न्तान् वेत्थ यदि ते जातवेद- स्स्वधया यज्ञं स्वधिति.ञ्जुषन्ताम्।। 35।।

卐 श.न्तप माऽति तपो- अग्ने मा तन्व1(अ) न्तपः। वनेषु शुष्मो अस्तु ते- पृथिव्या.मस्तु यद्धरः।। 36।।

卐 ददा.म्यस्मा अवसान.मेत-द्य^ एष^ आग.न्मम चे.दभू.दिह। यम.श्चिकित्वा. न्प्रत्येत.दाह- ममैष^ राय^ उप तिष्ठता.मिह।। 37।।

卐 इमां मात्रां मिमीमहे- यथाऽपर.न्न मासातै। शते शरत्सु नो पुरा।। 38।।

卐 प्रेमां मात्रां मिमीमहे- यथाऽपर.न्न मासातै। शते शरत्सु नो पुरा।। 39।।

卐 अपेमां मात्रां मिमीमहे- यथाऽपर.न्न मासातै। शते शरत्सु नो पुरा।। 40।।

卐 वी3(ई)मां मात्रां मिमीमहे- यथाऽपर.न्न मासातै। शते शरत्सु नो पुरा।। 41।।

卐 निरिमां मात्रां मिमीमहे- यथाऽपर.न्न मासातै। शते शरत्सु नो पुरा।। 42।।

卐 उदिमां मात्रां मिमीमहे- यथाऽपर.न्न मासातै। शते शरत्सु नो पुरा।। 43।।

卐 समिमां मात्रां मिमीमहे- यथाऽपर.न्न मासातै। शते शरत्सु नो पुरा।। 44।।

卐 अमासि मात्रां स्व.रगा- मायुष्मा.न्भूयासम्। यथाऽपर.न्न मासातै- शते शरत्सु नो पुरा।। 45।।

卐 प्राणो अपानो व्यान^ आयु- श्चक्षु.र्दृशये सूर्याय। अपरिपरेण पथा- यमराज्ञ॰ पितृन्गच्छ।। 46।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 ये अग्रव. श्शशमाना॰ परेयुर्-हित्वा द्वेषां.स्यनपत्यवन्तः। ते द्या. मुदित्याऽविदन्त लोक- न्नाकस्य पृष्ठे अधि दीध्यानाः।। 47।।

卐 उदन्वती द्यौ.रवमा- पीलुमतीति मध्यमा। तृतीया ह प्रद्यौ.रिति- यस्यां पितर^ आसते।। 48।।

卐 येन पितु॰ पितरो ये पितामहा^- य आविविशु. रुर्व1(अ)न्तरिक्षम्। य आक्षियन्ति पृथिवी. मुत द्यां- तेभ्य॰ पितृभ्यो नमसा विधेम।। 49।।

卐 इद.मिद्वा उ नाऽपर- न्दिवि पश्यसि सूर्यम्। माता पुत्रँ यथा सिचा- ऽभ्येनं भूम ऊर्णुहि।। 50।।

卐 इद.मिद्वा उ नाऽपर-ञ्जरस्यन्य.दितोऽपरम्। जाया पति.मिव वाससा- ऽभ्येनं भूम ऊर्णुहि।। 51।।

卐 अभि त्वोर्णोमि पृथिव्या^- मातु.र्वस्त्रेण भद्रया। जीवेषु भद्र. न्तन्मयि- स्वधा पितृषु सा त्वयि।। 52।।

卐 अग्नीषोमा पथिकृता स्योन- न्देवेभ्यो रत्न. न्दधथु. र्वि लोकम्। उप प्रेष्यन्तं पूषणँ यो वहा-त्यञ्जोयानै॰ पथिभि. स्तत्र गच्छतम्।। 53।।

卐 पूषा त्वेत.श्च्यावयतु प्र विद्वा- ननष्टपशु. र्भुवनस्य गोपाः। स^ त्वैतेभ्य॰ परि दद.त्पितृभ्यो-ऽग्नि.र्देवेभ्य. स्सुविदत्रियेभ्यः।। 54।।

卐 आयु.र्विश्वाऽऽयुः॰ परि पातु त्वा- पूषा त्वा पातु प्रपथे पुरस्तात्।

यत्राऽऽसते सुकृतो यत्र त ईयु- स्तत्र त्वा देव. स्सविता दधातु।। 55।।

卐 इमौ युनज्मि ते वह्नी~- असुनीताय वोढवे। ताभ्याँ यमस्य सादनं-

समिति.श्चाऽव गच्छतात्।। 56।।

卐 एतत्त्वा वासः॰ प्रथम. न्वाग- न्नपैतदूह यदिहाऽबिभः॰ पुरा।

इष्टापूर्त.मनुसङ्क्राम विद्वा-न्यत्र ते दत्तं बहुधा विबन्धुषु।। 57।।

卐 अग्ने.र्वर्म परि गोभि.र्व्ययस्व- सं प्रोर्णुष्व मेदसा पीवसा च। नेत्त्वा

धृष्णु.र्हरसा जर्हृषाणो- दधृ.ग्विधक्ष. न्परीङ्खयातै।। 58।।

卐 दण्डं हस्ता. दाददानो गतासो- स्सह श्रोत्रेण वर्चसा बलेन। अत्रैव

त्वमिह वयं सुवीरा^- विश्वा^ मृधो अभिमाती. र्जयेम।। 59।।

卐 धनुर्.हस्ता. दाददानो मृतस्य- सह क्षत्रेण वर्चसा बलेन। समागृभाय

वसु भूरि पुष्ट- मर्वा.ङ्त्वमे.ह्युप जीवलोकम्।। 60।।

## अष्टादश काण्डे तृतीयोऽनुवाकः

18-03-01

卐 इय. न्नारी पतिलोकँ वृणाना- नि पद्यत उप त्वा मर्त्य प्रेतम्। धर्मं पुराण.

मनुपालयन्ती- तस्यै प्रजा. न्द्रविण.ञ्चेह धेहि।। 1।।

卐 उदीर्ष्व नार्यभि जीवलोक-ङ्गतासु. मेत.मुप शेष एहि। हस्तग्राभस्य दधिषो. स्तवेदं- पत्यु. र्जनित्व.मभि सं बभूथ।। 2।।

卐 अपश्यँ युवति. न्नीयमाना-ञ्जीवां मृतेभ्यः परिणीयमानाम्। अन्धेन य.त्तमसा प्रावृताऽऽसी- त्प्राक्तो अपाची. मनय. न्तदेनाम्।। 3।।

卐 प्रजान.त्यघ्न्ये जीवलोक- न्देवानां पन्था. मनुसञ्चरन्ती। अय.न्ते गोपति. स्त.ञ्जुषस्व- स्वर्गँ लोक.मधि रोहयैनम्।। 4।।

卐 उप द्या.मुप वेतस- मवत्तरो नदीनाम्। अग्ने पित्त. मपा.मसि।। 5।।

卐 यन्त्व.मग्ने समदह- स्तमु निर्वापया पुनः। क्याम्बू.रत्र रोहतु- शाण्डदूर्वा व्यल्कशा।। 6।।

卐 इद.न्त एकं पुर ऊ त एकं- न्तृतीयेन ज्योतिषा सँ विशस्व। सँवेशने तन्वा3(आ)चारु.रेधि- प्रियो देवानां परमे सधस्थे।। 7।।

卐 उत्तिष्ठ प्रेहि प्र द्रवौकः- कृणुष्व सलिले सधस्थे। तत्र त्वं पितृभि. स्सँविदान- स्सं सोमेन मदस्व सं स्वधाभिः।। 8।।

卐 प्र च्यवस्व तन्व(अं) सम्भरस्व- मा ते गात्रा वि हायि मो~ शरीरम्। मनो निविष्ट. मनुसँविशस्व- यत्र भूमे. र्जुषसे तत्र गच्छ।। 9।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore SGS

卐 वर्चसा मां पितर. स्सोम्यासो- अञ्जन्तु देवा^ मधुना घृतेन। चक्षुषे मा प्रतर. न्तारयन्तो- जरसे मा जरदष्टिं वर्धन्तु।। 10।।

卐 वर्चसा मां समन.क्त्वग्नि- र्मेधां मे विष्णु.र्न्यन.क्त्वासन्न्। रयिं मे विश्वे नि यच्छन्तु देवा- स्स्योना. माऽऽपः पवनैः पुनन्तु।। 11।।

卐 मित्रावरुणा परि मा.मधाता- मादित्या^ मा स्वरवो वर्धयन्तु। वर्चो म इन्द्रो न्यनक्तु हस्तयो- र्जरदष्टिं मा सविता कृणोतु।। 12।।

卐 यो ममार प्रथमो मर्त्यानाँ- यः प्रेयाय प्रथमो लोक. मेतम्। वैवस्वतं सङ्गमन.ञ्जनानाँ- यमं राजानं हविषा सपर्यत।। 13।।

卐 परा यात पितर^ आ च याता-ऽयँ वो यज्ञो मधुना समक्तः। दत्तो अस्मभ्य. न्द्रविणेह भद्रं- रयिञ्च न.स्सर्ववीर. न्दधात।। 14।।

卐 कण्वः कक्षीवा. न्पुरुमीढो अगस्त्य- श्श्यावाश्व स्सोभ.र्यर्चनानाः। विश्वामित्रोऽय.ञ्जमदग्नि-रत्रि. रवन्तु नः कश्यपो वामदेवः।। 15।।

卐 विश्वामित्र जमदग्ने वसिष्ठ- भरद्वाज गोतम वामदेव। शर्दिर्नो अत्रि. रग्रभी. न्नमोभि- स्सुसंशासः पितरो मृडता नः।। 16।।

卐 कस्येमृजाना^ अति यन्ति रिप्र- मायु. र्दधानाः प्रतर. न्नवीयः। आप्यायमानाः प्रजया धनेना-ऽध.स्याम सुरभयो गृहेषु।। 17।।

卐 अञ्जते व्यञ्जते समञ्जते- क्रतुं रिहन्ति मधुनाऽभ्यञ्जते। सिन्धो.रुच्छ्वासे पतयन्त.मुक्षणं- हिरण्यपावाः पशु.मासु गृह्णते।। 18।।

卐 यद्वो मुद्रं पितर. स्सोम्यञ्च- तेनो~ सचध्वं स्वयशसो हि भूत। ते अर्वाणः कवय^ आ शृणोत- सुविदत्रा विदथे हूयमानाः।। 19।।

卐 ये अत्रयो अङ्गिरसो नवग्वा^- इष्टावन्तो रातिषाचो दधानाः। दक्षिणावन्त. स्सुकृतो य उ स्था-ऽऽसद्याऽस्मि.न्बर्हिषि मादयध्वम्।। 20।।-

卐 अधा यथा नः पितरः परासः- प्रत्नासो अग्न ऋत. माशशानाः। शुचीदय. न्दीध्यत^ उक्थशासः ~- क्षामा भिन्दन्तो अरुणी. रप व्रन्न्।। 21।।

卐 सुकर्माण. स्सुरुचो देवयन्तो- अयो न देवा^ जनिमा धमन्तः। शुचन्तो अग्निँ वावृधन्त इन्द्र-मुर्वी.ङ्गव्यां परिषद.न्नो अक्रन्न्।। 22।।

卐 आ यूथेव क्षुमति पश्वो अख्य-द्देवाना.ञ्जनिमा.न्त्युग्रः। मर्तास.श्चि.दुर्वशी रकृप्र- न्वृधे चिदर्य^ उपरस्याऽऽयोः।। 23।।

卐 अकर्म ते स्वपसो अभूम- ऋत. मवस्र.न्नुषसो विभातीः। विश्व. न्तद्भद्रँ यदवन्ति देवा^- बृह.द्वदेम विदथे सुवीराः।। 24।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 इन्द्रो मा मरुत्वा-न्प्राच्या^ दिशः पातु- बाहुच्युता पृथिवी द्या.मिवोपरि। लोककृतः पथिकृतो यजामहे- ये देवानां हुतभागा^ इह स्थ।। 25।।

卐 धाता मा निर्ऋत्या^- दक्षिणाया^ दिशः पातु- बाहुच्युता पृथिवी द्या.मिवोपरि। लोककृतः पथिकृतो यजामहे- ये देवानां हुतभागा^ इह स्थ।। 26।।

卐 अदिति.र्माऽदित्यैः- प्रतीच्या^ दिशः पातु- बाहुच्युता पृथिवी द्या.मिवोपरि। लोककृतः पथिकृतो यजामहे- ये देवानां हुतभागा^ इह स्थ। 27।।

卐 सोमो मा विश्वै.र्देवै- रुदीच्या^ दिशः पातु- बाहुच्युता पृथिवी द्या.मिवोपरि। लोककृतः पथिकृतो यजामहे- ये देवानां हुतभागा^ इह स्थ।। 28।।

卐 धर्ता ह त्वा धरुणो धारयाता- ऊर्ध्वं भानुं सविता द्या.मिवोपरि। लोककृतः पथिकृतो यजामहे- ये देवानां हुतभागा^ इह स्थ।। 29।।

卐 प्राच्या.न्त्वा दिशि पुरा- सँवृत. स्स्वधाया. मादधामि- बाहुच्युता पृथिवी द्या.मिवोपरि। लोककृतः पथिकृतो यजामहे- ये देवानां हुतभागा^ इह स्थ।। 30।।

Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 दक्षिणाया.न्त्वा दिशि पुरा- सँवृत. स्स्वधाया. मादधामि- बाहुच्च्युता पृथिवी द्या.मिवोपरि। लोककृतः पथिकृतो यजामहे- ये देवानां हुतभागा^ इह स्थ।। 31।।

卐 प्रतीच्च्या.न्त्वा दिशि पुरा- सँवृत. स्स्वधाया मादधामि- बाहुच्च्युता पृथिवी द्या.मिवोपरि। लोककृतः पथिकृतो यजामहे- ये देवानां हुतभागा^ इह स्थ।। 32।।

卐 उदीच्च्या.न्त्वा दिशि पुरा- सँवृत. स्स्वधाया. मादधामि- बाहुच्च्युता पृथिवी द्या.मिवोपरि। लोककृतः पथिकृतो यजामहे- ये देवानां हुतभागा^ इह स्थ।। 33।।

卐 ध्रुवाया.न्त्वा दिशि पुरा- सँवृत. स्स्वधाया मादधामि- बाहुच्च्युता पृथिवी द्या.मिवोपरि। लोककृतः पथिकृतो यजामहे- ये देवानां हुतभागा^ इह स्थ।। 34।।

卐 ऊर्ध्वाया.न्त्वा दिशि पुरा- सँवृत. स्स्वधाया मादधामि- बाहुच्च्युता पृथिवी द्या.मिवोपरि। लोककृतः पथिकृतो यजामहे- ये देवानां हुतभागा^ इह स्थ।। 35।।

卐 धर्ताऽसि धरुणोऽसि वंसगोऽसि।। 36।।

Ganapati Sachchidananda Avadhoota Datta Peetham, Mysore

卐 उदपू.रसि मधुपू.रसि वातपू.रसि।। 37।।

卐 इतश्च माऽमुत.श्चाऽवताँ- यमे~इव यतमाने~ यदैतम्। प्र वां भर.न्मानुषा^ देवयन्तो- आ सीदतां स्व.मु लोकँ विदाने~।। 38।।

卐 स्वासस्थे~ भवत. मिन्दवे नो- युजे वां ब्रह्म पूर्व्यं. न्नमोभिः। वि श्लोक^ एति पथ्येव सूरि- श्शृण्वन्तु विश्वे अमृतास^ एतत्।। 39।।

卐 त्रीणि पदानि रुपो अन्वरोह- च्चतुष्पदी. मन्वेत.द्व्रतेन। अक्षरेण प्रति मिमीते अर्क- मृतस्य नाभा.वभि सं पुनाति।। 40।।

卐 देवेभ्य꣡ क.मवृणीत मृत्युं- प्रजायै कि.ममृत. न्नाऽवृणीत। बृहस्पति. र्यज्ञ. मतनुत ऋषि꣡- प्रियाँ यम. स्तन्व1(अ) मारिरेच।। 41।।

卐 त्वमग्न ईडितो जातवेदो-ऽवा.ड्ढव्यानि सुरभीणि कृत्वा। प्रादा꣡ पितृभ्य. स्स्वधया ते अक्ष-न्नद्धि त्व.न्देव प्रयता हवींषि।। 42।।

卐 आसीनासो अरुणीना. मुपस्थे- रयि.न्धत्त दाशुषे मर्त्याय। पुत्रेभ्य꣡ पितर. स्तस्य वस्व꣡- प्र यच्छत त इहोर्ज. न्दधात।। 43।।

卐 अग्निष्वात्ता꣡ पितर^ एह गच्छत- सदस्सद स्सदत सुप्रणीतयः। ?अत्तो~ हवींषि प्रयतानि बर्हिषि- रयिञ्च न.स्सर्ववीर. न्दधात।। 44।।

卐 उपहूता^ नः पितरः स्सोम्यासो- बर्हिष्येषु निधिषु प्रियेषु। त आ गमन्तु त इह श्रुव-न्त्वधि ब्रुवन्तु तेऽव.न्त्वस्मान्।। 45।।

卐 ये नः पितुः पितरो ये पितामहा^- अनूजहिरे सोमपीथँ वसिष्ठाः। तेभि. र्यमः स्संरराणो हवीं-ष्युश.न्नुशद्भिः प्रतिकाम.मत्तु।। 46।।

卐 ये तातृषु. र्देवत्रा जेहमाना^- होत्राविद. स्स्तोमतष्टासो अर्कैः। आऽग्ने याहि सहस्र. न्देववन्दै- स्सत्यैः कविभिर् ऋषिभि. र्घर्मसद्भिः।। 47।।

卐 ये सत्यासो हविरदो हविष्पा^- इन्द्रेण देवै स्सरथ. न्तुरेण। आऽग्ने याहि सुविदत्रेभि. र्र्वा-ङ्परैः पूर्वैर् ऋषिभि. र्घर्मसद्भिः।। 48।।

卐 उप सर्प मातरं भूमि. मेता- मुरुव्यचसं पृथिवीं सुशेवाम्। ऊर्णम्रदाः पृथिवी दक्षिणावत^- एषा त्वा पातु प्रपथे पुरस्तात्।। 49।।

卐 उच्छ्वञ्चस्व पृथिवि मा नि बाधथाः- सूपायनाऽस्मै भव सूपसर्पणा। माता पुत्रँ यथा सिचा-ऽभ्येनं भूम ऊर्णुहि।। 50।।

卐 उच्छ्वञ्चमाना पृथिवी सु तिष्ठतु- सहस्रं मित^ उप हि श्रयन्ताम्। ते गृहासो घृतश्चुत. स्स्योना^- विश्वाहाऽस्मै शरणा. स्सन्त्वत्र।। 51।।

卐 उत्ते स्तभ्नामि पृथिवी न्त्व-त्परीमँ लोग. न्निदध.न्मो~ अहं रिषम्। एतां स्थूणां पितरो धारयन्ति ते- तत्र यम. स्सादना ते कृणोतु।। 52।।

卐 इम.मग्ने चमसं मा वि जिह्वरः- प्रियो देवाना. मुत सोम्यानाम्। अयँ य.श्चमसो देवपान- स्तस्मि.न्देवा^ अमृता^ मादयन्ताम्।। 53।।

卐 अथर्वा पूर्ण.श्चमसँ- यमिन्द्रायाऽबिभ. र्वाजिनीवते। तस्मि.न्कृणोति सुकृतस्य भक्ष- न्तस्मि. न्निन्दुः पवते विश्वदानीम्।। 54।।

卐 यत्ते कृष्ण. श्शकुन^ आतुतोद- पिपील. स्सर्प^ उत वा श्वापदः। अग्नि.ष्टद्विश्वा. दगद.ङ्कृणोतु- सोमश्च यो ब्राह्मणाः आविवेश।। 55।।

卐 पयस्वती. रोषधयः- पयस्व.न्मामकँ पयः। अपां पयसो यत्पय- स्तेन मा सह शुम्भतु।। 56।।

卐 इमा^ नारी. रविधवा. स्सुपत्नी- राञ्जनेन सर्पिषा सं स्पृशन्ताम्। अनश्रवो अनमीवा. स्सुरत्ना^- आ रोहन्तु जनयो योनि.मग्रे।। 57।।

卐 सङ्गच्छस्व पितृभि. स्सँयमे-नेष्टापूर्तेन परमे व्योमन्न्। हित्वाऽवद्यं पुन.रस्त.मेहि- सङ्गच्छता. न्तन्वा सुवर्चाः।। 58।।

卐 ये नः पितुः पितरो ये पितामहा^- य आविविशु. रुर्व1(अ)न्तरिक्षम्। तेभ्य. स्स्वरा.डसुनीति.र्नो अद्य- यथावश. न्तन्वः कल्पयाति।। 59।।

卐 श.न्ते नीहारो भवतु- श.न्ते प्रुष्वाऽव शीयताम्। शीतिके शीतिकावति-
ह्लादिके ह्लादिकावति।। मण्डूक्य1(अ)प्सु शं भुव^- इमं स्व1(अ)ग्निं
शमय।। 60।।

卐 विवस्वा.न्नो अभय.ङ्कृणोतु- य.स्सुत्रामा जीरदानु. स्सुदानुः। इहेमे
वीरा^ बहवो भवन्तु- गोम. दश्ववन्मय्यस्तु पुष्टम्।। 61।।

卐 विवस्वा.न्नो अमृतत्वे दधातु- परैतु मृत्यु. रमृत.न्न^ ऐतु। इमा.न्रक्षतु
पुरुषा. नाजरिम्णो- मो~ ष्वेषा. मसवो यम.ङ्गुः।। 62।।

卐 यो दध्रे अन्तरिक्षे न मह्ना- पितृणा.ङ्कविः प्रमति.र्मतीनाम्। तमर्चत
विश्वमित्रा हविर्भि- स्स^ नो यमः प्रतर.ञ्जीवसे धात्।। 63।।

卐 आ रोहत दिव.मुत्तमा- मृषयो मा बिभीतन। सोमपा. स्सोमपायिन^-
इदँ वः क्रियते हवि- रगन्म ज्योति.रुत्तमम्।। 64।।

卐 प्र केतुना बृहता भा.त्यग्नि-रा रोदसी~ वृषभो रोरवीति। दिव.श्चिदन्ता.
दुपमा. मुदान- डपा. मुपस्थे महिषो ववर्ध।। 65।।

卐 नाके सुपर्ण. मुप यत्पतन्तं- हृदा वेनन्तो अभ्यचक्षत त्वा। हिरण्यपक्षँ
वरुणस्य दूतँ- यमस्य योनौ शकुनं भुरण्युम्।। 66।।

卐 इन्द्र क्रतु.न्न आ भर- पिता पुत्रेभ्यो यथा। शिक्षा णो अस्मि.न्पुरुहूत यामनि- जीवा ज्योति रशीमहि।। 67।।

卐 अपूपाऽपिहिता. न्कुम्भा-न्यां.स्ते देवा अधारयन्न्। ते ते सन्तु स्वधावन्तो- मधुमन्तो घृतश्चुतः।। 68।।

卐 यास्ते धाना अनुकिरामि- तिलमिश्रा.स्स्वधावतीः। तास्ते सन्तु विभ्वीः प्रभ्वी- स्ता.स्ते यमो राजाऽनु मन्यताम्।। 69।।

卐 पुन.र्देहि वनस्पते- य एष निहित.स्त्वयि। यथा यमस्य सादन- आसातै विदथा वदन्न्।।

卐 आ रभस्व जातवेद- स्तेजस्व.द्धरो अस्तु ते। शरीर.मस्य सन्दहा-ऽथैन. न्धेहि सुकृता.मु लोके।। 71।।

卐 ये ते पूर्वे परागता- अपरे पितरश्च ये। तेभ्यो घृतस्य कुल्यैतु- शतधारा व्युन्दती।। 72।।

卐 एत.दारोह वय उन्मृजान- स्स्वा इह बृहदु दीदयन्ते। अभि प्रेहि मध्यतो माऽप हास्थाः- पितृणाँ लोकं प्रथमो यो अत्र।। 73।।

## अष्टादश काण्डे चतुर्थोऽनुवाकः

18-04-01

卐 आ रोहत जनित्री.ञ्जातवेदसः- पितृयाणै. स्सँ व^ आ रोहयामि।
अवा.ड्ढव्येषितो हव्यवाह^- ईजानँ युक्ता. स्सुकृता. न्धत्त लोके।। 1।।

卐 देवा^ यज्ञ.मृतवः कल्पयन्ति- हविः पुरोडाशं स्रुचो यज्ञाऽऽयुधानि।
तेभि.र्याहि पथिभि. र्दैवयानै- र्यै.रीजाना. स्स्वर्गँ यन्ति लोकम्।। 2।।

卐 ऋतस्य पन्था.मनु पश्य सा-ध्वङ्गिरस. स्सुकृतो येन यन्ति। तेभि.र्याहि पथिभि. स्स्वर्गं- यत्राऽऽदित्या^ मधु भक्षयन्ति- तृतीये नाके अधि वि श्रयस्व।। 3।।

卐 त्रय. स्सुपर्णा^ उपरस्य मायू^- नाकस्य पृष्ठे अधि विष्टपि श्रिताः।
स्वर्गा^ लोका^ अमृतेन विष्ठा^- इष.मूर्जँ यजमानाय दुह्राम्।। 4।।

卐 जुहू.र्दाधार द्या.मुपभृ. दन्तरिक्ष- न्ध्रुवा दाधार पृथिवीं प्रतिष्ठाम्। प्रतीमाँ लोका^ घृतपृष्ठा. स्स्वर्गाः- कामङ्कामँ यजमानाय दुह्राम्।। 5।।

卐 ध्रुव आ रोह पृथिवीँ विश्वभोजस- मन्तरिक्ष. मुपभृ. दाक्रमस्व। जुहु द्या.ङ्गच्छ यजमानेन साकं- स्रुवेण वत्सेन दिशः प्रपीना- स्सर्वा^ धुक्ष्वाऽहृणीयमानः।। 6।।

卐 तीर्थै. स्तरन्ति प्रवतो मही.रिति- यज्ञकृत. स्सुकृतो येन यन्ति।
अत्राऽदधु. र्यजमानाय लोक- न्दिशो भूतानि यदकल्पयन्त।। 7।।

卐 अङ्गिरसा. मयनं पूर्वो अग्नि- रादित्याना. मयन.ङ्गार्हपत्यो- दक्षिणाना. मयन. न्दक्षिणाग्निः। महिमान.मग्ने.र्विहितस्य ब्रह्मणा- समङ्ग. स्सर्व^ उपयाहि शग्मः।। 8।।

卐 पूर्वो अग्नि.ष्ट्वा तपतु शं पुरस्ता-च्छं पश्चा.त्तपतु गार्हपत्यः। दक्षिणाग्नि.ष्टे तपतु शर्म व-र्मोत्तरतो मध्यतो अन्तरिक्षा- द्दिशोदिशो अग्ने परि पाहि घोरात्।। 9।।

卐 यूय.मग्ने शन्तमाभि. स्तनूभि- रीजान. मभि लोकं स्वर्गम्। अश्वा^ भूत्वा पृष्टिवाहो वहाथ- यत्र देवै. स्सधमादं मदन्ति।। 10।।

卐 श.मग्ने पश्चा.त्तप शं पुरस्ता- च्छमुत्तरा. च्छमधरा. त्तपैनम्। एक.स्त्रेधा विहितो जातवेद-स्सम्य.गेन. न्धेहि सुकृता.मु लोके।। 11।।

卐 श.मग्नय. स्समिद्धा^ आ रभन्तां- प्राजापत्यं मेध्य.ञ्जातवेदसः। शृत.ङ्कृण्वन्त^ इह माऽवचिक्षिपन्न्।। 12।।

卐 यज्ञ^ एति विततः कल्पमान^- ईजान. मभि लोकं स्वर्गम्। तमग्नय. स्सर्वहुत.ञ्जुषन्तां- प्राजापत्यं मेध्य.ञ्जातवेदसः। शृत.ङ्कृण्वन्त^ इह माऽव चिक्षिपन्न्।। 13।।

卐 ईजान. श्चित. माऽरुक्ष. दग्नि- न्नाकस्य पृष्ठा. द्दिव.मुत्पतिष्यन्न्। तस्मै प्र भाति नभसो ज्योतिषीमा-न्त्स्वर्गः पन्था. स्सुकृते देवयानः।। 14।।

卐 अग्नि.र्होताऽध्वर्यु.ष्टे बृहस्पति- रिन्द्रो ब्रह्मा दक्षिणत.स्ते अस्तु। हुतोऽयं संस्थितो यज्ञ^ एति- यत्र पूर्व.मयनं हुतानाम्।। 15।।

卐 अपूपवा.न्क्षीरवां-श्चरु.रेह सीदतु। लोककृतः पथिकृतो यजामहे- ये देवानां हुतभागा^ इह स्थ।। 16।।

卐 अपूपवा.न्दधिवां-श्चरु.रेह सीदतु। लोककृतः पथिकृतो यजामहे- ये देवानां हुतभागा^ इह स्थ।। 17।।

卐 अपूपवा.न्द्रप्सवां-श्चरु.रेह सीदतु। लोककृतः पथिकृतो यजामहे- ये देवानां हुतभागा^ इह स्थ।।

卐 अपूपवा.न्घृतवां-श्चरु.रेह सीदतु। लोककृतः पथिकृतो यजामहे- ये देवानां हुतभागा^ इह स्थ।। 19।।

卐 अपूपवा.न्मांसवां-श्चरु.रेह सीदतु। लोककृतः पथिकृतो यजामहे- ये देवानां हुतभागा^ इह स्थ।। 20।।

卐 अपूपवा.नन्नवां-श्चरु.रेह सीदतु। लोककृतः पथिकृतो यजामहे- ये देवानां हुतभागा^ इह स्थ।। 21।।

卐 अपूपवा.न्मधुमां-श्चरु.रेह सीदतु। लोककृतः पथिकृतो यजामहे- ये देवानां हुतभागा इह स्थ।। 22।।

卐 अपूपवा.न्रसवां-श्चरु.रेह सीदतु। लोककृतः पथिकृतो यजामहे- ये देवानां हुतभागा इह स्थ।। 23।।

卐 अपूपवा.नपवां-श्चरु.रेह सीदतु। लोककृतः पथिकृतो यजामहे- ये देवानां हुतभागा इह स्थ।। 24।।

卐 अपूपापिहिता. न्कुम्भा-न्यां.स्ते देवा अधारयन्न्। ते ते सन्तु स्वधावन्तो- मधुमन्तो घृतश्चुतः।। 25।।

卐 यास्ते धाना अनुकिरामि- तिलमिश्रा. स्स्वधावतीः। तास्ते सन्तूद्भ्वीः प्रभ्वी- स्ता.स्ते यमो राजाऽनु मन्यताम्।। 26।।

卐 अक्षितिं भूयसीम्।। 27।।

卐 द्रप्स. श्चस्कन्द पृथिवी. मनु द्या-मिम.ञ्च योनि.मनु यश्च पूर्वः। समानँ योनि. मनु सञ्चरन्त- न्द्रप्स.ञ्जुहो.म्यनु सप्त होत्राः।। 28।।

卐 शतधारँ वायु.मर्कं स्वर्विद- न्नृचक्षस.स्ते अभि चक्षते रयिम्। ये पृणन्ति प्र च यच्छन्ति सर्वदा- ते दुह्रते दक्षिणां सप्तमातरम्।। 29।।

卐 कोश. न्दुहन्ति कलश.श्चतुर्बिल- मिडा. न्धेनुं मधुमतीं स्वस्तये। ऊर्जं
मदन्ती. मदिति.ञ्जने-ष्वग्ने मा हिंसीः परमे व्योमन्न्।। 30।।

卐 एत.त्ते देव. स्सविता- वासो ददाति भर्तवे। तत्त्वँ यमस्य राज्ये- वसान.
स्तार्प्यं.ञ्चर।। 31।।

卐 धाना^ धेनु. रभव-द्वत्सो अस्या. स्तिलोऽभवत्। ताँ वै यमस्य राज्ये-
अक्षिता. मुप जीवति।। 32।।

卐 एता.स्ते असौ धेनवः- कामदुघा^ भवन्तु। एनी. श्श्येनी. स्सरूपा^
विरूपा- स्तिलवत्सा^ उप तिष्ठन्तु त्वाऽत्र।। 33।।

卐 एनी.र्धाना^ हरिणी. श्श्येनी.रस्य- कृष्णा^ धाना^ रोहिणी. र्धेनव.स्ते।
तिलवत्सा^ ऊर्जं.मस्मै दुहाना^- विश्वाहा स.न्त्वनपस्फुरन्तीः।। 34।।

卐 वैश्वानरे हवि.रिद.ञ्जुहोमि- साहस्रं शतधार.मुत्सम्। स^ बिभर्ति पितरं
पितामहा- न्प्रपितामहा. न्बिभर्ति पिन्वमानः।। 35।।

卐 सहस्रधारं शतधार. मुत्स. मक्षितँ- व्यच्यमानं सलिलस्य पृष्ठे। ऊर्ज.
न्दुहान. मनपस्फुरन्त- मुपाऽसते पितर. स्स्वधाभिः।। 36।।

卐 इद.ङ्कसाम्बु चयनेन चित-न्त.त्सजाता^ अव पश्यतेत। मर्त्योऽय.
ममृतत्व. मेति तस्मै- गृहा.न्कृणुत याव.त्सबन्धु।। 37।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 इहैवैधि धनसनि- रिहचित्त^ इहक्रतुः। इहैधि वीर्यवत्तरो- वयोधा^ अपराहतः।। 38।।

卐 पुत्रं पौत्र मभितर्पयन्ती- रापो मधुमती.रिमाः। स्वधां पितृभ्यो अमृत. न्दुहाना^- आपो देवी रुभयां.स्तर्पयन्तु।। 39।।

卐 आपो अग्निं प्र हिणुत पितृ८ रु-पेमँ यज्ञं पितरो मे जुषन्ताम्। आसीना. मूर्ज. मुप ये सचन्ते- ते नो रयिं सर्ववीर. न्नि यच्छान्।। 40।।

卐 समिन्धते अमर्त्यं- हव्यवाहं घृतप्रियम्। स^ वेद निहिता. न्निधी- न्पितृ.न्परावतो गतान्।। 41।।

卐 यन्ते मन्थं यमोदनँ- यन्मांस. न्निपृणामि ते। ते ते सन्तु स्वधावन्तो- मधुमन्तो घृतश्चुतः।। 42।।

卐 यास्ते धाना^ अनुकिरामि-तिलमिश्रा. स्स्वधावतीः। तास्ते सन्तूद्भ्वी८ प्रभ्वी- स्ता.स्ते यमो राजाऽनु मन्यताम्।। 43।।

卐 इदं पूर्व. मपर. न्नियानँ- येना ते पूर्वे पितर८ परेताः। पुरोगवा^ ये अभिषाचो अस्य- ते त्वा वहन्ति सुकृता.मु लोकम्।। 44।।

卐 सरस्वती. न्देवयन्तो हवन्ते- सरस्वती. मध्वरे तायमाने। सरस्वतीं सुकृतो हवन्ते- सरस्वती दाशुषे वार्य.न्दात्।। 45।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

卐 सरस्वतीं पितरो हवन्ते- दक्षिणा^ यज्ञ मभिनक्षमाणाः। आसद्याऽस्मि. न्बर्हिषि मादयध्व- मनमीवा^ इष^ आ धेह्यस्मे~।। 46।।

卐 सरस्वति या सरथँ यया-थोक्थै. स्स्वधाभि. र्दैवि पितृभि. र्मदन्ती। सहस्त्रार्घ. मिडो अत्र भागं- राय.स्पोषँ यजमानाय धेहि।। 47।।

卐 पृथिवी.न्त्वा पृथिव्या. मावेशयामि- देवो नो धाता प्र तिरा.त्यायुः। परापरैता वसुवि.द्वो अ-स्त्वधा मृताꣳ पितृषु सं भवन्तु।। 48।।

卐 आ प्र च्यवेथा. मप तन्मृजेथाँ- यद्वा. मभिभा ^अत्रोचुः। अस्मा. देत.मघ्न्यौ तद्वशीयो- दातुꣳ पितृ.ष्विहभोजनौ मम।। 49।।

卐 एय. मग. न्दक्षिणा भद्रतो नो- अनेन दत्ता सुदुघा वयोधाः। यौवने जीवा. नुपपृञ्चती जरा- पितृभ्य^ उप.संपराणया. दिमान्।। 50।।

卐 इदं पितृभ्यꣳ प्र भरामि बर्हि- र्जीव. न्देवेभ्य^ उत्तरं स्तृणामि। तदा रोह पुरुष मेध्यो भव-न्प्रति त्वा जानन्तु पितरꣳ परेतम्।। 51।।

卐 एदं बर्हि. रसदो मेध्योऽभूꣳ- प्रति त्वा जानन्तु पितरꣳ परेतम्। यथापरु तन्व1(अं) सं भरस्व- गात्राणि ते ब्रह्मणा कल्पयामि।। 52।।

卐 पर्णो राजाऽपिधान.ञ्चरूणा- मूर्जो बलं सह^ ओजो न^ आगन्न्। आयु. र्जीवेभ्यो विदध- द्दीर्घाꣲयुत्वाय शतशारदाय।। 53।।

卐 ऊर्जो भागो य॑ इम.ञ्जजाना-ऽश्मान्नाना. माधिपत्य.ञ्जगाम। तमर्चत विश्वमित्रा॑ हविर्भि- स्स॑ नो यम॓ प्रतर.ञ्जीवसे धात्।। 54।।

卐 यथा यमाय हर्म्य- मवप. न्पञ्च मानवाः। एवा वपामि हर्म्यँ- यथा मे भूरयोऽसत।। 55।।

卐 इदं हिरण्यं बिभृहि- यत्ते पिताऽबिभ॓ पुरा। स्वर्गँ यत॓ पितु.र्हस्तं- निर्मृड्ढि दक्षिणम्।। 56।।

卐 ये च जीवा॑ ये च मृता॑- ये जाता॑ ये च यज्ञियाः। तेभ्यो घृतस्य कुल्यैतु- मधुधारा व्युन्दती।। 57।।

卐 वृषा मतीनां पवते विचक्षण- स्सूरो अह्नां प्रतरीतोषसा. न्दिवः। प्राण. स्सिन्धूनां कलशाँ॑ अचिक्रद- दिन्द्रस्य हार्दि.माविश. न्मनीषया।। 58।।

卐 त्वेषस्ते धूम॑ ऊर्णोतु- दिविष.न्छुक्र॑ आततः। सूरो न हि द्युता त्व-ङ्कृपा पावक रोचसे।। 59।।

卐 प्र वा एतीन्दु. रिन्द्रस्य निष्कृतिं- सखा सख्यु.र्न प्र मिनाति सङ्गिरः। मर्य॑इव योषा. स्समर्षसे- सोम॓ कलशे शतयामना पथा।। 60।।

卐 अक्ष. न्नमीमदन्त- ह्यव प्रियाँ॑ अधूषत। अस्तोषत स्वभानवो- विप्रा॑ यविष्ठा॑ ईमहे।। 61।।

卐 आ यात पितर. स्सोम्यासो- गम्भीरैः पथिभिः पितृयाणैः। आयु. रस्मभ्य. न्दधतः प्रजाञ्च- राय.श्च पोषै. रभि न.स्सचध्वम्।। 62।।

卐 परा यात पितर. स्सोम्यासो- गम्भीरैः पथिभिः पूर्याणैः। अधा मासि पुन रा यात नो गृहा- न्हवि.रत्तुं सुप्रजस. स्सुवीराः।। 63।।

卐 यद्वो अग्नि. रजहा. देक. मङ्गं- पितृलोक.ङ्गमय. न्जातवेदाः। तद्व एत. त्पुन.रा प्याययामि- साङ्गा. स्स्वर्गे पितरो मादयध्वम्।। 64।।

卐 अभू. द्दूतः प्रहितो जातवेदा.-स्साय. न्न्यह्न उपवन्द्यो नृभिः। प्रादाः पितृभ्य. स्स्वधया ते अक्ष- न्नद्धि त्व.न्देव प्रयता हवींषि।। 65।।

卐 असौ हा इह ते मनः- ककुत्सल.मिव जामयः। अभ्येनं भूम ऊर्णुहि।। 66।।

卐 शुम्भन्तां लोकाः पितृषदनाः- पितृषदने त्वा लोक आ सादयामि।।

卐 ये3(ए)ऽस्माकं पितर- स्तेषां बर्हि.रसि।। 68।।

卐 उदुत्तमँ वरुण पाश मस्म.दवा-ऽधमँ वि मध्यमं श्रथाय। अधा वय. मादित्य व्रते तवा-ऽनागसो अदितये स्याम।। 69।।

卐 प्राऽस्म.त्पाशा.न्वरुण मुञ्च सर्वा-न्यै.स्समामे बध्यते यै.र्व्यामे। अधा जीवेम शरदं शतानि- त्वया राज.न्गुपिता रक्षमाणाः।। 70।।

卐 अग्नये कव्यवाहनाय स्वधा नमः।। 71।।

卐 सोमाय पितृमते स्वधा नमः।। 72।।

卐 पितृभ्य. स्सोमवद्ध्य. स्स्वधा नमः।। 73।।

卐 यमाय पितृमते स्वधा नमः।। 74।।

卐 एतत्ते प्रततामह स्वधा ये च त्वा.मनु।। 75।।

卐 एतत्ते ततामह स्वधा ये च त्वा.मनु।। 76।।

卐 एतत्ते तत स्वधा।। 77।।

卐 स्वधा पितृभ्यꣳ पृथिविषद्ध्यः।। 78।।

卐 स्वधा पितृभ्यो अन्तरिक्षसद्ध्यः।। 79।।

卐 स्वधा पितृभ्यो दिविषद्ध्यः।। 80।।

卐 नमो वꣳ पितर^ ऊर्जे- नमो वꣳ पितरो रसाय।। 81।।

卐 नमो वꣳ पितरो भामाय- नमो वꣳ पितरो मन्यवे।। 82।।

卐 नमो वꣳ पितरो यद्धोर. न्तस्मै- नमो वꣳ पितरो यत्क्रूर. न्तस्मै।। 83।।

卐 नमो वꣳ पितरो यच्छिव. न्तस्मै- नमो वꣳ पितरो यत्स्योन. न्तस्मै।। 84।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 नमो॑ वः पितर- स्स्व॒धा वः॑ पितरः।। 85।।

卐 येऽत्र॑ पि॒तरः॑ पि॒तरो॒ येऽत्र॑ यू॒यं स्थ- यु॒ष्माँस्तेऽनु॑ यू॒य.न्तेषा॒ं श्रेष्ठा॑ भूयास्थ।। 86।।

卐 य इ॒ह पि॒तरो॑ जी॒वा- इ॒ह व॒यं स्मः। अ॒स्माँस्तेऽनु॑ व॒य-न्तेषा॒ं श्रेष्ठा॑ भूयास्म।। 87।।

卐 आ त्वा॑ऽग्न इधीमहि- द्यु॒मन्त॑. न्देव॒जर॑म्। यद्ध॒ सा ते॒ पनी॑यसी- स॒मि.द्दी॒दय॑ति॒ द्यवि॑। इषं॑ स्तो॒तृभ्य॒ आ भ॑र।। 88।।

卐 च॒न्द्रमा॑ अ॒प्स्व1(अ॒)न्तरा- सु॒प॒र्णो धा॑वते दि॒वि। न वो॑ हिरण्यनेमयः- प॒दं वि॑न्दन्ति विद्युतो- वि॒त्तं मे॑ अ॒स्य रोद॑सी।। 89।।

## नवदशं काण्डम्

### नवदश काण्डे प्रथमोऽनुवाकः

19-01-01

卐 सं॑सं स्त्रवन्तु न॒द्य1(अ॒)- स्सँ वाता॒. स्सं प॑त॒त्रिणः॑। य॒ज्ञ.मि॒मँ व॑र्धयता गिर- स्संस्रा॒व्ये॑ण ह॒विषा॑ जुहोमि।। 1।।

卐 इ॒मं हो॑मा य॒ज्ञ म॑व-ते॒मं सं॑स्त्रावणा उ॒त। य॒ज्ञ.मि॒मँ व॑र्धयता गिर- स्संस्रा॒व्ये॑ण ह॒विषा॑ जुहोमि।। 2।।

卐 रूपंरूपँ वयोवय- स्संरभ्यैनं परि ष्वजे। यज्ञ.मिमं चतस्रः प्रदिशो वर्धयन्तु- संस्राव्येण हविषा जुहोमि।। 3।।

19-01-02

卐 श.न्त आपो हैमवती- श्शमु ते सन्तूत्स्याः। श.न्ते सनिष्यदा^ आप- श्शमु ते सन्तु वर्ष्याः।। 1।।

卐 श.न्त आपो धन्वन्या3(आ)- श्शन्ते सन्त्वनूप्याः। शन्ते खनित्रिमा^ आप- श्शँ याः कुम्भेभि.राभृताः।। 2।।

卐 अनभ्रयः खनमाना^- विप्रा^ गम्भीरे अपसः। भिषग्भ्यो भिषक्तरा^- आपो अच्छा वदामसि।। 3।।

卐 अपा.मह दिव्याना- मपां स्रोतस्यानाम्। अपा.मह प्रणेजने-ऽश्वा^ भवथ वाजिनः।। 4।।

卐 ता^ अप. श्शिवा^- अपोऽयक्ष्मङ्करणी. रपः। यथैव तृप्यते मय- स्ता.स्त आ दत्त भेषजीः।। 5।।-

19-01-03

卐 दिव.स्पृथिव्याः पर्यन्तरिक्षा- द्वनस्पतिभ्यो अध्योषधीभ्यः। यत्रयत्र विभृतो जातवेदा- स्तत. स्तुतो जुषमाणो न^ एहि।। 1।।

卐 यस्ते अप्सु महिमा यो वनेषु- य^ ओषधीषु पशुष्वप्स्व1(अ)न्तः। अग्ने सर्वा. स्तन्व1(अ) स्सं रभस्व- ताभि.र्न^ एहि द्रविणोदा^ अजस्रः।। 2।।

卐 यस्ते देवेषु महिमा स्वर्गो- या ते तनुः पितृ.ष्वाविवेश। पुष्टि.र्या ते मनुष्येषु पप्रथे-ऽग्ने तया रयि.मस्मासु धेहि।। 3।।

卐 श्रुत्कर्णाय कवये वेद्याय- वचोभि. र्वाकै. रुप यामि रातिम्। यतो भय. मभयं त.न्नो अ-स्त्वव देवानाँ यज हेडो अग्ने।। 4।।-

19-01-04

卐 या.माहुतिं प्रथमा. मथर्वा- या जाता या हव्य.मकृणो ज्जातवेदाः। ता.न्त एतां प्रथमो जोहवीमि- ताभि.ष्टुप्तो वहतु हव्य- मग्नि रग्नये स्वाहा।। 1।।

(ताभि.ष्टुतो)

卐 आकूति. न्देवीं सुभगां पुरो दधे- चित्तस्य माता सुहवा नो अस्तु। या.माशा. मेमि केवली- सा मे अस्तु- विदेय.मेनां मनसि प्रविष्टाम्।। 2।।

卐 आकूत्या नो बृहस्पत- आकूत्या न^ उपाऽऽगहि। अथो~ भगस्य नो धे- ह्यथो~ न.स्सुहवो भव।। 3।।

卐 बृहस्पति.र्म आकूति. माङ्गिरसः- प्रति जानातु वाच. मेताम्। यस्य देवा^ देवता. स्सम्बभूवु- स्स^ सुप्रणीताः कामो अन्वे.त्वस्मान्।।।-

19-01-05

卐 इन्द्रो राजा जगत. श्चर्षणीना- मधि क्षमि विषुरूपँ यदस्ति। ततो ददाति दाशुषे वसूनि- चोद. द्राध. उपस्तुत. श्चि.दर्वाक्।। 1।।-

19-01-06

卐 सहस्रबाहुः पुरुष- स्सहस्राक्ष. स्सहस्रपात्। स भूमिँ विश्वतो वृत्वा-ऽत्यतिष्ठ. द्दशाङ्गुलम्।। 1।।

卐 त्रिभिः पद्भि. र्द्यां.मरोह- त्पादस्येहाऽभव.त्पुनः। तथा व्यक्राम. द्विष्व-ङ्शनाऽनशने अनु।। 2।।

卐 तावन्तो अस्य महिमान- स्ततो ज्यायांश्च पूरुषः। पादोऽस्य विश्वा भूतानि- त्रिपा.दस्याऽमृत.न्दिवि।। 3।।

卐 पुरुष एवेदं सर्वं- यद्भूतँ यच्च भाव्यम्। उतामृतत्वस्येश्वरो-यदन्येनाऽभव.त्सह।। 4।।

卐 यत्पुरुषँ व्यदधुः- कतिधा व्यकल्पयन्न्। मुख.ङ्किमस्य किं बाहू-किमूरू पादा उच्येते।। 5।।

卐 ब्राह्मणोऽस्य मुख. मासी- द्बाहू राजन्योऽभवत्। मध्य.न्तदस्य यद्वैश्यः- पद्भ्यां शूद्रो अजायत।। 6।।

卐 चन्द्रमा^ मनसो जात- श्चक्षो. स्सूर्यो अजायत। मुखा.दिन्द्रश्चाऽग्निश्च-
प्राणा. द्वायु. रजायत।। 7।।

卐 नाभ्या^ आसी. दन्तरिक्षं- शीर्ष्णो द्यौ.स्समवर्तत। पद्भ्यां भूमि. र्दिश.
श्श्रोत्रा- त्तथा लोका९ अकल्पयन्न्।। 8।।

卐 विरा.डग्रे समभव- द्विराजो अधि पूरुषः। स^ जातो अत्यरिच्यत-
पश्चा.द्भूमि. मथो~ पुरः।। 9।।

卐 यत्पुरुषेण हविषा- देवा^ यज्ञ. मतन्वत। वसन्तो अस्याऽऽसी.दाज्य-
ङ्ग्रीष्म^ इध्म^ श्शर.द्धविः।। 10।।

卐 तँ यज्ञं प्रावृषा प्रौक्ष- न्पुरुष.ञ्जात.मग्रशः। तेन देवा^ अयजन्त- साध्या^
वसव.श्च ये।। 11।।

卐 तस्मा.दश्वा अजायन्त- ये च के चोभयादतः। गावो ह जज्ञिरे तस्मा-
त्तस्मा.ज्जाता^ अजावयः।। 12।।

卐 तस्मा.द्यज्ञा.त्सर्वहुत^- ऋच. स्सामानि जज्ञिरे। छन्दो ह जज्ञिरे तस्मा-
द्यजु. स्तस्मा.दजायत।। 13।।

卐 तस्मा.द्यज्ञा.त्सर्वहुत- स्सम्भृतं पृषदाज्यम्। पशूं.स्तांश्चक्रे वायव्या-
नारण्या^ ग्राम्या.श्च ये।। 14।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 सप्ताऽस्याऽऽस.न्परिधय- स्त्रि.स्सप्त समिधः कृताः। देवा^ यद्यज्ञ.न्तन्वाना^- अबध्न. न्पुरुषं पशुम्।। 15।।

卐 मूर्ध्नो देवस्य बृहतो- अंशव. स्सप्त सप्ततीः। राज्ञ. स्सोमस्याऽजायन्त- जातस्य पुरुषा.दधि।। 16।।

19-01-07

卐 चित्राणि साक. न्दिवि रोचनानि- सरीसृपाणि भुवने जवानि। तुर्मिशं सुमति. मिच्छमानो- अहानि गीर्भि. स्सपर्यामि नाकम्।। 1।।

卐 सुहव. मग्ने कृत्तिका^ रोहिणी चा-ऽस्तु भद्रं मृगशिर. श्श.मार्द्रा। पुनर्वसू~ सूनृता चारु पुष्यो- भानु. राश्लेषा^ अयनं मघा^ मे।। 2।।

卐 पुण्यं पूर्वा फल्गुन्यौ चाऽत्र हस्त-श्चित्रा शिवा स्वाति सुखो मे अस्तु। राधे~ विशाखे~ सुहवाऽनुराधा^- ज्येष्ठा सुनक्षत्र. मरिष्टमूलम्।। 3।।

卐 अन्नं पूर्वा^ रासतां मे अषाढा^- ऊर्जं. न्देव्युत्तरा^ आ वहन्तु। अभिजि.न्मे रासतां पुण्य.मेव- श्रवण श्श्रविष्ठाः कुर्वतां सुपुष्टिम्।। 4।।

卐 आ मे मह. च्छतभिष.ग्वरीय^- आ मे द्वया प्रोष्ठपदा सुशर्म। आ रेवती चाऽश्वयुजौ भगं म- आ मे रयिं भरण्य^ आ वहन्तु।। 5।।-

19-01-08

卐 यानि नक्षत्राणि दिव्य1(अ)न्तरिक्षे- अप्सु भूमौ यानि नगेषु दिक्षु। प्रकल्पयं.श्चन्द्रमा^ यान्येति- सर्वाणि ममैतानि शिवानि सन्तु।। 1।।

卐 अष्टाविंशानि शिवानि- शग्मानि सह योगं भजन्तु मे। योगं प्र पद्ये क्षेमञ्च- क्षेमं प्र पद्ये योगञ्च- नमोऽहोरात्राभ्या.मस्तु।। 2।।

卐 स्वस्तितं मे सुप्रात स्सुसायं- सुदिवं सुमृगं सुशकुनं मे अस्तु। सुहव.मग्ने स्वस्त्य1(अ)मर्त्य-ङ्गत्वा पुन.रायाऽभिनन्दन्न्।। 3।।

卐 अनुहवं परिहवं- परिवादं परिक्षवम्। सर्वै.र्मे रिक्तकुम्भा- न्परा ता.न्त्सवित. स्सुव।। 4।।

卐 अपपापं परिक्षवं- पुण्यं भक्षीमहि क्षवम्। शिवा ते पाप नासिकां- पुण्यग. श्चाऽभि मेहताम्।। 5।।

卐 इमा^ या^ ब्रह्मणस्पते- विषूची. र्वात^ ईरते। सध्रीची.रिन्द्र ता॰ कृत्वा- मह्यं शिवतमा.स्कृधि।। 6।।

卐 स्वस्ति नो अ-स्त्वभय न्नो अस्तु- नमोऽहोरात्राभ्या.मस्तु।। 7।।-

19-01-09

卐 शान्ता द्यौ.श्शान्ता पृथिवी- शान्त. मिद.मुर्व1(अ)न्तरिक्षम्। शान्ता^ उदन्वती. राप- श्शान्ता^ न.स्स.न्त्वोषधीः।। 1।।

卐 शान्तानि पूर्वरूपाणि- शान्त.न्नो अस्तु कृताकृतम्। शान्तं भूतञ्च भव्यञ्च- सर्व.मेव श.मस्तु नः।। 2।।

卐 इयँ या परमेष्ठिनी- वाग्देवी ब्रह्मसंशिता। ययैव ससृजे घोर-न्तयैव शान्ति.रस्तु नः।। 3।।

卐 इदँ यत्परमेष्ठिनं- मनो वां ब्रह्मसंशितम्। येनैव ससृजे घोर- न्तेनैव शान्ति.रस्तु नः।। 4।।

卐 इमानि यानि पञ्चेन्द्रियाणि- मनष्षष्ठानि मे हृदि ब्रह्मणा संशितानि। यै.रेव ससृजे घोर- न्तै.रेव शान्ति.रस्तु नः।। 5।।

卐 शन्नो मित्र. श्शँ वरुण- श्शँ विष्णु. श्शं प्रजापतिः। शन्न^ इन्द्रो बृहस्पति- श्श.न्नो भव.त्वर्यमा।। 6।।

卐 शन्नो मित्र. श्शँ वरुण- श्शँ विवस्वा.न्छ.मन्तकः। उत्पाताꣳ पार्थिवाऽन्तरिक्षा-श्श.न्नो दिविचरा^ ग्रहाः।। 7।।

卐 शन्नो भूमि.र्वेप्यमाना- शमुल्का निर्हतञ्च यत्। श.ङ्गावो लोहितक्षीरा- श्शं भूमि.रवतीर्यतीः।। 8।।

卐 नक्षत्र मुल्काऽभिहतं शमस्तु न- श्शन्नोऽभिचारा. श्शमु सन्तु कृत्याः। शन्नो निखाता वल्गा. श्शमुल्का^- देशोपसर्गा. श्शमु नो भवन्तु।। 9।।

卐 शन्नो ग्रहा. श्चान्द्रमसा- श्श.मादित्य.श्च राहुणा। शन्नो मृत्यु धूमकेतु-श्शं रुद्रा. स्तिग्मतेजसः।। 10।।

卐 शं रुद्रा. श्शँ वसव- श्श.मादित्या. श्श.मग्नयः। शन्नो महर्षयो देवा-श्श.न्देवा. श्शं बृहस्पतिः।। 11।।

卐 ब्रह्म प्रजापति. र्धाता -लोका वेदा स्सप्तऋषयोऽग्नयः। तैर्मे कृतं स्वस्त्ययन- मिन्द्रो मे शर्म यच्छतु- ब्रह्मा मे शर्म यच्छतु। विश्वे मे देवा. श्शर्म यच्छन्तु- सर्वे मे देवा. श्शर्म यच्छन्तु।। 12।।

卐 यानि कानि चि.च्छान्तानि- लोके सप्तऋषयो विदुः। सर्वाणि शं भवन्तु मे- शं मे अस्त्वभयं मे अस्तु।। 13।।

卐 पृथिवी शान्ति- रन्तरिक्षं शान्ति- र्द्यौ.श्शान्ति- राप. श्शान्ति- रोषधय. श्शान्ति- र्वनस्पतय. श्शान्ति- र्विश्वे मे देवा.श्शान्ति- स्सर्वे मे देवा. श्शान्ति- श्शान्ति. श्शान्ति. श्शान्तिभिः। ताभि. श्शान्तिभि. स्सर्वशान्तिभि श्शमयामोऽहँ- यदिह घोरँ- यदिह क्रूरँ- यदिह पाप-न्त.च्छान्त. न्तच्छिवं- सर्व.मेव श.मस्तु नः।। 14।।

## नवदश काण्डे द्वितीयोऽनुवाकः

19-02-01

卐 शन्न^ इन्द्राग्नी~ भवता. मवोभि- श्शन्न^ इन्द्रावरुणा रातहव्या। श.मिन्द्रासोमा सुविताय शँ यो- श्शन्न^ इन्द्रापूषणा वाजसातौ।। 1।।

卐 श.न्नो भग. श्शमु न. श्शंसो अस्तु- शन्नः पुरन्धि. श्श.मु सन्तु रायः। शन्न. स्सत्यस्य सुयमस्य शंस- श्श.न्नो अर्यमा पुरुजातो अस्तु।। 2।।

卐 शन्नो धाता शमु धर्ता नो अस्तु- शन्न^ उरूची भवतु स्वधाभिः। शं रोदसी~ बृहती~ शन्नो अद्रि- श्शन्नो देवानां सुहवानि सन्तु।। 3।।

卐 शन्नो अग्नि. र्ज्योति. रनीको अस्तु- शन्नो मित्रावरुणा.वश्विना शम्। शन्न. स्सुकृतां सुकृतानि सन्तु- शन्न^ इषिरो अभि वातु वातः।। 4।।

卐 शन्नो द्यावापृथिवी~ पूर्वहूतौ- शमन्तरिक्ष.न्दृशये नो अस्तु। शन्न^ ओषधी. र्वनिनो भवन्तु- शन्नो रजसस्पति.रस्तु जिष्णुः।। 5।।

卐 शन्न^ इन्द्रो वसुभि. र्देवो अस्तु- शमादित्येभि. र्वरुण. स्सुशंसः। शन्नो रुद्रो रुद्रेभि. र्जलाष- श्शन्न.स्त्वष्टा ग्नाभि. रिह श्रृणोतु।। 6।।

卐 शन्न. स्सोमो भवतु ब्रह्म शन्न- श्शन्नो ग्रावाण. श्शमु सन्तु यज्ञाः। शन्न. स्स्वरूणां मितयो भवन्तु- शन्नः प्रस्व1(अ) श्शम्वस्तु वेदिः।। 7।।

卐 शन्न. स्सूर्य^ उरुचक्षा^ उदेतु- शन्नो भवन्तु प्रदिश. श्चतस्रः। शन्नः पर्वता^ ध्रुवयो भवन्तु- शन्न. स्सिन्धव. श्शमु स.न्त्वापः।। 8।।

卐 शन्नो अदिति. र्भवतु व्रतेभि- श्शन्नो भवन्तु मरुत. स्स्वर्काः। शन्नो विष्णु. श्शमु पूषा नो अस्तु- शन्नो भवित्रं शम्वस्तु वायुः।। 9।।

卐 शन्नो देव. स्सविता त्रायमाण- श्शन्नो भवन्तूषसो विभातीः। शन्नः पर्जन्यो भवतु प्रजाभ्य- श्शन्नः ~ क्षेत्रस्य पति.रस्तु शम्भुः।। 10।।-

19-02-02

卐 शन्न. स्सत्यस्य पतयो भवन्तु- शन्नो अर्वन्त. श्शमु सन्तु गावः। शन्न^ ऋभव. स्सुकृत. स्सुहस्ता-श्शन्नो भवन्तु पितरो हवेषु।। 1।।

卐 शन्नो देवा^ विश्वदेवा^ भवन्तु- शं सरस्वती सह धीभिरस्तु। श.मभिषाच. श्शमु रातिषाच- श्शन्नो दिव्याः पार्थिवा. श्शन्नो अप्याः।। 2।।

卐 शन्नो अज^ एकपा. द्देवो अस्तु- श.महिर्बुध्न्य1(अ). श्शं समुद्रः। शन्नो अपा. न्नपा.त्पेरु.रस्तु- शन्नः पृश्निः. र्भवतु देवगोपा।। 3।।

卐 आदित्या^ रुद्रा^ वसवो जुषन्ता- मिदं ब्रह्म क्रियमाण. न्नवीयः। श्रृण्वन्तु नो दिव्याः पार्थिवासो- गोजाता^ उत ये यज्ञियासः।। 4।।

卐 ये देवाना. मृत्विजो यज्ञियासो- मनो. र्यजत्रा^ अमृता^ ऋतज्ञाः। ते नो रासन्ता. मुरुगाय. मद्य- यूयं पात स्वस्तिभि.स्सदा नः।। 5।।

卐 तदस्तु मित्रावरुणा तदग्ने- शँ योरस्मभ्य. मिद.मस्तु शस्तम्।
अशीमहि गाध. मुत प्रतिष्ठा- न्नमो दिवे बृहते सादनाय।। 6।।-

19-02-03

卐 उषा^ अप स्वसु. स्तम- स्सँ वर्तयति वर्तनिं सुजातता। अया वाज.
न्देवहितं सनेम- मदेम शतहिमा. स्सुवीराः।। 1।।-

19-02-04

卐 इन्द्रस्य बाहू~ स्थविरौ वृषाणौ- च्चित्रा इमा वृषभौ पारयिष्णू~। तौ
योक्षे प्रथमो योग आगते- याभ्या.ञ्जित. मसुराणां स्व1(अ)र्यत्।। 1।।

卐 आशु. श्शिशानो वृषभो न भीमो- घनाघनः ≈ क्षोभण.श्चर्षणीनाम्।
सङ्क्रन्दनोऽनिमिष^ एकवीर- श्शतं सेना^ अजय.त्साक.मिन्द्रः।। 2।।

卐 सङ्क्रन्दनेनाऽनिमिषेण जिष्णुना-ऽयोध्येन दुश्च्यवनेन धृष्णुना। तदिन्द्रेण
जयत तत्सहध्वँ- युधो नर^ इषुहस्तेन वृष्णा।। 3।।

卐 स^ इषुहस्तै. स्स^ निषङ्गिभि- र्वशी संस्रष्टा स^ युध^ इन्द्रो गणेन।
संसृष्टजि.त्सोमपा^ बाहुशर्ध्यु1-(उ)ग्रधन्वा प्रतिहिताभि. रस्ता।। 4।।

卐 बलविज्ञाय. स्स्थविरꣳ प्रवीर- स्सहस्वा.न्वाजी सहमान^ उग्रः।
अभिवीरो अभिषत्वा सहोजि- ज्जैत्र.मिन्द्र रथ.मा तिष्ठ गोविदम्।। 5।।

卐 इमँ वीर. मनु हर्षध्व. मुग्र-मिन्द्रं सखायो अनु सं रभध्वम्।
ग्रामजित.ङ्गोजितँ वज्रबाहु-ञ्जयन्त. मज्म प्रमृणन्त. मोजसा।। 6।।
卐 अभि गोत्राणि सहसा गाहमानो-ऽदाय^ उग्र. श्शतमन्यु.रिन्द्रः।
दुश्च्यवनः पृतनाषा.डयोध्यो3(ओ)-ऽस्माकं सेना^ अवतु प्र युत्सु।। 7।।
卐 बृहस्पते परि दीया रथेन- रक्षोहाऽमित्रा॑ अपबाधमानः। प्रभञ्ज.न्छत्रू.
न्प्रमृण.न्नमित्रा- नस्माक. मेध्यविता तनूनाम्।। 8।।
卐 इन्द्र^ एषा. न्नेता बृहस्पति- र्दक्षिणा यज्ञः पुर^ एतु सोमः। देवसेनाना.
मभिभञ्जतीना-ञ्जयन्तीनां मरुतो यन्तु मध्ये।। 9।।
卐 इन्द्रस्य वृष्णो वरुणस्य राज्ञ^- आदित्यानां मरुतां शर्ध^ उग्रम्।
महामनसां भुवनच्यवाना-ङ्घोषो देवाना.ञ्जयता. मुदस्थात्।। 10।।
卐 अस्माक. मिन्द्र. स्समृतेषु ध्वजे-ष्वस्माकँ या^ इषव.स्ता^ जयन्तु।
अस्माकँ वीरा^ उत्तरे भव-न्त्वस्मा. न्देवासोऽवता हवेषु।। 11।।-

19-02-05

卐 इद. मुच्छ्रेयोऽवसान. माऽगां- शिवे~ मे द्यावापृथिवी~ अभूताम्।
असपत्नाः प्रदिशो मे भवन्तु- न वै त्वा द्विष्मो अभय.न्नो अस्तु।। 1।।-

19-02-06

卐 यत^ इन्द्र भयामहे- ततो नो अभयङ्कृधि। मघव.न्छग्धि तव त्व.न्न^ ऊतिभि- र्विद्विषो वि मृधो जहि।। 1।।

卐 इन्द्रँ वय. मनूराधं हवामहे-ऽनु राध्यास्म द्विपदा चतुष्पदा। मा न. स्सेना^ अररुषी. रुप गु- र्विषूची. रिन्द्र द्रुहो वि नाशय।। 2।।

卐 इन्द्र.स्त्रातोत वृत्रहा- परस्फानो वरेण्यः। स^ रक्षिता चरमत. स्स^ मध्यत- स्स^ पश्चा.त्स^ पुरस्ता.न्नो अस्तु।। 3।।

卐 उरु.न्नो लोक.मनु नेषि विद्वा-न्त्स्व1(अ)र्य. ज्ज्योति.रभयं स्वस्ति। उग्रा त इन्द्र स्थविरस्य बाहू~- उप क्षयेम शरणा बृहन्ता।। 4।।

卐 अभय.न्नः कर.त्यन्तरिक्ष- मभय. न्द्यावापृथिवी~ उभे~ इमे~। अभयं पश्चा. दभयं पुरस्ता- दुत्तरा. दधरा. दभय.न्नो अस्तु।। 5।।

卐 अभयं मित्रा. दभय. ममित्रा- दभयं ज्ञाता दभयं पुरो यः। अभय. न्नक्त. मभय. न्दिवा न- स्सर्वा^ आशा^ मम मित्रं भवन्तु।। 6।।-

19-02-07

卐 असपत्नं पुरस्ता-त्पश्चा.न्नो अभयङ्कृतम्। सविता मा दक्षिणत^- उत्तरा.न्मा शचीपतिः।। 1।।

卐 दिवो माऽदित्या^ रक्षतु- भूम्या^ रक्ष.न्त्वग्नयः। इन्द्राग्नी~ रक्षतां मा पुरस्ता- दश्विना.वभित. श्शर्म यच्छताम्। तिरश्ची. नघ्न्या^ रक्षतु जातवेदा^- भूतकृतो मे सर्वत. स्सन्तु वर्म।। 2।।-

19-02-08

卐 अग्नि.र्मा पातु वसुभिः पुरस्ता- त्तस्मि.न्क्रमे तस्मि.न्छ्रये- तां पुरं प्रैमि। स^ मा रक्षतु स^ मा गोपायतु - तस्मा आत्मानं परि ददे स्वाहा।। 1।।

卐 वायु र्माऽन्तरिक्षेणैतस्या^ दिशः पातु- तस्मि.न्क्रमे तस्मि.न्छ्रये- तां पुरं प्रैमि। स^ मा रक्षतु स^ मा गोपायतु - तस्मा आत्मानं परि ददे स्वाहा।। 2।।

卐 सोमो मा रुद्रै. र्दक्षिणाया^ दिशः पातु- तस्मि.न्क्रमे तस्मि.न्छ्रये- तां पुरं प्रैमि। स^ मा रक्षतु स^ मा गोपायतु - तस्मा आत्मानं परि ददे स्वाहा।। 3।।

卐 वरुणो माऽदित्यै. रेतस्या^ दिशः पातु- तस्मि.न्क्रमे तस्मि.न्छ्रये- तां पुरं प्रैमि। स^ मा रक्षतु स^ मा गोपायतु - तस्मा आत्मानं परि ददे स्वाहा।। 4।।

卐 सूर्यो मा द्यावापृथिवीभ्यां प्रतीच्या^ दिशः पातु- तस्मिं.न्क्रमे तस्मिं.न्छ्रये - तां पुरं प्रैमि। स^ मा रक्षतु स^ मा गोपायतु - तस्मा आत्मानं परि ददे स्वाहा।। 5।।

卐 आपो मौषधीमती. रेतस्या^ दिशः पान्तु- तासु क्रमे तासु श्रये- तां पुरं प्रैमि। ता^ मा रक्षन्तु ता^ मा गोपायन्तु- ताभ्य^ आत्मानं परि ददे स्वाहा।। 6।।

卐 विश्वकर्मा मा सप्तऋषिभि. रुदीच्या^ दिशः पातु- तस्मिं.न्क्रमे तस्मिं.न्छ्रये- तां पुरं प्रैमि। स^ मा रक्षतु स^ मा गोपायतु - तस्मा आत्मानं परि ददे स्वाहा।। 7।।

卐 इन्द्रो मा मरुत्वा. नेतस्या^ दिशः पातु- तस्मिं.न्क्रमे तस्मिं.न्छ्रये- तां पुरं प्रैमि। स^ मा रक्षतु स^ मा गोपायतु - तस्मा आत्मानं परि ददे स्वाहा।। 8।।

卐 प्रजापति.र्मा प्रजननवा.न्त्सह प्रतिष्ठया ध्रुवाया^ दिशः पातु- तस्मिं.न्क्रमे तस्मिं.न्छ्रये- तां पुरं प्रैमि। स^ मा रक्षतु स^ मा गोपायतु - तस्मा आत्मानं परि ददे स्वाहा।। 9।।

Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 बृहस्पति.र्मा विश्वै.र्देवै. रूर्ध्वाया^ दिशः पातु- तस्मि.न्क्रमे तस्मि.न्छ्रये - तां पुरं प्रैमि। स^ मा रक्षतु स^ मा गोपायतु - तस्मा आत्मानं परि ददे स्वाहा।। 10।-

19-02-09

卐 अग्नि.न्ते वसुवन्त.मृच्छन्तु। ये माऽघायवः प्राच्या^ दिशोऽभिदासान्।।।

卐 वायु.न्ते3(ए)ऽन्तरिक्षवन्त.मृच्छन्तु। ये माऽघायव^ एतस्या^ दिशोऽभिदासान्।। 2।।

卐 सोम.न्ते रुद्रवन्त.मृच्छन्तु। ये माऽघायवो दक्षिणस्या^ दिशोऽभिदासान्।। 3।।

卐 वरुण.न्त आदित्यवन्त. मृच्छन्तु। ये माऽघायव^ एतस्या दिशोऽभिदासान्।। 4।।

卐 सूर्य.न्ते द्यावापृथिवीवन्त. मृच्छन्तु। ये माऽघायवः प्रतीच्या^ दिशोऽभिदासान्।। 5।।

卐 अप.स्त ओषधीमतीर् ऋच्छन्तु। ये माऽघायव^ एतस्या^ दिशोऽभिदासान्।। 6।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 विश्वकर्माण.न्ते सप्तऋषिवन्त. मृच्छन्तु। ये माऽघायव^ उदीच्या^ दिशोऽभिदासान्।। 7।।

卐 इन्द्र.न्ते मरुत्वन्त. मृच्छन्तु। ये माऽघायव^ एतस्या^ दिशोऽभिदासान्।। 8।।

卐 प्रजापति.न्ते प्रजननवन्त. मृच्छन्तु। ये माऽघायवो ध्रुवाया^ दिशोऽभिदासान्।। 9।।

卐 बृहस्पति.न्ते विश्वदेववन्त. मृच्छन्तु। ये माऽघायव^ ऊर्ध्वाया^ दिशोऽभिदासान्।। 10।।-

19-02-10

卐 मित्रः पृथिव्योदक्राम-त्तां पुरं प्रणयामि वः। ता.मा विशत- तां प्र विशत- सा व.श्शर्म च वर्म च यच्छतु।। 1।।

卐 वायु. रन्तरिक्षेणोदक्राम-त्तां पुरं प्रणयामि वः। ता.मा विशत- तां प्र विशत- सा व.श्शर्म च वर्म च यच्छतु।। 2।।

卐 सूर्यो दिवोदक्राम-त्तां पुरं प्रणयामि वः। ता.मा विशत- तां प्र विशत- सा व.श्शर्म च वर्म च यच्छतु।। 3।।

卐 चन्द्रमा^ नक्षत्रै रुदक्राम-त्तां पुरं प्रणयामि वः। ता.मा विशत- तां प्र विशत- सा व.श्शर्म च वर्म च यच्छतु।। 4।।

卐 सोम^ ओषधीभि. रुदक्राम-त्तां पुरं प्रणयामि वः। ता.मा विशत- तां प्र विशत- सा व.श्शर्म च वर्म च यच्छतु।। 5।।

卐 यज्ञो दक्षिणाभि. रुदक्राम-त्तां पुरं प्रणयामि वः। ता.मा विशत- तां प्र विशत- सा व.श्शर्म च वर्म च यच्छतु।। 6।।

卐 समुद्रो नदीभि. रुदक्राम-त्तां पुरं प्रणयामि वः। ता.मा विशत- तां प्र विशत- सा व.श्शर्म च वर्म च यच्छतु।। 7।।

卐 ब्रह्म ब्रह्मचारिभि. रुदक्राम-त्तां पुरं प्रणयामि वः। ता.मा विशत- तां प्र विशत- सा व.श्शर्म च वर्म च यच्छतु।। 8।।

卐 इन्द्रो वीर्ये3(ए)णोदक्राम-त्तां पुरं प्रणयामि वः। ता.मा विशत- तां प्र विशत- सा व.श्शर्म च वर्म च यच्छतु।। 9।।

卐 देवा^ अमृतेनोदक्रामं-स्तां पुरं प्रणयामि वः। ता.मा विशत- तां प्र विशत- सा व.श्शर्म च वर्म च यच्छतु।। 10।।

卐 प्रजापति꠸ प्रजाभि. रुदक्राम-त्तां पुरं प्रणयामि वः। ता.मा विशत- तां प्र विशत- सा व.श्शर्म च वर्म च यच्छतु।। 11।।-

19-02-11

卐 अप न्यधुः पौरुषेयँ वधं य-मिन्द्राग्नी~ धाता सविता बृहस्पतिः। सोमो राजा वरुणो अश्विना यमः- पूषाऽस्मा.न्परि पातु मृत्योः।। 1।।

卐 यानि चकार भुवनस्य य.स्पतिः- प्रजापति. र्मातरिश्वा प्रजाभ्यः। प्रदिशो यानि वसते दिशश्च- तानि मे वर्माणि बहुलानि सन्तु।। 2।।

卐 यत्ते तनू.ष्वनह्यन्त- देवा^ द्युराजयो देहिनः। इन्द्रो यच्चक्रे वर्म- तदस्मा.न्पातु विश्वतः।। 3।।

卐 वर्म मे द्यावापृथिवी~ वर्माऽह.र्वर्म सूर्यः। वर्म मे विश्वे देवाः क्र-न्मा मा प्राप.त्प्रतीचिका।। 4।।

## नवदश काण्डे तृतीयोऽनुवाकः

19-03-01

卐 गायत्र्यु1(उ)ष्णि.गनुष्टु.ब्बृहती- पङ्क्ति. स्त्रिष्टुब्जगत्यै।। 1।।-

19-03-02

卐 आङ्गिरसाना. माद्यैः पञ्चानुवाकै. स्स्वाहा।। 1।।

卐 षष्ठाय स्वाहा।। 2।।

卐 सप्तमाऽष्टमाभ्यां स्वाहा।। 3।।

卐 नीलनखेभ्य. स्स्वाहा।। 4।।

卐 हरितेभ्य. स्स्वाहा।। 5।।

卐 क्षुद्रेभ्य. स्स्वाहा।। 6।।

卐 पर्यायिकेभ्य. स्स्वाहा।। 7।।

卐 प्रथमेभ्य. श्शङ्खेभ्य. स्स्वाहा।। 8।।

卐 द्वितीयेभ्य. श्शङ्खेभ्य. स्स्वाहा।। 9।।

卐 तृतीयेभ्य. श्शङ्खेभ्य. स्स्वाहा।। 10।।

卐 उपोत्तमेभ्य. स्स्वाहा।। 11।।

卐 उत्तमेभ्य. स्स्वाहा।। 12।।

卐 उत्तरेभ्य. स्स्वाहा।। 13।।

卐 ऋषिभ्य. स्स्वाहा।। 14।।

卐 शिखिभ्य. स्स्वाहा।। 15।।

卐 गणेभ्य. स्स्वाहा।। 16।।

卐 महागणेभ्य. स्स्वाहा।। 17।।

卐 सर्वेभ्योऽङ्गिरोभ्यो विदगणेभ्य. स्स्वाहा।। 18।।

卐 पृथक्सहस्राभ्यां स्वाहा।। 19।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 ब्रह्मणे स्वाहा।। 20।।

卐 ब्रह्मज्येष्ठा सम्भृता वीर्याणि- ब्रह्माऽग्रे ज्येष्ठ. न्दिव.मा ततान। भूतानां ब्रह्मा प्रथमोत जज्ञे- तेनाऽर्हति ब्रह्मणा स्पर्धितु.ङ्कः।। 21।।-

19-03-03

卐 आथर्वणाना.ञ्चतुर्ऋचेभ्य. स्स्वाहा।। 1।।

卐 पञ्चर्चेभ्य. स्स्वाहा।। 2।।

卐 षड्ऋचेभ्य. स्स्वाहा।। 3।।

卐 सप्तर्चेभ्य. स्स्वाहा।। 4।।

卐 अष्टर्चेभ्य. स्स्वाहा।। 5।।

卐 नवर्चेभ्य. स्स्वाहा।। 6।।

卐 दशर्चेभ्य. स्स्वाहा।। 7।।

卐 एकादशर्चेभ्य. स्स्वाहा।। 8।।

卐 द्वादशर्चेभ्य. स्स्वाहा।। 9।।

卐 त्रयोदशर्चेभ्य. स्स्वाहा।। 10।।

卐 चतुर्दशर्चेभ्य. स्स्वाहा।। 11।।

卐 पञ्चदशर्चेभ्य. स्स्वाहा।। 12।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 षोडशर्चेभ्य. स्स्वाहा।। 13।।

卐 सप्तदशर्चेभ्य. स्स्वाहा।। 14।।

卐 अष्टादशर्चेभ्य. स्स्वाहा।। 15।।

卐 एकोनविंशति. स्स्वाहा।। 16।।

卐 विंशति. स्स्वाहा।। 17।।

卐 महत्काण्डाय स्वाहा।। 18।।

卐 तृचेभ्य. स्स्वाहा।। 19।।

卐 एकर्चेभ्य. स्स्वाहा।। 20।।

卐 क्षुद्रेभ्य. स्स्वाहा।। 21।।

卐 एकानृचेभ्य. स्स्वाहा।। 22।।

卐 रोहितेभ्य. स्स्वाहा।। 23।।

卐 सूर्याभ्यां स्वाहा।। 24।।

卐 व्रात्याभ्यां स्वाहा।। 25।।

卐 प्राजापत्याभ्यां स्वाहा।। 26।।

卐 विषासह्यै स्वाहा।। 27।।

卐 मङ्गलिकेभ्य. स्स्वाहा।। 28।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 नक्षत्रकल्पाय स्वाहा।। 29।।

卐 शान्तिकल्पाय स्वाहा।। 30।।

卐 वैतानकल्पाय स्वाहा।। 31।।

卐 आङ्गिरसकल्पाय स्वाहा।। 32।।

卐 संहिताविधये स्वाहा।। 33।।

卐 ब्रह्मणे स्वाहा।। 34।।

卐 ब्रह्मज्येष्ठा सम्भृता वीर्याणि- ब्रह्माऽग्रे ज्येष्ठ.न्दिव. माततान। भूतानां ब्रह्मा प्रथमोत जज्ञे- तेनाऽर्हति ब्रह्मणा स्पर्धितु.ङ्कः।। 35।।-

19-03-04

卐 येन देवं सवितारं- परि देवा^ अधारयन्न्। तेनेमं ब्रह्मणस्पते- परि राष्ट्राय धत्तन।। 1।।

卐 परीम. मिन्द्र. मायुषे- महे क्षत्राय धत्तन। यथैन.ञ्जरसे नया- ज्ज्योक्क्षत्रेऽधि जागरत्।। 2।।

卐 परीमं सोम. मायुषे- महे श्रोत्राय धत्तन। यथैन.ञ्जरसे नया- ज्ज्योक् श्रोत्रेऽधि जागरत्।। 3।।

卐 परि धत्त धत्त नो वर्चसेम-ञ्जरामृत्यु.ङ्कृणुत दीर्घ.मायुः। बृहस्पतिः प्राऽयच्छ.द्वास^- एत.त्सोमाय राज्ञे परिधातवा उ।। 4।।

卐 जरां सु गच्छ परि धत्स्व वासो- भवा गृष्टीना. मभिशस्तिपा^ उ। शतञ्च जीव शरदः पुरूची^- रायश्च पोष. मुपसँव्ययस्व।। 5।।

卐 परीदँ वासो अधिथा. स्स्वस्तये-ऽभू. र्वापीना. मभिशस्तिपा^ उ। शतञ्च जीव शरदः पुरूची- र्वसूनि चारु.र्वि भजासि जीवन्न्।। 6।।

卐 योगेयोगे तवस्तरँ- वाजेवाजे हवामहे। सखाय^ इन्द्र.मूतये।। 7।।

卐 हिरण्यवर्णो अजर. स्सुवीरो- जरामृत्युः प्रजया सँ विशस्व। तदग्नि.राह तदु सोम^ आह- बृहस्पति. स्सविता तदिन्द्रः।। 8।।-

19-03-05

卐 अश्रान्तस्य त्वा मनसा- युनज्मि प्रथमस्य च। उत्कूल. मुद्वहो भ-वोदुह्य प्रति धावतात्।। 1।।-

19-03-06

卐 अग्नेः प्रजातं परि यद्धिरण्य- ममृत. न्दध्रे अधि मर्त्येषु। य^ एन.द्वेद स^ इ.देन. मर्हति- जरामृत्यु. र्भवति यो बिभर्ति।। 1।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

卐 यद्धिरण्यं सूर्येण सुवर्ण- प्रजावन्तो मनवः पूर्व ईषिरे। तत्त्वा चन्द्रँ वर्चसा सं सृज-त्यायुष्मा. न्भवति यो बिभर्ति।। 2।।

卐 आयुषे त्वा वर्चसे -त्वौजसे च बलाय च। यथा हिरण्यतेजसा-विभासासि जनाँ अनु।। 3।।

卐 यद्वेद राजा वरुणो- वेद देवो बृहस्पतिः। इन्द्रो यद्वृत्रहा वेद- तत्त आयुष्यं भुव- त्तत्ते वर्चस्यं भुवत्।। 4।।

## ॐ नवदश काण्डे चतुर्थोऽनुवाकः

19-04-01

卐 गोभि.ष्ट्वा पा.त्वृषभो- वृषा त्वा पातु वाजिभिः। वायु.ष्ट्वा ब्रह्मणा पा.-त्विन्द्र.स्त्वा पा.त्विन्द्रियैः।। 1।।

卐 सोम.स्त्वा पा.त्वोषधीभि- र्नक्षत्रैः पातु सूर्यः। माद्भ्य.स्त्वा चन्द्रो वृत्रहा-वातः प्राणेन रक्षतु।। 2।।

卐 तिस्रो दिव. स्तिस्रः पृथिवी- स्त्री.ण्यन्तरिक्षाणि चतुर. स्समुद्रान्। त्रिवृतं स्तोम. न्त्रिवृत. आप^ आहु- स्ता.स्त्वा रक्षन्तु त्रिवृता त्रिवृद्भिः।। 3।।

卐 त्री.न्नाकां. स्त्री.न्त्समुद्रां- स्त्री.न्ब्रध्नां- स्त्री.न्वैष्टपान्। त्री.न्मातरिश्वन. स्त्री.न्त्सूर्या- न्गोप्तॄ. न्कल्पयामि ते।। 4।।

卐 घृतेन त्वा समुक्षा-म्यग्न आज्येन वर्धयन्न्। अग्ने. श्चन्द्रस्य सूर्यस्य- मा प्राणं मायिनो दभन्न्।। 5।।

卐 मा वः प्राणं मा वोऽपानं- मा हरो मायिनो दभन्न्। भ्राजन्तो विश्ववेदसो- देवा दैव्येन धावत।। 6।।

卐 प्राणेनाऽग्निं सं सृजति- वातः प्राणेन संहितः। प्राणेन विश्वतोमुखं- सूर्य. न्देवा^ अजनयन्न्।। 7।।

卐 आयुषाऽऽयुःकृता. ञ्जीवा-ऽऽयुष्मा. न्जीव मा मृथाः। प्राणेनाऽत्मन्वता .ञ्जीव- मा मृत्यो. रुदगा^ वशम्।। 8।।

卐 देवाना. न्निहित. न्निधिँ यमिन्द्रो-ऽन्वविन्द. त्पथिभि. र्देवयानैः। आपो हिरण्य.ञ्जुगुपु. स्त्रिवृद्भि- स्ता.स्त्वा रक्षन्तु त्रिवृता त्रिवृद्भिः।। 9।।

卐 त्रयस्त्रिंश.द्देवता.स्त्रीणि च वीर्याणि- प्रियायमाणा^ जुगुपु रप्स्व1(अ)न्तः। अस्मिं.श्चन्द्रे अधि यद्धिरण्य- न्तेनाऽय.ङ्कृणव.द्वीर्याणि।। 10।।

卐 ये देवा^ दिव्येकादश स्थ- ते देवासो हवि.रिद.ञ्जुषध्वम्।। 11।।

卐 ये देवा^ अन्तरिक्ष एकादश स्थ- ते देवासो हवि.रिद.ञ्जुषध्वम्।। 12।।

卐 ये देवाः पृथिव्या. मेकादश स्थ- ते देवासो हवि.रिद.ञ्जुषध्वम्।। 13।।

卐 असपत्नं पुरस्ता- त्पश्चा.न्नो अभय.ङ्कृतम्। सविता मा दक्षिणत^-उत्तरा.न्मा शचीपतिः।। 14।।

卐 दिवो माऽदित्या^ रक्षन्तु- भूम्या^ रक्ष.न्त्वग्नयः। इन्द्राग्नी~ रक्षतां मा पुरस्ता- दश्विना.वभित. श्शर्म यच्छताम्। तिरश्ची. नघ्न्या^ रक्षतु जातवेदा-भूतकृतो मे सर्वत. स्सन्तु वर्म।। 15।।-

19-04-02

卐 इमं बध्नामि ते मणि- न्दीर्घायुत्वाय तेजसे। दर्भं सपत्नदम्भन- न्द्विषत. स्तपनं हृदः।। 1।।

卐 द्विषत. स्तापय.न्हृद- श्शत्रूणा. न्तापय.न्मनः। दुर्हार्द. स्सर्वा.स्त्व. न्दर्भ- घर्म^ इवाभी.न्त्सन्तापयन्न्।। 2।।

卐 घर्म^ इवाभितप. न्दर्भ- द्विषतो नितपन्मणे। हृद. स्सपत्नानां भि.-न्धीन्द्रऽइव विरुजं बलम्।। 3।।

卐 भिन्द्धि दर्भ सपत्नानां- हृदय. न्द्विषतां मणे। उद्य.न्त्वच.मिव भूम्या.-श्शिर^ एषाँ वि पातय।। 4।।

卐 भिन्द्धि दर्भ सपत्ना.न्मे- भिन्द्धि मे पृतनायतः। भिन्द्धि मे सर्वा.न्दुर्हार्दो- भिन्द्धि मे द्विषतो मणे।। 5।।

卐 छिन्द्धि दर्भ सपत्ना.न्मे- छिन्द्धि मे पृतनायतः। छिन्द्धि मे सर्वा.न्दुर्हार्दे- श्छिन्द्धि मे द्विषतो मणे।। 6।।

卐 वृश्च दर्भ सपत्ना.न्मे- वृश्च मे पृतनायतः। वृश्च मे सर्वा न्दुर्हार्दो- वृश्च मे द्विषतो मणे।। 7।।

卐 कृन्त दर्भ सपत्ना.न्मे- कृन्त मे पृतनायतः। कृन्त मे सर्वा.न्दुर्हार्दे- कृन्त मे द्विषतो मणे।। 8।।

卐 पिंश दर्भ सपत्ना.न्मे- पिंश मे पृतनायतः। पिंश मे सर्वा.न्दुर्हार्दे- पिंश मे द्विषतो मणे।। 9।।

卐 विध्य दर्भ सपत्ना.न्मे- विध्य मे पृतनायतः। विध्य मे सर्वा.न्दुर्हार्दो- विध्य मे द्विषतो मणे।।-

19-04-03

卐 निक्ष दर्भ सपत्ना.न्मे- निक्ष मे पृतनायतः। निक्ष मे सर्वा.न्दुर्हार्दो- निक्ष मे द्विषतो मणे।। 1।।

卐 तृन्द्धि दर्भ सपत्नां न्मे- तृन्द्धि मे पृतनायतः। तृन्द्धि मे सर्वां न्दुर्हार्दे-स्तृन्द्धि मे द्विषतो मणे।। 2।।

卐 रुन्द्धि दर्भ सपत्नां न्मे- रुन्द्धि मे पृतनायतः। रुन्द्धि मे सर्वां न्दुर्हार्दो-रुन्द्धि मे द्विषतो मणे।। 3।।

卐 मृण दर्भ सपत्नां न्मे- मृण मे पृतनायतः। मृण मे सर्वां न्दुर्हार्दो- मृण मे द्विषतो मणे।। 4।।

卐 मन्थ दर्भ सपत्नां न्मे- मन्थ मे पृतनायतः। मन्थ मे सर्वां न्दुर्हार्दो- मन्थ मे द्विषतो मणे।। 5।।

卐 पिण्ड्ढि दर्भ सपत्नां न्मे- पिण्ड्ढि मे पृतनायतः। पिण्ड्ढि मे सर्वां न्दुर्हार्दः-पिण्ड्ढि मे द्विषतो मणे।। 6।।

卐 ओष दर्भ सपत्नां न्मे- ओष मे पृतनायतः। ओष मे सर्वां न्दुर्हार्द- ओष मे द्विषतो मणे।। 7।।

卐 दह दर्भ सपत्नां न्मे- दह मे पृतनायतः। दह मे सर्वां न्दुर्हार्दो- दह मे द्विषतो मणे।। 8।।

卐 जहि दर्भ सपत्नां न्मे- जहि मे पृतनायतः। जहि मे सर्वां न्दुर्हार्दो- जहि मे द्विषतो मणे।। 9।।-

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

19-04-04

卐 यत्ते दर्भ जरामृत्यु- श्शतँ वर्मसु वर्म ते। तेनेमँ वर्मिण.ङ्कृत्वा- सपत्ना.
न्जहि वीर्यैः।। 1।।

卐 शत.न्ते दर्भ वर्माणि- सहस्रँ वीर्याणि ते। त.मस्मै विश्वे त्वा.न्देवा^-
जरसे भर्तवा अदुः।। 2।।

卐 त्वा.माहु. र्दैव वर्म- त्वा.न्दर्भ ब्रह्मण.स्पतिम्। त्वा.मिन्द्रस्याऽऽहु. र्वर्म-
त्वं राष्ट्राणि रक्षसि।। 3।।

卐 सपत्नक्षयण. न्दर्भ- द्विषत स्तपनं हृदः। मणि.ङ्क्षत्रस्य वर्धन-
न्तनूपान.ङ्कृणोमि ते।। 4।।

卐 यत्समुद्रो अभ्यक्रन्द- त्पर्जन्यो विद्युता सह। ततो हिरण्ययो बिन्दु-
स्ततो दर्भो अजायत।। 5।।-

19-04-05

卐 औदुम्बरेण मणिना- पुष्टिकामाय वेधसा। पशूनां सर्वेषां स्फाति-ङ्गोष्ठे मे
सविता करत्।। 1।।

卐 यो नो अग्नि. र्गार्हपत्यः- पशूना मधिपा^ असत्। औदुम्बरो वृषा
मणि- स्सं मा सृजतु पुष्ट्या।। 2।।

卐 करीषिणीं फलवतीं- स्वधा. मिरा.ञ्च नो गृहे। औदुम्बरस्य तेजसा-धाता पुष्टि. न्दधातु मे।। 3।।

卐 यद्द्विपाच्च चतुष्पाच्च- या.न्यन्नानि ये रसाः। गृहे3(ए)ऽह. न्त्वेषां भूमानं-बिभ्र. दौदुम्बरं मणिम्।। 4।।

卐 पुष्टिं पशूनां परि जग्रभाऽह-ञ्चतुष्पदा. न्द्विपदाँ यच्च धान्यम्। पयः पशूनां रस. मोषधीनां- बृहस्पति. स्सविता मे नि यच्छात्।। 5।।

卐 अहं पशूना. मधिपा^ असानि- मयि पुष्टं पुष्टपति. र्दधातु। मह्य. मौदुम्बरो मणि- र्द्रविणानि नि यच्छतु।। 6।।

卐 उप मौदुम्बरो मणिः- प्रजया च धनेन च। इन्द्रेण जिन्वितो मणि- रा माऽग.न्त्सह वर्चसा।। 7।।

卐 देवो मणि. स्सपत्नहा- धनसा^ धनसातये। पशो. रन्नस्य भूमान-ङ्गवां स्फाति. न्नियच्छतु।। 8।।

卐 यथाऽग्रे त्वँ वनस्पते- पुष्ट्या सह जज्ञिषे। एवा धनस्य मे स्फाति-मा दधातु सरस्वती।। 9।।

卐 आ मे धनं सरस्वती- पय.स्स्फातिञ्च धान्यम्। सिनीवाल्यु1(उ)पा ऽऽवहा-दय. ञ्चौदुम्बरो मणिः।। 10।। (सिनिवी.ल्युपा)?

卐 त्वं मणीना. मधिपा^ वृषाऽसि- त्वयि पुष्टं पुष्टपति. र्जजान। त्वयीमे वाजा^ द्रविणानि- सर्वौदुम्बर. स्स^ त्व.मस्म.त्सहस्वा-ऽऽरा. दराति. ममति.ङ्क्षुधञ्च।। 11।।

卐 ग्रामणी.रसि ग्रामणी. रुत्थाया-ऽभिषिक्तोऽभि मा सिञ्च वर्चसा। तेजोऽसि तेजो मयि धारया-ऽधि रयि.रसि रयिं मे धेहि।। 12।।

卐 पुष्टि.रसि पुष्ट्या मा समङ्ग्धि- गृहमेधी गृहपतिं मा कृणु। औदुम्बर. स्स^ त्व.मस्मासु धेहि- रयिञ्च न.स्सर्ववीर. न्नियच्छ- राय.स्पोषाय प्रति मुञ्चे अह.न्त्वाम्।। 13।।

卐 अय. मौदुम्बरो मणि- र्वीरो वीराय बध्यते। स^ न.स्सनिं मधुमती.ङ्कृणोतु- रयि.ञ्चन स्सर्ववीर. न्नियच्छात्।। 14।।-

19-04-06

卐 शतकाण्डो दुश्च्यवन- स्सहस्रपर्ण^ उत्तिरः। दर्भो य^ उग्र^ ओषधि- स्त.न्ते बध्ना.म्यायुषे।। 1।।

卐 नाऽस्य केशा.न्प्र वपन्ति- नोरसि ताड. माघ्नते। यस्मा अच्छिन्नपर्णेन- दर्भेण शर्म यच्छति।। 2।।



Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 दिवि ते तूल.मोषधे- पृथिव्या.मसि निष्ठितः। त्वया सहस्रकाण्डेना-ऽयुः प्र वर्धयामहे।। 3।।

卐 तिस्रो दिवो अत्यतृण- त्तिस्र^ इमाः पृथिवी.रुत। त्वयाऽहं. न्दुर्हार्दो जिह्वा-न्नितृणद्मि वचांसि।। 4।।

卐 त्व.मसि सहमानो-ऽह.मस्मि सहस्वान्। उभौ सहस्वन्तौ भूत्वा-सपत्ना.न्सहिषीवहि।। 5।।

卐 सहस्व नो अभिमातिं- सहस्व पृतनायतः। सहस्व सर्वा.न्दुर्हार्द-स्सुहार्दो मे बहू.न्कृधि।। 6।।

卐 दर्भेण देवजातेन- दिविष्टम्भेन शश्व.दित्। तेनाऽहं शश्वतो जनाऽ-असनं सनवानि च।। 7।।

卐 प्रियं मा दर्भ कृणु- ब्रह्मराजन्याभ्यां- शूद्राय चाऽर्याय च। यस्मै च कामयामहे- सर्वस्मै च विपश्यते।। 8।।

卐 यो जायमानः पृथिवी. मदृंह-द्यो अस्तभ्ना. दन्तरिक्ष. न्दिवञ्च। यं बिभ्रत. न्ननु पाप्मा विवेद- स^ नोऽयं दर्भो वरुणो दिवाऽकः।। 9।।

卐 सपत्नहा शतकाण्ड.स्सहस्वा- नोषधीनां प्रथम. स्संबभूव। स^ नोऽयं दर्भः परि पातु विश्वत- स्तेन साक्षीय पृतनाः पृतन्यतः।। 10।।-

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

19-04-07

卐 सहस्त्रार्घ. श्शतकाण्डः पयस्वा- नपा. मग्नि. र्वीरुधां राजसूयम्। स नोऽयं दर्भः परि पातु विश्वतो- देवो मणि. रायुषा सं सृजाति नः।। 1।।

卐 घृता. दुल्लुप्तो मधुमा. न्पयस्वा- न्भूमिदृंहो ऽच्युत.श्च्यावयिष्णुः। नुद.न्त्सपत्ना. नधरांश्च कृण्व- न्दर्भाऽऽरोह महता. मिन्द्रियेण।। 2।।

卐 त्वं भूमि. मत्येष्योजसा- त्वँ वेद्यां सीदसि चारु. रध्वरे। त्वां पवित्र. मृषयोऽभरन्त- त्वं पुनीहि दुरिता.न्यस्मत्।। 3।।

卐 तीक्ष्णो राजा विषासही- रक्षोहा विश्वचर्षणिः। ओजो देवानां बल. मुग्र. मेत-त्तन्ते बध्नामि जरसे स्वस्तये।। 4।।

卐 दर्भेण त्व.ङ्कृणव.द्वीर्याणि- दर्भं बिभ्र.दात्मना मा व्यथिष्ठाः। अतिष्ठाया वर्चसाऽधाऽन्या- न्त्सूर्य इवाऽऽभाहि प्रदिश.श्चतस्त्रः।। 5।।

## नवदश काण्डे पञ्चमोऽनुवाकः

19-05-01

卐 जङ्गिडोऽसि जङ्गिडो- रक्षिताऽसि जङ्गिडः। द्विपा. च्चतुष्पा. दस्माकं- सर्वं रक्षतु जङ्गिडः।। 1।।

卐 या गृत्स्य.स्त्रिपञ्चाशी.-श्शतं कृत्याकृतश्च ये। सर्वा. न्विनक्तु तेजसो-ऽरसा.न्जङ्गिड. स्करत्।।।

卐 अरसं कृत्रिम. न्नाद- मरसा. स्सप्त विस्त्रसः। अपेतो जङ्गिडा.मति-मिषु.मस्तेव शातय।। 3।।

卐 कृत्यादूषण^ एवाय- मथो~ अरातिदूषणः। अथो~ सहस्वा.न्जङ्गिडः-प्र ण^ आयूंषि तारिषत्।। 4।।

卐 स^ जङ्गिडस्य महिमा- परि णः पातु विश्वतः। विष्कन्धँ येन सासह-संस्कन्ध. मोज^ ओजसा।। 5।।

卐 त्रिष्ट्वा देवा^ अजनय- न्निष्ठितं भूम्या. मधि। तमु त्वाऽङ्गिरा^ इति-ब्राह्मणाः पूर्व्या^ विदुः।। 6।।

卐 न त्वा पूर्वा^ ओषधयो- न त्वा तरन्ति या नवाः। विबाध^ उग्रो जङ्गिडः- परिपाण. स्सुमङ्गलः।। 7।।

卐 अथोपदान भगवो- जङ्गिडाऽमितवीर्य। पुरा त उग्रा ग्रसत- उपेन्द्रो वीर्य. न्ददौ।। 8।।

卐 उग्र^ इत्ते वनस्पत- इन्द्र^ ओज्मान. मादधौ। अमीवा. स्सर्वा. श्चातय-न्जहि रक्षां.स्योषधे।। 9।।

卐 आशरीकँ विशरीकं- बलासं पृष्ट्यामयम्। तक्मानँ विश्वशारद- मरसा. न्जङ्गिड.स्करत्।।-

19-05-02

卐 इन्द्रस्य नाम गृह्णन्त^- ऋषयो जङ्गिड.न्ददुः। देवा^ य.ञ्चक्रु भेषज- मग्रे विष्कन्धदूषणम्।। 1।।

卐 स^ नो रक्षतु जङ्गिडो- धनपालो धनेव। देवा^ य.ञ्चक्रु. ब्राह्मणाः- परिपाण. मरातिहम्।। 2।।

卐 दुर्हार्द. स्संघोर.ञ्चक्षुः- पापकृत्वान. माऽगमम्। तांस्त्वं सहस्रचक्षो- प्रतीबोधेन नाशय- परिपाणोऽसि जङ्गिडः।। 3।।

卐 परि मा दिवः परि मा पृथिव्याः- पर्यन्तरिक्षा.त्परि मा वीरुद्भ्यः। परि मा भूता.त्परि मोत भव्या- द्दिशोदिशो जङ्गिडः पा.त्वस्मान्।।।

卐 य ऋष्णवो देवकृता^- य^ उतो ववृतेऽन्यः। सर्वा.स्ता.न्विश्वभेषजो- ऽरसा. न्जङ्गिड. स्करत्।। 5।।-

19-05-03

卐 शतवारो अनीनश-द्यक्ष्मा.त्रक्षांसि तेजसा। आरोह.न्वर्चसा सह- मणि.र्दुर्णामचातनः।। 1।।

卐 शृङ्गाभ्यां रक्षो नुदते- मूलेन यातुधान्यः। मध्येन यक्ष्मं बाधते- नैनं पाप्माऽति तत्रति।। 2।।

卐 ये यक्ष्मासो अर्भका^- महान्तो ये च शब्दिनः। सर्वा.न्दुर्णामहा मणि- श्शतवारो अनीनशत्।। 3।।

卐 शतँ वीरा. नजनय- च्छतँ यक्ष्मा. नपावपत्। दुर्णाम्न. स्सर्वा.न्हत्वा-ऽव रक्षांसि धूनुते।। 4।।

卐 हिरण्यशृङ्ग^ ऋषभ- श्शातवारो अयं मणिः। दुर्णाम्न. स्सर्वा.स्तृड्वा-ऽव रक्षां.स्यक्रमीत्।। 5।।

卐 शत.मह. न्दुर्णाम्नीना-ङ्गन्धर्वाप्सरसां शतम्। शतं शश्वन्वतीनां- शतवारेण वारये।। 6।।-

19-05-04

卐 इदँ वर्चो अग्निना दत्त. माऽग- न्भर्गो यश. स्सह^ ओजो वयो बलम्। त्रयस्त्रिंश.द्यानि च वीर्याणि- ता.न्यग्निः प्र ददातु मे।। 1।।

卐 वर्च^ आ धेहि मे तन्वा3(आं)- सह^ ओजो वयो बलम्। इन्द्रियाय त्वा कर्मणे वीर्याय- प्रति गृह्णामि शतशारदाय।। 2।।

卐 ऊर्जे त्वा बलाय- त्वौजसे सहसे त्वा। अभिभूयाय त्वा राष्ट्रभृत्याय-
पर्यूहामि शतशारदाय।। 3।।

卐 ऋतुभ्य.ष्ट्वाऽर्तवेभ्यो- माद्भ्य. स्संवत्सरेभ्यः। धात्रे विधात्रे समृधे-
भूतस्य पतये यजे।। 4।।-

19-05-05

卐 न तँ यक्ष्मा^ अरुन्धते- नैनं शपथो अश्नुते। यं भेषजस्य गुल्गुलो.-
स्सुरभि. र्गन्धो अश्नुते।। 1।।

卐 विष्वञ्च.स्तस्मा.द्यक्ष्मा^- मृगा^ अश्वा^ इवेरते। यद्गुल्गुलु सैन्धवँ-
य.द्वाऽप्यसि समुद्रियम्।। 2।।

卐 उभयो. रग्रभ. न्नामा-ऽस्मा अरिष्टतातये।। 3।।-

19-05-06

卐 ऐतु देव.स्त्रायमाणः- कुष्ठो हिमवत.स्परि। तक्मानं सर्व.न्नाशय- सर्वाश्च
यातुधान्यः।। 1।।

卐 त्रीणि ते कुष्ठ नामानि- नद्यमारो नद्यारिषः। नद्यायं पुरुषो रिषत्। यस्मै
परिब्रवीमि त्वा- सायंप्रात. रथो~ दिवा।। 2।।

卐 जीवला नाम ते माता- जीवन्तो नाम ते पिता। नद्यायं पुरुषो रिषत्।
यस्मै परिब्रवीमि त्वा- सायंप्रात. रथो~ दिवा।। 3।।

卐 उत्तमो अस्योषधीना- मनड्वा न्जगता.मिव- व्याघ्र. श्वपदामिव।
नद्यायं पुरुषो रिषत्। यस्मै परिब्रवीमि त्वा- सायंप्रात. रथो~ दिवा।। 4।।

卐 त्रि.श्शाम्बुभ्यो अङ्गिरेभ्य- स्त्रि.रादित्येभ्य.स्परि। त्रि.र्जातो विश्वदेवेभ्यः।
स^ कुष्ठो विश्वभेषज- स्साकं सोमेन तिष्ठति। तक्मानं सर्व. न्नाशय- सर्वाश्च
यातुधान्यः।। 5।।

卐 अश्वत्थो देवसदन- स्तृतीयस्या. मितो दिवि। तत्राऽमृतस्य चक्षण-
न्ततः कुष्ठो अजायत। स^ कुष्ठो विश्वभेषज- स्साकं सोमेन तिष्ठति।
तक्मानं सर्व. न्नाशय- सर्वाश्च यातुधान्यः।। 6।।

卐 हिरण्ययी नौ.रचर- द्धिरण्यबन्धना दिवि। तत्राऽमृतस्य चक्षण- न्ततः
कुष्ठो अजायत। स^ कुष्ठो विश्वभेषज- स्साकं सोमेन तिष्ठति। तक्मानं सर्व.
न्नाशय- सर्वाश्च यातुधान्यः।। 7।।

卐 यत्र नाव.प्रभ्रंशनँ- यत्र हिमवत. श्शिरः। तत्राऽमृतस्य चक्षण- न्ततः
कुष्ठो अजायत। स^ कुष्ठो विश्वभेषज- स्साकं सोमेन तिष्ठति। तक्मानं
सर्व.न्नाशय- सर्वाश्च यातुधान्यः।। 8।।

卐 यन्त्वा वेद पूर्व^ इक्ष्वाको- यँ वा त्वा कुष्ठ काम्यः। यँ वा वसो~ य.मात्स्य-स्तेनाऽसि विश्वभेषजः।। 10।।

卐 शीर्षशोक. न्तृतीयकं- सदन्दि. र्यश्च हायनः। तक्मानँ विश्वधावी-र्याऽधराञ्चं परा सुव।। 10।।-

19-05-07

卐 यन्मे छिद्रं मनसो यच्च वाच- स्सरस्वती मन्युमन्त.ञ्जगाम। विश्वै. स्तद्देवै. स्सह सँविदान- स्स.न्दधातु बृहस्पतिः।। 1।।

卐 मा न^ आपो मेधां- मा ब्रह्म प्र मथिष्टन। सुष्यदा यूयं स्यन्दध्व-मुपहूतोऽहं सुमेधा^ वर्चस्वी।। 2।।

卐 मा नो मेधां मा नो दीक्षां- मा नो हिंसिष्टँ यत्तपः। शिवा न श्शं स.-न्त्वायुषे शिवा^ भवन्तु मातरः।। 3।।

卐 या नः पीपर. दश्विना- ज्योतिष्मती तम.स्तिरः। ता.मस्मे~ रासता. मिषम्।। 4।।-

19-05-08

卐 भद्र.मिच्छन्त^ ऋषय. स्स्वर्विद- स्तपो दीक्षा. मुपनिषेदु. रग्रे। ततो राष्ट्रं बल मोजश्च जात- न्तदस्मै देवा^ उपसन्नमन्तु।। 1।।-

19-05-09

卐 ब्रह्म होता ब्रह्म यज्ञा^- ब्रह्मणा स्वरवो मिताः। अध्वर्यु.र्ब्रह्मणो जातो-
ब्रह्मणोऽन्तर्हितं हविः।। 1।।

卐 ब्रह्म स्त्रुचो घृतवती- र्ब्रह्मणा वेदि.रुद्धिता। ब्रह्म यज्ञस्य तत्त्वञ्च-
ऋत्विजो ये हविष्कृतः। शमिताय स्वाहा।। 2।।

卐 अंहोमुचे प्र भरे मनीषा. मा-सुत्राव्णे सुमति. मावृणानः। इम.मिन्द्र प्रति
हव्य.ङ्गृभाय- सत्या. स्सन्तु यजमानस्य कामाः।। 3।।

卐 अंहोमुचँ वृषभँ यज्ञियानाँ- विराजन्तं प्रथम. मध्वराणाम्। अपा. न्नपात.
मश्विना हुवे धिय^- इन्द्रियेण त इन्द्रिय. न्दत्त. मोजः।। 4।।-

19-05-10

卐 यत्र ब्रह्मविदो यान्ति- दीक्षया तपसा सह। अग्नि.र्मा तत्र नय-
त्वग्नि.र्मेधा^ दधातु मे। अग्नये स्वाहा।। 1।।

卐 यत्र ब्रह्मविदो यान्ति- दीक्षया तपसा सह। वायु.र्मा तत्र नयतु- वायुः
प्राणा.न्दधातु मे। वायवे स्वाहा।। 2।।

卐 यत्र ब्रह्मविदो यान्ति- दीक्षया तपसा सह। सूर्यो मा तत्र नयतु- चक्षु.
स्सूर्यो दधातु मे। सूर्याय स्वाहा।। 3।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 यत्र ब्रह्मविदो यान्ति- दीक्षया तपसा सह। चन्द्रो मा तत्र नयतु-
मन.श्चन्द्रो दधातु मे। चन्द्राय स्वाहा।। 4।।

卐 यत्र ब्रह्मविदो यान्ति- दीक्षया तपसा सह। सोमो मा तत्र नयतु- पय.
स्सोमो दधातु मे। सोमाय स्वाहा।। 5।।

卐 यत्र ब्रह्मविदो यान्ति- दीक्षया तपसा सह। इन्द्रो मा तत्र नयतु-
बल.मिन्द्रो दधातु मे। इन्द्राय स्वाहा।। 6।।

卐 यत्र ब्रह्मविदो यान्ति- दीक्षया तपसा सह। आपो मा तत्र नय-त्वमृतं
मोप तिष्ठतु। अद्भ्य. स्स्वाहा।। 7।।

卐 यत्र ब्रह्मविदो यान्ति- दीक्षया तपसा सह। ब्रह्मा मा तत्र नयतु- ब्रह्मा
ब्रह्म दधातु मे। ब्रह्मणे स्वाहा।-

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

19-05-11

卐 आयुषोऽसि प्रतरणँ- विप्रं भेषज. मुच्यसे। तदाञ्जन त्वं शन्ताते-
श.मापो अभय.ङ्कृतम्।। 1।।

卐 यो हरिमा जायान्यो-ऽङ्गभेदो विसल्पकः। सर्व.न्ते यक्ष्म. मङ्गेभ्यो- बहि
र्निर्ह.न्त्वाञ्जनम्।। 2।।

卐 आञ्जनं पृथिव्यां जातं- भद्रं पुरुषजीवनम्। कृणो.त्वप्रमायुकं- रथजूति.
मनागसम्।।

卐 प्राण प्राण. न्त्रायस्वा-ऽसो~ असवे मृड। निर्ऋते निर्ऋत्या^ नः-
पाशेभ्यो मुञ्च।। 4।।

卐 सिन्धो. र्गर्भोऽसि- विद्युतां पुष्पम्। वातः प्राण. स्सूर्य.श्चक्षु-
र्दिव.स्पयः।। 5।।

卐 देवाञ्जन त्रैककुद- परि मा पाहि विश्वतः। न त्वा तर.न्त्योषधयो- बाह्याः
पर्वतीया^ उत।।

卐 वी3(ई)दं मध्य. मवाऽसृप- द्रक्षोहाऽमीवचातनः। अमीवा. स्सर्वा.
श्चातय-न्नाशय. दभिभा^ इतः।। 7।।

卐 बह्वि3(इ)दं राज.न्वरुणा-ऽनृत.माह पूरुषः। तस्मा.त्सहस्रवीर्य मुञ्च नः
पर्यंहसः।। 8।।

卐 यदापो अघ्न्या^ इति- वरुणेति यदूचिम। तस्मा.त्सहस्रवीर्य- मुञ्च नः
पर्यंहसः।।।

卐 मित्रश्च त्वा वरुणश्चा-ऽनुप्रेयतु.राञ्जन। तौ त्वाऽनुगत्य दूरं- भोगाय
पुन.रोहतुः।।

19-05-12

卐 ऋणा.दृण.मिव सन्नय- कृत्या.ङ्कृत्याकृतो गृहम्। चक्षुर्मन्त्रस्य दुर्हार्दः पृष्टी.रपि श्रृणाऽञ्जन।। 1।।

卐 यदस्मासु दुष्वप्न्यँ- यद्गोषु यच्च नो गृहे। अनामग.स्तञ्च दुर्हार्दः- प्रियः प्रति मुञ्चताम्।। 2।।

卐 अपा.मूर्ज ओजसो वावृधान- मग्ने. र्जात. मधि जातवेदसः। चतुर्वीरं पर्वतीयँ यदाञ्जनं- दिशः प्रदिशः कर. दि.च्छिवा.स्ते।। 3।।

卐 चतुर्वीरं बध्यत आञ्जन.न्ते- सर्वा दिशो अभया.स्ते भवन्तु। ध्रुव. स्तिष्ठासि सवितेव चाऽर्य- इमा विशो अभि हरन्तु ते बलिम्।। 4।।

卐 आक्ष्वैकं मणि.मेक.ङ्कृणुष्व- स्नाह्येकेनाऽपिबैक. मेषाम्। चतुर्वीरं नैर्ऋतेभ्य. श्चतुर्भ्यो- ग्राह्या बन्धेभ्यः परि पा.त्वस्मान्।।।

卐 अग्नि.र्माऽग्निनाऽवतु- प्राणायाऽपानायाऽऽयुषे वर्चस- ओजसे तेजसे स्वस्तये सुभूतये स्वाहा।। 6।।

卐 इन्द्रो मेन्द्रियेणाऽवतु- प्राणायाऽपानायाऽऽयुषे वर्चस- ओजसे तेजसे स्वस्तये सुभूतये स्वाहा।। 7।।

卐 सोमो॑ मा॒ सौम्ये॑नाऽवतु- प्रा॒णाया॑ऽपा॒नायाऽऽयु॑षे॒ वर्च॑स॒ ओज॑से॒ तेज॑से स्व॒स्तये॑ सुभू॒तये॒ स्वाहा॑।। 8।।

卐 भगो॑ मा॒ भगे॑नाऽवतु- प्रा॒णाया॑ऽपा॒नायाऽऽयु॑षे॒ वर्च॑स॒- ओज॑से॒ तेज॑से स्व॒स्तये॑ सुभू॒तये॒ स्वाहा॑।। 9।।

卐 म॒रुतो॑ मा ग॒णै॑रवतु- प्रा॒णाया॑ऽपा॒नायाऽऽयु॑षे॒ वर्च॑स॒- ओज॑से॒ तेज॑से स्व॒स्तये॑ सुभू॒तये॒ स्वाहा॑।। 10।।

## नवदश काण्डे षष्ठोऽनुवाकः

19-06-01

卐 प्र॒जाप॑ति.ष्ट्वाऽबध्ना. त्प्र॒थम- मस्तृ॑तँ वी॒र्या॑य॒ कम्। तत्ते॑ बध्ना॒.म्यायु॑षे॒ वर्च॑स॒ ओज॑से च॒ बला॑य॒ चा-ऽस्तृ॑त.स्त्वा॒ऽभि र॑क्षतु।। 1।।

卐 ऊ॒र्ध्व. स्ति॑ष्ठतु॒ रक्ष॒.न्नप्र॑मा॒द् मस्तृ॒तेमं- मा त्वा॑ द॒भ. न्प॒णयो॑ यातु॒धानाः॑। इन्द्र॑^ इव॒ दस्यू॒.नव॑ धूनुष्व पृत॒न्यत- स्सर्वा॒.न्छत्रू॒.न्विष॑ह॒स्वा-ऽस्तृ॑त.स्त्वा॒ऽभि र॑क्षतु।। 2।।

卐 श॒त.ञ्च॒न प्र॒हर॑न्तो- नि॒घ्नन्तो॒ न त॑स्ति॒रे। तस्मि॒.न्निन्द्र॒ꣳ पर्य॑दत्त॒- चक्षु॑ꣳ प्रा॒ण. मथो॒~ बल॒- मस्तृ॑त.स्त्वा॒ऽभि र॑क्षतु।। 3।।

卐 इन्द्रस्य त्वा वर्मणा परि धापयामो- यो देवाना. मधिराजो बभूव। पुन.स्त्वा देवा॑ प्रणयन्तु सर्वे-ऽस्तृत.स्त्वाऽभि रक्षतु।। 4।।

卐 अस्मि.न्मणा.वेकशतँ वीर्याणि- सहस्रं प्राणा^ अस्मि.न्नस्तृते। व्याघ्र. श्शत्रू. नभितिष्ठ सर्वान्- यस्त्वा पृतन्या. दधर. स्सो अ-स्त्वस्तृत.स्त्वाऽभि रक्षतु।। 5।।

卐 घृता. दुल्लुप्तो मधुमा. न्पयस्वा- न्त्सहस्रप्राण. श्शतयोनि. र्वयोधाः। शम्भूश्च मयोभू श्चोर्जस्वांश्च पयस्वां- श्चाऽस्तृत.स्त्वाऽभि रक्षतु।। 6।।

卐 यथा त्व.मुत्तरोऽसो- असपत्न. स्सपत्नहा। सजाताना. मसद्वशी- तथा त्वा सविता कर- दस्तृत.स्त्वाऽभि रक्षतु।। 7।।-

19-06-02

卐 आ रात्रि पार्थिवं रज॑- पितु. रप्रायि धामभिः। दिव. स्सदांसि बृहती वि तिष्ठस- आ त्वेषँ वर्तते तमः।। 1।।

卐 न यस्या॑ पार. न्ददृशे न योयुव- द्विश्व.मस्या. न्निविशते य.देजति। अरिष्टास.स्त उर्वि तमस्वति- रात्रि पार. मशीमहि- भद्रे पार. मशीमहि।। 2।।

卐 ये ते रात्रि नृचक्षसो- द्रष्टारो नवति.र्नव। अशीति. स्स.न्त्यष्टा- उतो~ ते सप्त सप्ततिः।। 3।।

卐 षष्टिश्च षद्व रेवति- पञ्चाश.त्पञ्च सुम्नयि। चत्वार. श्चत्वारिंशच्च- त्रयस्त्रिंशच्च वाजिनि।। 4।।

卐 द्वौ च ते विंशतिश्च ते- रात्र्येकादशाऽवमाः। तेभि.र्नो अद्य पायुभि-र्नु पाहि दुहित. र्दिवः।। 5।।

卐 रक्षा माकि.र्नो अघशंस^ ईशत- मा नो दुश्शंस^ ईशत। मा नो अद्य गवां स्तेनो- माऽवीनाँ वृक^ ईशत।। 6।।

卐 माऽश्वानां भद्रे तस्करो- मा नृणाँ यातुधान्यः। परमेभिः पथिभि- स्तेनो धावतु तस्करः। परेण दत्वती रज्जुः- परेणाऽघायु. रर्षतु।। 7।।

卐 अध रात्रि तृष्टधूम- मशीर्षाण. महि.ङ्कृणु। हनू~ वृकस्य जम्भया-स्तेन त.न्द्रुपदे जहि।। 8।।

卐 त्वयि रात्रि वसामसि- स्वपिष्यामसि जागृहि। गोभ्यो न.श्शर्म यच्छा- ऽश्वेभ्यः पुरुषेभ्यः।। 9।।-

19-06-03

卐 अथो~यानि च ?य.स्स्मा ह- यानि चाऽन्तः परीणहि। तानि ते परि दद्मसि।। 1।।

卐 रात्रि मात. रुषसे नः- परि देहि। उषा^ नो अह्ने परि ददा-त्वह. स्तुभ्यँ विभावरि।। 2।।

卐 यत्कि.ञ्चेदं पतयति- यत्किञ्चेदं सरीसृपम्। यत्किञ्च पर्वतायाऽसत्त्व-न्तस्मा.त्त्वं रात्रि पाहि नः।। 3।।

卐 सा पश्चा.त्पाहि सा पुर- स्सोत्तरा. दधरा. दुत। गोपाय नो विभावरि-स्तोतार.स्त इह स्मसि।। 4।।

卐 ये रात्रि. मनुतिष्ठन्ति- ये च भूतेषु जाग्रति। पशू.न्ये सर्वा.न्रक्षन्ति- ते न^ आत्मसु जाग्रति- ते नः पशुषु जाग्रति।। 5।।

卐 वेद् वै रात्रि ते नाम- घृताची नाम वा असि। तान्त्वां भरद्वाजो वेद- सा नो वित्तेऽधि जाग्रति।। 6।।-

19-06-04

卐 इषिरा योषा युवति. र्दमूना^- रात्री देवस्य सवितु. र्भगस्य। अश्वक्षभा सुहवा सम्भृतश्री- रापप्रौ द्यावापृथिवी~ महित्वा।। 1।।

卐 अति विश्वा. न्यरुह.द्गम्भीरो- वर्षिष्ठ. मरुहन्त श्रविष्ठाः। उशती रात्र्यनु-
सा भद्राऽभि तिष्ठते- मित्र^ इव स्वधाभिः।। 2।।

卐 वर्यें वन्दे सुभगे सुजात- आजग. न्रात्रि सुमना^ इह स्याम्।
अस्मां.स्त्रायस्व नर्याणि जाता- अथो~ यानि गव्यानि पुष्ट्या।। 3।।

卐 सिंहस्य रात्र्युशती पींषस्य- व्याघ्रस्य द्वीपिनो वर्च^ आ ददे। अश्वस्य
ब्रध्नं पुरुषस्य मायुं- पुरु रूपाणि कृणुषे विभाती।। 4।।

卐 शिवां रात्रि.मनु सूर्यञ्च- हिमस्य माता सुहवा नो अस्तु। अस्य स्तोमस्य
सुभगे नि बोध- येन त्वा वन्दे विश्वासु दिक्षु।। 5।।

卐 स्तोमस्य नो विभावरि- रात्रि राजेव जोषसे। असाम सर्ववीरा^- भवाम
सर्ववेदसो- व्युच्छन्ती. रनूषसः।। 6।।

卐 शम्या ह नाम दधिषे- मम दिप्सन्ति ये धना। रात्री हि ता.नसुतपा-
य.स्स्तेनो न विद्यते- यत्पुन.र्न विद्यते।। 7।।

卐 भद्राऽसि रात्रि चमसो न विष्टो- विष्व.ङ्गोरूपँ युवति. र्बिभर्षि। चक्षुष्मती
मे उशती वपूंषि- प्रति त्व.न्दिव्या न क्षाम.मुक्थाः।। 8।।

卐 यो अद्य स्तेन^ आय-त्यघायु.र्मर्त्यो रिपुः। रात्री तस्य प्रतीत्य- प्र
ग्रीवाः प्र शिरो हनत्।।।

卐 प्र पादौ न यथाऽयति- प्र हस्तौ न यथाऽशिषत्। यो मलिम्लु. रुपायति- स^ संपिष्टो अपायति। अपायति स्वपायति- शुष्के स्थाणा.वपायति।।

19-06-05

卐 अध रात्रि तृष्टधूम- मशीर्षाण. महि.ङ्कृणु। अक्षौ वृकस्य निर्जह्या- स्तेन त.न्द्रुपदे जहि।।।

卐 ये ते रात्र्यनड्वाह- स्तीक्ष्णश्रृङ्गा. स्स्वाशवः। तेभि.र्नो अद्य पारया-ऽति दुर्गाणि विश्वहा।। 2।।

卐 रात्रिंरात्रि. मरिष्यन्त-स्तरेम तन्वा वयम्। गम्भीर. मप्लवा^इव- न तरेयु. ररातयः।।

卐 यथा शाम्याकः प्रपत-न्नपवा. न्नानुविद्यते। एवा रात्रि प्र पातय- यो अस्मा॰ अभ्यघायति।।

卐 अप स्तेनँ वासो- गो~अज. मुत तस्करम् । अथो~ यो अर्वत. श्शिरो-ऽभिधाय निनीषति।। 5।।

卐 यद्द्या रात्रि सुभगे- विभज.न्त्ययो वसु। यदेत. दस्मा.न्भोजय- यथेदन्या. नुपायसि।। 6।।

卐 उषसे नः परि देहि- सर्वा.न्रात्र्यनागसः। उषा^ नो अह्ने आ भजा.-
दह.स्तुभ्यँ विभावरि।। 7।।-

🏺 19-06-06

卐 अयुतोऽह. मयुतो म आत्मा-ऽयुतं मे चक्षु. रयुतं मे श्रोत्र- मयुतो मे प्राणोऽयुतो मेऽपानो-ऽयुतो मे व्यानोऽयुतोऽहं सर्वः।। 1।।-

卐 देवस्य त्वा सवितुः प्रसवे-ऽश्विनो. र्बाहुभ्यां- पूष्णो हस्ताभ्यां प्रसूत^ आ रभे।। 1।।-

🏺 19-06-07

卐 काम. स्तदग्रे समवर्तत- मनसो रेतः प्रथमँ यदासीत्। स^ काम कामेन बृहता सयोनी- रायस्पोषँ यजमानाय धेहि।। 1।।

卐 त्वङ्काम सहसाऽसि प्रतिष्ठितो- विभु र्विभावा सख आ सखीयते। त्व.मुग्रः पृतनासु सासहि- स्सह^ ओजो यजमानाय धेहि।। 2।।

卐 दूरा. च्चकमानाय- प्रतिपाणायाऽक्षये। आऽस्मा अशृण्व. न्नाशाः-
कामेनाऽजनय.न्त्स्वः।। 3।।

卐 कामेन मा काम^ आग-न्हृदया. द्धृदयं परि। यदमीषा.मदो मन-
स्तदैतूप मा.मिह।। 4।।

卐 यत्काम कामयमाना॑- इद.ङ्कृण्मसि ते हविः। तन्न.स्सर्वं समृध्यता-मथैतस्य हविषो वीहि स्वाहा।। 5।।-

19-06-08

卐 कालो अश्वो वहति सप्तरश्मि- स्सहस्राक्षो अजरो भूरिरेताः। त.मा रोहन्ति कवयो विपश्चित- स्तस्य चक्रा भुवनानि विश्वा।। 1।।

卐 सप्त चक्रा.न्वहति काल॑ एष॑- सप्तास्य नाभी. रमृत. न्न्वक्षः। स॑ इमा विश्वा भुवना.न्यञ्ज- त्काल. स्स॑ ईयते प्रथमो नु देवः।। 2।।

卐 पूर्णꣳ कुम्भोऽधि काल॑ आहित- स्तँ वै पश्यामो बहुधा नु सन्तम्। स॑ इमा विश्वा भुवनानि प्रत्य-ङ्काल. न्तमाहुꣳ परमे व्योमन्न्।।।

卐 स॑ एव सं भुवना न्याऽभर-त्स॑ एव सं भुवनानि पर्यैत्। पिता स.न्नभव. त्पुत्र॑ एषा- न्तस्मा.द्वै नाऽन्य.त्पर.मस्ति तेजः।। 4।।

卐 कालोऽमू. न्दिव. मजनय- त्काल॑ इमाꣳ पृथिवी.रुत। काले ह भूतं भव्य-ञ्चेषितं ह वि तिष्ठते।। 5।।

卐 कालो भूति. मसृजत- काले तपति सूर्यः। काले ह विश्वा भूतानि- काले चक्षु. र्विपश्यति।। 6।।

卐 काले मनः काले प्राणः- काले नाम समाहितम्। कालेन सर्वा^ नन्द-न्त्यागतेन प्रजा^ इमाः।। 7।।

卐 काले तपः काले ज्येष्ठ-ङ्काले ब्रह्म समाहितम्। कालो ह सर्वस्येश्वरो-यः पिताऽसी. त्प्रजापतेः।। 8।।

卐 तेनेषित.न्तेन जात- न्तदु तस्मि. न्प्रतिष्ठितम्। कालो ह ब्रह्म भूत्वा-बिभर्ति परमेष्ठिनम्।। 9।।

卐 कालः प्रजा^ असृजत- कालो अग्रे प्रजापतिम्। स्वयम्भूः कश्यपः काला- त्तपः काला. दजायत।। 10।।-

19-06-09

卐 काला.दाप. स्समभव- न्काला.द्ब्रह्म तपो दिशः। काले.नोदेति सूर्यः-काले निविशते पुनः।।।

卐 कालेन वातः पवते- कालेन पृथिवी मही। द्यौ.र्मही काल आहिता।।

卐 कालो ह भूतं भव्यञ्च- पुत्रो अजनय.त्पुरा। काला.दृच. स्समभव-न्यजुः काला. दजायत।। 3।।

卐 कालो यज्ञं समैरय- द्देवेभ्यो भाग. मक्षितम्। काले गन्धर्वाप्सरसः-काले लोकाः प्रतिष्ठिताः।। 4।।

卐 कालेऽय. मङ्गिरा देवो-ऽथर्वा चाधि तिष्ठतः। इमञ्च लोकं परमञ्च लोकं-पुण्यांश्च लोका.न्विधृतीश्च पुण्याः। सर्वा.न्लोका. नभिजित्य- ब्रह्मणा काल.स्स^ ईयते परमो नु देवः।। 5।।-

## ꧁ नवदश काण्डे सप्तमोऽनुवाकः

19-07-01

卐 रात्रिंरात्रि. मप्रयातं भरन्तो-ऽश्वायेव तिष्ठते घास. मस्मै। राय.स्पोषेण समिषा मदन्तो- मा ते अग्ने प्रतिवेशा^ रिषाम।। 1।।

卐 या ते वसो. र्वात^ इषु- स्सा त एषा तया नो मृड। राय.स्पोषेण समिषा मदन्तो- मा ते अग्ने प्रतिवेशा^ रिषाम।। 2।।

卐 सायंसाय.ङ्गृहपति.र्नो अग्निः- प्रातःप्रात. स्सौमनसस्य दाता। वसोर्वसो.र्वसुदान^ एधि- वय. न्त्वेन्धाना. स्तन्वं पुषेम।। 3।।

卐 प्रातःप्रात. र्गृहपतिर्नो अग्नि- स्सायंसायं सौमनसस्य दाता। वसोर्वसो.र्वसुदान^ ए-धीन्धाना.स्त्वा शतं हिमा^ ऋधेम।। 4।।

卐 अप.श्चा दग्धान्नस्य भूयासम्। अन्नादायाऽन्नपतये- रुद्राय नमो अग्नये। सभ्य. स्सभां मे पाहि- ये च सभ्या. स्सभासदः।। 5।।

卐 त्व.मिन्द्रा पुरुहूत- विश्व.मायु. व्यश्नवत्। अहरह. र्बलि.मित्ते हरन्तो-ऽश्वायेव तिष्ठते घास.मग्ने।। 6।।-

19-07-02

卐 यमस्य लोका.दध्या बभूविथ- प्रमदा मर्त्या.न्प्र युनक्षि धीरः। एकाकिना सरथँ यासि विद्वा- न्त्स्वप्नं मिमानो असुरस्य योनौ।। 1।।

卐 बन्ध.स्त्वाऽग्रे विश्वचया^ अपश्य- त्पुरा रात्र्या^ जनितो. रेके अह्नि। तत. स्स्वप्नेद.मध्या बभूविथ- भिषग्भ्यो रूप. मपगूहमानः।। 2।।

卐 बृहद्गावाऽसुरेभ्योऽधि देवा- नुपाऽऽवर्तत महिमान. मिच्छन्न्। तस्मै स्वप्नाय दधु. राधिपत्य- न्त्रयस्त्रिंशास. स्स्व.रानशानाः।। 3।।

卐 नैताँ विदुः पितरो नोत देवा^- येषा.ञ्जल्पि. श्चर.त्यन्तरेदम्। त्रिते स्वप्न. मदधु राप्त्ये नर^- आदित्यासो वरुणेनाऽनुशिष्टाः।। 4।।

卐 यस्य क्रूर. मभजन्त दुष्कृतो-ऽस्वप्नेन सुकृतः पुण्य. मायुः। स्व.र्मदसि परमेण बन्धुना- तप्यमानस्य मनसोऽधि जज्ञिषे।। 5।।

卐 विद्म ते सर्वाः परिजाः पुरस्ता- द्विद्म स्वप्न यो अधिपा^ इहा ते। यशस्विनो नो यशसेह पा-ह्यारा.द्विषेभि. रप याहि दूरम्।। 6।।-

19-07-03

卐 यथा कलाँ यथा शफँ- यथर्णं सन्नयन्ति। एवा दुष्वप्यं सर्व-मप्रिये सन्नयामसि।। 1।।

卐 सं राजानो अगु.स्समृणा.न्यगु- स्सङ्कुष्ठा^ अगु. स्सङ्कला^ अगुः। स.मस्मासु यद्दुष्वप्य- न्निर्द्विषते दुष्वप्यं सुवाम।। 2।।

卐 देवानां पत्नीनां गर्भ- यमस्य कर- यो भद्र स्वप्न। स^ मम यः पाप-स्त.द्विषते प्र हिण्मः। मा तृष्टाना.मसि कृष्णशकुने.र्मुखम्।। 3।।

卐 तन्त्वा स्वप्न तथा सँ विद्म- स^ त्वं स्वप्नाश्व^इव- काय मश्व^इव नीनाहम्। अनास्माक. न्देवपीयुं पियारुँ वप- यदस्मासु दुष्वप्यँ यद्गोषु यच्च नो गृहे।।

卐 अनास्माक. स्तद्देवपीयुः पियारु- र्निष्क.मिव प्रति मुञ्चताम्। नवारत्नी. नपमया^- अस्माक. न्ततः परि। दुष्वप्यं सर्व. न्द्विषते निर्दयामसि।। 5।।-

19-07-04

卐 घृतस्य जूति. स्समना सदेवा- सँवत्सरं हविषा वर्धयन्ती। श्रोत्र.ञ्चक्षुः प्राणोऽच्छिन्नो नो अ-स्त्वच्छिन्ना^ वय. मायुषो वर्चसः।। 1।।

卐 उपा॒ऽस्मा. न्प्रा॒णो ह्व॑यता॒- मुप॑ व॒यं प्रा॒णं ह॑वामहे। वर्चो॑ जग्राह पृ॒थि॒व्य॑1(अ॒)न्तरि॑क्षँ॒- वर्च॒. स्सोमो॒ बृह॒स्पति॑. र्वि॒ध॒र्ता।। 2।।

卐 वर्च॑सो॒ द्यावा॑पृथि॒वी~ स॒ङ्ग्रह॑णी~ बभू॒वथु॒- र्वर्चो॑ गृही॒त्वा पृ॑थि॒वी.मनु॒ सञ्च॑रेम। य॒शस॒.ङ्गावो॒ गोप॑ति. मुप॑तिष्ठ.न्त्याय॒ती-र्यशो॑ गृही॒त्वा पृ॑थि॒वी.मनु॒ सञ्च॑रेम।। 3।।

卐 व्र॒ज.ङ्कृ॑णुध्व॒ं स॒ हि वो॑ नृपाणो॒- वर्मा॑ सीव्यध्वं ब॒हु॒ला पृ॒थूनि॑। पुर॑ः कृणुध्व॒. माय॑सी॒. रधृ॑ष्टा॒- मा व॑ स्सुस्रो.च्चमसो दृंहता॒ तम्।। 4।।

卐 य॒ज्ञस्य॒ चक्षु॒ः प्रभृ॑ति॒.र्मुख॑ञ्च- वा॒चा श्रोत्रे॑ण॒ मन॑सा जुहोमि। इ॒मँ य॒ज्ञँ वित॑तँ वि॒श्वक॑र्म॒णा-ऽऽदे॒वा॑ यन्तु सुमन॒स्यमा॑नाः।। 5।।

卐 ये दे॒वाना॑. मृ॒त्विजो॒ ये च॑ य॒ज्ञिया॒- येभ्यो॑ ह॒व्य.क्रि॒यते॑ भाग॒धेय॑म्। इ॒मँ य॒ज्ञं स॒ह पत्नी॑भि॒. रेत्य॒- याव॑न्तो दे॒वा. स्त॑वि॒षा मा॑दयन्ताम्।। 6।।-

19-07-05

卐 त्व.मग्ने॑ व्रत॒पा॑ अ॑सि- दे॒व॑ आ मर्त्ये॒ष्वा। त्वँ य॒ज्ञे.ष्वीड्य॑ः।। 1।।

卐 यद्वो॑ व॒यं प्र॑मि॒नाम॑ व्र॒तानि॑- वि॒दुषा॑. न्देवा॒ अवि॑दुष्टरासः। अ॒ग्नि.ष्ट. द्वि॒श्वा.दा पृ॑णातु वि॒द्वा-न्त्सोम॑स्य॒ यो ब्रा॑ह्म॒णा॑ आवि॒वेश॑।। 2।।

卐 आ देवाना मपि पन्था. मगन्म- यच्छक्नवाम तदनु प्रवोढुम्। अग्नि. र्विद्वा.न्त्स^ यजा-त्स^ इद्धोता सोऽध्वरा-न्त्स^ ऋतू.न्कल्पयाति।। 3।।-

19-07-06

卐 वाङ्म आस- न्नसोः प्राण- श्चक्षु.रक्ष्णो- श्श्रोत्र.ङ्कर्णयोः। अपलिताः केशा^- अशोणा^ दन्ता- बहु बाह्वो.र्बलम्।। 1।।

卐 ऊर्वो.रोजो जङ्घयो- र्जवः पादयोः। प्रतिष्ठा^ अरिष्टानि मे- सर्वात्माऽनिभृष्टः।। 2।।-

19-07-07

卐 तनू. स्तन्वा मे सहे दत- स्सर्व. मायु. रशीय। स्योनं मे सीद- पुरुः पृणस्व- पवमान.स्स्वर्गे।। 1।।-

19-07-08

卐 प्रियं मा कृणु देवेषु- प्रियं राजसु मा कृणु। प्रियं सर्वस्य पश्यत^- उत शूद्र उताऽर्ये।। 1।।-

19-07-09

卐 उत्तिष्ठ ब्रह्मणस्पते- देवा.न्यज्ञेन बोधय। आयुः प्राणं प्रजां पशू- न्कीर्तिं यजमानञ्च वर्धय।। 1।।-

19-07-10

卐 अग्ने समिध. माऽहार्षं- बृहते जातवेदसे। स^ मे श्रद्धाञ्च मेधाञ्च-जातवेदाः प्र यच्छतु।। 1।।

卐 इध्मेन त्वा जातवेद- स्समिधा वर्धयामसि। तथा त्व.मस्मा.न्वर्धय-प्रजया च धनेन च।। 2।।

卐 यदग्ने यानि कानि चि-दा ते दारूणि दध्मसि। सर्व. न्तदस्तु मे शिव-न्तज्जुषस्व यविष्ठ्य।। 3।।

卐 एता.स्ते अग्ने समिध-स्त्व.मिद्ध.स्समिद्भव। आयु. रस्मासु धे-ह्यमृतत्व. माचार्याय।। 4।।-

19-07-11

卐 हरि. स्सुपर्णो दिव. मारुहोऽर्चिषा- ये त्वा दिप्सन्ति दिव. मुत्पतन्तम्। अव ता.ञ्जहि हरसा जातवेदो-ऽबिभ्य. दुग्रोऽर्चिषा दिव.मा रोह सूर्य।। 1।।-

19-07-12

卐 अयोजाला^ असुरा^ मायिनो-ऽयस्मयैः पाशै.रङ्किनो ये चरन्ति। तांस्ते रन्धयामि हरसा जातवेद- स्सहस्रऋष्टि. स्सपत्ना. न्प्रमृण.न्पाहि वज्रः।। 1।।

19-07-13

卐 पश्येम शरद. श्शतम्।। 1।।

卐 जीवेम शरद. श्शतम्।। 2।।

卐 बुध्येम शरद. श्शतम्।। 3।।

卐 रोहेम शरद. श्शतम्।। 4।।

卐 पूषेम शरद. श्शतम्।। 5।।

卐 भवेम शरद. श्शतम्।। 6।।

卐 भूषेम शरद. श्शतम्।। 7।।

卐 भूयसी. श्शरद. श्शतात्।। 8।।-

19-07-14

卐 अव्यस.श्च व्यचस.श्च- बिलँ वि ष्यामि मायया। ताभ्या. मुद्धृत्य वेद-मथ कर्माणि कृण्महे।। 1।।-

19-07-15

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore • SGS

卐 जीवा.स्स्थ जीव्यासं- सर्व. मायु. र्जीव्यासम्।। 1।।

卐 उपजीवा. स्थोपजीव्यासं- सर्व.मायु. र्जीव्यासम्।। 2।।

卐 सञ्जीवा. स्थ सञ्जीव्यासं- सर्व.मायु. र्जीव्यासम्।। 3।।

卐 जीवला.स्स्थ जीव्यासं- सर्व. मायु. र्जीव्यासम्।। 4।

19-07-16

卐 इन्द्र जीव सूर्य जीव- देवा^ जीवा^- जीव्यास. महम्। सर्व. मायु. र्जीव्यासम्।।-

19-07-17

卐 स्तुता मया वरदा वेदमाता- प्र चोदयन्तां पावमानी द्विजानाम्। आयुঃ प्राणं प्रजां पशु-ङ्कीर्तिं. न्द्रविणं ब्रह्मवर्चसम्। मह्य.न्दत्त्वा व्रजत ब्रह्मलोकम्।। 1।।-

19-07-18

卐 यस्मा. त्कोशा. दुदभराम वेद-न्तस्मि.न्नन्त. रव दध्म^ एनम्। कृत.मिष्टं ब्रह्मणो वीर्येण- तेन मा देवा. स्तपसाऽवतेह।। 1।।

# ॐविंशं काण्डम्

## ॐ विंश काण्डे प्रथमोऽनुवाकः

20-01-01

卐 इन्द्रं त्वा वृषभं वयं- सुते सोमे हवामहे। स पाहि मध्वो अन्धसः।।
1।।

卐 मरुतो यस्य हि क्षये- पाथा दिवो विमहसः। स सुगोपातमो जनः।।
2।।

卐 उक्षान्नाय वशाऽन्नाय- सोमपृष्ठाय वेधसे। स्तोमै. र्विधेमाऽग्नये।। 3।।-

20-01-02

卐 मरुतः पोत्रा.त्सुष्टुभ. स्स्वर्का- दृतुना सोमं पिबन्तु।। 1।।

卐 अग्नि. राग्नीध्रा. त्सुष्टुभ. स्स्वर्का- दृतुना सोमं पिबतु।। 2।।

卐 इन्द्रो ब्रह्मा ब्राह्मणा.त्सुष्टुभ. स्स्वर्का- दृतुना सोमं पिबतु।। 3।।

卐 देवो द्रविणोदाः पोत्रा. त्सुष्टुभ. स्स्वर्का- दृतुना सोमं पिबतु।। 4।।-

20-01-03

卐 आ याहि सुषुमा हि त- इन्द्र सोमं पिबा इमम्। एदं बर्हि. स्सदो मम।।
1।।

卐 आ त्वा ब्रह्मयुजा हरी~-वहता.मिन्द्र केशिना। उप ब्रह्माणि न.श्शृणु।।

2।।

卐 ब्रह्माण.स्त्वा वयँ युजा- सोमपा.मिन्द्र सोमिनः। सुतावन्तो हवामहे।।

3।।-

20-01-04

卐 आ नो याहि सुतावतो-ऽस्माकं सुष्टुती.रुप। पिबा सु शिप्रि.न्नन्धसः।।

1।।

卐 आ ते सिञ्चामि कुक्ष्यो- रनु गात्रा वि धावतु। गृभाय जिह्वया मधु।। 2।

卐 स्वादुष्टे अस्तु संसुदे- मधुमा.न्तन्वे3(ए) तव। सोम. श्श.मस्तु ते हृदे।।

3।।-

20-01-05

卐 अय.मु त्वा विचर्षणे- जनी.रिवाऽभि सँवृतः। प्र सोम^ इन्द्र सर्पतु।।

1।।

卐 तुविग्रीवो वपोदर- स्सुबाहु. रन्धसो मदे। इन्द्रो वृत्राणि जिघ्नते।। 2।।

卐 इन्द्र प्रेहि पुर.स्त्वँ- विश्वस्येशान^ ओजसा। वृत्राणि वृत्रह.ञ्जहि।।

3।।

卐 दीर्घ.स्ते अस्त्वङ्कुशो- येना वसु प्रयच्छसि। यजमानाय सुन्वते।। 4।।

卐 अय.न्त इन्द्र सोमो- निपूतो अधि बर्हिषि। एही.मस्य द्रवा पिब। 5।।

卐 शाचिगो शाचिपूजना-ऽयं रणाय ते सुतः। आखण्डल प्र हूयसे।। 6।।

卐 यस्ते श्रृङ्गवृषो नपा-त्प्रणपा.त्कुण्डपाय्यः। न्यस्मि.न्दध्र आ मनः। 7।।-

20-01-06

卐 इन्द्र त्वा वृषभँ वयं- सुते सोमे हवामहे। स^ पाहि मध्वो अन्धसः।। 1।।

卐 इन्द्र क्रतुविदं सुतं- सोमं हर्य पुरुष्टुत। पिबा ऽवृषस्व तातृपिम्।। 2।।

卐 इन्द्र प्र णो धितावानँ- यज्ञँ विश्वेभि. र्देवेभिः। तिर. स्स्तवान विश्पते।।

卐 इन्द्र सोमा. स्सुता^ इमे- तव प्र यन्ति सत्पते। क्षय.ञ्चन्द्रास^ इन्दवः।। 4।।

卐 दधिष्वा जठरे सुतं- सोम.मिन्द्र वरेण्यम्। तव द्युक्षास^ इन्दवः।। 5।।

卐 गिर्वणः पाहि न.स्सुतं- मधो. र्धाराभि.रज्यसे। इन्द्र त्वादात. मि.द्यशः। 6।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham Mysore

卐 अभि द्युम्नानि वनिन^- इन्द्रं सचन्ते अक्षिता। पीत्वी सोमस्य वावृधे।।
7।

卐 अर्वावतो न^ आ गहि- परावतश्च वृत्रहन्न्। इमा जुषस्व नो गिरः। 8।।

卐 यदन्तरा परावत- मर्वावत.ञ्च हूयसे। इन्द्रेह तत^ आ गहि।। 9।।-

☸ 20-01-07

卐 उद्धे.दभि श्रुतामघँ- वृषभ. न्नर्यापसम्। अस्तार. मेषि सूर्य।। 1।।

卐 नव यो नवतिं पुरो- बिभेद बाह्वोजसा। अहिञ्च वृत्रहाऽवधीत्।।।

卐 स^ न^ इन्द्र. श्शिव. स्सखा-ऽश्वाव.द्गोम.द्यवमत्। उरुधारेव दोहते।।
3।।

卐 इन्द्र क्रतुविदं सुतं- सोमं हर्य पुरुष्टुत। पिबाऽऽवृषस्व तातृपिम्।। 4।।-

☸ 20-01-08

卐 एवा पाहि प्रत्नथा मन्दतु त्वा- श्रुधि ब्रह्म वावृधस्वोत गीर्भिः। आवि.
स्सूर्य.ङ्कृणुहि पीपिहीषो- जहि शत्रूँ रभि गा^ इन्द्र तृन्धि।। 1।।

卐 अर्वा.ङेहि सोमकाम.न्त्वाऽऽहु- रयं सुत. स्तस्य पिबा मदाय।
उरुव्यचा^ जठर आ वृषस्व- पितेव न.श्शृणुहि हूयमानः।। 2।।

卐 आपूर्णो अस्य कलश. स्स्वाहा- सेक्तेव कोशं सिसिचे पिबध्यै। समु प्रिया^ आऽववृत्र. न्मदाय- प्रदक्षिणि.दभि सोमास^ इन्द्रम्।। 3।।-

20-01-09

卐 तँ वो दस्म. मृतीषहँ- वसो. र्मन्दान. मन्धसः। अभि वत्स.न्न स्वसरेषु धेनव^- इन्द्र.ङ्गीर्भि. र्नवामहे।। 1।।

卐 द्युक्षं सुदानु. न्तविषीभि रावृत-ङ्गिरि.न्न पुरुभोजसम्। क्षुमन्तँ वाजं शतिनं सहस्त्रिणं- मक्षू गोमन्त. मीमहे।। 2।।

卐 तत्त्वा यामि सुवीर्य- न्तद्ब्रह्म पूर्वचित्तये। येना यतिभ्यो भृगवे धने हिते- येन प्रस्कण्व. माविथ।। 3।।

卐 येना समुद्र. मसृजो मही. रप-स्तदिन्द्र वृष्णि ते शवः। सद्य. स्सो अस्य महिमा न सन्नशे- यङ्क्षोणी. रनुचक्रदे।। 4।।-

20-01-10

卐 उदु त्ये मधुमत्तमा^- गिर. स्स्तोमास^ ईरते। सत्राजितो धनसा^ अक्षितोतयो- वाजयन्तो रथा^इव।। 1।।

卐 कण्वा^इव भृगव. स्सूर्या^इव- विश्व.मि.द्धीत.मानशुः। इन्द्रं स्तोमेभि. र्महयन्त^ आयवः- प्रियमेधासो अस्वरन्न्।। 2।।-

20-01-11

卐 इन्द्रः पूर्भिदाऽतिर. द्दास. मर्कै- र्विदद्वसु. र्दयमानो वि शत्रून्। ब्रह्मजूत. स्तन्वा वावृधानो- भूरिदात्र^ आऽपृण. द्रोदसी~ उभे~।। 1।।

卐 मखस्य ते तविषस्य प्र जूति- मियर्मि वाच. ममृताय भूषन्न्। इन्द्र क्षितीना. मसि मानुषीणाँ- विशा. न्दैवीना. मुत पूर्वयावा।। 2।।

卐 इन्द्रो वृत्र. मवृणो.च्छर्धनीतिः- प्र मायिना. ममिना.द्वर्पणीतिः। अह.न्व्यंस. मुशध.ग्वने-ष्वावि. र्धेना^ अकृणो.द्राम्याणाम्।। 3।।

卐 इन्द्र. स्स्वर्षा^ जनय. न्नहानि- जिगायोशिग्भिः पृतना^ अभिष्टिः। प्रारोचय. न्मनवे केतु. मह्ना- मविन्द. ज्ज्योति.र्बृहते रणाय।। 4।।

卐 इन्द्र.स्तुजो बर्हणा^ आ विवेश- नृव.द्दधानो नर्या पुरूणि। अचेतय.द्धिय^ इमा^ जरित्रे- प्रेमँ वर्ण. मतिर.च्छुक्र. मासाम्।। 5।।

卐 महो महानि पनय.न्त्य-स्येन्द्रस्य कर्म सुकृता पुरूणि। वृजनेन वृजिना.न्त्सं पिपेष- मायाभि. र्दस्यूꣳ रभिभूत्योजाः।। 6।।

卐 युधेन्द्रो मह्ना वरिव.श्चकार- देवेभ्य. स्सत्पति. श्चर्षणिप्राः। विवस्वत. स्सदने अस्य तानि- विप्रा^ उक्थेभिः कवयो गृणन्ति।। 7।।

卐 सत्रासाहँ वरेण्यं सहोदां- ससवांसं स्व.रपश्च देवीः। ससान यः
पृथिवी.न्द्या.मुतेमा- मिन्द्रं मद.न्त्यनु धीरणासः।। 8।।

卐 ससानाऽत्याँ उत सूर्यं ससा-नेन्द्र.स्ससान पुरुभोजस.ङ्गाम्।
हिरण्यय. मुत भोगं ससान- हत्वी दस्यू.न्प्राऽऽर्यँ वर्ण. मावत्।।।

卐 इन्द्र^ ओषधी. रसनो. दहानि- वनस्पतीँ रसनो. दन्तरिक्षम्। बिभेद
वल.न्नुनुदे विवाचो-ऽथाऽभव. द्दमिताऽभिक्रतूनाम्।। 10।।

卐 शुनं हुवेम मघवान. मिन्द्र- मस्मि.न्भरे नृतमँ वाजसातौ। श्रृण्वन्त. मुग्र.
मूतये समत्सु- घ्नन्तँ वृत्राणि सञ्जित.न्धनानाम्।।-

20-01-12

卐 उदु ब्रह्माण्यैरत श्रव-स्येन्द्रं समर्यै महया वसिष्ठ। आ यो विश्वानि
शवसा तता-नोपश्रोता म ईवतो वचांसि।। 1।।

卐 अयामि घोष^ इन्द्र देवजामि- रिरज्यन्त यच्छुरुधो विवाचि। नहि
स्व.मायु. श्चिकिते जनेषु- तानी.दंहां.स्यति पर्ष्यस्मान्।। 2।।

卐 युजे रथ.ङ्गवेषणं हरिभ्या- मुप ब्रह्माणि जुजुषाण.मस्थुः। वि बाधिष्ट स्य
रोदसी~ महि-त्वेन्द्रो वृत्राण्यप्रती जघन्वान्।।।

卐 आप.श्चित्पिप्यु. स्तर्यो 3(ओ) न गावो- नक्ष.न्नृत.ञ्जरितार.स्त इन्द्र।
याहि वायु.र्न नियुतो नो अच्छा- त्वं हि धीभि. र्दयसे वि वाजान्।।।

卐 ते त्वा मदा^ इन्द्र मादयन्तु- शुष्मिण. न्तुविराधस.ञ्जरित्रे। एको देवत्रा
दयसे हि मर्ता-नस्मि.न्छूर सवने मादयस्व।। 5।।

卐 एवे.दिन्द्रँ वृषणँ वज्रबाहुँ- वसिष्ठासो अभ्यर्च.न्त्यर्कैः। स^ न.स्स्तुतो
वीरव.द्धातु गोम- द्यूयं पात स्वस्तिभि.स्सदा नः।। 6।।-

卐 ऋजीषी वज्री वृषभ. स्तुराषा-ड्छुष्मी राजा वृत्रहा सोमपावा। युक्त्वा
हरिभ्या. मुप यास दर्वा-ङ्माध्यन्दिने सवने मत्स.दिन्द्रः। 7।।-

20-01-13

卐 इन्द्रश्च सोमं पिबतं बृहस्पते-ऽस्मि.न्यज्ञे मन्दसाना वृषण्वसू~। आ वाँ
विश.न्त्विन्दव. स्स्वाभुवो-ऽस्मे~ रयिं सर्ववीर. न्नियच्छतम्।। 1।।

卐 आ वो वहन्तु सप्तयो रघुष्यदो- रघुपत्वानः प्र जिगात बाहुभिः। सीदता
ऽऽबर्हि. रुरु व.स्सदस्कृतं- मादयध्वं मरुतो मध्वो अन्धसः।। 2।।

卐 इमं स्तोम मर्हते जातवेदसे- रथ.मिव सं महेमा मनीषया। भद्रा हि नः
प्रमति.रस्य संस-द्यग्ने सख्ये मा रिषामा वयन्तव।। 3।।

卐 ऐभि. रग्ने सरथँ याह्यर्वा-ङ्नारथँ वा विभवो ह्यश्वाः। पत्नीवत. स्त्रिंशतं त्रींश्च देवा- ननुष्वध. मा वह मादयस्व।। 4।। इति प्रथमोऽनुवाकः

## ॐ विंश काण्डे द्वितीयोऽनुवाकः

20-02-01

卐 वय.मु त्वा.मपूर्व्य स्थूर.न्न- कच्चि.द्भरन्तोऽवस्यवः। वाजे चित्रं हवामहे।। 1।

卐 उप त्वा कर्म. न्नूतये स^ नो यु-वोग्र. श्चक्राम यो धृषत्। त्वामि.द्ध्यवितारँ ववृमहे- सखाय^ इन्द्र सानसिम्।। 2।।

卐 यो न^ इद.मिदं पुरा प्र वस्य^- आनिनाय तमु व.स्स्तुषे। सखाय^ इन्द्र.मूतये।। 3।।

卐 हर्यश्वं सत्पति.ञ्चर्षणीसहं- स^ हि ष्मा यो अमन्दत। आ तु न.स्स^ वयति गव्य. मश्व्यं- स्तोतृभ्यो मघवा शतम्।। 4।।-

20-02-02

卐 प्र मंहिष्ठाय बृहते बृहद्रये- सत्यशुष्माय तवसे मतिं भरे। अपा.मिव प्रवणे यस्य दुर्धरं- राधो विश्वायु शवसे अपावृतम्।। 1।।

卐 अध ते विश्व.मनु हास. दिष्टय- आपो निम्नेव सवना हविष्मतः। यत्पर्वते न समशीत हर्यत^- इन्द्रस्य वज्र. श्श्नथिता हिरण्ययः।। 2।।

卐 अस्मै भीमाय नमसा समध्वर- उषो न शुभ्र^ आ भरा पनीयसे। यस्य धाम श्रवसे नामेन्द्रिय-ज्योति. रकारि हरितो नायसे।। 3।।

卐 इमे त इन्द्र ते वयं पुरुष्टुत- ये त्वाऽऽरभ्य चरामसि प्रभूवसो। नहि त्व.दन्यो गिर्वणो गिर. स्सघ-त्क्षोणी.रिव प्रति नो हर्य तद्वचः। 4।।

卐 भूरि त इन्द्र वीर्य1(अ)न्तवस्म-स्यस्य स्तोतु.र्मघव.न्काम. मापृण। अनु ते द्यौ.र्बृहती वीर्यं मम- इयञ्च ते पृथिवी नेम ओजसे।। 5।।

卐 त्वन्त.मिन्द्र पर्वतं महा.मुरुँ- वज्रेण वज्रि.न्पर्वश. श्चकर्तिथ। अवाऽसृजो निवृता. स्सर्तवा अप- स्सत्रा विश्व.न्दधिषे केवलं सहः। 6।-

20-02-03

卐 उदप्रुतो न वयो रक्षमाणा^- वावदतो अभ्रियस्येव घोषाः। गिरिभ्रजो नोर्मयो मदन्तो- बृहस्पति. मभ्य1(अ)र्का^ अनावन्न्।।।

卐 सङ्गोभि. राङ्गिरसो नक्षमाणो- भग^इवे.दर्यमण. न्निनाय। जने मित्रो न दम्पती~ अनक्ति- बृहस्पते वाजयाऽऽशू९ रिवाऽऽजौ।। 2।।

卐 साध्वर्या^ अतिथिनी रिषिरा- स्स्पार्हा. स्सुवर्णा^ अनवद्यरूपाः।
बृहस्पतिः पर्वतेभ्यो वितूर्या^- निर्गा^ ऊपे यवमिव स्थिविभ्यः। 3।।

卐 आप्रुषाय.न्मधुन^ ऋतस्य योनि- मवक्षिप. न्नर्क^ उल्का.मिव द्योः।
बृहस्पति. रुद्धर. न्नश्मनो गा^- भूम्या^ उद्नेव वि त्वचं बिभेद।। 4।।

卐 अप ज्योतिषा तमो अन्तरिक्षा- दुद्र. श्शीपालमिव वात^ आजत्।
बृहस्पति. रनुमृश्या वलस्या-ऽभ्रमिव वात^ आ चक्र आ गाः।। 5।।

卐 यदा वलस्य पीयतो जसुं भे-द्बृहस्पति. रग्नितपोभि. रर्कैः। दद्भि.र्न जिह्वा
परिविष्ट. माद-दावि. र्निधी॰ रकृणो. दुस्त्रियाणाम्।। 6।।

卐 बृहस्पति. रमत हि त्य.दासा- न्नाम स्वरीणां सदने गुहा यत्। आण्डेव
भित्त्वा शकुनस्य गर्भ- मुदुस्त्रियाः पर्वतस्य त्मनाऽऽजत्।।

卐 अश्नाऽपिनद्धं मधु पर्यपश्य- न्मत्स्य.न्न दीन उदनि क्षियन्तम्।
निष्टज्जभार चमस.न्न वृक्षा-द्बृहस्पति. र्विरवेणा विकृत्य। 8।।

卐 सोषा.मविन्द.त्स^ स्व1(अ) स्सो अग्निं- सो अर्केण वि बबाधे तमांसि।
बृहस्पति. र्गोवपुषो वलस्य- निर्मज्जान.न्न पर्वणो जभार।। 9।।

卐 हिमेव पर्णा. मुषिता वनानि- बृहस्पतिनाऽकृपय.द्वलो गाः। अनानुकृत्य
मपुनश्चकार- या.त्सूर्यामासा मिथ^ उच्चरातः।। 10।।

卐 अभि श्याव.न्न कृशनेभि रश्व- न्नक्षत्रेभिः पितरो द्या.मपिंशन्न्।
रात्र्या.न्तमो अदधु. ज्योति रह- न्बृहस्पति. र्भिन.दद्रिं विदद्गाः।। 11।।
卐 इद. मकर्म नमो अभ्रियाय- यः पूर्वी.रन्वानोनवीति। बृहस्पति. स्स^ हि
गोभि. स्सो अश्वै- स्स^ वीरेभि स्स^ नृभि.र्नो वयो धात्।।-

20-02-04

卐 अच्छा म इन्द्रं मतय. स्स्वर्विद- स्सध्रीची. र्विश्वा^ उशती. रनूषत।
परिष्वजन्ते जनयो यथा पतिं- मर्य.न्न शुन्ध्युं मघवान मूतये।। 1।।
卐 न घा त्वद्रि.गप वेति मे मन-स्त्वे~ इत्कामं पुरुहूत शिश्रय। राजेव दस्म
निषदोऽधि बर्हि-ष्यस्मि.न्त्सु सोमेऽवपान. मस्तु ते।। 2।।
卐 विषूवृ.दिन्द्रो अमते. रुत क्षुध- स्स^ इद्रायो मघवा वस्व^ ईशते।
तस्ये.दिमे प्रवणे सप्त सिन्धवो- वयो वर्धन्ति वृषभस्य शुष्मिणः।। 3।।
卐 वयो न वृक्षं सुपलाश. माऽसद-न्त्सोमास^ इन्द्रं मन्दिन. श्चमूषदः।
प्रैषा. मनीकं शवसा दविद्युत- द्विदत्स्व1(अ)र्मनवे ज्योति. रार्यम्।। 4।।
卐 कृत.न्न श्वघ्नी वि चिनोति देवने- सँवर्गँ यन्मघवा सूर्य.ञ्जयत्। न तत्ते
अन्यो अनु वीर्यँ शक-न्न पुराणो मघव. न्नोत नूतनः।। 5।।

卐 विशँविशं मघवा पर्यशायत- जनाना.न्धेना^ अवचाकश.द्वृषा। यस्याऽह शक्र. स्सवनेषु रण्यति- स^ तीव्रै. स्सोमै. स्सहते पृतन्यतः।। 6।।

卐 आपो न सिन्धु. मभि यत्समक्षर-न्त्सोमास^ इन्द्र.ङ्कुल्या^इव ह्रदम्। वर्धन्ति विप्रा^ महो अस्य सादने- यव.न्न वृष्टि. र्दिव्येन दानुना।। 7।।

卐 वृषा न क्रुद्धः पतय.द्रजस्स्वा- यो अर्यपत्नी. रकृणो. दिमा^ अपः। स^ सुन्वते मघवा जीरदानवे-ऽविन्द. ज्ज्योति. र्मनवे हविष्मते।। 8।।

卐 उज्जायतां परशु. र्ज्योतिषा सह- भूया^ ऋतस्य सुदुघा पुराणवत्। वि रोचता. मरुषो भानुना शुचि- स्स्व1(अ)र्ण शुक्रं शुशुचीत सत्पतिः।। 9।।

卐 गोभि.ष्टरेमाऽमति. न्दुरेवाँ- यवेन क्षुधं पुरुहूत विश्वाम्। वयं राजभिः प्रथमा धना-न्यस्माकेन वृजनेना जयेम।। 10।।

卐 बृहस्पति.र्नः परि पातु पश्चा- दुतोत्तरस्मा. दधरा. दघायोः। इन्द्रः पुरस्ता. दुत मध्यतो न-स्सखा सखिभ्यो वरिवः कृणोतु।। 11।।

卐 बृहस्पते युव.मिन्द्रश्च वस्वो- दिव्यस्येशाथे~ उत पार्थिवस्य। धत्तं रयिं स्तुवते कीरये चि-द्यूयं पात स्वस्तिभि.स्सदा नः।। 12।।

## ॐ विंश काण्डे तृतीयोऽनुवाकः

20-03-01

卐 वय.मु त्वा तदिदर्था- इन्द्र त्वायन्त. स्सखायः। कण्वा उक्थेभि. र्जरन्ते।। 1।।

卐 न घे.मन्य. दापपन- वज्रि.न्नपसो नविष्टौ। तवेदु स्तोम.श्चिकेत।। 2।।

卐 इच्छन्ति देवा. स्सुन्वन्त- न्न स्वप्नाय स्पृहयन्ति। यन्ति प्रमाद. मतन्द्राः।। 3।।

卐 वय.मिन्द्र त्वायवो-ऽभि प्र णोनुमो वृषन्न्। विद्धि त्व1(अ)स्य नो वसो~।। 4।।

卐 मा नो निदे च वक्तवे-ऽर्यो रन्धी. रराव्णे। त्वे~ अपि क्रतु.र्मम।। 5।।

卐 त्वँ वर्माऽसि सप्रथः- पुरोयोध.श्च वृत्रहन्न्। त्वया प्रति ब्रुवे युजा।। 6।।-

20-03-02

卐 वार्त्रहत्याय शवसे- पृतनाषाह्याय च। इन्द्र त्वाऽऽवर्तयामसि।। 1।।

卐 अर्वाचीनं सु ते मन- उत चक्षुः श्शतक्रतो। इन्द्र कृण्वन्तु वाघतः।। 2।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 नामानि ते शतक्रतो~- विश्वाभि. र्गीर्भि.रीमहे। इन्द्राऽभिमातिषाह्ये।। 3।।

卐 पुरुष्टुतस्य धामभि- श्शतेन महयामसि। इन्द्रस्य चर्षणीधृतः। 4।।

卐 इन्द्रँ वृत्राय हन्तवे- पुरुहूत.मुप ब्रुवे। भरेषु वाजसातये।। 5।।

卐 वाजेषु सासहि.र्भव- त्वा.मीमहे शतक्रतो~। इन्द्र वृत्राय हन्तवे।। 6।।

卐 द्युम्नेषु पृतनाज्ये- पृत्सु तूर्षु श्रवस्सु च। इन्द्र साक्ष्वाऽभिमातिषु।। 7।।-

20-03-03

卐 शुष्मिन्तम.न्न^ ऊतये- द्युम्निनं पाहि जागृविम्। इन्द्र सोमं शतक्रतो~।। 1।।

卐 इन्द्रियाणि शतक्रतो^- या ते जनेषु पञ्चसु। इन्द्र तानि त आ वृणे।। 2।।

卐 अग.न्निन्द्र श्रवो बृह-द्युम्न.न्दधिष्व दुष्टरम्। उत्ते शुष्म.न्तिरामसि।। 3।।

卐 अर्वावतो न^ आ ग-ह्यथो~ शक्र परावतः। उ लोको यस्ते अद्रिव-इन्द्रेह तत^ आ गहि।। 4।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 इन्द्रो अङ्ग महद्भय- मभी षदप चुच्यवत्। स हि स्थिरो विचर्षणिः।।
5।।

卐 इन्द्रश्च मृळयाति नो- न नः पश्चादघन्नशत्। भद्रं भवाति नः पुरः।।
6।।

卐 इन्द्र आशाभ्यस्परि- सर्वाभ्यो अभयङ्करत्। जेता
शत्रून्विचर्षणिः।। 7।।-

20-03-04

卐 न्यू 3(ऊ)षु वाचं प्र महे भरामहे- गिर इन्द्राय सदने विवस्वतः। नू
चिद्धि रत्नं ससतामिवाऽविद-न्न दुष्टुतिर्द्रविणोदेषु शस्यते।। 1।।

卐 दुरो अश्वस्य दुर इन्द्र गोरसि- दुरो यवस्य वसुन इनस्पतिः।
शिक्षानरः प्रदिवो अकामकर्शन- स्सखा सखिभ्य स्तमिदङ्गृणीमसि।।
2।।

卐 शचीव इन्द्र पुरुकृद्द्युमत्तम- तवेदिद मभितश्चेकिते वसु। अत
स्सङ्गृभ्याऽभिभूत आ भर- मा त्वायतो जरितुः काममूनयीः।। 3।।

卐 एभिर्द्युभि स्सुमना एभि रिन्दुभि- र्निरुन्धानो अमतिङ्गोभि रश्विना।
इन्द्रेण दस्यु न्दरयन्त इन्दुभि- र्युतद्वेषस स्समिषा रभेमहि।। 4।।

卐 समिन्द्र राया समिषा रभेमहि- सँ वाजेभि॰ पुरुश्चन्द्रै. रभिद्युभिः। सन्देव्या प्रमत्या वीरशुष्मया- गोअग्रयाऽश्वावत्या रभेमहि।। 5।।

卐 ते त्वा मदा^ अमद.न्तानि वृष्ण्या- ते सोमासो वृत्रहत्येषु सत्पते। यत्कारवे दश वृत्राण्यप्रति- बर्हिष्मते नि सहस्राणि बर्हयः।। 6।।

卐 युधा युध. मुप घेदेषि धृष्णुया- पुरा पुरं समिदं हंस्योजसा। नम्या^ यदिन्द्र सख्या परावति- निबर्हयो नमुचि. न्नाम मायिनम्।। 7।।

卐 त्व.ङ्करञ्ज.मुत पर्णयँ वधी- स्तेजिष्ठयाऽतिथिग्वस्य वर्तनी। त्वं शता वङ्गृदस्याऽभिन.त्पुरो- ऽनानुद॰ परिषूता^ ऋजिश्वना।। 8।।

卐 त्वमेता.न्जनराज्ञो द्विर्दशा-ऽबन्धुना सुश्रवसोपजग्मुषः। षष्टिं सहस्रा नवति.न्नव श्रुतो- नि चक्रेण रथ्या दुष्पदाऽवृणक्।।।

卐 त्व.माविथ सुश्रवस. न्तवोतिभि- स्तव त्रामभि.रिन्द्र तूर्वयाणम्। त्व.मस्मै कुत्स. मतिथिग्व. मायुं- महे राज्ञे यूने अरन्धनायः।। 10।।

卐 य^ उदृचीन्द्र देवगोपा- स्सखाय.स्ते शिवतमा^ असाम। त्वां स्तोषाम त्वया सुवीरा^- द्राघीय^ आयु॰ प्रतर. न्दधानाः।। 11।।-

20-03-05

卐 अभि त्वा वृषभा सुते- सुतं सृजामि पीतये। तृम्पा व्यश्नुही मदम्।। 1।।

卐 मा त्वा मूरा^ अविष्यवो- मोपहस्वान^ आ दभन्न्। माकीं ब्रह्मद्विषो वनः।। 2।।

卐 इह त्वा गोपरीणसा- महे मन्दन्तु राधसे। सरो गौरो यथा पिब।। 3।।

卐 अभि प्र गोपति-ङ्गिरेन्द्र.मर्च यथा विदे। सूनुं सत्यस्य सत्पतिम्।। 4।।

卐 आ हरय. स्ससृज्रिरे- ऽरुषी.रधि बर्हिषि। यत्राऽभि सन्नवामहे।। 5।।

卐 इन्द्राय गाव^ आशिर- न्दुदुह्रे वज्रिणे मधु। यत्सी.मुपह्वरे विदत्।।-

20-03-06

卐 आ तू न^ इन्द्र मद्र्य-ग्घुवान. स्सोमपीतये। हरिभ्याँ याह्यद्रिवः।। 1।।

卐 सत्तो होता न^ ऋत्विय- स्तिस्तिरे बर्हि.रानुषक्। अयुज्र. न्प्रातरद्रयः।। 2।।

卐 इमा ब्रह्म ब्रह्मवाहꣳ- क्रियन्त आ बर्हि स्सीद। वीहि शूर पुरोळाशम्।। 3।।

卐 रारन्धि सवनेषु ण^- एषु स्तोमेषु वृत्रहन्न्। उक्थेष्विन्द्र गिर्वणः।। 4।।

卐 मतय. स्सोमपा. मुरुं- रिहन्ति शवस.स्पतिम्। इन्द्रँ वत्स.न्न मातरः। 5।।

卐 स^ मन्दस्वा ह्यन्धसो- राधसे तन्वा महे। न स्तोतार. न्निदे करः।। 6।।

卐 वयमिन्द्र त्वायवो- हविष्मन्तो जरामहे। उत त्वमस्मयु. वसो~।।
7।।

卐 मा॒ऽऽरे अस्मद्वि मुमुचो- हरिप्रियाऽर्वाङ् याहि। इन्द्र स्वधावो मत्स्वेह।। 8।।

卐 अर्वाञ्चन्त्वा सुखे रथे- वहतामिन्द्र केशिना। घृतस्नू~ बर्हिरासदे।।
9।।-

20-03-07

卐 उप न.स्सुतमा गहि- सोममिन्द्र गवाशिरम्। हरिभ्याँ यस्ते अस्मयुः।। 1।।

卐 तमिन्द्र मदमा गहि- बर्हिष्ठाङ्ग्रावभि. स्सुतम्। कुविन्न्वस्य तृप्णवः।
2।।

卐 इन्द्रमित्था गिरो ममा-ऽच्छागु. रिषिता^ इतः। आवृते सोमपीतये।।
3।।

卐 इन्द्रं सोमस्य पीतये- स्तोमै.रिह हवामहे। उक्थेभिः कुविदागमत्।।।

卐 इन्द्र सोमा. स्सुता^ इमे- तान्दधिष्व शतक्रतो~। जठरे वाजिनीवसो~।। 5।।

卐 विद्मा हि त्वा धनञ्जयँ- वाजेषु दधृष.ङ्कवे। अधा ते सुम्न.मीमहे।। 6।।

卐 इम.मिन्द्र गवाशिरँ- यवाशिरञ्च नः पिब। आगत्या वृषभि. स्सुतम्।। 7।।

卐 तुभ्ये.दिन्द्र स्व ओक्ये3(ए)- सोम.ञ्चोदामि पीतये। एष रारन्तु ते हृदि।। 8।

卐 त्वां सुतस्य पीतये- प्रत्न.मिन्द्र हवामहे। कुशिकासो अवस्यवः। 9।।-

20-03-08

卐 अश्वावति प्रथमो गोषु गच्छति- सुप्रावी.रिन्द्र मर्त्य.स्तवोतिभिः। तमि.त्पृणक्षि वसुना भवीयसा- सिन्धु. मापो यथाऽभितो विचेतसः।। 1।।

卐 आपो न देवी.रुप यन्ति होत्रिय- मवः पश्यन्ति विततँ यथा रजः। प्राचै. र्देवासः प्रणयन्ति देवयुं- ब्रह्मप्रिय.ञ्जोषयन्ते वरा इव।। 2।।

卐 अधि द्वयो. रदधा उक्थ्य1(अँ) वचो- यतस्रुचा मिथुना या सपर्यतः। असँयत्तो व्रते ते क्षेति पुष्यति- भद्रा शक्ति. र्यजमानाय सुन्वते।। 3।।

卐 आ.दङ्गिराः प्रथम. न्दधिरे वय- इद्धाग्नय. श्शम्या ये सुकृत्यया। सर्वं पणे. स्समविन्दन्त भोजन- मश्वावन्त.ङ्गोमन्त. मापशु.न्नरः।। 4।।

卐 यज्ञै. रथर्वा प्रथमः पथ. स्तते- तत. स्सूर्यो व्रतपा^ वेन^ आऽजनि। आ गा^ आज. दुशना काव्य. स्सचा- यमस्य जात. ममृतँ यजामहे।। 5।।

卐 बर्हि.र्वा यत्स्वपत्याय वृज्यते-ऽर्को वा श्लोक. माघोषते दिवि। ग्रावा यत्र वदति कारु. रुक्थ्य1(अ)- स्तस्ये.दिन्द्रो अभिपित्वेषु रण्यति।। 6।।

卐 प्रोग्रां पीतिँ वृष्ण^ इयर्मि सत्यां- प्रयै सुतस्य हर्यश्व तुभ्यम्। इन्द्र धेनाभि. रिह मादयस्व- धीभि. र्विश्वाभि. श्शच्या गृणानः।। 7।-

20-03-09

卐 योगेयोगे तवस्तरँ- वाजेवाजे हवामहे। सखाय^ इन्द्र.मूतये।। 1।।

卐 आ घा गम.द्यदि श्रव-त्सहस्रिणीभि. रूतिभिः। वाजेभि.रुप नो हवम्।। 2।।

卐 अनु प्रत्नस्यौकसो- हुवे तुविप्रति. न्नरम्। यन्ते पूर्वं पिता हुवे।। 3।।

卐 युञ्जन्ति ब्रध्न. मरुष-ञ्चरन्तं परि तस्थुषः। रोचन्ते रोचना दिवि।। 4।।

卐 युञ्ज.न्त्यस्य काम्या- हरी~ विपक्षसा रथे। शोणा धृष्णू~ नृवाहसा।। 5।।

卐 केतु.ङ्कृण्व. न्नकेतवे- पेशो मर्या^ अपेशसे। समुषद्भि. रजायथाः।। 6।।-

20-03-10

卐 यदिन्द्राऽहँ यथा त्व-मीशीय वस्व^ एक^ इत्। स्तोता मे गोषखा स्यात्।।1।।

卐 शिक्षेय.मस्मै दित्सेयं- शचीपते मनीषिणे। यदह.ङ्गोपति. स्स्याम्।।2।।

卐 धेनुष्ट इन्द्र सूनृता- यजमानाय सुन्वते। गा.मश्वं पिप्युषी दुहे।। 3।।

卐 न ते वर्ताऽस्ति राधस^- इन्द्र देवो न मर्त्यः। यद्दित्ससि स्तुतो मघम्।।4।।

卐 यज्ञ^ इन्द्र. मवर्धय- द्यद्भूमिँ व्यवर्तयत्। चक्राण^ ओपश.न्दिवि।। 5।।

卐 वावृधानस्य ते वयँ- विश्वा धनानि जिग्युषः। ऊति.मिन्द्रा ऽऽवृणीमहे।।6।।-

20-03-11

卐 व्य्1(अ)न्तरिक्ष. मतिर- न्मदे सोमस्य रोचना। इन्द्रो यदभिन.द्वलम्।।1।।

卐 उद्गा^ आज.दङ्गिरोभ्य^- आवि.ष्कृण्व.न्गुहा सतीः। अर्वाञ्च. न्नुनुदे वलम्।। 2।।

卐 इन्द्रे॑ण रोच॒ना दि॒वो- दृ॒ळ्हानि॑ दृंहि॒तानि॑ च। स्थि॒राणि॒ न प॑रा॒णुदे॑।। 3।।

卐 अ॒पा.मू॒र्मि. म॑द.न्नि॒व- स्तोम॑^ इन्द्राऽजिरायते। वि ते॒ मदा॑^ अराजिषुः।। 4।।-

20-03-12

卐 त्वं हि स्तो॑म॒वर्ध॑न॒^- इन्द्राऽस्युक्थ॒वर्ध॑नः। स्तो॒तॄ॒णा. मु॒त भ॑द्र॒कृत्।।।

卐 इन्द्र॒.मि.त्के॒शिना॒ हरी॑~- सोम॒पेया॑य वक्षतः। उप॑ य॒ज्ञं सु॒राध॑सम्।। 2।।

卐 अ॒पां फेने॑न॒ नमु॑चे॒- शिर॑^ इ॒न्द्रोद॑वर्तयः। विश्वा॒^ यदज॑य. स्स्पृधः।। 3।।

卐 मा॒याभि॑.रु॒त्सिसृ॑प्सत॒^- इन्द्र॒ द्या.मा॒रुरु॑क्षतः। अव॒ दस्यू॑ँ रधूनुथाः।। 4।।

卐 अ॒सु॒न्वा.मि॑न्द्र सं॒स॒दँ॒- विषू॑ची॒ँ व्य॑नाशयः। सो॒म॒पा^ उत्त॑रो॒ भव॑न्।। 5।।-

20-03-13

卐 प्र ते महे विदथे शंसिषं हरी~- प्र ते वन्वे वनुषो हर्यतं मदम्। घृत.न्न यो हरिभि.श्चारु सेचत- आ त्वा विशन्तु हरिवर्पस.ङ्गिरः।। 1।।

卐 हरिं हि योनि.मभि ये समस्वर-न्हिन्वन्तो हरी~ दिव्यँ यथा सदः। आ यं पृणन्ति हरिभि.र्न धेनव^- इन्द्राय शूषं हरिवन्त.मर्चत।। 2।।

卐 सो अस्य वज्रो हरितो य^ आयसो- हरि.र्निकामो हरि.रा गभस्त्योः। द्युम्नी सुशिप्रो हरिमन्युसायक - इन्द्रे नि रूपा हरिता मिमिक्षिरे।। 3।।

卐 दिवि न केतु.रधि धायि हर्यतो - विव्यच.द्वज्रो हरितो न रंह्या। तुददहिं हरिशिप्रो य^ आयस - स्सहस्रशोका^ अभव.द्धरिंभरः।। 4।।

卐 त्वन्त्व.मह.र्यथा उपस्तुतः - पूर्वेभि.रिन्द्र हरिकेश यज्वभिः। त्वं हर्यसि तव विश्व.मुक्थ्य1 - (अ)मसामि राधो हरिजात हर्यतम्।। 5।।-

20-03-14

卐 ता वज्रिणं मन्दिनं स्तोम्यं मद- इन्द्रं रथे वहतो हर्यता हरी~। पुरूण्यस्मै सवनानि हर्यत^ - इन्द्राय सोमा हरयो दधन्विरे।। 1।।

卐 अर.ङ्कामाय हरयो दधन्विरे - स्थिराय हिन्वन् हरयो हरी~ तुरा। अर्वद्भि.र्यो हरिभि जोष.मीयते - सो अस्य कामं हरिवन्त. मानशे।। 2।।

卐 हरिश्मशारुर् हरिकेश^ आयस - स्तुरस्पेये यो हरिपा^ अवर्धत।
अर्वद्भि.र्यो हरिभि. र्वाजिनीवसु - रति विश्वा दुरिता पारिष.द्धरी~।। 3।।
卐 स्रुवेव यस्य हरिणी~ विपेततु - श्शिप्रे~ वाजाय हरिणी~ दविध्वतः। प्र
यत्कृते चमसे मर्मृज.द्धरी~ - पीत्वा मदस्य हर्यतस्याऽन्धसः।। 4।।
卐 उत स्म सद्म हर्यतस्य पस्त्यो3(ओ)-रत्यो न वाजं हरिवा॰ अचिक्रदत्।
मही चिद्धि धिषणाऽहर्य. दोजसा - बृह.द्वयो दधिषे हर्यत.श्चि.दा।। 5।।-

☸ 20-03-15

卐 आ रोदसी~ हर्यमाणो महित्वा - नव्यन्नव्यं हर्यसि मन्म नु प्रियम्। प्र
पस्त्य. मसुर हर्यत.ङ्गो - रावि.ष्कृधि हरये सूर्याय।। 1।।
卐 आ त्वा हर्यन्तं प्रयुजो जनानां - रथे वहन्तु हरिशिप्र.मिन्द्र। पिबा यथा
प्रतिभृतस्य मध्वो - हर्य.न्यज्ञं सधमादे दशोणिम्।। 2।।
卐 अपा॰ पूर्वेषां हरिव. स्सुताना- मथो~ इदं सवन.ङ्केवल.न्ते। ममद्धि
सोमं मधुमन्त. मिन्द्र - सत्रा वृष.न्जठर आ वृषस्व।। 3।।-

☸ 20-03-16

卐 अप्सु धूतस्य हरिव॰ पिबेह- नृभि. स्सुतस्य जठरं पृणस्व। मिमिक्षु.
र्यमद्रय^ इन्द्र तुभ्य - न्तेभि.र्वर्धस्व मद.मुक्थवाहः।। 1।।

卐 प्रोग्रां पीतिँ वृष्ण^ इयर्मि सत्यां - प्रयै सुतस्य हर्यश्व तुभ्यम्। इन्द्र धेनाभि. रिह मादयस्व - धीभि. र्विश्वाभि. श्शच्या गृणानः।। 2।।

卐 ऊती शचीव.स्तव वीर्येण - वयो दधाना^ उशिज^ ऋतज्ञाः। प्रजाव.दिन्द्र मनुषो दुरोणे - तस्थु.र्गृणन्त. स्सधमाद्यासः।। 3।।

## विंश काण्डे चतुर्थोऽनुवाकः

20-04-01

卐 यो जात^ एव प्रथमो मनस्वा- न्देवो देवा.न्क्रतुना पर्यभूषत्। यस्य शुष्मा.द्रोदसी~ अभ्यसेता- न्नृम्णस्य मह्ना स^ जनास^ इन्द्रः। 1।।

卐 यः पृथिवीँ व्यथमाना. मदृंह- द्यः पर्वता.न्प्रकुपिता~ अरम्णात्। यो अन्तरिक्षँ विममे वरीयो - यो द्या.मस्तभ्ना.त्स^ जनास^ इन्द्रः।। 2।।

卐 यो हत्वाऽहि. मरिणा.त्सप्त सिन्धून्- यो गा^ उदाज. दपधा^ वलस्य। यो अश्मनो रन्त. रग्नि.ञ्जजान - सँवृ.क्समत्सु स^ जनास^ इन्द्रः।। 3।।

卐 येनेमा विश्वा च्यवना कृतानि - यो दासँ वर्ण. मधर.ङ्गुहाऽकः। श्वघ्नीव यो जिगीवाँ लक्ष. माद- दर्यः पुष्टानि स^ जनास^ इन्द्रः।। 4।

卐 यं स्मा पृच्छन्ति कुह सेति घोर- मुते.माहु र्नैषो अस्ती.त्येनम्। सो अर्यः पुष्टी. र्विज^इवा मिनाति - श्रदस्मै धत्त स^ जनास^ इन्द्रः।। 5।।

卐 यो रध्रस्य चोदिता यः कृशस्य - यो ब्रह्मणो नाधमानस्य कीरेः।
युक्तग्राव्णो योऽविता सुशिप्र. - स्सुतसोमस्य स^ जनास^ इन्द्रः।। 6।।

卐 यस्याऽश्वासः प्रदिशि यस्य गावो - यस्य ग्रामा^ यस्य विश्वे रथासः।
यस्सूर्यँ य^ उषस.ञ्जजान - यो अपा.न्नेता स^ जनास^ इन्द्रः।। 7।।

卐 यङ्क्रन्दसी~ सँयती~ विह्वयेते~- परेऽवर उभया^ अमित्राः।
समान.ञ्चिद्रथ. मातस्थिवांसा - नाना हवेते~ स^ जनास^ इन्द्रः।। 8।।

卐 यस्मा.न्न ऋते विजयन्ते जनासो - यँ युध्यमाना^ अवसे हवन्ते। यो
विश्वस्य प्रतिमानं बभूव - यो अच्युतच्यु.त्स^ जनास^ इन्द्रः।। 9।।

卐 य.श्शश्वतो मह्येनो दधाना.- नमन्यमाना.न्छर्वा जघान। यश्शर्धते
नाऽनुददाति श्रृध्याँ - यो दस्योर्.हन्ता स^ जनास^ इन्द्रः।। 10।।

卐 य.श्शम्बरं पर्वतेषु क्षियन्त- ञ्चत्वारिंश्यां शर.द्यन्वविन्दत्। ओजायमानँ
यो अहि.ञ्जघान - दानुं शयानं स^ जनास^ इन्द्रः।। 11।।

卐 य.श्शम्बरं पर्यतर.त्कसीभि- र्योऽचारुकास्नाऽपिब.त्सुतस्य। अन्त.र्गिरौ
यजमानं बहु.ञ्जनँ - यस्मि.न्नाऽमूर्छ.त्स^ जनास^ इन्द्रः।। 12।।

卐 य.स्सप्तरश्मि.र्वृषभ. स्तुविष्मा- नवाऽसृज.त्सर्तवे सप्त सिन्धून्। यो
रौहिण. मस्फुर.द्वज्रबाहु- र्द्या.मारोहन्तं स^ जनास^ इन्द्रः।। 13।।

卐 द्यावा चि.दस्मै पृथिवी नमेते~ - शुष्मा.च्चिदस्य पर्वता^ भयन्ते। य.स्सोमपा^ निचितो वज्रबाहु - र्यो वज्रहस्त. स्स^ जनास^ इन्द्रः।। 14।।

卐 य.स्सुन्वन्त. मवति यꣳ पचन्तँ – य.श्शंसन्तँ यश्शशमान.मूती। यस्य ब्रह्म वर्धनँ यस्य सोमो - यस्येदं राध.स्स^ जनास^ इन्द्रः।। 15।।

卐 जातो व्यख्य.त्पित्रो. रुपस्थे - भुवो न वेद जनितुꣳ परस्य। स्तविष्यमाणो नो~ यो अस्म- द्व्रता देवानां स^ जनास^ इन्द्रः।। 16।।

卐 य.स्सोमकामो हर्यश्व. स्सूरि- र्यस्मा.द्रेजन्ते भुवनानि विश्वा। यो जघान शम्बरँ यश्च शुष्णँ - य^ एकवीर. स्स^ जनास^ इन्द्रः।। 17।।

卐 य.स्सुन्वते पचते दुध्र^ आ चि- द्वाज.न्दर्दर्षि स^ किलाऽसि सत्यः। वयन्त इन्द्र विश्वह प्रियास- स्सुवीरासो विदथ.मा वदेम।। 18।।-

20-04-02

卐 अस्मा इदु प्र तवसे तुराय - प्रयो न हर्मि स्तोमं माहिनाय। ऋचीषमायाऽध्रिगव ओह - मिन्द्राय ब्रह्माणि राततमा।। 1।।

卐 अस्मा इदु प्रय^इव प्र यांसि - भरा.म्याङ्गूषं बाधे सुवृक्ति। इन्द्राय हृदा मनसा मनीषा - प्रत्नाय पत्ये धियो मर्जयन्त।। 2।।

卐 अस्मा इदु त्य.मुपमं स्वर्षां - भरा.म्याङ्गूष. मास्येन। मंहिष्ठ. मच्छोक्तिभि. र्मतीनां - सुवृक्तिभि. स्सूरिँ वावृधध्यै।। 3।।

卐 अस्मा इदु स्तोमं सं हिनोमि - रथ.न्न तष्टेव तत्सिनाय। गिरश्च गिर्वाहसे सुवृ-क्तीन्द्राय विश्वमिन्वं मेधिराय।। 4।।

卐 अस्मा इदु सप्ति.मिव श्रव-स्येन्द्रायाऽर्कं.ञ्जुह्वा3(आ) समञ्जे। वीर.न्दानौकसँ वन्दध्यै - पुरा.ङ्गूर्तश्रवस.न्दर्माणम्।। 5।।

卐 अस्मा इदु त्वष्टाऽतक्ष.द्वज्रं - स्वपस्तमं स्वर्य1(अं) रणाय। वृत्रस्य चि.द्विद.द्येन मर्म - तुज.न्नीशान. स्तुजता कियेधाः।। 6।।

卐 अस्येदु मातु. स्सवनेषु सद्यो - महः पितुं पपिवा.न्चार्वन्ना। मुषाय.द्विष्णुः पचतं सहीया - न्विध्य.द्वराह. न्तिरो अद्रि.मस्ता।। 7।।

卐 अस्मा इदु ग्ना.श्चि. द्देवपत्नी - रिन्द्रायाऽर्कं महिहत्य ऊवुः। परि द्यावापृथिवी ~जभ्र उर्वी~ - नाऽस्य ते महिमानं परि ष्टः।। 8।।

卐 अस्ये.देव प्र रिरिचे महित्व- न्दिव.स्पृथिव्याः पर्यन्तरिक्षात्। स्वरा.ळिन्द्रो दम आ विश्वगूर्त- स्स्वरि. रमत्रो ववक्षे रणाय।। 9।।

卐 अस्ये.देव शवसा शुषन्तँ - वि वृश्च.द्वज्रेण वृत्र.मिन्द्रः। गा न व्राणा^ अवनी. रमुञ्च- दभि श्रवो दावने सचेताः।। 10।।

卐 अस्येदु त्वेषसा रन्त सिन्धवꣳ- परि यद्वज्रेण सी.मयच्छत्। ईशानकृ.द्दाशुषे दशस्य- न्तुर्वीतये गाध.न्तुर्वणिꣳ कः।। 11।।

卐 अस्मा इदु प्र भरा तूतुजानो- वृत्राय वज्र.मीशानꣳ कियेधाः। गो.र्न पर्व वि रदा तिर-श्चेष्य.न्नर्णां.स्यपा.ञ्चरध्यै।। 12।

卐 अस्येदु प्र ब्रूहि पूर्व्याणि - तुरस्य कर्माणि नव्य^उक्थैः। युधे यदिष्णान^ आयुधा- न्यृघायमाणो निरिणाति शत्रून्।। 13।।

卐 अस्येदु भिया गिरयश्च दृꣳहा- द्यावा च भूमा जनुष.स्तुजेते~। उपो~ वेनस्य जोगुवान^ ओणिं - सद्यो भुव.द्वीर्याय नोधाः।। 14।।

卐 अस्मा इदु त्य.दनु दाय्येषा - मेको यद्वव्ने भूरे. रीशानः। प्रैतशं सूर्ये पस्पृधानं - सौवश्व्ये सुष्वि. माव.दिन्द्रः।। 15।।

卐 एवा ते हारियोजना सुवृ-क्तीन्द्र ब्रह्माणि गोतमासो अक्रन्न्। ऐषु विश्वपेशस. न्धिय.न्धाꣳ - प्रात.र्मक्षू धियावसु.र्जगम्यात्।। 16।।-

20-04-03

卐 य^ एक^ इ.द्धव्य. श्चर्षणीना - मिन्द्र. न्त.ङ्गीर्भि. रभ्यर्च आभिः। यꣳ पत्यते वृषभो वृष्ण्यावा- न्त्सत्य. स्सत्वा पुरुमाय. स्सहस्वान्।।।

卐 तमु नः पूर्वे पितरो नवग्वा-स्सप्त विप्रासो अभि वाजयन्तः। नक्षद्दाभ.
न्ततुरिं पर्वतेष्ठा- मद्रोघवाचं मतिभि श्शविष्ठम्।। 2।।

卐 तमीमह इन्द्र.मस्य रायः- पुरुवीरस्य नृवतः पुरुक्षोः। यो अस्कृधोयु.
रजर. स्स्वर्वा- न्त.मा भर हरिवो मादयध्यै।। 3।।

卐 तन्नो वि वोचो यदि ते पुरा चि-ज्जरितार^ आनशु^ स्सुम्नमिन्द्र। कस्ते
भागः किं वयो दुध्र खिद्वः- पुरुहूत पुरूवसोऽसुरघ्नः।। 4।।

卐 तं पृच्छन्ती वज्रहस्तं रथेष्ठा- मिन्द्रँ वेपी वक्करी यस्य नू गीः। तुविग्राभ.
न्तुविकूर्मिं रभोदा-ङ्गातु.मिषे नक्षते तुम्र.मच्छ।। 5।।

卐 अया ह त्यं मायया वावृधानं- मनोजुवा स्वतवः पर्वतेन। अच्युता
चि.द्वीळिता स्वोजो - रुजो वि दृळ्हा धृषता विरप्शिन्।। 6।।

卐 तँ वो धिया नव्यस्या शविष्ठं - प्रत्नं प्रत्नव.त्परितंसयध्यै। स^ नो वक्ष.
दनिमान स्सुव-ह्मेन्द्रो विश्वा.न्यति दुर्गहाणि।। 7।।

卐 आ जनाय द्रुह्वणे पार्थिवानि - दिव्यानि दीपयोऽन्तरिक्षा। तपा
वृष.न्विश्वत. श्शोचिषा ता-न्ब्रह्मद्विषे शोचय क्षा.मपश्च।। 8।।

卐 भुवो जनस्य दिव्यस्य राजा - पार्थिवस्य जगत.स्त्वेषसन्दृक्। धिष्व
वज्र.न्दक्षिण इन्द्र हस्ते - विश्वा^ अजुर्य दयसे वि मायाः।। 9।।

卐 आ सँयत.मिन्द्र ण.स्स्वस्तिं - शत्रुतूर्याय बृहती. ममृध्राम्। यया दासा.न्यार्याणि वृत्रा - करो वज्रि ‘2’न्त्सुतुका नाहुषाणि।। 10।।

卐 स^ नो नियुद्भिः पुरुहूत वेधो - विश्ववाराभि. रागहि प्रयज्यो~। न या अदेवो वरते न देव^ - आभि.र्याहि तूय.मा मद्र्यद्रिक्।। 11।।-

20-04-04

卐 य.स्तिग्मशृङ्गो वृषभो न भीम^- एकः कृष्टी.श्च्यावयति प्र विश्वाः। य.श्शश्वतो अदाशुषो गयस्य - प्रयन्ताऽसि सुष्वितराय वेदः।। 1।।

卐 त्वं ह त्य.दिन्द्र कुत्स.माव- श्शुश्रूषमाण.स्तन्वा समर्ये। दासँ यच्छुष्ण.ङ्कुयव. न्न्यस्मा - अरन्धय^ आर्जुनेयाय शिक्षन्न्।। 2।।

卐 त्व.न्धृष्णो~ धृषता वीतहव्यं - प्रावो विश्वाभि. रूतिभि. स्सुदासम्। प्र पौरुकुत्सि. न्त्रसदस्यु.मावः –≈क्षेत्रसाता वृत्रहत्येषु पूरुम्।। 3।।

卐 त्वन्नृभि.र्नृमणो देववीतौ - भूरीणि वृत्रा हर्यश्व हंसि। त्वन्नि दस्यु.ञ्चुमुरि. न्धुनि – ञ्चाऽस्वापयो दभीतये सुहन्तु।। 4।।

卐 तव च्यौत्नानि वज्रहस्त तानि - नव यत्पुरो नवतिञ्च सद्यः। निवेशने शततमाऽविवेषी - रहन्च वृत्र. न्नमुचि. मुताऽहन्न्।। 5।।

卐 सना ता त इन्द्र भोजनानि - रातहव्याय दाशुषे सुदासे। वृष्णे ते हरी~
वृषणा युनज्मि - व्यन्तु ब्रह्माणि पुरुशाक वाजम्।। 6।।

卐 मा ते अस्यां सहसाव. न्परिष्टा-वघाय भूम हरिवः परादै। त्रायस्व
नोऽवृकेभि. र्वरूथै - स्तव प्रियास. स्सूरिषु स्याम।। 7।।

卐 प्रियास^ इत्ते मघव. न्नभिष्टौ- नरो मदेम शरणे सखायः। नि तुर्वश. न्नि
याद्वं शिशी-ह्यतिथिग्वाय शंस्य.ङ्करिष्यन्न्।। 8।।

卐 सद्य.श्चिन्नु ते मघव.न्नभिष्टौ - नर.श्शंस.न्त्युक्थशास^ उक्था। ये ते
हवेभि. र्विपणी॰ रदाश- न्नस्मा.न्वृणीष्व युज्याय तस्मै।। 9।।

卐 एते स्तोमा^ नरा.न्नृतम तुभ्य - मस्मद्र्यञ्चो ददतो मघानि। तेषा.मिन्द्र
वृत्रहत्ये शिवो भू-स्सखा च शूरोऽविता च नृणाम्।। 10।।

卐 नू इन्द्र शूर स्तवमान^ ऊती - ब्रह्मजूत.स्तन्वा वावृधस्व। उप नो
वाजा.न्मिमी.ह्युप स्तीन् - यूयं पात स्वस्तिभि.स्सदा नः।। 11।।

### विंश काण्डे पञ्चमोऽनुवाकः

20-05-01

卐 आ याहि सुषुमा हि त- इन्द्र सोमं पिबा≈इमम्। एदं बर्हि. स्सदो
मम। 1।।

卐 आ त्वा ब्रह्मयुजा हरी~- वहता. मिन्द्र केशिना। उप ब्रह्माणि न.श्शृणु।। 2।।

卐 ब्रह्माण.स्त्वा वयँ युजा- सोमपा.मिन्द्र सोमिनः। सुतावन्तो हवामहे।। 3।।

卐 इन्द्र.मि.द्गाथिनो बृह- दिन्द्र. मर्केभि. रर्किणः। इन्द्रँ वाणी. रनूषत।। 4।।

卐 इन्द्र^ इद्धर्यो. स्सचा- संमिश्ल^ आ वचो युजा। इन्द्रो वज्री हिरण्ययः।। 5।।

卐 इन्द्रो दीर्घाय चक्षस- आ सूर्यं रोहय.द्दिवि। वि गोभि.रद्रि. मैरयत्।। 6।।-

20-05-02

卐 इन्द्रँ वो विश्वत.स्परि- हवामहे जनेभ्यः। अस्माक.मस्तु केवलः।। 1।।

卐 व्य1(अ)न्तरिक्ष. मतिर-न्मदे सोमस्य रोचना। इन्द्रो यदभिन.द्वलम्।। 2।।

卐 उद्गा^ आज.दङ्गिरोभ्य^- आवि.ष्कृण्व. न्गुहा सतीः। अर्वाञ्च. न्नुनुदे वलम्।। 3।।

卐 इन्द्रेण रोचना दिवो- दृळ्हानि दृंहितानि च। स्थिराणि न पराणुदे।।
4।।
卐 अपा.मूर्मि. र्मद.न्निव- स्तोम^ इन्द्राजिरायते। वि ते मदा^ अराजिषुः।।
5।।-
20-05-03
卐 इन्द्रेण सं हि दृक्षसे- सञ्जग्मानो अबिभ्युषा। मन्दू~ समानवर्चसा।।
1।।
卐 अनवद्यै. रभिद्युभि- र्मख. स्सहस्व.दर्चति। गणै.रिन्द्रस्य काम्यैः।।
2।।
卐 आ.दह स्वधा.मनु- पुन.र्गर्भत्व.मेरिरे। दधाना^ नाम यज्ञियम्।। 3।।-
20-05-04
卐 इन्द्रो दधीचो अस्थभि- र्वृत्रा.ण्यप्रतिष्कुतः। जघान नवती.र्नव। 1।।
卐 इच्छ.न्नश्वस्य यच्छिरः- पर्वते.ष्वपश्रितम्। तद्विद.च्छर्यणावति।। 2।।
卐 अत्राऽह गो.रमन्वत- नाम त्वष्टु.रपीच्यम्। इत्था चन्द्रमसो गृहे।।
3।।-
20-05-05

卐 वाच.मष्टापदी.मह- न्नवस्त्रक्ति. मृतस्पृशम्। इन्द्रा.त्परि तन्वं ममे।।

1।।

卐 अनु त्वा रोदसी~ उभे~- क्रक्षमाण.मकृपेताम्। इन्द्र यद्दस्युहाऽभवः।।

2।।

卐 उत्तिष्ठ.न्नोजसा सह- पीत्वी शिप्रे~ अवेपयः। सोम.मिन्द्र चमू~

सुतम्।। 3।।-

20-05-06

卐 भिन्धि विश्वा^ अप द्विषः- परि बाधो जही मृधः। वसु स्पार्ह.न्त.दा

भर।। 1।

卐 यद्वीळा.विन्द्र यत्स्थिरे- यत्पर्शाने पराभृतम्। वसु स्पार्ह.न्त.दा

भर।। 2।।

卐 यस्य ते विश्वमानुषो- भूरे.र्दत्तस्य वेदति। वसु स्पार्ह.न्त.दा भर।।

3।।-

20-05-07

卐 प्र सम्राज.ञ्चर्षणीना-मिन्द्रं स्तोता नव्य.ङ्गीर्भिः। नर.न्नृषाहं मंहिष्ठम्।।

1।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham · Mysore

卐 यस्मि.न्नुक्थानि रण्यन्ति- विश्वानि च श्रवस्या। अपा.मवो न समुद्रे।।

2।।

卐 तं सुष्टुत्या विवासे- ज्येष्ठराजं भरे कृत्नुम्। महो वाजिनं सनिभ्यः। 3।।-

20-05-08

卐 अय.मु ते स.मतसि- कपोत^ इव गर्भधिम्। वच.स्तच्चि.न्न ओहसे।।

1।।

卐 स्तोत्रं राधानां पते- गिर्वाहो वीर यस्य ते। विभूति.रस्तु सूनृता।। 2।।

卐 ऊर्ध्व.स्तिष्ठा न^ ऊतये-ऽस्मिन् वाजे शतक्रतो~। समन्येषु ब्रवावहै।।

3।।-

20-05-09

卐 प्रणेतारँ वस्यो अच्छा- कर्तार.ञ्ज्योति. स्समत्सु। सासह्वांसँ युधाऽमित्रान्।।

卐 स^ नः पप्रिः पारयाति- स्वस्ति नावा पुरुहूतः। इन्द्रो विश्वा^ अति द्विषः। 2।।

卐 स^ त्व.न्न^ इन्द्र वाजेभि-र्दशस्या च गातुया च। अच्छा च न.स्सुम्न.न्नेषि।। 3।।-

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore • SGS

20-05-10

卐 त.मिन्द्रँ वाजयामसि- म॒हे वृ॒त्राय॒ हन्तवे। स^ वृषा वृष॒भो भुवत्।।।

卐 इन्द्र॒. स्स^ दामने कृ॒त^- ओजि॒ष्ठ. स्स^ मदे हि॒तः। द्यु॒म्नी श्लो॒की स^ सो॒म्यः।। 2।।

卐 गि॒रा वज्रो॒ न सम्भृत॒- स्सबलो॒ अनपच्युतः। व॒व॒क्ष ऋ॒ष्वो अस्तृतः।। 3।।

卐 इन्द्र॒.मि.द्गा॒थिनो बृह-दिन्द्र॒.मर्केभि॒.र॒र्किणः। इन्द्रँ वाणी.रनूषत।। 4।।

卐 इन्द्र॒^ इद्धर्यो॒. स्सचा॒- संमिश्ल॒^ आ वचो॒युजा। इन्द्रो व॒ज्री हि॒रण्य॒यः।। 5।।

卐 इन्द्रो दी॒र्घाय॒ चक्षस॒- आ सूर्यं रोहय॒.द्दिवि। वि गोभि॒. रद्रि.मैरयत्।। 6।।

卐 आ याहि सुषुमा हि त॒- इन्द्र॒ सोम॒ं पिबा इ॒मम्। एदं ब॒र्॒हि. स्सदो॒ मम। 7।।

卐 आ त्वा ब्रह्म॒युजा॒ हरी॒~- वहता.मिन्द्र के॒शिना। उप॒ ब्रह्माणि न.श्शृणु।। 8।।

卐 ब्रह्माणं.स्त्वा वयँ युजा- सोमपा.मिन्द्र सोमिनः। सुतावन्तो हवामहे।। 9।।

卐 युञ्जन्ति ब्रध्न.मरुष-ञ्चरन्तं परि तस्थुषः। रोचन्ते रोचना दिवि।। 10।।

卐 युञ्ज.न्त्यस्य काम्या- हरी~ विपक्षसा रथे। शोणा धृष्णू~ नृवाहसा।। 11।।

卐 केतु.ङ्कृण्व.न्नकेतवे- पेशो मर्या^ अपेशसे। समुषद्भि.रजायथाः।। 12।।

卐 उदुत्य.ञ्जातवेदस- न्देवँ वहन्ति केतवः। दृशे विश्वाय सूर्यम्।। 13।।

卐 अप त्ये तायवो- यथा नक्षत्रा यन्त्यक्तुभिः। सूराय विश्वचक्षसे।। 14।।

卐 अदृश्र.न्नस्य केतवो- वि रश्मयो जना॰ अनु। भ्राजन्तो अग्नयो यथा।। 15।।

卐 तरणि.र्विश्वदर्.शतो- ज्योतिष्कृ.दसि सूर्य। विश्व.मा भासि रोचन।। 16।।

卐 प्रत्य.ङ्देवानाँ विशः- प्रत्य.ङ्ङुदेषि मानुषीः। प्रत्य.ङ्विश्वं स्वर्दृशे।। 17।।

卐 येना पावक चक्षसा- भुरण्यन्त.ञ्जना॰ अनु। त्वँ वरुण पश्यसि।। 18।।

卐 वि द्यामेषि रजस्पृथ्वह मिमानो अक्तुभिः। पश्यन्जन्मानि सूर्य।। 19।।

卐 सप्त त्वा हरितो रथे- वहन्ति देव सूर्य। शोचिष्केशँ विचक्षणम्।। 20।।

卐 अयुक्त सप्त शुन्ध्युव- स्सूरो रथस्य नप्त्यः। ताभिर्याति स्वयुक्तिभिः।। 21।।-

20-05-11

卐 अभि त्वा वर्चसा गिर- स्सिञ्चन्ती.राचरण्यवः। अभि वत्स.न्न धेनवः। 1।।

卐 ता^ अर्षन्ति शुभ्रिय- पृञ्चन्ती. वर्चसा पयः। जात.ज्ञात्री. यथा हृदा।। 2।। (प्रियः)

卐 वज्रापवसाध्यः कीर्ति-म्रियमाण. मावहन्न्। मह्य.मायु.र्घृतं पयः।। 3।।

卐 आऽयं गौः पृश्नि.रक्रमी- दसद.न्मातरं पुरः। पितरञ्च प्रय.न्त्स्वः।। 4।।

卐 अन्त.श्चरति रोचना^- अस्य प्राणा.दपानतः। व्यख्य.न्महिष.स्स्वः। 5।।

卐 त्रिंश.द्धाम वि राजति- वाक्पतङ्गो अशिश्रियत्। प्रति वस्तो.रह.द्युभिः।
6।।-

20-05-12

卐 यच्छक्रा^ वाच. माऽरुह-न्नन्तरिक्षं सिषासथः। स.न्देवा^ अमद.न्वृषा।। 1।

卐 शक्रो वाच. मधृष्टा-योरुवाचो अधृष्णुहि। मंहिष्ठ^ आ मद.र्दिवि। 2।।

卐 शक्रो वाच.मधृष्णुहि- धाम धर्म.न्वि राजति। विमद.न्बर्हि. रासरन्न्।।
3।।

卐 तँ वो दस्म.मृतीषहँ- वसो.र्मन्दान. मन्धसः। अभि वत्स.न्न स्वसरेषु धेनव^- इन्द्र.ङ्गीर्भि.र्नवामहे।। 4।।

卐 द्युक्षं सुदानु. न्तविषीभि. रावृत-ङ्गिरि.न्न पुरुभोजसम्। क्षुमन्तँ वाजं शतिनं सहस्रिणं- मक्षू गोमन्त.मीमहे।। 5।।

卐 तत्त्वा यामि सुवीर्य-न्तद्ब्रह्म पूर्वचित्तये। येना यतिभ्यो भृगवे धने हिते- येन प्रस्कण्व.माविथ।। 6।।

卐 येना^ समुद्र.मसृजो मही.रप- स्तदिन्द्र वृष्णि ते शवः। सद्य.स्सो अस्य महिमा न सन्नशे- य.ङ्क्षोणी.रनुचक्रदे।। 7।।-

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

20-05-13

卐 क.न्नव्यो अतसीना- न्तुरो गृणीत मर्त्यः। नही न्वस्य महिमान मिन्द्रियं- स्व.र्गृणन्त^ आनशुः।। 1।।

卐 कदु स्तुवन्त^ ऋतयन्त देवत- ऋषिः को विप्र^ ओहते। कदा हवं मघव.न्निन्द्र सुन्वतः- कदु स्तुवत^ आ गमः।। 2।।-

20-05-14

卐 अभि प्र व.स्सुराधस- मिन्द्र.मर्च यथा विदे। यो जरितृभ्यो मघवा पुरूवसु- स्सहस्रेणेव शिक्षति।। 1।।

卐 शतानीकेव प्र जिगाति धृष्णुया- हन्ति वृत्राणि दाशुषे। गिरे.रिव प्र रसा अस्य पिन्विरे- दत्राणि पुरुभोजसः।। 2।।

卐 प्र सु श्रुतं सुराधस- मर्चा शक्र.मभिष्टये। यस्सुन्वते स्तुवते काम्यँ वसु- सहस्रेणेव मंहते।। 3।।

卐 शतानीका हेतयो अस्य दुष्टरा^- इन्द्रस्य समिषो महीः। गिरि.र्न भुज्मा मघवत्सु पिन्वते- यदीं सुता^ अमन्दिषुः।। 4।।-

20-05-15

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 वयङ्ग त्वा सुतावन्त^- आपो न वृक्तबर्हिषः। पवित्रस्य प्रस्त्रवणेषु वृत्रह-
न्परि स्तोतार^ आसते।। 1।।

卐 स्वरन्ति त्वा सुते नरो- वसो~ निरेक उक्थिनः। कदा सुत. न्तृषाण^
ओक^ आ गम^- इन्द्र स्वब्दीव वंसगः।। 2।।

卐 कण्वेभि.र्धृष्ण.वा धृष-द्वाज. न्दर्षि सहस्रिणम्। पिशङ्गरूपं
मघव.न्विचर्षणे- मक्षू गोमन्त.मीमहे।। 3।।-

20-05-16

卐 क^ ईं वेद सुते सचा- पिबन्त.ङ्कद्वयो दधे। अयँ यः पुरो
विभिन.त्त्योजसा- मन्दान. श्शिप्र्यन्धसः।। 1।।

卐 दाना मृगो न वारणः- पुरुत्रा चरथ. न्दधे। नकिष्ट्वा नि यमदा सुते गमो-
महाँ श्चर.स्योजसा।। 2।।

卐 य^ उग्र. स्स.न्ननिष्टृत- स्स्थिरो रणाय संस्कृतः। यदि स्तोतु.र्मघवा
श्रृणव.द्धव- न्नेन्द्रो योष.त्या गमत्।।।-

20-05-17

卐 विश्वाः पृतना^ अभिभूतर. न्नरं सजू- स्ततक्षु.रिन्द्र. ञ्जजनुश्च राजसे।
क्रत्वा वरिष्ठँ वर^ आमुरि. मु-तोग्र. मोजिष्ठ. न्तवस. न्तरस्विनम्।। 1।।

卐 समीं रेभासो अस्वर-न्निन्द्रं सोमस्य पीतये। स्वर्पतिँ यदीँ वृधे धृतव्रतो-ह्योजसा समूतिभिः।। 2।।

卐 नेमि. न्नमन्ति चक्षसा- मेषँ विप्रा^ अभिस्वरा। सुदीतयो वो अद्रुहोऽपि कर्णे- तरस्विन. स्समृक्वभिः।। 3।-

20-05-18

卐 तमिन्द्र.ञ्जोहवीमि मघवान.मुग्रं- सत्रा दधान. मप्रतिष्कुतं शवांसि। मंहिष्ठो गीर्भि.रा च यज्ञियो ववर्त-द्राये नो विश्वा सुपथा कृणोतु वज्री।। 1।।

卐 या^ इन्द्र भुज^ आभर- स्स्वर्वाँ॒ असुरेभ्यः। स्तोतार.मिन्मघव.न्नस्य वर्धय- ये च त्वे~ वृक्तबर्हिषः।। 2।।

卐 यमिन्द्र दधिषे त्व- मश्व.ङ्गां भाग.मव्ययम्। यजमाने सुन्वति दक्षिणावति- तस्मि.न्तन्धेहि मा पणौ।। 3।।-

20-05-19

卐 इन्द्रो मदाय वावृधे- शवसे वृत्रहा नृभिः। तमि.न्मह.त्स्वाजिषूते.मर्भे हवामहे- स^ वाजेषु प्र नोविषत्।। 1।।

卐 असि हि वीर सेन्यो-ऽसि भूरि परादुदिः। असि दुभ्रस्य चिद्वृधो यजमानाय शिक्षसि- सुन्वते भूरि ते वसु।। 2।।

卐 यदुदीरत आजयो- धृष्णवे धीयते धना। युक्ष्वा मदच्युता हरी~- कं हनः कँ वसौ दधो-ऽस्मा इन्द्र वसौ दधः।। 3।।

卐 मदेमदे हि नो ददि- र्यूथा गवा.मृजुक्रतुः। सङ्गृभाय पुरू शतोभयाहस्त्या वसु- शिशीहि राय^ आ भर।। 4।।

卐 मादयस्व सुते सचा- शवसे शूर राधसे। विद्मा हि त्वा पुरूवसु-मुप कामा.न्त्ससृज्महे-ऽथा नोऽविता भव।। 5।।

卐 एते त इन्द्र जन्तवो- विश्वं पुष्यन्ति वार्यम्। अन्तर्हि ख्यो जनाना-मर्यो वेदो अदाशुषा- न्तेषा.न्नो वेद^ आ भर।। 6।-

20-05-20

卐 सुरूपकृत्नु.मूतये- सुदुघा.मिव गोदुहे। जुहूमसि द्यविद्यवि।। 1।।

卐 उप न. स्सवना गहि- सोमस्य सोमपाः पिब। गोदा^ इद्रेवतो मदः।। 2।।

卐 अथा ते अन्तमानाँ- विद्याम सुमतीनाम्। मा नो अति ख्य^ आ गहि।। 3।।

卐 शुष्मिन्तम.न्न^ ऊतये- द्युम्निनं पाहि जागृविम्। इन्द्र सोमं शतक्रतो~।।
4।।

卐 इन्द्रियाणि शतक्रतो~- या ते जनेषु पञ्चसु। इन्द्र तानि त आ वृणे।।
5।।

卐 अग.न्निन्द्र श्रवो बृह- द्युम्न.न्दधिष्व दुष्टरम्। उत्ते शुष्म. न्तिरामसि।।
6।।

卐 अर्वावतो न^ आ ग-ह्यथो~ शक्र परावतः। उ लोको यस्ते अद्रिव^-
इन्द्रेह तत^ आ गहि।। 7।।

卐 इन्द्रो अङ्ग मह.द्भय-मभी.षदप चुच्यवत्। स^ हि स्थिरो विचर्.षणिः।।
8।।

卐 इन्द्रश्च मृळयाति नो- न नः पश्चा.दघ.न्नशत्। भद्रं भवाति नः पुरः।।
9।।

卐 इन्द्र^ आशाभ्य.स्परि- सर्वाभ्यो अभय.ङ्करत्। जेता शत्रू.-
न्विचर्.षणिः।। 10।।

卐 क^ ईं वेद सुते सचा- पिबन्त.ङ्कद्वयो दधे। अयँ यः पुरो
विभिन.त्त्योजसा- मन्दान. श्शिप्र्यन्धसः।। 11।।



Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

卐 दाना मृगो न वारणः- पुरुत्रा चरथ. न्दधे। नकिष्ट्वा नि यम.दा सुते गमो- महाँ श्चर.स्योजसा।। 12।।

卐 य^ उग्र. स्सन्ननिष्टृत- स्स्थिरो रणाय संस्कृतः। यदि स्तोतु.र्मघवा शृणव.द्धव-न्नेन्द्रो योष.त्या गमत्।।

卐 वय.ङ्घ त्वा सुतावन्त^- आपो न वृक्तबर्हिषः। पवित्रस्य प्रस्रवणेषु वृत्रह-न्परि स्तोतार^ आसते।। 14।।

卐 स्वरन्ति त्वा सुते नरो- वसो नि.रेक उक्थिनः। कदा सुत.न्तृषाण^ ओक^ आ गम^- इन्द्र स्वब्दीव वंसगः।। 15।।

卐 कण्वेभि.र्धृष्ण.वा धृष-द्वाज. न्दर्षि सहस्रिणम्। पिशङ्गरूपं मघव.न्विचर्षणे- मक्षू गोमन्त.मीमहे।। 16।।-

20-05-21

卐 श्रायन्त^ इव सूर्यँ- विश्वे.दिन्द्रस्य भक्षत। वसूनि जाते जनमान^ ओजसा- प्रति भाग.न्न दीधिम।। 1।।

卐 अनर्शरातिँ वसुदा.मुप स्तुहि- भद्रा^ इन्द्रस्य रातयः। सो अस्य कामँ विधतो न रोषति- मनो दानाय चोदयन्न्।। 2।।

卐 बण्महा॰ असि सूर्य- बळादित्य महा॰ असि। मह.स्ते सतो महिमा पनस्यते-ऽद्धा देव महा॰ असि।। 3।।

卐 बड्सूर्य श्रवसा महा॰ असि- सत्रा देव महा॰ असि। मह्ना देवाना. मसुर्यः पुरोहितो- विभु ज्योति.रदाभ्यम्।। 4।।-

20-05-22

卐 उदु त्ये मधुमत्तमा^- गिर. स्स्तोमास^ ईरते। सत्राजितो धनसा^ अक्षितोतयो- वाजयन्तो रथा^ इव।। 1।।

卐 कण्वा^इव भृगव. स्सूर्या^इव- विश्व.मिद्धीत.मानशुः। इन्द्रं स्तोमेभि.र्महयन्त^ आयवः- प्रियमेधासो अस्वरन्।।।

卐 उदिन्न्वस्य रिच्यते-ऽंशो धन.न्न जिग्युषः। य^ इन्द्रो हरिवा.न्न दभन्ति तं रिपो- दक्ष. न्दधाति सोमिनि।। 3।।

卐 मन्त्र.मखर्वं सुधितं सुपेशस- न्दधात यज्ञियेष्वा। पूर्वी.श्चन प्रसितय.स्तरन्ति तँ- य^ इन्द्रे कर्मणा भुवत्।। 4।।-

20-05-23

卐 एवा ह्यसि वीरयु- रेवा शूर^ उत स्थिरः। एवा ते राध्यं मनः।। 1।।

卐 एवा रातिस्तुवीमघ- विश्वेभिर्धायि धातृभिः। अधा चिदिन्द्र मे सचा।। 2।।

卐 मो ~षु ब्रह्मेव तन्द्रयु-र्भुवो वाजानां पते। मत्स्वा सुतस्य गोमतः।। 3।।

卐 एवा ह्यस्य सूनृता- विरप्शी गोमती मही। पक्वा शाखा न दाशुषे।। 4।।

卐 एवा हि ते विभूतय- ऊतय इन्द्र मावते। सद्यश्चित्सन्ति दाशुषे।। 5।।

卐 एवा ह्यस्य काम्या- स्तोम उक्थञ्च शंस्या। इन्द्राय सोमपीतये।। 6।।-

🏺 20-05-24

卐 तन्ते मदङ्गृणीमसि- वृषणं पृत्सु सासहिम्। उलोककृत्नु.मद्रिवो- हरिश्रियम्।। 1।।

卐 येन ज्योतींष्यायवे- मनवे च विवेदिथ। मन्दानो अस्य बर्हिषो- वि राजसि।। 2।।

卐 तदद्या चित्त उक्थिनो-ऽनु ष्टुवन्ति पूर्वथा। वृषपत्नी.रपो जया दिवेदिवे।। 3।।

Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 तम्वभि प्र गायत- पुरुहूतं पुरुष्टुतम्। इन्द्र.ङ्गीर्भि. स्तविष.मा विवासत।। 4।।

卐 यस्य द्विबर्हसो बृह-त्सहो दाधार रोदसी~। गिरीः रज्राः अप स्स्व.वृषत्वना।। 5।।

卐 स^ राजसि पुरुष्टुतँ~- एको वृत्राणि जिघ्नसे। इन्द्र जैत्रा श्रवस्या च यन्तवे।। 6।।-

20-05-25

卐 वय.मु त्वा.मपूर्व्य- स्थूर.न्न कच्चि.द्भरन्तोऽवस्यवः। वाजे चित्रं हवामहे।। 1।।

卐 उप त्वा कर्म.न्नूतये- स^ नो युवोग्र.श्चक्राम यो धृषत्। त्वामि.द्ध्यवितारँ ववृमहे- सखाय^ इन्द्र सानसिम्।। 2।।

卐 यो न^ इदमिदं पुरा- प्र वस्य^ आनिनाय तमु व.स्स्तुषे। सखाय^ इन्द्र.मूतये।। 3।।

卐 हर्यश्वं सत्पति.ञ्चर्षणीसहं- स^ हि ष्मा यो अमन्दत। आ तु न.स्स^ वयति गव्य.मश्व्यं- स्तोतृभ्यो मघवा शतम्।। 4।।

卐 इन्द्राय साम गायत- विप्राय बृहते बृहत्। धर्मकृते विपश्चिते पनस्यवे।।
5।।

卐 त्व.मिन्द्राऽभिभू.रसि- त्वं सूर्य.मरोचयः। विश्वकर्मा विश्वदेवो महा॒
असि।। 6।।

卐 विभ्राज.ञ्ज्योतिषा स्व1(अ)-रगच्छो रोचन. न्दिवः। देवा.स्त इन्द्र
सख्याय येमिरे।। 7।।

卐 तम्वभि प्र गायत- पुरुहूतं पुरुष्टुतम्। इन्द्र.ङ्गीर्भि. स्तविष.मा
विवासत।। 8।।

卐 यस्य द्विबर्हसो बृह-त्सहो दाधार रोदसी~। गिरी॒ रज्रा॒ अप
स्स्व.र्वृषत्वना।। 9।।

卐 स^ राजसि पुरुष्टुतँ~- एको वृत्राणि जिघ्नसे। इन्द्र जैत्रा श्रवस्या च
यन्तवे।। 10।।

20-05-26

卐 इमा नु कं भुवना सीषधा-मेन्द्रश्च विश्वे च देवाः। यज्ञञ्च न.स्तन्वञ्च
प्रजा.ञ्चा-ऽऽदित्यै.रिन्द्र. स्सह चीक्लृपाति।। 1।।

卐 आदित्यै.रिन्द्र. स्सगणो मरुद्भि-रस्माकं भूत्वविता तनूनाम्। हत्वाय देवा^ असुरा.न्यदाय- न्देवा^ देवत्व. मभिरक्षमाणाः।। 2।।

卐 प्रत्यञ्च.मर्क. मनय.न्छचीभि – रादि.त्स्वधा. मिषिरां पर्यपश्यन्न्। अया वाज. न्देवहितं सनेम- मदेम शतहिमा. स्सुवीराः।। 3।।

卐 य^ एक^ इद्धि.दयते- वसु मर्ताय दाशुषे। ईशानो अप्रतिष्कुत^- इन्द्रो अङ्ग।। 4।।

卐 कदा मर्त. मराधसं- पदा क्षुम्प.मिव स्फुरत्। कदा न.श्शुश्रव.द्गिर^- इन्द्रो अङ्ग।। 5।

卐 यश्चिद्धि त्वा बहुभ्य^ आ- सुतावाँ॒ आविवासति। उग्र.न्त.त्पत्यते शव^- इन्द्रो अङ्ग।

卐 य^ इन्द्र सोमपातमो- मद.श्शविष्ठ चेतति। येना हंसि न्य1(अ)त्त्रिण-न्त.मीमहे।। 7।।

卐 येना दशग्व.मध्रिगुँ- वेपयन्तं स्वर्णरम्। येना समुद्र.माविथा-तमीमहे।। 8।।

卐 येन सिन्धुं मही.रपो- रथाँ॒ इव प्रचोदयः। पन्था.मृतस्य यातवे-तमीमहे।।।-

Sri Ganapati Sachchidananda Avadhoota Dattapeetham • Mysore •

☸ 20-05-27

卐 एन्द्र नो गधि प्रिय- स्सत्राजि.दगोह्यः। गिरि.र्न विश्वत.स्पृथुः-पति.र्दिवः।। 1।।

卐 अभि हि सत्य सोमपा^ उभे~ बभूथ रोदसीव। इन्द्राऽसि सुन्वतो वृधः-पति.र्दिवः।। 2।।

卐 त्वं हि शश्वतीना- मिन्द्र दर्ता पुरामसि। हन्ता दस्यो.र्मनोर्वृधः-पति.र्दिवः।। 3।

卐 एदु मध्वो मदिन्तरं- सिञ्च वाऽध्वर्यो अन्धसः। एवा हि वीर.स्स्तवते-सदावृधः ।

卐 इन्द्र स्थातर्.हरीणा- न्नकि.ष्टे पूर्व्यस्तुतिम्। उदानंश शवसा न भन्दना।। 5।।

卐 तँ वो वाजानां पति- महूमहि श्रवस्यवः। अप्रायुभि.र्यज्ञेभि र्वावृधेन्यम्।। 6।।-

☸ 20-05-28

卐 एतो~ न्विन्द्रं स्तवाम- सखाय. स्स्तोम्य. न्नरम्। कृष्टी.र्यो विश्वा^ अभ्यस्त्येक^ इत्।। 1।।

卐 अगोरुधाय गविषे- द्युक्षाय दस्म्यँ वचः। घृता.त्स्वादीयो मधुनश्च वोचत।। 2।।

卐 यस्याऽमितानि वीर्या3(आ)- न राधः पर्येतवे। ज्योति.र्न विश्व-मभ्यस्ति दक्षिणा।। 3।।

20-05-29

卐 स्तुहीन्द्रँ व्यश्ववद- नूर्मिँ वाजिनँ यमम्। अर्यो गयं मंहमानँ वि दाशुषे।। 1।।

卐 एवा नूनमुप स्तुहि- वैयश्व दशम.न्नवम्। सुविद्वांस.ञ्चर्कृत्य. ञ्चरणीनाम्।। 2।।

卐 वेत्था हि निर्ऋतीनाँ- वज्रहस्त परिवृजम्। अहरह. श्शुन्ध्युः परिपदामिव।। 3।।

## विंश काण्डे षष्ठोऽनुवाकः

20-06-01

卐 वनोति हि सुन्व.न्क्षयं परीणस- स्सुन्वानो हि ष्मा यज.त्यव द्विषो-देवाना मव द्विषः। सुन्वान^ इत्सिषासति सहस्रा वाज्यवृतः। सुन्वानायेन्द्रो ददा.त्याभुवं- रयि न्ददा.त्याभुवम्।। 1।।

卐 मो~ षु वो अस्म.दभि तानि पौंस्या- सना भूव.न्द्युम्नानि मोत जारिषु-
रस्म.त्पुरोत जारिषुः। यद्व.श्चित्रँ युगेयुगे- नव्य.ङ्घोषा.दमर्त्यम्। अस्मासु
तन्मरुतो यच्च दुष्टर- न्दिधृता यच्च दुष्टरम्।। 2।।

卐 अग्निं होतारं मन्ये दास्वन्तँ- वसुं सूनुं सहसो जातवेदसँ- विप्र.न्न
जातवेदसम्। य^ ऊर्ध्वया स्वध्वरो- देवो देवाच्या कृपा। घृतस्य
विभ्राष्टि.मनु वष्टि शोचिषा-ऽऽजुह्वानस्य सर्पिषः।। 3।।

卐 यज्ञै. स्संमिश्लाः पृषतीभिर् ऋष्टिभि- र्याम.न्छुभ्रासो अञ्जिषु प्रिया^ उत।
आसद्या बर्हि. र्भरतस्य सूनवः- पोत्रा.दा सोमं पिबता दिवो नरः।। 4।।

卐 आ वक्षि देवाँ इह विप्र यक्षि- चोश.न्होत. र्निषदा योनिषु त्रिषु। प्रति
वीहि प्रस्थितं सोम्यं मधु- पिबाऽऽग्नीध्रा. त्तव भागस्य तृण्णुहि।। 5।।

卐 एष^ स्य^ ते तन्वो नृम्णवर्धन- स्सह^ ओजः प्रदिवि बाह्वोर् हितः।
तुभ्यं सुतो मघव.न्तुभ्य. माभृत- स्त्व.मस्य ब्राह्मणा.दा तृप.त्पिब।। 6।।

卐 यमु पूर्व.महुवे तमिदं हुवे- सेदु हव्यो ददि.र्यो नाम पत्यते। अध्वर्युभिः
प्रस्थितं सोम्यं मधु- पोत्रा.त्सोम. न्द्रविणोदः पिब ऋतुभिः।। 7।।-

20-06-02

卐 सुरूपकृत्नु.मूतये- सुदुघा.मिव गोदुहे। जुहूमसि द्यविद्यवि।। 1।।

卐 उप न.स्सवना ऽ गहि- सोमस्य सोमपाः पिब। गोदा^ इ.द्रेवतो मदः।।
2।।

卐 अथा ते अन्तमानाँ- विद्याम सुमतीनाम्। मा नो अति ख्य^ आ गहि।।
3।।

卐 परेहि विग्र.मस्तृत- मिन्द्रं पृच्छा विपश्चितम्। यस्ते सखिभ्य^ आ वरम्।। 4।।

卐 उत ब्रुवन्तु नो निदो- निरन्यत.श्चिदारत। दधाना^ इन्द्र^ इद्दुवः।। 5।।

卐 उत न.स्सुभगाँ अरि-र्वोचेयु र्दस्मकृष्टयः। स्यामे.दिन्द्रस्य शर्मणि।।
6।।

卐 एमाशु. माशवे भर- यज्ञश्रियं. न्नृमादनम्। पतय.न्मन्दयत्सखम्।।
7।।

卐 अस्य पीत्वा शतक्रतो~- घनो वृत्राणा.मभवः। प्रावो वाजेषु वाजिनम्।। 8।।

卐 तन्त्वा वाजेषु वाजिनँ- वाजयाम. श्शतक्रतो। धनाना.मिन्द्र सातये।।
9।।

卐 यो रायो3(ओ)ऽवनि.र्महा- न्त्सुपार. स्सुन्वत. स्सखा। तस्मा इन्द्राय गायत।। 10।।

卐 आ त्वेता नि षीद-तेन्द्र.मभि प्र गायत। सखाय. स्स्तोमवाहसः।। 11।।

卐 पुरूतमं पुरूणा - मीशानं वार्याणाम्। इन्द्रं सोमे सचा सुते।। 12।।-

20-06-03

卐 स^ घा नो योग^ आ भुव-त्स^ राये स^ पुरन्ध्याम्। गम.द्वाजेभि.रा स^ नः।। 1।।

卐 यस्य संस्थे न वृण्वते- हरी~ समत्सु शत्रवः। तस्मा इन्द्राय गायत।। 2।।

卐 सुतपाव्ने सुता^ इमे- शुचयो यन्ति वीतये। सोमासो दध्याशिरः।। 3।।

卐 त्वं सुतस्य पीतये- सद्यो वृद्धो अजायथाः। इन्द्र ज्यैष्ठ्याय सुक्रतो~।। 4।।

卐 आ त्वा विश.न्त्वाशव- स्सोमास^ इन्द्र गिर्वणः। शन्ते सन्तु प्रचेतसे।। 5।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 त्वां स्तोमा^ अवीवृध- न्त्वा.मुक्था शतक्रतो~। त्वाँ वर्धन्तु नो गिरः।। 6।।

卐 अक्षितोति स्सनेदिमँ- वाज.मिन्द्र स्सहस्त्रिणम्। यस्मि.न्विश्वानि पौंस्या।। 7।।

卐 मा नो मर्ता^ अभि द्रुह-न्तनूना.मिन्द्र गिर्वणः। ईशानो यवया वधम्।। 8।।

卐 युञ्जन्ति ब्रध्न.मरुष- ञ्चरन्तं परि तस्थुषः। रोचन्ते रोचना दिवि।। 9।।

卐 युञ्ज.न्त्यस्य काम्या- हरी~ विपक्षसा रथे। शोणा धृष्णू~ नृवाहसा।। 10।।

卐 केतु.ङ्कृण्व.न्नकेतवे- पेशो मर्या^ अपेशसे। समुषद्भि.रजायथाः।। 11।।

卐 आ.दह स्वधा.मनु- पुन.र्गर्भत्व.मेरिरे। दधाना^ नाम यज्ञियम्।। 12।।-

20-06-04

卐 वीळु चि.दारुजत्नुभि- र्गुहा चि.दिन्द्र वह्निभिः। अविन्द^ उस्त्रिया^ अनु।। 1।।

卐 देवयन्तो यथा मति- मच्छा विदद्वसु.ङ्गिरः। महा.मनूषत श्रुतम्।। 2।।

卐 इन्द्रेण सं हि दृक्षसे- सञ्जग्मानो अबिभ्युषा। मन्दू~ समानवर्चसा।।
3।।

卐 अनवद्यै. रभिद्युभि- र्मख. स्सहस्व.दर्चति। गणै.रिन्द्रस्य काम्यैः।।
4।।

卐 अतः परिज्म.न्ना गहि- दिवो वा रोचना.दधि। समस्मि.न्नृञ्जते गिरः।।
5।।

卐 इतो वा साति. मीमहे- दिवो वा पार्थिवा.दधि। इन्द्रं महो वा रजसः।।
6।।

卐 इन्द्र.मि.द्गाथिनो बृह-दिन्द्र.मर्केभि.रर्किणः। इन्द्रँ वाणी.रनूषत।। 7।।

卐 इन्द्र^ इद्धर्यो. स्सचा- संमिश्ल^ आ वचोयुजा। इन्द्रो वज्री हिरण्ययः।।
8।।

卐 इन्द्रो दीर्घाय चक्षस- आ सूर्यं रोहय.द्दिवि। वि गोभि.रद्रि.मैरयत्।।
9।।

卐 इन्द्र वाजेषु नोऽव- सहस्त्रप्रधनेषु च। उग्र^ उग्राभि.रूतिभिः।। 10।।

卐 इन्द्रँ वयं महाधन- इन्द्र.मर्भे हवामहे। युजँ वृत्रेषु वज्रिणम्।। 11।।

卐 स॒ नो॑ वृष॒न्नमु॒श्वरुं- स॒त्रादाव॒न्नपा॑ वृधि। अ॒स्मभ्य॒मप्रतिष्कुतः।। 12।।

卐 तु॒ञ्जेतुञ्जे॒ य॒ उत्तरे॒- स्तोमा॒ इन्द्रस्य व॒ज्रिणः। न विन्धे अस्य सुष्टुतिम्।। 13।।

卐 वृषा॑ यू॒थेव॒ वंसगः- कृष्टी॒रिय॒त्योजसा। ईशानो॒ अप्रतिष्कुतः।। 14।।

卐 य॒ एक॒श्चर॒षणीनाँ- वसू॒ना॒ मिर॒ज्यति। इन्द्रः पञ्च क्षिती॒नाम्।। 15।।

卐 इन्द्रँ॑ वो वि॒श्वत॒स्परि॒- हवा॑महे॒ जने॑भ्यः। अ॒स्माक॒मस्तु॒ केवलः।। 16।।

卐 एन्द्र सा॒नसिं॒ र॒यिं- स॒जित्वा॑नं सदा॒सह॑म्। वर्षि॑ष्ठ॒मूतये भर।। 17।।

卐 नि येन मु॒ष्टिह॒त्यया- नि वृ॒त्रा रु॒णधा॑महै। त्वोता॑सो॒ न्यर्वता।। 18।।

卐 इन्द्र॒ त्वोता॑स॒ आ व॒यँ- वज्र॑ङ्घना॒ ददीमहि। जये॒म सँ यु॒धि स्पृधः।। 19।।

卐 व॒यं शूरे॑भि॒रस्तृभि॒- रिन्द्र॒ त्वया॑ यु॒जा व॒यम्। सा॒स॒ह्याम पृतन्य॒तः।। 20।।-

20-06-05

卐 म॒हाँ इन्द्रः पर॒श्च॒ नु- महि॒त्वमस्तु व॒ज्रिणे॑। द्यौ॒र्न प्रथि॒ना शवः। 1।

卐 समोहे वा य आशत- नर.स्तोकस्य सनितौ। विप्रासो वा धियायवः।।
2।।

卐 यः कुक्षि. स्सोमपातम- स्समुद्र^इव पिन्वते। उर्वी.रापो न काकुदः।।
3।।

卐 एवा ह्यस्य सूनृता- विरप्शी गोमती मही। पक्वा शाखा न दाशुषे।। 4।।

卐 एवा हि ते विभूतय^- ऊतय^ इन्द्र मावते। सद्य.श्चि.त्सन्ति दाशुषे।।
5।।

卐 एवा ह्यस्य काम्या- स्तोम^ उक्थञ्च शंस्या। इन्द्राय सोमपीतये।। 6।।

卐 इन्द्रेहि मत्स्यन्धसो- विश्वेभि. स्सोमपर्वभिः। महाँ अभिष्टि.रोजसा।।
7।।

卐 एमेनं सृजता सुते- मन्दि.मिन्द्राय मन्दिने। चक्रिं विश्वानि चक्रये।।
8।।

卐 मत्स्वा सुशिप्र मन्दिभि-स्स्तोमेभि. र्विश्वचर्षणे। सचैषु सवने.ष्वा।।
9।।

卐 असृग्र.मिन्द्र ते गिरः- प्रति त्वा.मुदहासत। अजोषा^ वृषभं पतिम्।।
10।।

卐 सञ्चोदय चित्र.मर्वा - ग्राध^ इन्द्र वरेण्यम्। अस.दित्ते विभु प्रभु।।
11।।

卐 अस्मा.न्त्सु तत्र चोद-येन्द्र राये रभस्वतः। तुविद्युम्न यशस्वतः।।
12।।

卐 सङ्गोम.दिन्द्र वाजव- दस्मे~ पृथु श्रवो बृहत्। विश्वाऽयु.र्धेह्यक्षितम्।।
13।।

卐 अस्मे~ धेहि श्रवो बृह - द्युम्नं सहस्रसातमम्। इन्द्र ता^ रथिनी.रिषः।।
14।।

卐 वसो.रिन्द्रँ वसुपति-र्गीर्भि.र्गृणन्त^ ऋग्मियम्। होम गन्तार.मूतये।।
15।।

卐 सुतेसुते न्योकसे- बृह.द्बृहत^ एदरिः। इन्द्राय शूष.मर्चति।। 16।।

## विंश काण्डे सप्तमोऽनुवाकः

20-07-01

卐 विश्वेषु हि त्वा सवनेषु तुञ्जते- समान.मेकँ वृषमण्यवꣳ पृथ-क्स्व.स्सनिष्यवꣳ पृथक्। तन्त्वा नाव.न्न पर्षणिं- शूषस्य धुरि धीमहि। इन्द्र.न्न यज्ञै.श्चितयन्त^- आयव. स्स्तोमेभि. रिन्द्र.मायवः।। 1।।

卐 वि त्वा ततस्त्रे मिथुना अवस्यवो -व्रजस्य साता गव्यस्य निस्सृज.
स्सक्षन्त^ इन्द्र निस्सृजः। यद्गव्यन्ता द्वा जना- स्व1(अ)र्यन्ता समूहसि।
आवि.ष्करिक्र.द्वृषणं सचाभुवँ- वज्र.मिन्द्र सचाभुवम्।। 2।।
卐 उतो~ नो अस्या^ उषसो जुषेत- ह्य1(अ)र्कस्य बोधि हविषो हवीमभि-
स्स्वर्षाता हवीमभिः। यदिन्द्र हन्तवे मृधो- वृषा वज्रि.न्चिकेतसि। आ मे
अस्य वेधसो नवीयसो- मन्म श्रुधि नवीयसः।। 3।।-

20-07-02

卐 तुभ्ये.दिमा सवना शूर विश्वा- तुभ्यं ब्रह्माणि वर्धना कृणोमि। त्व.न्नृभिर्
हव्यो विश्वधाऽसि।। 1।।
卐 नू चिन्नु ते मन्यमानस्य दस्मो- दश्नुवन्ति महिमान.मुग्र। न वीर्य.मिन्द्र
ते न राधः।।।
卐 प्र वो महे महिवृधे भरध्वं- प्रचेतसे प्र सुमति.ङ्कृणुध्वम्। विशः पूर्वीः प्र
चरा चर्षणिप्राः।। 3।।
卐 यदा वज्रं हिरण्य. मि.दथा रथं- हरी~ यमस्य वहतो वि सूरिभिः। आ
तिष्ठति मघवा सनश्रुत^- इन्द्रो वाजस्य दीर्घश्रवस.स्पतिः।। 4।।

卐 सो चिन्नु वृष्टि यूर्थ्या3(आ) स्वा- सचा॒ इन्द्र. श्मश्रूणि हरिता॒ऽभिप्रुष्णुते। अव वेति सुक्षयं सुते मधू-दिद्धूनोति वातो यथा वनम्।। 5।।

卐 यो वाचा विवाचो मृध्रवाचः- पुरू सहस्राऽशिवा जघान। तत्त.दिदस्य पौंस्य.ङ्गृणीमसि- पितेव यस्तविषीँ वावृधे शवः।। 6।।-

20-07-03

卐 यच्चिद्धि सत्य सोमपा- अनाशस्ता इव स्मसि। आ तू न इन्द्र शंसय- गोष्वश्वेषु शुभ्रिषु- सहस्रेषु तुवीमघ।। 1।।

卐 शिप्रि.न्वाजानां पते- शचीव.स्तव दंसना। आ तू न इन्द्र शंसय- गोष्वश्वेषु शुभ्रिषु- सहस्रेषु तुवीमघ।। 2।।

卐 निष्वापया मिथूदृशा- सस्ता. मबुध्यमाने। आ तू न इन्द्र शंसय- गोष्वश्वेषु शुभ्रिषु- सहस्रेषु तुवीमघ।। 3।।

卐 ससन्तु त्या अरातयो- बोधन्तु शूर रातयः। आ तू न इन्द्र शंसय- गोष्वश्वेषु शुभ्रिषु- सहस्रेषु तुवीमघ।। 4।।

卐 समिन्द्र गर्दभं मृण- नुवन्तं पापयाऽमुया। आ तू न इन्द्र शंसय- गोष्वश्वेषु शुभ्रिषु- सहस्रेषु तुवीमघ।। 5।।

卐 पताति कुण्डृणाच्या- दूरँ वातो वना.दधि। आ तू न^ इन्द्र शंसय-
गोष्वश्वेषु शुभ्रिषु- सहस्रेषु तुवीमघ।। 6।।
卐 सर्वं परिक्रोश.ञ्जहि- जम्भया कृकदाश्वम्। आ तू न^ इन्द्र शंसय-
गोष्वश्वेषु शुभ्रिषु- सहस्रेषु तुवीमघ।। 7।।-

20-07-04

卐 वि त्वा ततस्रे मिथुना^ अवस्यवो- व्रजस्य साता गव्यस्य निस्सृज-
स्सक्षन्त^ इन्द्र निस्सृजः। यद्गव्यन्ता द्वा जना- स्व1(अ)र्यन्ता समूहसि।
आविष्करिक्र.द्वृषणं सचाभुवँ- वज्र.मिन्द्र सचाभुवम्।। 1।।
卐 विदुष्टे अस्य वीर्यस्य पूरवः- पुरो यदिन्द्र शारदी रवाऽतिर- स्सासहानो
अवाऽतिरः। शास. स्त.मिन्द्र मर्त्य-मयज्युं शवस.स्पते। मही. ममुष्णाः
पृथिवी. मिमा^ अपो- मन्दसान^ इमा^ अपः।। 2।।
卐 आदित्ते अस्य वीर्यस्य चर्किर-न्मदेषु वृष.न्नुशिजो यदाविथ- सखीयतो
यदाविथ। चकर्थ कारमेभ्यः- पृतनासु प्रवन्तवे। ते अन्यामन्या.न्नद्यं
सनिष्णत- श्रवस्यन्त. स्सनिष्णत।। 3।।-

20-07-05

卐 वने न वा यो न्यधायि चाक-न्छुचि.र्वां स्तोमो भुरणा.वजीगः। यस्येदिन्द्रः पुरुदिनेषु होता- नृणा.न्नर्यो नृतमः ~ क्षपावान्।। 1।।

卐 प्र ते अस्या^ उषसः प्राऽपरस्या^-नृतौ स्याम नृतमस्य नृणाम्। अनु त्रिशोक. श्शतमाऽवह.न्नॄ- न्कुत्सेन रथो यो अस.त्ससवान्।। 2।।

卐 कस्ते मद^ इन्द्र रन्त्यो भू- द्दुरो गिरो अभ्युग्रो वि धाव। कद्वाहो अर्वा.गुप मा मनीषा^- आ त्वा शक्या. मुपमं राधो अन्नैः।। 3।।

卐 कदु द्युम्न.मिन्द्र त्वावतो नॄ- न्कया धिया करसे कन्न^ आगन्न्। मित्रो न सत्य^ उरुगाय भृत्या- अन्ने समस्य यदस.न्मनीषाः।। 4।।

卐 प्रेरय सूरो अर्थ.न्न पारँ- ये अस्य काम.ञ्जनिधा^ इव ग्मन्न्। गिरश्च ये ते तुविजात पूर्वी- र्नर^ इन्द्र प्रतिशिक्ष.न्त्यन्नैः।। 5।।

卐 मात्रे नु ते सुमिते इन्द्र पूर्वी- द्यौ.र्मज्मना पृथिवी काव्येन। वराय ते घृतवन्त. स्सुतास-स्स्वाद्म.न्भवन्तु पीतये मधूनि।। 6।।

卐 आ मध्वो अस्मा असिच. न्नमत्र- मिन्द्राय पूर्णं स^ हि सत्यराधाः। स^ वावृधे वरिम.न्ना पृथिव्या^- अभि क्रत्वा नर्यः पौंस्यैश्च।। 7।।

卐 व्यान.ळिन्द्रः पृतना.स्स्वोजा- आऽस्मै यतन्ते सख्याय पूर्वीः। आऽस्मा रथ.न्न पृतनासु तिष्ठ- यं भद्रया सुमत्या चोदयासे।। 8।।-

20-07-06

卐 आ सत्यो यातु मघवाँ ऋजीषी- द्रव.न्त्वस्य हरय^ उप नः। तस्मा
इदन्ध. स्सुषुमा सुदक्ष- मिहाऽभिपित्व.ङ्करते गृणानः।। 1।।

卐 अव स्य^ शूराऽध्वनो नान्ते-ऽस्मि.न्नो अद्य सवने मन्दध्यै।
शंसा.त्युक्थ. मुशनेव वेधा- श्चिकितुषे असुर्याय मन्म।। 2।।

卐 कवि.र्न निण्यँ विदथानि साध-न्वृषा यत्सेकँ विपिपानो अर्चात्। दिव^
इत्थाऽजीजन.त्सप्त कारू - नह्ना चिच्चक्रु. र्वयुना गृणन्तः।। 3।।

卐 स्व1(अ)र्य.द्वेदि सुदृशीक. मर्कै- र्महि ज्योती रुरुचु. र्यद्ध वस्तोः। अन्धा
तमांसि दुधिता विचक्षे- नृभ्य.श्चकार नृतमो अभिष्टौ।। 4।।

卐 ववक्ष इन्द्रो अमित. मृजीष्यु1-(उ)भे~ आ पप्रौ रोदसी~ महित्वा।
अत.श्चिदस्य महिमा वि रे-च्यभि यो विश्वा भुवना बभूव।। 5।।

卐 विश्वानि शक्रो नर्याणि विद्वा-नपो रिरेच सखिभि. र्निकामैः।
अश्मान.श्चिद्ये बिभिदु. र्वचोभि- र्व्रज. ङ्गोमन्त. मुशिजो वि वव्रुः।। 6।।

卐 अपो वृत्रँ वव्रिवांसं पराऽह-न्प्राव.त्ते वज्रं पृथिवी सचेताः। प्राऽर्णांसि
समुद्रिया.ण्यैनो४- पति.र्भव.न्छवसा शूर धृष्णो~।। 7।।

卐 अपो यदद्रिं पुरुहूत दर्द - राविर्भुवत्सरमा पूर्व्यन्ते। स^ नो नेता वाजमा दर्षि भूरिं- ङ्गोत्रा रुजन्नङ्गिरोभिर्गृणानः।। 8।।-

☬ 20-07-07

卐 तद्वो गाय सुते सचा- पुरुहूताय सत्वने। शँ यद्गवे न शाकिने।। 1।।

卐 न घा वसुर्नि यमते- दानँ वाजस्य गोमतः। यत्सीमुप श्रवद्गिरः।। 2।।

卐 कुवित्संस्य प्र हि व्रजं- ङ्गोमन्तन्दस्युहा गमत्। शचीभिरप नो वरत्।।।-

☬ 20-07-08

卐 इन्द्र क्रतुन्न^ आ भर- पिता पुत्रेभ्यो यथा। शिक्षा णो अस्मिन्पुरुहूत यामनि- जीवा^ ज्योतिरशीमहि।। 1।।

卐 मा नो अज्ञाता^ वृजना^ दुराध्यो3 (ओ)- माऽशिवासो अव क्रमुः। त्वया वयं प्रवतश्शश्वती रपो-ऽति शूर तरामसि।। 2।।-

☬ 20-07-09

卐 इन्द्र ज्येष्ठन्न^ आ भरँ- ओजिष्ठं पपुरि श्रवः। येनेमे चित्र वज्रहस्त रोदसी~- ओभे~ सुशिप्र प्राः।। 1।।

卐 त्वा.मुग्र.मवसे चर्षणीसहं- राज.न्देवेषु हूमहे। विश्वा सु नो विथुरा पिब्दना वसो-ऽमित्रा.न्सुषहा.न्कृधि।। 2।।-

20-07-10

卐 यद्याव^ इन्द्र ते शतं- शतं भूमी.रुत स्युः। न त्वा वज्रि'2'न्त्सहस्रं सूर्या^- अनु न जात.मष्ट रोदसी~।। 1।।

卐 आ पप्राथ महिना वृष्ण्या वृष-न्विश्वा शविष्ठ शवसा। अस्मा॰ अव मघव.न्गोमति व्रजे- वज्रि.न्चित्राभि.रूतिभिः।। 2।।-

20-07-11

卐 यदिन्द्र यावत.स्त्व- मेताव.दह.मीशीय। स्तोतार.मिद्दिधिषेय रदावसो~- न पापत्वाय रासीय।। 1।।

卐 शिक्षेय मि.न्महयते दिवेदिवे- राय^ आ कुहचि.द्विदे। नहि त्व.दन्य.न्मघव.न्न^ आप्यँ- वस्यो अस्ति पिता चन।। 2।।-

20-07-12

卐 इन्द्र त्रिधातु शरण- न्त्रिवरूथं स्वस्तिमत्। छर्दि.र्यच्छ मघवद्भ्यश्च मह्यञ्च- यावया दिद्युमेभ्यः।। 1।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 ये गव्यता मनसा शत्रु मादभु-रभिप्रघ्नन्ति धृष्णुया। अध स्मा नो मघव.न्निन्द्र गिर्वण- स्तनूपा^ अन्तमो भव।। 2।।-

20-07-13

卐 इन्द्राऽऽयाहि चित्रभानो^- सुता^ इमे त्वायवः। अण्वीभि.स्तना पूतासः।। 1।।

卐 इन्द्रा ऽऽयाहि धियेषितो- विप्रजूत. स्सुतावतः। उप ब्रह्माणि वाघतः।। 2।।

卐 इन्द्रा ऽऽयाहि तूतुजान^- उप ब्रह्माणि हरिवः। सुते दधिष्व न.श्चनः।। 3।।-

20-07-14

卐 मा चि.दन्य.द्वि शंसत- सखायो मा रिषण्यत। इन्द्र.मि.त्स्तोता वृषणं सचा सुते- मुहु.रुक्था च शंसत।। 1।।

卐 अवक्रक्षिणँ वृषभं यथाजुर-ङ्गा.न्न चर्षणीसहम्। विद्वेषणं सँवननोभयङ्करं- मंहिष्ठ. मुभयाविनम्।। 2।।

卐 यच्चिद्धि त्वा जना^ इमे- नाना हवन्त^ ऊतये। अस्माकं ब्रह्मेद.मिन्द्र भूतु ते-ऽहा विश्वा च वर्धनम्।। 3।।

卐 वि तर्तूर्यन्ते मघव.न्विपश्चितो-ऽर्यो विपो जनानाम्। उप क्रमस्व पुरुरूप.मा भर- वाज. न्नेदिष्ठ.मूतये।। 4।।-

20-07-15

卐 ब्रह्मणा ते ब्रह्मयुजा युनज्मि- हरी~ सखाया सधमाद आशू~। स्थिरं रथं सुख.मिन्द्राऽधितिष्ठ- न्प्रजान.न्विद्वा॰ उप याहि सोमम्।। 1।।-

20-07-16

卐 अध्वर्यवोऽरुण. न्दुग्ध मंशु- ञ्जुहोतन वृषभाय क्षितीनाम्। गौरा.द्वेदीया॰ अवपान. मिन्द्रो- विश्वाहे.द्याति सुतसोम.मिच्छन्न्।। 1।।

卐 यद्दधिषे प्रदिवि चार्वन्न- न्दिवेदिवे पीति.मिदस्य वक्षि। उत हृदोत मनसा जुषाण^- उश.न्निन्द्र प्रस्थिता.न्पाहि सोमान्।। 2।।

卐 जज्ञान. स्सोमं सहसे पपाथ- प्र ते माता महिमान.मुवाच। एन्द्र पप्राथोर्व1(अ)न्तरिक्षँ- युधा देवेभ्यो वरिव.श्चकर्थ।। 3।।

卐 यद्योधया महतो मन्यमाना-न्त्साक्षाम ता.न्बाहुभि. श्शाशदानान्। यद्वा नृभि.र्वृत^ इन्द्राऽभियुध्या-स्त.न्त्वयाऽऽजिं सौश्रवस.ञ्जयेम।। 4।।

卐 प्रेन्द्रस्य वोचं प्रथमा कृतानि- प्र नूतना मघवा या चकार। यदे.ददेवी. रसहिष्ट माया- अथाऽभव.त्केवल. स्सोमो अस्य।। 5।।

卐 तवेदँ विश्व. मभितः पशव्य1(अँ)- यत्पश्यसि चक्षसा सूर्यस्य। गवामसि गोपति.रेक^ इन्द्र- भक्षीमहि ते प्रयतस्य वस्वः।। 6।।

卐 बृहस्पते युव.मिन्द्रश्च वस्वो- दिव्यस्येशाथे~ उत पार्थिवस्य। धत्तं रयिं स्तुवते कीरये चि- द्यूयं पात स्वस्तिभि.स्सदा नः।। 7।।-

20-07-17

卐 य.स्तस्तम्भ सहसा वि ज्मो अन्ता- न्बृहस्पति.स्त्रिषधस्थो रवेण। तं प्रत्नास^ ऋषयो दीध्यानाः- पुरो विप्रा^ दधिरे मन्द्रजिह्वम्।। 1।।

卐 धुनेतय. स्सुप्रकेतं मदन्तो- बृहस्पते अभि ये न.स्ततस्रे। पृषन्तं सृप्र. मदब्ध मूर्वं- बृहस्पते रक्षता.दस्य योनिम्।। 2।।

卐 बृहस्पते या परमा पराव-दत^ आ त ऋतस्पृशो नि षेदुः। तुभ्य.ङ्खाता^ अवता^ अद्रिदुग्धा^- मध्व.श्चोत.न्त्यभितो विरप्शम्।। 3।।

卐 बृहस्पतिः प्रथम.ञ्जायमानो- महो ज्योतिषः परमे व्योमन्न्। सप्ताऽस्य. स्तुविजातो रवेण- वि सप्तरश्मि. रधम.त्तमांसि।। 4।।

卐 स^ सुष्टुभा स^ ऋक्कता गणेन- वलं रुरोज फलिगं रवेण। बृहस्पति. रुस्रिया^ हव्यसूदः- कनिक्रद.द्वावशती. रुदाजत्।। 5।।

卐 एवा पित्रे विश्वदेवाय वृष्णे- यज्ञै.र्विधेम नमसा हविर्भिः। बृहस्पते सुप्रजा^ वीरवन्तो- वयं स्याम पतयो रयीणाम्।। 6।।-

20-07-18

卐 अस्तेव सु प्रतरँ लाय. मस्य- न्भूष.न्निव प्र भरा स्तोम.मस्मै। वाचा विप्रा.स्तरत वाच. मर्यो- नि रामय जरित. स्सोम^ इन्द्रम्।। 1।।

卐 दोहेन गा.मुप शिक्षा सखायं- प्र बोधय जरित. र्जार.मिन्द्रम्। कोश.न्न पूर्णँ वसुना.न्यृष्ट- मा च्यावय मघदेयाय शूरम्।। 2।।

卐 किमङ्ग त्वा मघव.न्भोज.माहु- श्शिशीहि मा शिशय.न्त्वा शृणोमि। अप्नस्वती मम धी.रस्तु शक्र- वसुविदं भग.मिन्द्रा ऽभरा नः।। 3।।

卐 त्वा.ञ्जना^ मम.सत्येष्विन्द्र- सन्तस्थाना^ वि ह्वयन्ते समीके। अत्रा युज.ङ्कृणुते यो हविष्मा-न्नाऽसुन्वता सख्यँ वष्टि शूरः।। 4।।

卐 धन.न्न स्पन्द्रं बहुलँ यो अस्मै- तीव्रा.न्त्सोमा॰ आसुनोति प्रयस्वान्। तस्मै शत्रू.न्त्सुतुका.न्प्रात.रह्नो- नि स्वष्ट्रा.न्युवति हन्ति वृत्रम्।। 5।।

卐 यस्मि.न्वय. न्दधिमा शंस मिन्द्रे- य.श्शिश्राय मघवा काम.मस्मे~। आरा.च्चि.त्स. न्भयता.मस्य शत्रु- र्न्यस्मै द्युम्ना जन्या^ नमन्ताम्।। 6।।

卐 आरा.च्छत्रु.मप बाधस्व दूर-मुग्रो य.श्शम्बः पुरुहूत तेन। अस्मे~ धेहि यवम्.द्गोम.दिन्द्र- कृधी धिय.ञ्जरित्रे वाजरत्नाम्।। 7।।

卐 प्र यमन्त.र्वृषसवासो अग्म- न्तीव्रा. स्सोमा^ बहुलान्तास^ इन्द्रम्। नाह दामानं मघवा नि यंस-न्नि सुन्वते वहति भूरि वामम्।। 8।।

卐 उत प्रहा. मतिदीवा जयति- कृत.मिव श्वघ्नी वि चिनोति काले। यो देवकामो न धनं रुणद्धि- समि.त्तं राय. स्सृजति स्वधाभिः।। 9।।

卐 गोभि.ष्टरेमाऽमति न्दुरेवाँ- यवेन वा क्षुधं पुरुहूत विश्वे। वयं राजसु प्रथमा धना- न्यरिष्टासो वृजनीभि.र्जयेम।। 10।।

卐 बृहस्पति.र्नः परि पातु पश्चा- दुतोत्तरस्मा.दधरा. दघायोः। इन्द्रः पुरस्ता.दुत मध्यतो न-स्सखा सखिभ्यो वरिवः कृणोतु।। 11।।-

20-07-19

卐 यो अद्रिभि.त्प्रथमजा^ ऋतावा- बृहस्पति.राङ्गिरसो हविष्मान्। द्विबर्हज्मा प्राघर्मस.त्पिता न^- आ रोदसी~ वृषभो रोरवीति।। 1।।

卐 जनाय चि.द्य^ ईवत उ लोकं- बृहस्पति र्देवहूतौ चकार। घ्नन्वृत्राणि वि पुरो दर्दरीति- जय.न्छत्रूं रमित्रा.न्पृत्सु साहन्।। 2।।

卐 बृहस्पति. स्समजय.द्वसूनि- महो व्रजा.न्गोमतो देव^ एषः। अप.
स्सिषास.न्त्स्व1(अ)रप्रतीतो- बृहस्पतिर्.हन्त्यमित्र.मर्कैः।। 3।।

## ≈◊≈ विंश काण्डे अष्टमोऽनुवाकः

20-08-01

卐 इमा. न्धियं सप्तशीर्ष्णीं पिता न^- ऋतप्रजातां बृहती. मविन्दत्। तुरीयं
स्वि.ज्जनय.द्विश्वजन्यो-ऽयास्य^ उक्थ.मिन्द्राय शंसन्न्।। 1।।

卐 ऋतं शंसन्त^ ऋजु दीध्याना^- दिव.स्पुत्रासो असुरस्य वीराः। विप्रं पद.
मङ्गिरसो दधाना^- यज्ञस्य धाम प्रथमं मनन्त।। 2।।

卐 हंसैरिव सखिभि. र्वावदद्भि-रश्मन्मयानि नहना व्यस्यन्न्। बृहस्पति.
रभिकनिक्रद.द्गा^- उत प्राऽस्तौ.दुच्च विद्वाँ अगायत्।। 3।।

卐 अवो द्वाभ्यां पर^ एकया गा^- गुहा तिष्ठन्ती. रनृतस्य सेतौ। बृहस्पति.
स्तमसि ज्योति.रिच्छ- न्नुदुस्रा आऽक.र्वि हि तिस्र^ आवः।। 4।।

卐 विभिद्या पुरं शयथे.मपाची- न्नि.स्त्रीणि साक. मुदधे. रकृन्तत्।
बृहस्पति. रुषसं सूर्य.ङ्गा- मर्कं विवेद स्तनय.न्निव द्यौः।। 5।।

卐 इन्द्रो वलं रक्षितार. न्दुघाना-ङ्करेणेव वि चकर्ता रवेण। स्वेदाञ्जिभि.
राशिर. मिच्छमानो- ऽरोदय.त्पणि.मा गा^ अमुष्णात्।। 6।।

卐 स॒ ई॑ स॒त्येभि॒. स्सखि॑भि. श्शु॒चद्भि॒- र्गोधा॑यस॒ँ विध॑न॒सै. रद॑र्दः।
ब्रह्म॑ण॒स्पति॒. र्वृषभि. र्व॒राहै॑- र्घ॒र्मस्वे॑देभि॒. र्द्रवि॑ण॒ँ व्या॑नट्।। 7।।

卐 ते स॒त्येन॒ मन॑सा॒ गोप॑ति॒.ङ्गा^- इ॒या॒नास॑^ इषणयन्त धी॒भिः। बृ॒ह॒स्पति.
र्मि॒थो अव॑द्यपेभि॒- रु॒दु॒स्त्रिया^ असृजत स्व॒युग्भिः।। 8।।

卐 तँ व॒र्धय॑न्तो म॒तिभिं. श्शि॒वाभिं- स्सिं॒ह.मिव॒ नान॑दतं स॒धस्थे॑। बृ॒ह॒स्पतिँ॒
वृष॑णं॒ शूर॑साती॒- भरे॑भरे॒ अनु मदेम जि॒ष्णुम्।। 9।।

卐 य॒दा वा॒ज. मस॑न.द्विश्वरू॑प- मा द्या.म॒रु॒क्ष॒ दुत्त॑राणि॒ सद्म॑। बृ॒ह॒स्पतिँ॒
वृष॑णँ व॒र्धय॑न्तो॒- नाना॒ स॒न्तो॒ बिभ्र॑तो॒ ज्योति॑.रा॒सा।। 10।।

卐 स॒त्या.मा॒शिष॑.ङ्कृणुता॒ व॒यो॒धै- की॒रि.ञ्चि॒द्ध्यव॒थ स्वेभि॒.रेवैः। प॒श्चा मृधो॒
अप॑ भवन्तु॒ विश्वा॒-स्तद्रो॑दसी~ श्शृणुतँ विश्व॒मिन्वे~।। 11।।

卐 इन्द्रो॑ म॒ह्ना म॒ह॒तो अ॒र्ण॒वस्य॒- वि मू॒र्धान. मभिन.द॒र्बुदस्य॑। अह॒.न्नहि॒.
मरि॑णा.त्स॒प्त सिन्धू॑- न्दे॒वै.द्यावापृथिवी॒~ प्राव॑त.न्नः।। 12।।-

20-08-02

卐 अ॒भि प्र गोप॑ति.ङ्गि-रेन्द्र.मर्च॒ यथा॑ वि॒दे। सू॒नुं स॒त्यस्य॒ सत्प॑तिम्।। 1।।

卐 आ हर॑य. स्ससृज्रिरे-ऽरु॒षी. रधि॑ ब॒र्हिषि। यत्रा॒ऽभि स॒न्नवा॑महे।। 2।।

卐 इन्द्रा॑य॒ गाव॑^ आ॒शिर॑- न्दुदु॒ह्रे व॒ज्रिणे॒ मधु॑। यत्सी॑.मुपह्व॒रे वि॒दत्।। 3।।

卐 उद्य.द्ब्रध्नस्य विष्टप-ङ्गृह.मिन्द्रश्च गन्वहि। मध्वः पीत्वा सचेवहि- त्रिस्सप्त सख्युः पदे।। 4।।

卐 अर्चत प्राऽर्चत- प्रियमेधासो अर्चत। अर्चन्तु पुत्रका उत- पुर.न्न धृष्ण्वर्चत।।।

卐 अव स्वराति गर्गरो- गोधा परि सनिष्वणत्। पिङ्गा परि चनिष्कद-दिन्द्राय ब्रह्मोद्यतम्।। 6।।

卐 आ यत्पत.न्त्येन्य- स्सुदुघा अनपस्फुरः। अपस्फुर.ङ्गृभायत-सोम.मिन्द्राय पातवे।। 7।।

卐 अपा.दिन्द्रो अपा.दग्नि- र्विश्वे देवा अमत्सत। वरुण इदिह क्षय-त्त.मापो अभ्यनूषत- वत्सं संशिश्वरी.रिव।। 8।।

卐 सुदेवो असि वरुण- यस्य ते सप्त सिन्धवः। अनुक्षरन्ति काकुदं- सूर्म्यं सुषिरा.मिव।। 9।।

卐 यो व्यती रफाणय-त्सुयुक्ता उप दाशुषे। तक्वो नेता तदि.द्वपु- रुपमा यो अमुच्यत।। 10।।

卐 अतीदु शक्र ओहत- इन्द्रो विश्वा अति द्विषः। भिन.त्कनीन ओदनं-पच्यमानं परो गिरा।। 11।।

卐 अर्भको न कुमारको-ऽधि तिष्ठ.न्नवं रथम्। स^ पक्ष.न्महिषं मृगं- पित्रे मात्रे विभुक्रतुम्।। 12।।

卐 आ तू सुशिप्र दम्पते- रथ न्तिष्ठा हिरण्ययम्। अध द्युक्षं सचेवहि- सहस्रपाद मरुषं- स्वस्तिगा. मनेहसम्।। 13।।

卐 तङ्घे.मित्था नमस्विन^- उप स्वराज. मासते। अर्थ.ञ्चिदस्य सुधितँ यदेतव- आवर्तयन्ति दावने।। 14।।

卐 अनु प्रत्नस्यौकसः- प्रियमेधास^ एषाम्। पूर्वा.मनु प्रयतिँ वृक्तबर्हिषो- हितप्रयस^ आशत।। 15।।

卐 यो राजा चर्षणीनाँ- याता रथेभि. रध्रिगुः। विश्वासा. न्तरुता पृतनाना- ञ्ज्येष्ठो यो वृत्रहा गृणे।। 16।।

卐 इन्द्र.न्तं शुम्भ पुरुहन्म.न्नवसे- यस्य द्विता विधर्तरि। हस्ताय वज्रः प्रति धायि दर्शतो- महो दिवे न सूर्यः।। 17।।

卐 नकि.ष्ट.ङ्कर्मणा नश- द्य.श्चकार सदावृधम्। इन्द्र.न्न यज्ञै. र्विश्वगूर्त. मृभ्वस- मधृष्ट. न्धृष्ण्वोजसम्।। 18।।

卐 अषाळ्ह.मुग्रं पृतनासु सासहिँ- यस्मि.न्महीः. रुरुज्रयः। सन्धेनवो जायमाने अनोनवु- र्द्यावः ~ क्षामो अनोनवुः।। 19।।

卐 यद्याव॑^ इन्द्र ते श॒तं- श॒तं भूमी॑.रु॒त स्युः। न त्वा॑ वज्रि॑.न्त्स॒ह॒स्रं॒ सूर्या॒^-
अ॒नु न जा॒त.म॑ष्ट॒ रोद॑सी~।। 20।।
卐 आ प॑प्राथ महि॒ना वृष्ण्या॑ वृष॒-न्विश्वा॑ शविष्ठ॒ शव॑सा। अ॒स्मा॰ अ॑व
मघव॒.न्गोम॑ति व्र॒जे- वज्रि॑.न्चि॒त्राभि॑.रू॒तिभिः।। 21।।-
20-08-03
卐 उत्त्वा॑ मन्दन्तु॒ स्तोमा॑ः- कृणु॒ष्व राधो॑ अद्रिवः। अव॑ ब्रह्म॒द्विषो॑ जहि।।
1।।
卐 प॒दा प॒णी॰ र॑रा॒धसो॒- नि बा॑धस्व म॒हा॰ अ॑सि। न॒हि त्वा॒ कश्च॒न प्रति॑।।
2।।
卐 त्व.मी॑शिषे सु॒ताना॒- मिन्द्र॒ त्व.मसु॑तानाम्। त्वं राजा॒ जना॑नाम्।। 3।।
卐 ई॒ङ्खय॑न्ती. र॒पस्यु॒व^- इन्द्र॑.ञ्जा॒त. मुपा॑ऽऽसते। भे॒जा॒नास॑. स्सु॒वीर्य॑म्।।
4।।
卐 त्व.मि॑न्द्र॒ बला॒.दधि॒- सह॑सो जा॒त^ ओज॑सः। त्वँ वृ॑ष॒.न्वृषे.द॑सि।। 5।।
卐 त्व.मि॑न्द्राऽसि वृत्र॒हा- व्य॑1(अ॒)न्तरि॑क्ष. मतिरः। उद्या.म॑स्तभ्ना॒^
ओज॑सा।। 6।।
卐 त्व.मि॑न्द्र स॒जोष॑स- म॒र्कं बि॑भर्षि बा॒ह्वोः। वज्र॒ं शिशा॑न॒^ ओज॑सा।। 7।।

卐 त्व.मिन्द्राऽभिभू.रसि- विश्वा जाता.न्योजसा। स विश्वा भुव आऽभवः।। 8।।-

20-08-04

卐 आ या.त्विन्द्र. स्स्वपति.र्मदाय- यो धर्मणा तूतुजान.स्तुविष्मान्। प्रत्वक्षाणो अति विश्वा सहां-स्यपारेण महता वृष्ण्येन।। 1।।

卐 सुष्ठामा रथ. स्सुयमा हरी~ ते- मिम्यक्ष वज्रो नृपते गभस्तौ। शीभं राज'2'न्थ्सुपथा ऽऽया.ह्यर्वाङ्- वर्धाम ते पपुषो वृष्ण्यानि।। 2।।

卐 एन्द्रवाहो नृपतिं वज्रबाहु- मुग्र.मुग्रास. स्तविषास एनम्। प्रत्वक्षसं वृषभं सत्यशुष्म- मेमस्मत्रा सधमादो वहन्तु।। 3।।

卐 एवा पति.न्द्रोणसाचं सचेतस-मूर्ज.स्स्कम्भ. न्धरुण आ वृषायसे। ओजः कृष्व सङ्गृभाय त्वे~ अ-प्यसो यथा केनिपाना.मिनो वृधे।। 4।।

卐 गम.न्नस्मे~ वसून्या हि शंसिषं- स्वाशिषं भर.मायाहि सोमिनः। त्व.मीशिषे साऽस्मि.न्नासत्सि बर्हि-ष्यनाधृष्या तव पात्राणि धर्मणा।। 5।।

卐 पृथक्प्राय.न्प्रथमा देवहूतयो-ऽकृण्वत श्रवस्यानि दुष्टरा। न ये शेकु. र्यज्ञिया. न्नाव. मारुह- मीर्मैव ते न्यविशन्त केपयः।। 6।।

卐 एवैवाऽपा.गपरे सन्तु दूढ्यो-ऽश्वा^ येषा. न्दुर्युज^ आयुयुज्रे। इत्था ये प्रागुपरे सन्ति दावने- पुरूणि यत्र वयुनानि भोजना।। 7।।

卐 गिरीº रज्रा.न्रेजमानाº अधारय- द्यौ꣡ क्रन्द.दन्तरिक्षाणि कोपयत्। समीचीने~ धिषणे~ विष्कभायति- वृष्ण꣡ पीत्वा मद उक्थानि शंसति।। 8।।

卐 इमं बिभर्मि सुकृत.न्ते अङ्कुशँ- येनाऽऽरुजासि मघव.न्छफारुजः। अस्मि.न्त्सु ते सवने अस्त्वोक्त्यं- सुत इष्टौ मघव.न्बोध्याभगः।। 9।।

卐 गोभि.ष्टरेमाऽमति. न्दुरेवाँ- यवेन क्षुधं पुरुहूत विश्वाम्। वयं राजभि꣡ प्रथमा धना-न्यस्माकेन वृजनेना जयेम।। 10।।

卐 बृहस्पति.र्न꣡ परि पातु पश्चा- दुतोत्तरस्मा.दधरा. दघायोः। इन्द्र꣡ पुरस्ता.दुत मध्यतो न- स्सखा सखिभ्यो वरिव꣡ कृणोतु।। 11।।-

20-08-05

卐 त्रिकद्रुकेषु महिषो यवाशिर. न्तुविशुष्म. स्तृप-त्सोम.मपिब. द्विष्णुना सुतँ यथाऽवशत्। स^ ईं ममाद महि कर्म कर्तवे महा.मुरुं- सैनं सश्च.द्देवो देवं- सत्य.मिन्द्रं सत्य^ इन्दुः।। 1।।

卐 प्रो~ ष्वस्मै पुरोरथ- मिन्द्राय शूष.मर्चत। अभीके चिदु लोककृ.त्सङ्गे समत्सु वृत्रहा-ऽस्माकं बोधि चोदिता- नभन्ता. मन्यकेषा-ञ्ज्याका^ अधि धन्वसु।। 2।।

卐 त्वं सिन्धूꣳ रवासृजो-ऽधराचो अह.न्नहिम्। अश.त्रुरिन्द्र जज्ञिषे- विश्वं पुष्यसि वार्य-न्तन्त्वा परि.ष्वजामहे- नभन्ता.मन्यकेषा-ञ्ज्याका^ अधि धन्वसु।। 3।।

卐 वि षु विश्वा^ अरातयो-ऽर्यो नशन्त नो धियः। अस्ताऽसि शत्रवे वधँ- यो न^ इन्द्र जिघांसति- या ते राति. र्ददि. र्वसु- नभन्ता मन्यकेषा-ञ्ज्याका^ अधि धन्वसु।। 4।।-

20-08-06

卐 तीव्रस्याऽभिवयसो अस्य पाहि- सर्वरथा^ वि हरी~ इह मुञ्च। इन्द्र.मा त्वा यजमानासो अन्ये- नि रीरम. न्तुभ्य.मिमे सुतासः।। 1।।

卐 तुभ्यं सुता. स्तुभ्य.मु सोत्वास- स्त्वा.ङ्गिर. श्श्वात्र्या^ आ ह्वयन्ति। इन्द्रेद. मद्य सवन.ञ्जुषाणो- विश्वस्य विद्वाꣳ इह पाहि सोमम्।। 2।।

卐 य^ उशता मनसा सोम.मस्मै- सर्वहृदा देवकाम. स्सुनोति। न गा^ इन्द्र स्तस्य परा ददाति- प्रशस्त. मिच्चारु.मस्मै कृणोति।। 3।।

卐 अनुस्पष्टो भव.त्येषो अस्य- यो अस्मै रेवा.न्न सुनोति सोमम्। निररत्नौ मघवा त.न्दधाति- ब्रह्मद्विषो ह.न्त्यनानुदिष्टः।। 4।।

卐 अश्वायन्तो गव्यन्तो वाजयन्तो- हवामहे त्वोपगन्तवा उ। आभूषन्त.स्ते सुमतौ नवायाँ- वय.मिन्द्र त्वा शुनं हुवेम।। 5।।

卐 मुञ्चामि त्वा हविषा जीवनाय क- मज्ञातयक्ष्मा. दुत राजयक्ष्मात्। ग्राहि. र्जग्राह यद्येत.देन- न्तस्या^ इन्द्राग्नी~ प्र मुमुक्त.मेनम्।। 6।।

卐 यदि क्षितायु. र्यदि वा परेतो- यदि मृत्यो. रन्तिक.न्नीत^ एव। त.मा हरामि निर्ऋते.रुपस्था-दस्पार्.श.मेनं शतशारदाय।। 7।।

卐 सहस्राक्षेण शतवीर्येण शताऽऽयुषा- हविषाऽहार्.ष.मेनम्। इन्द्रो यथैनं शरदो नया-त्यति विश्वस्य दुरितस्य पारम्।। 8।।

卐 शत.ञ्जीव शरदो वर्धमान- श्शतं हेमन्ता.न्छत.मु वसन्तान्। शत.न्त इन्द्रो अग्नि. स्सविता बृहस्पति- श्शताऽऽयुषा हविषाऽहार्.ष.मेनम्।। 9।।

卐 आऽहार्.ष. मविद.न्त्वा- पुन.राऽगा४ पुनर्णवः। सर्वाङ्ग सर्वन्ते चक्षु- स्सर्व.मायुश्च तेऽविदम्।। 10।।

卐 ब्रह्मणाऽग्नि. स्सँविदानो- रक्षोहा बाधता.मितः। अमीवा यस्ते गर्भ- न्दुर्णामा योनि.माशये।। 11।।

卐 यस्ते गर्भ.ममीवा- दुर्णामा योनि. माशये। अग्निष्टं ब्रह्मणा सह-
निष्क्रव्याद. मनीनशत्।। 12।।

卐 यस्ते हन्ति पतयन्त- न्निषत्स्नुं यस्सरीसृपम्। जातँ यस्ते जिघांसति-
त.मितो नाशयामसि।। 13।।

卐 यस्त ऊरू~ विहर-त्यन्तरा दम्पती~ शये। योनिँ यो अन्त.रारेळ्हि-
त.मितो नाशयामसि।। 14।।

卐 यस्त्वा भ्राता पति.र्भूत्वा- जारो भूत्वा निपद्यते। प्रजाँ यस्ते जिघांसति-
त.मितो नाशयामसि।। 15।।

卐 यस्त्वा स्वप्नेन तमसा- मोहयित्वा निपद्यते। प्रजाँ यस्ते जिघांसति-
त.मितो नाशयामसि।। 16।।

卐 अक्षीभ्या.न्ते नासिकाभ्या-ङ्कर्णाभ्या.ञ्छुबुका.दधि। यक्ष्मं शीर्षण्यं
मस्तिष्का- ज्जिह्वाया^ वि वृहामि ते।। 17।।

卐 ग्रीवाभ्य.स्त उष्णिहाभ्य्ः- कीकसाभ्यो अनूक्यात्। यक्ष्म.
न्दोषण्य1(अ) मंसाभ्यां- बाहुभ्याँ वि वृहामि ते।। 18।।

卐 हृदया.त्ते परि क्लोम्नो- हलीक्ष्णा.त्पार्श्वाभ्याम्। यक्ष्मं मतस्नाभ्यां प्लीह्नो-
यक्नस्ते वि वृहामसि।। 19।।

卐 आन्त्रेभ्य.स्ते गुदाभ्यो- वनिष्ठो रुदरा.दधि। यक्ष्म.ङ्कुक्षिभ्यां प्लाशो- र्नाभ्याँ वि वृहामि ते।। 20।।

卐 ऊरुभ्या.न्ते अष्ठीवद्भ्यां- पार्ष्णिभ्यां प्रपदाभ्याम्। यक्ष्मं भसद्य1(अं) श्रोणिभ्यां भासदं- भंससो वि वृहामि ते।। 21।।

卐 (-) अस्थिभ्यस्ते मज्जभ्य- स्स्नावभ्यो धमनिभ्यः। यक्ष्मं पाणिभ्या. मङ्गुलिभ्यो- नखेभ्यो वि वृहामि ते।। 22।।

卐 [-] अङ्गेअङ्गे लोम्निलोम्नि- य.स्ते पर्वणिपर्वणि। यक्ष्म.न्त्वचस्य.न्ते वय- ङ्कश्यपस्य वीबर्हेण- विष्वञ्चँ वि वृहामसि।। 23।।

卐 अपेहि मनसस्पते-ऽप काम परश्चर। परो निर्ऋत्या^ आ चक्ष्व- बहुधा जीवतो मनः।। 24।।

## विंश काण्डे नवमानुवाकः

(विंश काण्डे नवमानुवाके पूर्वार्धम्)

20-09-01

卐 वय. मेन.मिदा ह्यो-ऽपीपेमेह वज्रिणम्। तस्मा उ अद्य समना सुतं भरा- ?ऽऽ नूनं भूषत श्रुते।। 1।।

卐 वृकं.श्चि.दस्य वारण^- उरामथि.रा वयुनेषु भूषति। सेमन्न.स्स्तोम.ञ्जुजुषाण^ आ ग-हीन्द्र प्र चित्रया धिया।। 2।।

卐 कदू न्व1(अ)स्याकृत-मिन्द्रस्याऽस्ति पौंस्यम्। केनो~ नु कं श्रोमतेन न शुश्रुवे- जनुषः परि वृत्रहा।। 3।।-

20-09-02

卐 त्वामिद्धि हवामहे- साता वाजस्य कारवः। त्वाँ वृत्रेष्विन्द्र सत्पति-न्नर.स्त्वा.ङ्काष्ठा.स्वर्वतः।। 1।।

卐 स^ त्वन्न.श्चित्र वज्रहस्त धृष्णुया- मह स्तवानो अद्रिवः। गा.मश्वं रथ्य.मिन्द्र सङ्किर- सत्रा वाज.न्न जिग्युषे।। 2।।-

20-09-03

卐 अभि त्वा पूर्वपीतय- इन्द्र स्तोमेभि.रायवः। समीचीनास^ ऋभव स्समस्वर- न्रुद्रा^ गृणन्त पूर्व्यम्।। 1।।

卐 अस्ये.दिन्द्रो वावृधे वृष्ण्यं शवो- मदे सुतस्य विष्णवि। अद्या तमस्य महिमान मायवो-ऽनुष्टुवन्ति पूर्वथा।। 2।।-

20-09-04

卐 अधा॒ ह्रीन्द्र गिर्वण॒- उप॑ त्वा॒ कामा॑न्मह॒ स्ससृ॒ज्महे। उ॒दे॒व यन्त॑ उ॒द्भिः।। 1।।

卐 वार्ण त्वा॑ य॒व्याभि॒-र्वर्धन्ति शू॒र ब्रह्मा॑णि। वा॒वृ॒ध्वांस.श्चि.द्द्रिवो दि॒वेदि॑वे।। 2।।

卐 यु॒ञ्जन्ति॒ हरी॑ इषि॒रस्य॒ गाथ॑-यो॒रौ रथ॑ उ॒रुयु॑गे। इ॒न्द्र॒वाहा॑ वचो॒युजा।। 3।।-

20-09-05

卐 अ॒ग्नि.न्दू॒तं वृ॑णीमहे॒- होता॑रँ वि॒श्ववे॑दसम्। अ॒स्य य॒ज्ञस्य सु॒क्रतुम्।। 1।।

卐 अ॒ग्नि.म॑ग्निं॒ हवी॑मभि॒- स्सदा॑ हवन्त वि॒श्पति॑म्। ह॒व्य॒वाह॑ं पुरुप्रि॒यम्।। 2।।

卐 अग्ने॑ दे॒वा इ॒हा व॑ह- जज्ञा॒नो वृ॒क्तब॑र्हिषे। असि॒ होता॑ न॒ ईड्य॑ः।। 3।।-

20-09-06

卐 ई॒ळेन्यो॑ नम॒स्य॑-स्ति॒र. स्तमां॑सि दर्श॒तः। सम॒ग्नि.रि॑ध्यते॒ वृषा॑।। 1।।

卐 वृषो अग्नि. स्समिध्यते-ऽश्वो न देववाहनः। तं हविष्मन्त^ ईळते।। 2।।

卐 वृषण.न्त्वा वयँ वृष- न्वृषण. स्समिधीमहि। अग्ने दीद्यतं बृहत्।। 3।।-

20-09-07

卐 अग्नि.मीळिष्वाऽवसे - गाथाभि. श्शीरशोचिषम्। अग्निं राये पुरुमीळ्ह श्रुत. न्नरो-ऽग्निं सुदीतये छर्दिः।। 1।।

卐 अग्न आ याह्यग्निभि- र्होतार.न्त्वा वृणीमहे। आ त्वा.मनक्तु प्रयता हविष्मती- यजिष्ठं बर्हि.रासदे।। 2।।

卐 अच्छा हि त्वा सहस.स्सूनो अङ्गिर-स्स्रुच.श्चर.न्त्यध्वरे। ऊर्जो नपात.ङ्घृतकेश. मीमहे-ऽग्निँ यज्ञेषु पूर्व्यम्।। 3।।-

20-09-08

卐 इमा^ उ त्वा पुरूवसो~- गिरो वर्धन्तु या मम। पावकवर्णा. श्शुचयो विपश्चितो-ऽभि स्तोमै. रनूषत।। 1।।

卐 अयं सहस्र.मृषिभि. स्सहस्कृत- स्समुद्र^ इव पप्रथे। सत्य.स्सो अस्य महिमा गृणे शवो- यज्ञेषु विप्रराज्ये।। 2।।

Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 आ नो॒ विश्वा᳚सु॒ हव्य॒^- इन्द्र॑. स्स॒मत्सु॑ भूषतु। उप॒ ब्रह्मा᳚णि॒ सव॑नानि

वृ॒त्रहा- प॑रम॒ज्या^ ऋची᳚षमः।। 3।।

卐 त्व.न्दा॒ता प्र॑थ॒मो राध॑सा॒म-स्यसि॑ स॒त्य^ ई᳚शान॒कृत्। तु॒वि॒द्यु॒म्नस्य॒ युज्या

वृ॑णीमहे- पु॒त्रस्य॒ शव॑सो म॒हः।। 4।।-

20-09-09

卐 त्वमि᳚न्द्र॒ प्रतू᳚र्ति.-ष्व॒भि विश्वा᳚^ असि॒ स्पृध॑ः। अ॒श॒स्ति॒हा ज॑नि॒ता

वि॑श्व॒तू.र॑सि॒- त्वन्तू᳚र्य तरुष्य॒तः।। 1।।

卐 अनु॑ ते॒ शुष्म᳚.न्तु॒रय᳚न्त. मीयतुः ~- क्षो॒णी शिशु॒.न्न मा॒तरा᳚। विश्वा᳚.स्ते॒

स्पृध॑. श्श्नथयन्त म॒न्यवे᳚- वृत्रँ यदि᳚न्द्र॒ तूर्व॑सि।। 2।।

卐 इ॒त^ ऊ॒ती वो᳚ अ॒जर᳚- प्रहे॒ता॒र. मप्र॑हितम्। आ॒शु.ञ्जेता᳚रं॒ हेता᳚रं र॒थीत॑म॒-

मतू᳚र्त. न्तु॒ग्र्या॒वृ᳚धम्।। 3।।

卐 यो राजा᳚ चर्.षणी॒नाँ- याता॒ रथे᳚भि॒. रध्रि॑गुः। विश्वा᳚सा. न्तरु॒ता पृत॑नाना॒-

ज्ज्येष्ठो॒ यो वृ॑त्र॒हा गृणे।। 4।।

卐 इन्द्र॒.न्तं शु᳚म्भ पुरुहन्म॒.न्नव॑से॒ - यस्य॑ द्वि॒ता वि॑ध॒र्तरि॑। हस्ता॑य॒ वज्र॒ः

प्रति॑ धायि द॒र्.श॒तो- म॒हो दि॒वे न सूर्य॑ः।। 5।।-

20-09-10

卐 तव त्य.दिन्द्रियं बृह- त्तव शुष्म.मुत क्रतुम्। वज्रं शिशाति धिषणा वरेण्यम्।।

卐 तव द्यौ.रिन्द्र पौंस्यं-पृथिवी वर्धति श्रवः। त्वा.मापः पर्वतासश्च हिन्विरे।। 2।।

卐 त्वाँ विष्णु.र्बृह.न्क्षयो- मित्रो गृणाति वरुणः। त्वां शर्धो मद.त्यनु मारुतम्।। 3।।-

20-09-11

卐 समस्य मन्यवे विशो- विश्वा नमन्त कृष्टयः। समुद्रायेव सिन्धवः।। 1।।

卐 ओज.स्तदस्य तित्विष- उभे~ यत्समवर्तयत्। इन्द्र.श्चर्मेव रोदसी~।। 2।।

卐 वि चि.द्वृत्रस्य दोधतो- वज्रेण शतपर्वणा। शिरो बिभेद वृष्णिना।। 3।।

卐 तदिदास भुवनेषु ज्येष्ठँ- यतो जज्ञ उग्र.स्त्वेषनृम्णः। सद्यो जज्ञानो नि रिणाति शत्रू- ननु यदेनं मदन्ति विश्व ऊमाः।। 4।।

卐 वावृधान. श्शवसा भूर्योजा.- श्शत्रुर्दासाय भियस. न्दधाति। अव्यनच्च व्यनच्च सस्नि- सन्ते नवन्त प्रभृता मदेषु।। 5।।

卐 त्वे~ क्रतु.मपि पृञ्चन्ति भूरि- द्वि.र्यदेते त्रि.र्भव.न्त्यूमाः। स्वादो.स्स्वादीय. स्स्वादुना सृजा- समद. स्सु मधु मधुनाऽभि योधीः।। 6।।

卐 यदि चिन्नु त्वा धना जयन्तं- रणेरणे अनुमदन्ति विप्राः। ओजीय.श्शुष्मि'2'न्त्स्थिर.मा तनुष्व- मा त्वा दभ. न्दुरेवासः॰ कशोकाः।। 7।।

卐 त्वया वयं शाशद्महे रणेषु- प्रपश्यन्तो युधेन्यानि भूरि। चोदयामि त आयुधा वचोभि- स्स.न्ते शिशामि ब्रह्मणा वयांसि।। 8।।

卐 नि तद्दधिषेऽवरे परे च- यस्मि. न्नाविथाऽवसा दुरोणे। आ स्थापयत मातर.ञ्जिगत्नु-मत^ इन्वत कर्वराणि भूरि।। 9।।

卐 स्तुष्व वर्ष्म.न्पुरुवर्त्मानं समृभ्वाण- मिनतम. माप्त. माप्त्यानाम्। आ दर्शति शवसा भूर्योजाः- प्र सक्षति प्रतिमानं पृथिव्याः।। 10।।

卐 इमा ब्रह्म बृहद्दिवः कृणव- दिन्द्राय शूष.मग्रिय. स्स्वर्षाः। महो गोत्रस्य क्षयति स्वराजा- तुरश्चि. द्विश्व. मर्णव.त्तपस्वान्।। 11।।

卐 एवा महा. न्बृहद्दिवो अथर्वा-ऽवोच.त्स्वा. न्तन्व1(अ)मिन्द्र.मेव। स्वसारौ मातरिभ्वरी~ अरिप्रे~- हिन्वन्ति चैने~ शवसा वर्धयन्ति च।। 12।।

卐 चित्र. न्देवाना.ङ्केतु.रनीक-ञ्ज्योतिष्मा. न्प्रदिश. स्सूर्य^ उद्यन्न्।
दिवाकरोऽति द्युम्नै. स्तमांसि- विश्वाऽतारी. दुरितानि शुक्रः।। 13।।

卐 चित्र.न्देवाना. मुद्गा.दनीक- ञ्चक्षु.र्मित्रस्य वरुणस्याऽग्नेः। आऽप्रा^
द्यावापृथिवी~ अन्तरिक्षं- सूर्य^ आत्मा जगत.स्तस्थुषश्च।। 14।।

卐 सूर्यो देवी. मुषसं रोचमानां मर्यो- न योषा. मभ्येति पश्चात्। यत्रा नरो
देवयन्तो युगानि- वितन्वते प्रति भद्राय भद्रम्।। 15।।-

20-09-12

卐 त्वन्न^ इन्द्राऽऽभरँ~- ओजो नृम्णं शतक्रतो~ विचर्षणे। आ वीरं
पृतनाषहम्।।

卐 त्वं हि नः पिता वसो~ त्वं माता शतक्रतो~ बभूविथ। अधा ते
सुम्न.मीमहे।। 2।।

卐 त्वां शुष्मि.न्पुरुहूत- वाजयन्त. मुप ब्रुवे शतक्रतो~। स^ नो रास्व
सुवीर्यम्।। 3।।-

20-09-13

卐 स्वादो.रित्था विषूवतो- मध्वः पिबन्ति गौर्यः। या^ इन्द्रेण सयावरी-
र्वृष्णा मदन्ति शोभसे- वस्वी.रनु स्वराज्यम्।। 1।।

卐 ता^ अस्य पृशनायुव- स्सोमं श्रीणन्ति पृश्नयः। प्रिया^ इन्द्रस्य धेनवो- वज्रं हिन्वन्ति सायकँ- वस्वी.रनु स्वराज्यम्।। 2।।

卐 ता^ अस्य नमसा सह- स्सपर्यन्ति प्रचेतसः। व्रता.न्यस्य सश्चिरे- पुरूणि पूर्वचित्तये- वस्वी.रनु स्वराज्यम्।। 3।।-

20-09-14

卐 इन्द्राय मद्वने सुतं- परि ष्टोभन्तु नो गिरः। अर्क.मर्चन्तु कारवः।। 1।।

卐 यस्मि.न्विश्वा^ अधि श्रियो- रणन्ति सप्त संसदः। इन्द्रं सुते हवामहे।। 2।।

卐 त्रिकद्रुकेषु चेतन- न्देवासो यज्ञ.मत्नत। तमि.द्वर्धन्तु नो गिरः। 3।।-

20-09-15

卐 यत्सोम.मिन्द्र विष्णवि- यद्वा घ त्रित आप्त्ये। यद्वा मरुत्सु मन्दसे- समिन्दुभिः।। 1।।

卐 यद्वा शक्र परावति- समुद्रे अधि मन्दसे। अस्माक.मित्सुते रणा- समिन्दुभिः।। 2

卐 यद्वाऽसि सुन्वतो वृधो- यजमानस्य सत्पते। उक्थे वा यस्य रण्यसि- समिन्दुभिः।। 3।।-

20-09-16

卐 यद्द्य कच्च वृत्रह- न्नुदगा^ अभि सूर्य। सर्व. न्तदिन्द्र ते वशे।। 1।।

卐 यद्वा प्रवृद्ध सत्पते- न मरा^ इति मन्यसे। उतो~ तत्सत्य. मित्तव।।

2।।

卐 ये सोमासः परावति- ये अर्वावति सुन्विरे। सर्वाँ स्ताः इन्द्र गच्छसि।। 3।।-

20-09-17

卐 उभयं श्रृणवच्च न^- इन्द्रो अर्वा.गिदँ वचः। सत्राच्या मघवा सोमपीतये- धिया शविष्ठ^ आ ऽगमत्।। 1।।

卐 तं हि स्वराजँ वृषभ. न्तमोजसे- धिषणे निष्टतक्षतुः। उतोपमानां प्रथमो नि षीदसि- सोमकामं हि ते मनः।। 2।।-

20-09-18

卐 अभ्रातृव्यो अना त्व-मनापि. रिन्द्र जनुषा सना.दसि। युधे.दापित्व. मिच्छसे।।

卐 नकी रेवन्तं सख्याय विन्दसे- पीयन्ति ते सुराश्वः। यदा कृणोषि नदनुं समूह-स्यादि.त्पितेव हूयसे।। 2।।-

卐 20-09-19

卐 अह.मिद्धि पितु.ष्परि- मेधा.मृतस्य जग्रभ। अहं सूर्य^ इवाऽजनि।।
1।।

卐 अहं प्रत्नेन मन्मना- गिर.श्शुम्भामि कण्ववत्। येनेन्द्र. श्शुष्म.मिद्दधे।।
2।।

卐 ये त्वा.मिन्द्र न तुष्टुवु-र्ऋषयो ये च तुष्टुवुः। ममे.द्वर्धस्व सुष्टुतः।। 3।।-

卐 20-09-20

卐 मा भूम निष्ट्याऽइ-वेन्द्र त्वदरणा^ इव। वनानि न प्रजहिता.न्यद्रिवो-
दुरोषासो अमन्महि।। 1।।

卐 अमन्मही.दनाशवो-ऽनुग्रासश्च वृत्रहन्न्। सकृत्सु ते महता शूर राधसा-
ऽनु स्तोमं मुदीमहि।। 2।।-

卐 20-09-21

卐 पिबा सोम.मिन्द्र मन्दतु त्वा- यन्ते सुषाव हर्यश्वाऽद्रिः। सोतु.र्बाहुभ्यां-
सुयतो नाऽर्वा।। 1।।

卐 यस्ते मदो युज.श्चारु रस्ति- येन वृत्राणि हर्यश्व हंसि। स^ त्वा.मिन्द्र
प्रभूवसो~ ममत्तु।। 2।।

卐 बोधा सु मे मघव.न्वाच.मेमाँ- यान्ते वसिष्ठो अर्चति प्रशास्तिम्। इमा ब्रह्म सधमादे जुषस्व।। 3।।-

20-09-22

卐 शग्ध्यू3(ऊ)षु शचीपत- इन्द्र विश्वाभि.रूतिभिः। भग.न्न हि त्वा यशसँ वसुविद- मनु शूर चरामसि।। 1।।

卐 पौरो अश्वस्य पुरुकृ.द्गवाम-स्युत्सो देव हिरण्ययः। नकिर्हि दानं परि.मर्धिष.त्त्वे~- यद्य.द्यामि त.दा भर।। 2।।

卐 इन्द्र.मि.द्देवतातय- इन्द्रं प्रयत्यध्वरे। इन्द्रं समीके वनिनो हवामह- इन्द्र. न्धनस्य सातये।। 3।।

卐 इन्द्रो मह्ना रोदसी~ पप्रथ.च्छव^- इन्द्र स्सूर्य. मरोचयत्। इन्द्रे ह विश्वा भुवनानि येमिर- इन्द्रे सुवानास^ इन्दवः।। 4।।-

20-09-23

卐 अस्तावि मन्म पूर्व्यं- ब्रह्मेन्द्राय वोचत। पूर्वी.र्ऋतस्य बृहती रनूषत- स्तोतु. र्मेधा^ असृक्षत।। 1।।

卐 तुरण्यवो मधुमन्त.ङ्घृतश्चुतँ- विप्रासो अर्क.मानृचुः। अस्मे~ रयिः पप्रथे वृष्ण्यं शवो-ऽस्मे~ सुवानास^ इन्दवः।। 2।।-

20-09-24

卐 यदिन्द्र प्रा.गपा.गुद-ङ्न्वा हूयसे नृभिः। सिमा पुरू नृषूतो अस्यानवे-
ऽसि प्रशर्ध तुर्वशे।। 1।।

卐 यद्वा रुमे रुशमे श्यावके कृप- इन्द्र मादयसे सचा। कण्वास.स्त्वा
ब्रह्मभि. स्स्तोमवाहस्- इन्द्राऽऽ यच्छ.न्त्या गहि।। 2।।-

20-09-25

卐 अभि त्वा शूर नोनुमो-ऽदुग्धा इव धेनवः। ईशान.मस्य जगत.
स्स्वर्दृश- मीशान.मिन्द्र तस्थुषः।। 1।।

卐 न त्वावाँ अन्यो दिव्यो न पार्थिवो- न जातो न जनिष्यते। अश्वायन्तो
मघव.न्निन्द्र वाजिनो- गव्यन्त.स्त्वा हवामहे।। 2।।-

20-09-26

卐 रेवती.र्न स्सधमाद- इन्द्रे सन्तु तुविवाजाः। क्षुमन्तो याभि.र्मदेम।।
1।।

卐 आ घ त्वावा.न्त्मनाऽऽप्त- स्स्तोतृभ्यो धृष्ण.वियानः। ऋणो.रक्ष.न्न
चक्र्योः।। 2।।

卐 आ य.द्दुवं श्शतक्रत- वा काम.ञ्जरितृणाम्। ऋणो.रक्ष.न्न शचीभिः।।
3।।-

20-09-27

卐 तत्सूर्यस्य देवत्व. न्तन्महित्वं- मध्या कर्तो. र्विततं सञ्जभार। यदे.दयुक्त
हरित. स्सधस्था- दाद्रात्री वास. स्तनुते सिमस्मै।। 1।।
卐 तन्मित्रस्य वरुणस्याऽभिचक्षे- सूर्यो रूप.ङ्कृणुते द्यो.रुपस्थे। अनन्त.
मन्य.द्रुश.दस्य पाजः- कृष्ण मन्य.द्धरित स्सं भरन्ति।। 2।।-

20-09-28

卐 कया न.श्चित्र^ आ भुव- दूती सदावृध. स्सखा। कया शचिष्ठया वृता।।
1।।
卐 क.स्त्वा सत्यो मदानां- मंहिष्ठो मत्सदन्धसः। दृळ्हा चि.दारुजे वसु।।
2।।
卐 अभी षु ण. स्सखीना- मविता जरितृणाम्। शतं भवा.स्यूतिभिः। 3।।
卐 इमा नु कं भुवना सीषधा-मेन्द्रश्च विश्वे च देवाः। यज्ञञ्च न.स्तन्वञ्च
प्रजा.ञ्चा-ऽऽदित्यै.रिन्द्र. स्सह चीक्लृपाति।। 4।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 आदित्यै.रिन्द्र. स्सगणो मरुद्धि- रस्माकं भूत्वविता तनूनाम्। हत्वाय देवा^ असुरा.न्यदाय- न्देवा^ देवत्व.मभिरक्षमाणाः।। 5।।

卐 प्रत्यञ्च.मर्क. मनय.न्छचीभि- रादि.त्स्वधा.मिषिरां पर्यपश्यन्न्। अया^ वाज. न्देवहितं सनेम- मदेम शतहिमा. स्सुवीराः।। 6।।-

20-09-29

卐 अपेन्द्र प्राचो मघव. न्नमित्रा- नपाऽपाचो अभिभूते नुदस्व। अपोदीचो अप शूराऽधराच^ उरौ- यथा तव शर्म.न्मदेम।। 1।।

卐 कुवि.दङ्ग यवमन्तो यवञ्चि-द्यथा दा.न्त्यनुपूर्वं वियूय। इहेहैषा.ङ्कृणुहि भोजनानि- ये बर्हिषो नमोवृक्ति.न्न जग्मुः।। 2।।

卐 नहि स्थू.र्यृतुथा यात.मस्ति- नोत श्रवो विविदे सङ्गमेषु। गव्यन्त इन्द्रं सख्याय विप्रा^- अश्वायन्तो वृषणं वाजयन्तः।। 3।।

卐 युवं सुराम. मश्विना- नमुचा.वासुरे सचा। विपिपाना शुभस्पती ~ इन्द्र.ङ्कर्म.स्वावतम्।। 4।।

卐 पुत्रमिव पितरा.वश्विनो-भेन्द्राऽवथुः काव्यैः. दंसनाभिः। यत्सुरामं व्यपिब. श्शचीभि- स्सरस्वती त्वा मघव.न्नभिष्णक्।। 5।।

卐 इन्द्र. स्सुत्रामा स्ववा॑ अवोभि- स्सुमृळीको भवतु विश्ववेदाः। बाधता. न्द्वेषो अभय.न्नः कृणोतु- सुवीर्यस्य पतय. स्स्याम।। 6।।

卐 स^ सुत्रामा स्ववा॑ इन्द्रो अस्म- दारा.च्चि.द्वेष. स्सनुत. र्युयोतु। तस्य वयं सुमतौ यज्ञियस्या-ऽपि भद्रे सौमनसे स्याम।। 7।।-

20-09-30

卐 वि हि सोतो. रसृक्षत- नेन्द्र. न्देव. ममंसत। यत्राऽमद.द्वृषाकपि- रर्यः पुष्टेषु मत्सखा- विश्वस्मा.दिन्द्र^ उत्तरः।। 1।।

卐 परा हीन्द्र धावसि- वृषाकपे. रति व्यथिः। नो~ अह प्र विन्द-स्यन्यत्र सोमपीतये- विश्वस्मा.दिन्द्र^ उत्तरः।। 2।।

卐 किमय.न्त्वाँ वृषाकपि- श्चकार हरितो मृगः। यस्मा इरस्यसीदु- न्व1(अ)र्यो वा पुष्टिम.द्वसु -विश्वस्मा.दिन्द्र^ उत्तरः।। 3।।

卐 यमिम. न्त्वँ वृषाकपिं- प्रिय.मिन्द्राऽभिरक्षसि। श्वा न्वस्य जम्भिष- दपि कर्णे वराहयु- र्विश्वस्मा.दिन्द्र^ उत्तरः।। 4।।

卐 प्रिया तष्टानि मे कपि- र्व्यक्ता व्यदूदुषत्। शिरो न्वस्य राविष-न्न सुग. न्दुष्कृते भुवँ- विश्वस्मा.दिन्द्र^ उत्तरः।। 5।।

卐 न मत्स्त्री सुभसत्तरा- न सुयाशुतरा भुवत्। न म.त्प्रतिच्यवीयसी- न सक्थ्युद्यमीयसी- विश्वस्मा.दिन्द्र^ उत्तरः।। 6।।

卐 उवे अम्ब सुलाभिके- यथेवाऽङ्ग भविष्यति। भस.न्मे अम्ब सक्थि मे- शिरो मे वीव हृष्यति- विश्वस्मा.दिन्द्र^ उत्तरः।। 7।।

卐 किं सुबाहो~ स्वङ्गुरे- पृथुष्टो पृथुजाघने। किं शूरपत्नि न.स्त्व- मभ्यमीषि वृषाकपिँ- विश्वस्मा.दिन्द्र^ उत्तरः।। 8।।

卐 अवीरा.मिव मामयं- शरारु.रभि मन्यते। उताऽह.मस्मि वीरि- णीन्द्रपत्नी मरुत्सखा- विश्वस्मा.दिन्द्र^ उत्तरः।। 9।।

卐 संहोत्रं स्म पुरा नारी- समनँ वाऽव गच्छति। वेधा^ ऋतस्य वीरि- णीन्द्रपत्नी महीयते- विश्वस्मा.दिन्द्र^ उत्तरः।। 10।।

卐 इन्द्राणी.मासु नारिषु- सुभगा. मह. मश्रवम्। नह्यस्या^ अपर.ञ्चन- जरसा मरते पति- र्विश्वस्मा.दिन्द्र^ उत्तरः।। 11।।

卐 नाह.मिन्द्राणि रारण- सख्यु. र्वृषाकपे.र्ऋते। यस्येद. मप्यं हविः- प्रिय. न्देवेषु गच्छति- विश्वस्मा.दिन्द्र^ उत्तरः।। 12।।

卐 वृषाकपायि रेवति- सुपुत्र आदु सुस्नुषे। घसत्त इन्द्र उक्षणः- प्रिय.ङ्काचित्करं हवि- र्विश्वस्मा.दिन्द्र^ उत्तरः।। 13।।



Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

卐 उक्ष्णो हि मे पञ्चदश- साकं पचन्ति विंशतिम्। उताऽह मद्मि पीव^ इ-
दुभा कुक्षी पृणन्ति मे- विश्वस्मा.दिन्द्र^ उत्तरः।। 14।।

卐 वृषभो न तिग्मश्रृङ्गो-ऽन्त.र्यूथेषु रोरुवत्। मन्थस्त इन्द्र शं हृदे- यन्ते सुनोति भावयु- र्विश्वस्मा.दिन्द्र^ उत्तरः।। 15।।

卐 न सेशे यस्य रम्बते-ऽन्तरा सक्थ्या3(आ) कपृत्। सेदीशे यस्य रोमश- न्निषेदुषो विजृम्भते- विश्वस्मा.दिन्द्र^ उत्तरः।। 16।।

卐 न सेशे यस्य रोमश- न्निषेदुषो विजृम्भते। सेदीशे यस्य रम्बते-ऽन्तरा सक्थ्या3(आ) कपृ-द्विश्वस्मा.दिन्द्र^ उत्तरः।। 17।।

卐 अय.मिन्द्र वृषाकपिः- परस्वन्तं हतँ विदत्। असिं सूना.न्नव.ञ्चरु- मादेधस्यान^ आचितँ- विश्वस्मा.दिन्द्र^ उत्तरः।। 18।।

卐 अय.मेमि विचाकश- द्विचिन्व. न्दास.मार्यम्। पिबामि पाकसुत्वनो-ऽभि धीर. मचाकशँ- विश्वस्मा.दिन्द्र^ उत्तरः।। 19।।

卐 धन्व च यत्कृन्तत्रञ्च- कति स्वि.त्ता वि योजना। नेदीयसो वृषाकपे- ऽस्त.मेहि गृहा॰ उप- विश्वस्मा.दिन्द्र^ उत्तरः।। 20।।

卐 पुनरेहि वृषाकपे- सुविता कल्पयावहै। य^ एष^ स्वप्ननंशनो- ऽस्त.मेषि पथा पुन- र्विश्वस्मा.दिन्द्र^ उत्तरः।। 21।।

卐 यदुदञ्चो वृषाकपे- गृह.मिन्द्राऽजगन्तन। क्व1(अ)स्य पुल्वघो मृगः- कमगं. न्जनयोपनो- विश्वस्मा.दिन्द्र^ उत्तरः।। 22।।

卐 पर्शुर्.ह नाम मानवी- साकं ससूव विंशतिम्। भद्रं भल त्यस्या अभू- द्यस्या^ उदर्.मामय- द्विश्वस्मा.दिन्द्र^ उत्तरः।। 23।।

कुन्ताप सूक्तानि (खिलभागः)

20-09-31

卐 इद.ञ्जना^ उप श्रुत- नराशंस. स्तविष्यते। षष्टिं सहस्रा नवतिञ्च कौरम- आ रुशमेषु दद्महे।। 1।।

卐 उष्ट्रा^ यस्य प्रवाहणो- वधूमन्तो द्वि.र्दश। वर्ष्मा रथस्य नि जिहीडते दिव^- ईषमाणा^ उपस्पृशः।। 2।।

卐 एष^ इषाय मामहे- शत.न्निष्का.न्दश स्रजः। त्रीणि शता.न्यर्वतां- सहस्रा दश गोनाम्।। 3।।

卐 वच्यस्व रेभ वच्यस्व- वृक्षे न पक्के शकुनः। नष्टे जिह्वा चर्चरीति- क्षुरो न भुरिजो.रिव।। 4।।

卐 प्र रेभासो मनीषा- वृषा गाव^ इवेरते। अमोतपुत्रका एषा- ममोत गा^इवाऽऽसते।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 प्र रेभ धीं भरस्व- गोविदँ वसुविदम्। देवत्रेमाँ वाचं श्रीणी-हीषु. र्नावी.रस्तारम्।।

卐 राज्ञो विश्वजनीनस्य- यो देवो मर्त्या॒ अति। वैश्वानरस्य सुष्टुति-मा सुनोता परिक्षितः।। 7।।

卐 परिच्छिन्नः ~ क्षेम. मकरो- त्तम आसन. माचरन्न्। कुलाय.ङ्कृण्व. न्कौरव्यः- पति र्वदति जायया।। 8।।

卐 कतर.त्त आ हराणि- दधि मन्थां परिश्रुतम्। जायाः पतिं वि पृच्छति-राष्ट्रे राज्ञः परिक्षितः।। 9।।

卐 अभीवस्वः प्र जिहीते- यवः पक्वः पथो बिलम्। जन.स्स^ भद्र.मेधति - राष्ट्रे राज्ञः परिक्षितः।। 10।।

卐 इन्द्रः कारु.मबूबुध- दुत्तिष्ठ वि चरा जनम्। ममे.दुग्रस्य चर्कृधि- सर्व^ इत्ते पृणा.दरिः।। 11।।

卐 इह गावः प्र जायध्व- मिहाऽश्वा^ इह पूरुषाः। इहो~ सहस्रदक्षिणो-ऽपि पूषा नि षीदति।। 12।।

卐 नेमा^ इन्द्र गावो रिष- न्मो~ आसा.ङ्गोपरीरिषत्। मासा. ममित्रयु. र्जन^ - इन्द्र मा स्तेन^ ईशत।। 13।।

卐 उप नो न रमसि- सूक्तेन वचसा वयं- भद्रेण वचसा वयम्। वना दधिध्वनो गिरो- न रिष्येम कदा चन।। 14।।-

20-09-32

卐 य.स्सभेयो विदथ्य- स्सुत्वा यज्वाथ पूरुषः। सूर्य.ञ्चामू रिशादस- स्त.द्देवाः प्रा.गकल्पयन्न्।। 1।।

卐 यो जाम्या अप्रथय- स्तद्य.त्सखाय. न्दुधूर्षति। ज्येष्ठो यदप्रचेता- स्तदाहु. रधरा.गिति।। 2।।

卐 यद्भद्रस्य पुरुषस्य- पुत्रो भवति दाधृषिः। तद्विप्रो अब्रवी.दु- त.द्गन्धर्वः काम्यँ वचः।। 3।।

卐 यश्च पणि. रघुजिष्ठ्यो- यश्च देवा अदाशुरिः। धीराणां शश्वता मह- न्तदपा.गिति शुश्रुम।। 4।।

卐 ये च देवा अयजन्ता-ऽथो ये च परादुदिः। सूर्यो दिव.मिव गत्वाय- मघवा नो वि रप्शते।। 5।।

卐 योऽनाक्ताक्षो अनभ्यक्तो- अमणिवो अहिरण्यवः। अब्रह्मा ब्रह्मणः पुत्र- स्तोता कल्पेषु संमिता।। 6।।

卐 य^ आक्ताक्ष. स्सुभ्यक्त- स्सुमणि. स्सुहिरण्यवः। सुब्रह्मा ब्रह्मणः पुत्र-स्तोता कल्पेषु संमिता।। 7।।

卐 अप्रपाणा च वेशन्ता- रेवाँ अप्रतिदिश्ययः। अयभ्या कन्या कल्याणी-तोता कल्पेषु संमिता।। 8।।

卐 सुप्रपाणा च वेशन्ता- रेवा.न्त्सुप्रतिदिश्ययः। सुयभ्या कन्या कल्याणी-तोता कल्पेषु संमिता।। 9।।

卐 परिवृक्ता च महिषी- स्वस्त्या च युधिङ्गमः। अनाशुर.श्चाऽयामी- तोता कल्पेषु संमिता।। 10।।

卐 वावाता च महिषी- स्वस्त्या च युधिङ्गमः। श्वाशुर.श्चाऽयामी- तोता कल्पेषु संमिता।। 11।।

卐 यदिन्द्राऽदो दाशराज्ञे- मानुषँ वि गाहथाः। विरूप. स्सर्वस्मा आसी-त्सह यक्षाय कल्पते।। 12।।

卐 त्वँ वृषाक्षुं मघव-न्नम्रं मर्याऽकरो रविः। त्वं रौहिणँ व्यास्यो- वि वृत्रस्याऽभिन.च्छिरः।। 13।।

卐 यः पर्वता.न्व्यदधा-द्यो अपो व्यगाहथाः। इन्द्रो यो वृत्रहा महा-न्तस्मा.दिन्द्र नमोऽस्तु ते।। 14।।

卐 पृष्ठ. न्धावन्तं हर्यो- रौच्चैश्श्रवस. मब्रुवन्न्। स्वस्त्यश्व जैत्रा-येन्द्र.मा वह सुस्रजम्।। 15।।

卐 ये त्वा श्वेता^ अजैश्रवसो- हार्यो युञ्जन्ति दक्षिणम्। पूर्वा नमस्य देवानां-बिभ्र.दिन्द्र महीयते।। 16।।

(ऐतश प्रलापाः)

20-09-33

卐 एता^ अश्वा^ आ प्लवन्ते।। 1।।

卐 प्रतीपं प्रातिसुत्वनम्।। 2।।

卐 तासा.मेका हरिक्किका।। 3।।

卐 हरिक्किके कि.मिच्छसि।। 4।।

卐 साधुं पुत्रं हिरण्ययम्।। 5।।

卐 क्वाहतं परास्यः।। 6।।

卐 यत्रामू.स्तिस्र. श्शिंशपाः।। 7।।

卐 परि त्रयः।। 8।।

卐 पृदाकवः।। 9।।

卐 श्रृङ्ग. न्धमन्त^ आसते।। 10।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

卐 अय॒.न्म॒हा ते॑ अर्वा॒हः।। 11।।

卐 स^ इच्छकं॒ सघा॑घते।। 12।।

卐 सघा॑घते॒ गोमी॒द्या गोग॑ती॒.रिति॑। 13।।

卐 पुमा॑ङ्कुस्तेनिमि॑च्छसि।। 14।।

卐 पल्प॑ बद्ध॒ वयो॒ इति॑।। 15।।

卐 बद्ध॑ वो॒ अघा॒ इति॑।। 16।।

卐 अजा॑गार॒ केवि॒का।। 17।।

卐 अश्व॑स्य॒ वारो॑ गोशपद्य॒के।। 18।।

卐 श्येनी॒पती॑ सा।। 19।।

卐 अ॒ना॒म॒योप॑जि॒ह्विका॑।। 20।।-

20-09-34

卐 को अ॑र्य बहु॒लिमा॒ इषू॑नि।। 1।।

卐 को असि॒ द्याः पय॑ः।। 2।।

卐 को अर्जु॑न्या॒ः पय॑ः।। 3।।

卐 कः का॒ष्ण्र्याः पय॑ः।। 4।।

卐 ए॒तं पृ॑च्छ कु॒हं पृ॑च्छ।। 5।।

卐 कुहाकं पक्कं पृच्छ।। 6।।

卐 यवानो यति स्वभिः कुभिः।। 7।।

卐 अकुप्यन्तः कुपायकुः।। 8।।

卐 आमणको मणत्सकः।। 9।।

卐 देवत्वप्रतिसूर्य।। 10।।

卐 एन.श्चिपङ्क्तिका हविः।। 11।।

卐 प्रदुद्रुदो मघाप्रति।। 12।।

卐 श्रृङ्ग उत्पन्न।। 13।।

卐 मा त्वाऽभिसखा नो विदन्न्।।

卐 वशायाः पुत्र. मायन्ति।। 15।।

卐 इरावेदु.मयन्दत।। 16।।

卐 अथो~ इय न्निय.न्निति।। 17।।

卐 अथो~ इयन्निति।। 18।।

卐 अथो~ श्वा अस्थिरो भवन्न्।। 19।।

卐 उयँ यकांश.लोकका।। 20।।-

20-09-35

卐 आमिनोनिति भद्यते।। 1।।

卐 तस्य अनु निभञ्जनम्।। 2।।

卐 वरुणो याति वस्वभिः।। 3।।

卐 शतँ वा भारती शवः।। 4।।

卐 शत.माश्वा हिरण्ययाः। शतं रथ्या हिरण्ययाः। शत.ङ्कुथा हिरण्ययाः। शत.न्निष्का हिरण्ययाः।। 5।।

卐 अहल कुश वर्तक।। 6।।

卐 शफेन इव ओहते।। 7।।

卐 आयवनेनती जनी।। 8।।

卐 वनिष्ठा नाव गृह्यन्ति।। 9।।

卐 इदं मह्यं मदू.रिति।। 10।।

卐 ते वृक्षा. स्सह तिष्ठति।। 11।।

卐 पाकबलिः।। 12।।

卐 शकबलिः।। 13।।

卐 अश्वत्थ खदिरो धवः।। 14।।

卐 अर.दुपरम।। 15।।



Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 शयो हत^ इव।। 16।।

卐 व्याप पूरुषः।। 17।।

卐 अदूहमित्यां पूषकम्।। 18।।

卐 अत्यर्धर्च परस्वतः।। 19।।

卐 दौव हस्तिनो दृती।। 20।।-

20-09-36

卐 आ.दलाबुक. मेककम्।। 1।।

卐 अलाबुक. न्निखातकम्।। 2।।

卐 कर्करिको निखातकः।। 3।।

卐 तद्वात^ उन्मथायति।। 4।।

卐 कुलाय.ङ्कृणवा.दिति।। 5।।

卐 उग्रँ वनिष. दाततम्।। 6।।

卐 न वनिष. दनाततम्।। 7।।

卐 क^ एषा.ङ्कर्करी लिखत्।। 8।।

卐 क^ एषा.न्दुन्दुभिं हनत्।। 9।।

卐 यदीयं हन.त्कथं हनत्।। 10।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore

卐 दे॒वी ह॑न॒.त्कुह॑नत्।। 11।।

卐 पर्या॒गारं॒ पुन॑ःपुनः।। 12।।

卐 त्रीण्यु॒ष्ट्रस्य॒ नामा॒नि।। 13।।

卐 हि॒र॒ण्य. मित्येके॒ अब्रवीत्।। 14।।

卐 द्वौ वा॒ ये शिशवः।। 15।।

卐 नील॑शिखण्ड॒वाह॑नः।। 16।।

प्रवह्लिकाः

20-09-37

卐 वित॑तौ किरणौ॒ द्वौ- ता.वा॒पिनष्टि॒ पूरु॑षः। न वै॒ कुमारि॒ तत्तथा॒- यथा॒ कुमारि॒ मन्य॑से।। 1।।

卐 मा॒तु.ष्टे कि॑रणौ॒ द्वौ- निवृ॑त्त॒ः पुरुषानृते। न वै॒ कुमारि॒ तत्तथा॒- यथा॒ कुमारि॒ मन्य॑से।। 2।।

卐 निगृ॑ह्य॒ कर्ण॑कौ॒ द्वौ- निरा॒यच्छसि॒ मध्य॑मे। न वै॒ कुमारि॒ तत्तथा॒- यथा॒ कुमारि॒ मन्य॑से।। 3।।

卐 उ॒त्ता॒नायै॒ शया॒नायै॒- तिष्ठ॒न्ती॒ वाऽव॑ गूहसि। न वै॒ कुमारि॒ तत्तथा॒- यथा॒ कुमारि॒ मन्य॑से।। 4।।

卐 श्लक्ष्णायां श्लक्ष्णिकायां- श्लक्ष्ण.मेवाऽव गूहसि। न वै कुमारि तत्तथा- यथा कुमारि मन्यसे।। 5।।

卐 अवश्लक्ष्ण.मिव भ्रंश- दन्त.लोम.मति ह्रदे। न वै कुमारि तत्तथा- यथा कुमारि मन्यसे।। 6।।-

प्रतिराध्याः

20-09-38

卐 इहेत्थ प्रा.गपा.गुद.गधरा - गराला.गुदभर्त्सथ।। 1।।

卐 इहेत्थ प्रा.गपा.गुद.गधरा- ग्वत्साः पुरुषन्त^ आसते।। 2।।

卐इहेत्थ प्रा.गपा.गुद.गधराक् - स्थालीपाको वि लीयते।। 3।।

卐इहेत्थ प्रा.गपा.गुद.गधराक् - स^ वै पृथु लीयते।। 4।।

卐 इहेत्थ प्रा.गपा.गुद.गधरा- गाष्टे लाहणि लीशाथी।। 5।।

卐 इहेत्थ प्रा.गपा.गुद.गधरा- गक्ष्लिली पुच्छिलीयते।। 6।।-

आजिज्ञासेन्याः

20-09-39

卐 भुगि.त्यभिगत. श्शलि- त्यपक्रान्तः फलि.^त्यभिष्ठितः। दुन्दुभि.माहननाभ्यां- जरित.रो था मो दैव।। 1।।

卐 कोशबिले रजनि ग्रन्थे- र्धान मुपानहि पादम्। उत्तमा.ञ्जनिमा.न्जन्या-नुत्तमा.ञ्जनी.न्वत्मन्यात्।। 2।।

卐 अलाबूनि पृषातका- न्यश्वत्थपलाशम्। पिपीलिकाऽवटश्वसो विद्यु.त्स्वापर्णशफो- गोशफो जरित-रो था मो दैव।। 3।।

卐 वीमे देवा^ अक्रंसता-ऽध्वर्यो~ क्षिप्रं प्रचर। सुसत्य.मिद्गवाम-स्यसि प्रखुदसि।। 4।।

卐 पत्नी यद्दश्यते- पत्नी यक्ष्यमाणा- जरित.रो था मो दैव।

卐 होता विष्टीमेन- जरित.रो था मो दैव।। 5।।

卐 आदित्या ह जरित- रङ्गिरोभ्यो दक्षिणा. मनयन्न्। तां ह जरितः प्रत्यायं-स्तामु ह जरितः प्रत्यायन्न्।।

卐 तां ह जरित.र्नः प्रत्यगृभ्णं-स्ता.मु ह जरित.र्नः प्रत्यगृभ्णः। अहा.नेतरस.न्नवि चेतनानि- यज्ञा.नेतरस.न्न पुरोगवामः।। 7।।

卐 उत श्वेत आशुपत्वा- उतो~ पद्याभि.र्यविष्ठः। उते.माशु मानं पिपर्ति।। 8।।

卐 आदित्या^ रुद्रा^ वसव.स्त्वेनु त- इदं राधः प्रति गृभ्णीह्यङ्गिरः। इदं राधो विभु प्रभु- इदं राधो बृह.त्पृथु।। 9।।

卐 देवा दद.त्वासुर- न्तद्वो अस्तु सुचेतनम्। युष्मा॑ अस्तु दिवेदिवे- प्रत्येव गृभायत।। 10।।

卐 त्व.मिन्द्र शर्मरिणा- हव्यं पारावतेभ्यः। विप्राय स्तुवते वसुवनिं- दुरश्रवसे वह।।

卐 त्व.मिन्द्र कपोताय- च्छिन्नपक्षाय वञ्चते। श्यामाकं पक्कं पीलु च- वा.रस्मा अकृणो.र्बहुः।। 12।।

卐 अरङ्गरो वावदीति- त्रेधा बद्धो वरत्रया। इरामह प्रशंस-त्यनिरा.मप सेधति।।-

आहनस्याः

20-09-40

卐 यदस्या॑ अंहुभेद्याः- कृधु स्थूल.मुपाऽतसत्। मुष्काविदस्या॑ एजतो- गोशफे~ शकुला.विव।। 1।।

卐 यदा स्थूलेन पससाणौ- मुष्का॑ उपाऽवधीत्। विष्वञ्चा.वस्या॑ वर्धत- स्सिकतास्वेव गर्दभौ।। 2।।

卐 यदल्पिका.स्वल्पिका- कर्कधूके.ऽवषद्यते। वासन्तिक.मिव तेजनं- य.न्त्यवाताय वित्पति।। 3।।

卐 यद्देवासो ललामगुं- प्रविष्टीमिन.माविषुः। सकुला देदिश्यते नारी-
सत्यस्याऽक्षिभुवो यथा।। 4।।

卐 महानग्न्यतृप्न-द्विमोक्रद्.दस्थानाऽसरन्न्। शक्तिकानना.स्वच-मशकं सक्तु
पद्यम।। 5।।

卐 महानग्न्युलूखल- मतिक्राम.न्त्यब्रवीत्। यथा तव वनस्पते- निरघ्नन्ति
तथैवेति।।

卐 महानग्न्युप ब्रूते- भ्रष्टोऽथाऽप्यभूभुवः। यथैव ते वनस्पते- पिप्पति
तथैवेति।। 7।।

卐 महानग्न्युप ब्रूते- भ्रष्टोऽथाऽप्यभूभुवः। यथा वयो विदाह्य- स्वर्गेन.
मवदह्यते।। 8।।

卐 महानग्न्युप ब्रूते- स्वसा.वेशितं पसः। इत्थं फलस्य वृक्षस्य- शूर्पे शूर्पं
भजेमहि।। 9।।

卐 महानग्नी कृकवाकं- शम्यया परि धावति। अय.न्न विद्म यो मृग-
श्शीर्ष्णा हरति धाणिकाम्।। 10।।

卐 महानग्नी महानग्नं- धावन्त. मनु धावति। इमा. स्तदस्य गा^ रक्ष- यभ
मा.मद्ध्योदनम्।। 11।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 सुदेव.स्त्वा महानग्नी-र्बबाधते महत. स्साधु खोदनम्। कुसं पीवरो नवत्।।

卐 वशा दग्धा.मिमाङ्गुरिं- प्रसृजतोग्रतं परे। महान्वै भद्रो- यभ. मा.मद्ध्योदनम्।। 13।।

卐 विदेवस्त्वा महानग्नी-र्विबाधते महत.स्साधु खोदनम्। कुमारिका पिङ्गलिका- कार्द भस्मा कु धावति।। 14।।

卐 महा.न्वै भद्रो बिल्वो- महा.न्भद्र^ उदुम्बरः। महा९ अभिक्त बाधते- महत. स्साधु खोदनम्।। 15।।

卐 यः कुमारी पिङ्गलिका- वसन्तं पीवरी लभेत्। तैलकुण्ड.मिमाङ्गुष्ठं- रोदन्तं शुद. मुद्धरेत्।। इति कुन्ताप सूक्तानि।

(विंश काण्डे नवमानुवाके द्वितीयार्धम्)

20-09-41

卐 यद्ध प्राची. रजग-न्तोरो मण्डूरधाणिकीः। हता^ इन्द्रस्य शत्रव- स्सर्वे बुद्बुदयाशवः।। 1।।

卐 कपृन्नरः कपृथ. मुद्दधातन- चोदयत खुदत वाजसातये। निष्टिग्र्यः पुत्र.मा च्यावयोतय- इन्द्रं सबाध^ इह सोमपीतये।। 2।।

卐 दधिक्राव्णो अकारिष-ञ्जिष्णो. रश्वस्य वाजिनः। सुरभि नो मुखा कर-त्प्र ण^ आयूंषि तारिषत्।। 3।।

卐 सुतासो मधुमत्तमा- स्सोमा^ इन्द्राय मन्दिनः। पवित्रवन्तो अक्षर-न्देवा.न्गच्छन्तु वो मदाः।। 4।।

卐 इन्दु.रिन्द्राय पवत- इति देवासो अब्रुवन्न्। वाचस्पति. र्मखस्यते- विश्वस्येशान^ ओजसा।। 5।।

卐 सहस्त्रधारः पवते- समुद्रो वाच.मीङ्खयः। सोमः पती रयीणां- सखेन्द्रस्य दिवेदिवे।। 6।।

卐 अव द्रप्सो अंशुमती. मतिष्ठ- दियानः कृष्णो दशभि. स्सहस्त्रैः। आवत्त. मिन्द्र. श्शाच्या धमन्त- मपस्नेहिती.र्नृमणा^ अधत्त।। 7।।

卐 द्रप्स.मपश्यँ विषुणे चरन्त- मुपह्वरे नद्यो अंशुमत्याः। नभो न कृष्ण. मवतस्थिवांस- मिष्यामि वो वृषणो युध्यताऽजौ।। 8।।

卐 अध द्रप्सो अंशुमत्या^ उपस्थे-ऽधारय.त्तन्व. न्तित्विषाणः। विशो अदेवी. रभ्या3(आ)चरन्ती- र्बृहस्पतिना युजेन्द्र. स्ससाहे।। 9।।

卐 त्वं ह त्य.त्सप्तभ्यो जायमानो-ऽशत्रुभ्यो अभव. श्शत्रुरिन्द्र। गूळ्हे द्यावापृथिवी~ अन्वविन्दो- विभुमद्भ्यो भुवनेभ्यो रण.न्धाः।। 10।।

卐 त्वं ह् त्य.द्प्रतिमान.मोजो- वज्रेण वज्रि.न्धृषितो जघन्थ। त्वं शुष्णस्याऽवाऽतिरो वधत्रै- स्त्व.ङ्गा^ इन्द्र शच्ये.दविन्दः।। 11।।

卐 त.मिन्द्रँ वाजयामसि- महे वृत्राय हन्तवे। स^ वृषा वृषभो भुवत्।। 12।।

卐 इन्द्र.स्स^ दामने कृत^- ओजिष्ठ.स्स^ मदे हितः। द्युम्नी श्लोकी स^ सोम्यः।। 13।।

卐 गिरा वज्रो न सम्भृत- स्सबलो अनपच्युतः। ववक्ष ऋष्वो अस्तृतः।। 14।।-

20-09-42

卐 महा॰ इन्द्रो य^ ओजसा- पर्जन्यो वृष्टिमा॰ इव। स्तोमै. र्वत्सस्य वावृधे।। 1।

卐 प्रजा.मृतस्य पिप्रत॰- प्र यद्भरन्त वह्नयः। विप्रा^ ऋतस्य वाहसा।। 2।।

卐 कण्वा^ इन्द्रँ यदक्रत- स्तोमै.र्यज्ञस्य साधनम्। जामि ब्रुवत आयुधम्।। 3।।-

20-09-43

卐 आ नूनमश्विना युवं वत्सस्य गन्तमवसे। प्रास्मै यच्छतमवृकं पृथु च्छर्दिर्युयुतं या अरातयः।। 1।।

卐 यदन्तरिक्षे यद्दिवि यत्पञ्च मानुषाँ अनु। नृम्णं तद्धत्तमश्विना।। 2।।

卐 ये वां दंसांस्यश्विना विप्रासः परिमामृशुः। एवेत्काण्वस्य बोधतम्।। 3।।

卐 अयं वां घर्मो अश्विना स्तोमेन परि षिच्यते। अयं सोमो मधुमान् वाजिनीवसू येन वृत्रं चिकेतथः।। 4।।

卐 यदप्सु यद्वनस्पतौ यदोषधीषु पुरुदंससा कृतम्। तेन माविष्टमश्विना।। 5।।

20-09-44

卐 यन्नासत्या भुरण्यथो यद्वा देव भिषज्यथः। अयं वां वत्सो मतिभिर्न विन्धते हविष्मन्तं हि गच्छथः।। 1।।

卐 आ नूनमश्विनोर्ऋषिः स्तोमं चिकेत वामया। आ सोमं मधुमत्तमं घर्मं सिञ्चादथर्वणि।। 2।।

卐 आ नूनं रघुवर्तनिं- रथ. न्तिष्ठाथो अश्विना। आ वां स्तोमा^ इमे मम- नभो न चुच्च्यवीरत।। 3।।

卐 यदद्य वा.न्नास-त्योक्थै. राचुच्युवीमहि। यद्वा वाणीभि.रश्वि.- नेवे.त्काण्वस्य बोधतम्।। 4।।

卐 यद्वा.ङ्कक्षीवा॰ उत यद्व्यश्व^ ऋषि- र्यद्वा न्दीर्घतमा^ जुहाव। पृथी यद्वाँ वैन्य. स्सादने-ष्वेवे.दतो अश्विना चेतयेथाम्।। 5।।-

20-09-45

卐 यात.ञ्छर्दिष्पा उत नः परस्पा- भूत.ञ्जगत्पा उत न.स्तनूपा। वर्ति.स्तोकाय तनयाय यातम्।। 1।।

卐 यदिन्द्रेण सरथँ याथो अश्विना- यद्वा वायुना भवथ. स्समोकसा। यदादित्येभि.र्ऋभुभि. स्सजोषसा- यद्वा विष्णो.र्विक्रमणेषु तिष्ठथः।। 2।।

卐 यदद्याऽश्विना.वहं- हुवेय वाजसातये। यत्पृत्सु तुर्वणे सह- स्तच्छ्रेष्ठ. मश्विनो.रवः।।

卐 आ नूनँ यात मश्वि-नेमा हव्यानि वां हिता। इमे सोमासो अधि तुर्वशे यदा-विमे कण्वेषु वा.मथ।। 4।।

卐 यन्नासत्या पराके- अर्वाके अस्ति भेषजम्। तेन नूनँ विमदाय प्रचेतसा-छर्दि. र्वत्साय यच्छतम्।। 5।।-

☸ 20-09-46

卐 अभुत्स्यु प्र देव्या- साकँ वाचाऽह. मश्विनोः। व्याव.र्देव्या मतिँ- वि रातिं मर्त्येभ्यः।। 1।।

卐 प्र बोधयोषो अश्विना- प्र देवि सूनृते महि। प्र यज्ञ होत रानुष-क्प्र मदाय श्रवो बृहत्।।।

卐 यदुषो यासि भानुना- सं सूर्येण रोचसे। आ हाऽय मश्विनो रथो-वर्ति.र्याति नृपाय्यम्।। 3।।

卐 यदापीतासो अंशवो- गावो न दुह्र ऊधभिः। यद्वा वाणी. रनूषत- प्र देवयन्तो अश्विना।। 4।।

卐 प्रद्युम्नाय प्र शवसे- प्र नृषाह्याय शर्मणे। प्र दक्षाय प्रचेतसा।। 5।।

卐 यन्नून. न्धीभि. रश्विना- पितु.र्योना निषीदथः। यद्वा सुम्नेभि.रुक्थ्या।। 6।।-

☸ 20-09-47

卐 तँ वां रथँ वय.मद्या हुवेम- पृथुज्रय.मश्विना सङ्गति.ङ्गोः। य.स्सूर्याँ वहति वन्धुरायु- र्गिर्वाहसं पुरुतमँ वसूयुम्।। 1।।

卐 युवं श्रिय.मश्विना देवता ता-न्दिवो नपाता वनथ. श्शचीभिः। युवो र्वपु.रभि पृक्ष. स्सचन्ते- वहन्ति यत्ककुहासो रथे वाम्।। 2।।

卐 को वा.मद्या करते रातहव्य^- ऊतये वा सुतपेयाय वाऽर्कैः। ऋतस्य वा वनुषे पूर्व्याय- नमो येमानो अश्विनाऽऽ ववर्तत्।।।

卐 हिरण्ययेन पुरुभू^ रथे-नेमँ यज्ञ. न्नासत्योप यातम्। पिबाथ^ इन्मधुन. स्सोम्यस्य- दधथो रत्नँ विधते जनाय।। 4।।

卐 आ नो यात. न्दिवो अच्छा पृथिव्या^- हिरण्ययेन सुवृता रथेन। मा वा.मन्ये नि यम. न्देवयन्त- स्सँ यद्ददे नाभिः पूर्व्या वाम्।। 5।।

卐 नू नो रयिं पुरुवीरं बृहन्त- न्दस्रा मिमाथा.मुभये.ष्वस्मे~। नरो यद्वा.मश्विना स्तोम.माव-न्त्सधस्तुति. माजमीऴ्हासो अग्मन्न्।।।

卐 इहेह यद्वां समना पपृक्षे- सेय.मस्मे~ सुमति. र्वाजरत्ना। उरुष्यत.ञ्जरितारँ युवं ह- श्रितः कामो नासत्या युवद्रिक्।। 7।।

卐 मधुमती. रोषधी.र्द्याव^ आपो- मधुमन्नो भव.त्वन्तरिक्षम्। क्षेत्रस्य पति. र्मधुमा.न्नो- अस्त्वरिष्यन्तो अन्वेन. ञ्चरेम।। 8।।

卐 प॒नाय्य॒. न्तद॑श्विना कृ॒तँ वाँ॑- वृष॒भो दि॒वो रज॑सः पृथि॒व्याः। स॒ह॒स्त्रं शंसा॑

उ॒त ये गवि॑ष्टौ॒- सर्वा॒॒ इ.त्ताँ उप॑ याता॒ पिब॑ध्यै।। 9।।

**इति अथर्ववेद् शौनक संहिता समाप्ता।**

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •